UNIVERSAL
LIBRARY
OU_184555
UNIVERSAL
LIBRARY

University of Mysore

Oriental Library Publications

SANSKRIT SERIES NO 74

श्रीव्यासतीर्थविरचितम्

तर्कताण्डवम्

श्रीराघवेन्द्रतीर्थकृतन्यायदीपाख्यव्याख्यासमलङ्कृतम्

प्रथमसम्पुटम्

TARKA TĀNDAVAM

OF

SRI VYĀSATĪRTHA

WITH

THE COMMENTARY, NYĀYADĪPA OF SRI RĀGHAVĒNDRATĪRTHA

Vol. I

EDITED BY

D. SRINIVASACHAR, M.A.

Professor of Sanskrit, Maharaja's College and Curator, Govt. Oriental Library, Mysore

AND

VIDWAN V. MADHWACHAR

Govt. Oriental Library, Mysore

MYSORE

PRINTED AT THE GOVERNMENT BRANCH PRESS

1932

मुखोपन्यासः.

व्यासत्रयनाम्ना प्रथितेषु चन्द्रिकान्यायामृततर्कताण्डवाख्येषु ग्रन्थेषु कृतविमर्शानां महोदयानां विचारचातुरी स्वसिद्धान्तवैखरी सुतत्त्वमाधुरी च सुगमतमा भवतीति नाविदितमुद्घोषयामो वयम् । त्रिष्वप्येषु तर्कताण्डवाख्योयं वादग्रन्थाधिसङ्ग्रहः, निगमोपकारकतया शिष्टपरिगृहीतासु तर्कशास्त्रपरम्परास्वागन्तुकानां, 'वेदाः केनचित् कृताः । न प्रमाणम् । अपि तु सहकारिमहिम्नैव प्रमाणम् । ईश्वरः परिमितगुणः । दुःखध्वंसो मोक्षः' इत्यादिमविषयान् निगममहिमापकर्षकान् प्रतिपादयतां प्रबन्धानां दूषणीयतां, निगमाविरोधाकूतानामादरणीयतां च युक्तयैव समर्पयति । यदस्य नाम्नि; तर्के ताण्डवं, तर्कस्य ताण्डवं, तर्केण ताण्डवमिति च त्रिधा विग्रहीतव्यमास्ते । तेन हि सप्तम्या अधःकारस्य, षष्ठ्या भावाविष्करणचेष्टाविशेषरूपताण्डवान्वयिनः सम्बन्धस्य, अनुमार्थकतर्कशब्देन युक्तेश्च, सुलभो लाभः ॥

कथमस्मिन्कल्पनावनपथे निःशङ्कसञ्चरणमादरश्चेति शङ्का परमवशिष्यते । तत्रैतद्व्याख्यानस्य दिशं प्रत्यङ्गुलिं प्रसारयामः । व्याख्यानस्यास्य, तात्पर्यचन्द्रिकायाः प्रकाशस्येव, सुधायाः परिमळस्येव च नर्तनोपकारकवस्तुनाम्ना न नामाभिहितम् । अपि तु मूलनाम्नोपि स्वनाम्नैव व्याचिख्यासया, शुष्कन्यायं दीपयति दहतीति, सन्न्यायं प्रकाशयतीति, न्यायेन युक्तया प्रकाशत इति च सुलभत्रिविवरणं न्यायदीपनामैव । नैतावदेव सन्ति च वाक्यानि । सम्पुटेस्मिन् द्वितीय-

पुटे चतुर्दशतमपङ्क्तेः "अत्र न्यायचिन्तापरे ग्रन्थे" इत्यारभ्य "ब्रह्मतन्त्रोक्तप्रमेयनिर्णयोपयुक्तप्रमाणन्यायचिन्तापरत्वात्तद्विषयादिनैवास्य विषयादिमत्ता" इति ; तृतीयपुटे नवमपङ्क्तौ "ताण्डवकरणस्य प्रसङ्गकं पूर्वरङ्गं निबध्नाति" इति च। द्वितीयपुटे उपयुक्तचिन्तापदाभ्यां ब्रह्मतन्त्रा-(वेदान्ता)नुकूलाननुकूलन्याययोर्युक्तायुक्तत्वविमर्शनस्य तृतीयपुटपङ्क्त्या नर्तनार्थविवक्षायाः, सर्वत्र युक्तयनुधावनस्य चावगमः सुलभः ॥

इदञ्चहिन्नोस्य ग्रन्थस्य प्रथमं सम्पुटमिदानीं प्रकाशयामः। तत्र प्रथमतः ग्रन्थं ग्रन्थकर्तारं चाधिकृत्य कञ्चन मुखोपन्यासमारचयेम ॥

आस्तामनन्तरं विपुला ग्रन्थविचारणा। कर्तुरपि विचारे सङ्कुचितैवास्मदीया प्रवृत्तिः। यतः प्राचीनः सोमनाथकविवरेण्यः व्यासविजयाख्यकाव्ये सुविशालमुपाश्लोकयत्। उपलभामहे च मुद्रितं काव्यमिदमिदानीम् ॥

सुविचारविचारणाविवेकशौण्डस्यास्य तर्कताण्डवस्य ; अपरेषां—
१. न्यामृतम्, २. तात्पर्यचन्द्रिका, ३. तत्त्वविवेकटीकामन्दारमञ्जरी, ४. उपाधिखण्डनटीकामन्दारमञ्जरी, ५ मायावादखण्डनटीकामन्दारमञ्जरी, ६. मिथ्यात्वानुमानखण्डनटीकामन्दारमञ्जरी, ७. भेदोज्जीवनम्, इत्येषामपि ग्रन्थानां ग्रथयितारः पदवाक्यप्रमाणज्ञाः संप्रदायार्थकोविदाः व्यासराजमुनयः। एभ्यः पारिव्राज्यप्रदातारः—

"कंसध्वंसिपदाम्भोज संसक्तो हंसपुङ्गवः।
ब्रह्मण्यगुरुराजाख्यो वर्ततां मम मानसे" ॥

इति तात्पर्यचन्द्रिकादावाद्दता ब्रह्मण्यतीर्थमुनिवरेण्याः। विद्यागुरवस्तु सर्वशास्त्रविशारदाः ज्ञानभक्तिवैराग्यादिगुणगुम्फिताः श्रीपादराजाः इति

विश्रुता लक्ष्मीनारायणमुनयः । इममप्यभिप्रयन्तिग्रन्थकारा एव न्यायामृते—

"ज्ञानवैराग्यभक्त्यादि कल्याणगुणशालिनः ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून् मम" ॥ इति ॥

एतेषामन्तेवासिन अनेके अवर्तन्त । तेषु चतुरधिकशतानां ग्रन्थानां निर्मातारो विजयीन्द्रसंयमीन्द्राः, गुर्वर्थदीपिकायुक्तिमल्लिकाद्यनेकग्रन्थकर्तारो वादिराजस्वामिनश्च सुप्रसिद्धाः ॥

क्रिस्तशकषोडशशतमाने भारतभूमिमिमे मूर्तितोप्यलमकुर्वन्निति शासनसंपादितो निर्णयः । "विजयनगराधीशकृष्णदेवराजेन गौरपुराभिदो ग्रामः व्यासराजस्वामिभ्यः नवचत्वारिंशदधिकचतुःशतोत्तरैकसहस्रतमे शकाब्दे दत्तः" इति हि शासने पठन्ति । गन्थैरेभिरखिलानुपकुर्वतामेषां विशेषतः सर्वे मध्वमतावलम्बिन अधमर्णा एव ॥

अयमपि तु कथासंग्रहः पण्डितरत्नबिरुदाङ्कितविद्वद्वरगौडगोरि वेङ्कटरमणार्यरचितचन्द्रिकाप्रकाशप्रसराख्यग्रन्थस्य भूमिकात उद्धृतः ॥

व्यासतीर्था एते गानशास्त्रे कर्णाटककविकर्माणि च सुकृतपरिचया इति एभिःकृतगानगाथापरिशीलनेन निश्चिनुमः । अत एषां शिष्यपरंपरे द्वे । गीर्वाणभाषया द्वैतसिद्धान्तप्रचारकाणामेका । कर्णाटकभाषया द्वैतसिद्धान्तप्रचारकाणामपरा । प्रथमपरंपरायां विजयीन्द्रादयः पण्डितप्रकाण्डा प्रथमपरिगणनाः । द्वितीयायां प्रसिद्धतमपुरन्दरदासादयः । यैः कृतगीतिकामेव सर्वे गानाभ्यासिनः प्रथममवलम्बन्ते । पुरंदरदासादयोपि नानधीतगीर्वाणप्रबन्धाः । अभ्यस्तवेदान्तशास्त्रा एव । परं

ततः प्रकृतग्रन्थमिममधिकृत्य विचारयिष्यामः । तर्कताण्डवस्येत्थं नामकरणे तदनुगुणत्वे च पूर्वमेव किंचिदलिखाम । इदानीमत्र प्रकरणविभाग, प्रतिपादनीयं, प्रतिपादनापरिपाटीं च निरूपणायार्न-ष्यामः ॥

विभागः—आदौ प्रत्यक्षपरिच्छेदः शब्दपरिच्छेदः अनुमान-परिच्छेदः इति त्रिधा परिच्छेदनाम्ना विभागः कृतः । ४८७ पुटे ७ पङ्क्तौ, ४९०–१२ पङ्क्तौ, ५०५–५ पङ्क्तौ च व्याख्याने प्रथमद्वि-तीयतृतीयशब्दैः परिच्छेदशब्दोत्तराण्येव नामानि व्यक्तीभवन्ति । ब्रह्म-तन्त्रानुरोधेन परिच्छेदचतुष्टयकरणं विहाय विभागत्रयकरणे हार्दं किंचिदस्ति । प्रमाणानि त्रीण्येवेति प्रदर्शयामेति । द्वितीयपुटे व्या-ख्यान एव सुव्यक्तमिदम् ॥

परिशीलितेस्मिन् ग्रन्थे प्रायो विष्णुतत्त्वनिर्णयस्य प्रमाण-निरूपणवाक्यानां नानाविवरणान्युपलभ्यन्ते । तत्र "सदागमैक" इति श्लोकेन हरिं स्तुत्वा तत्रोक्तविशेषणानां तत्कोटिप्रविष्टानां च समर्थनायोत्तरोद्योगः, परिच्छेदनाम्नैव विभागः, तेपि त्रय एव हि वर्तन्ते । अत्रापि प्रथमतः "स्वतःप्रमाणै" रिति श्लोकः, तत्र श्रीरमणविशेषणकोटिप्रविष्टानां समर्थनार्थारम्भश्च वर्तते । परिच्छेदत्रय-कृतिरपि तद्विभागकरणमनुरुणद्धीति वयमुत्प्रेक्षामहे । एतत्सम्पुटा-न्तिमग्रन्थपर्यालोचनया "स्वतः" इत्यादिश्लोकपूर्वार्धोक्तस्थापना-यैतावान्प्रबन्ध इति सुव्यक्तं भविष्यति । "तदेवं वर्णस्य गुणत्वे उक्तरीत्या ग्रहणासम्भवात् नित्यविभुद्रव्यात्मकवर्णसमुदायात्मकस्य वेदस्यापौरुषेयत्वं युक्तमिति" इति मूले । "**युक्तमिति । तथाचा-म्नायैरादिवर्जितैरित्युक्तं** साध्विति भावः" इति व्याख्यायां चास्ति ॥

परिच्छेदेष्वप्येष्वान्तराळिकान् षड्विभागान् तत्तद्विषयविवेचनानुगुणैर्वादशब्दोत्तरैर्नामभिरुपलभामहे । त इमे—

१. प्रामाण्यवादः
२. वेदापौरुषेयत्ववादः
३. ईश्वरवादः
४. वर्णवादः
५. समवायवादः
६. निर्विकल्पकवादः । इति ।

षट्स्वप्येषु द्वात्रिंशद्विभागाः सन्ति । तेषां "स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः" इतिरीत्या विषयानुगुणान्येव नामानि तत्तदन्ते लिखितान्यवलोक्यन्ते । विषयानुक्रमणिकायां तानि स्पष्टानि । यथा महाविभागानां नामसु समानः परिच्छेदशब्दः, यथा च तदल्पानां मध्यविभागानां नामसु वादशब्दः,एवमेवान्तिमविभागानां नामस्वपि समानोऽप्रतिकूलार्थदः कश्चन शब्दो भवेदेव । तेन प्रथमद्वितीयादिसंख्याशब्दान्योजयित्वाह्ययामेत्यपरमप्यनुकूलम् । भगवान् बादरायणः महाभारतेपर्वान्तैः पौलोमास्तिकादिशब्दैरल्पविभागान्, तादृशैः आदिसभादिशब्दैरनल्पविभागांश्चोररीचकार, इमे व्यासमुनयोप्यल्पानल्पोभयगणघटितानां नामस्वन्तमप्रतिकूलार्थं वादशब्दमेवानुमन्यन्त इत्यस्मान् प्रतिभाति । नायमध्वास्मदुपज्ञः । न्यायदीपकर्त्रैव कृतपदाङ्कः । तत्र चतुर्थपुटे अष्टमपङ्क्तौ "अत्र स्वतः प्रामाण्यज्ञप्तिवादपर्यन्तं" इति १०८ तमपुटे ११ पङ्क्तौ "अतीतवादोक्तदिशा निःशङ्कप्रवृत्त्यर्थं, अत्र वादे उक्तदिशा" इति ; ३७८ तमपुटे ६ पङ्क्तौ "व्यक्तं चैतद्वा[1]दान्ते ग्रन्थे एव" इति च पश्यामः । स्वतस्त्ववादग्रन्थे

[1] वर्णवादान्त इत्यर्थः.

न्यायामृतेप्येषैव रीतिरिति, ४५९ तमपुटे ८ मपङ्क्तौ "न्यायामृते असतो निषेधप्रतियोगित्वसमर्थनवादे" इति व्याख्यनस्यास्य वाक्य-विमर्शका अभ्युपगच्छेयुः । मूलेपि केषुचित्पुस्तकेषु १८४ तमपुटे ९ मपङ्क्तौ "इत्युत्पत्ति स्वतस्त्ववादे" इत्यस्ति ॥

आस्तामयं विचारः । इत्थमस्ति महावादेषु विन्यस्तानामणुवादा-नामियत्तानिर्णयः ॥

प्रथमे प्रामाण्यवादे	....	अष्टादश	....	१८
द्वितीये	....	उत्तरास्त्रयः	....	३
तृतीये	....	अनन्तर एक एव		१
चतुर्थे	....	ततः षट्	....	६
पञ्चमे	....	उपरि द्वौ	....	२
षष्ठे	....	अवशिष्टौ	....	२ इति ।

प्रतिपादनीयः.

आदावेव नामनिर्वचनाव्याजेन प्रतिपादनीयो विषयः सामान्यतः प्रदर्शितप्राय एव । केवलनैयायिकाभिधानानामनुसृतवेदानां च ज्ञान-ज्ञानसाधनविषये यत्रयत्र विसंवादस्तत्समीकरण एव ग्रन्थकर्तुर्मुख्यो-भिप्रायः । तेषांस्तेषां संपुटानां प्रकाशनवेलायां विशेषतस्तांस्तान्विष-यान् प्रदर्शयिष्यामः ॥

प्रकृतसंपुटे अयं विषयविशेषः.

प्रत्यक्षखण्डप्रत्यक्षपरिच्छेदशब्दाभ्यामपि संकेतितेस्मिन्संपुटे प्रत्यक्षज्ञानानां, तत्साधनानां, तत्प्रामाण्यानां, ज्ञेयानां च निरूपणं न्यायतः संप्राप्तम् । ज्ञानज्ञेयसाधनानि प्रमाणलक्षणपद्धत्याद्यभिरेव सुखावबोधानीति प्रामाण्यमेवोर्वरितम् । तत्रापि प्रामाण्यस्वरूपविषये

न तादृशो विवादः । अपि तु कथमस्योत्पत्तिः ज्ञप्तिश्चेत्यत्रैव । अतः स एव विषयः सामान्यरूपेण विचारपथपान्थ इति सुष्ठु पश्यामः - नहि सामान्याकारेण चर्चितं प्रत्यक्षप्रामाण्यत्वादिरूपविशेषाकारेण न सिध्यति ॥

प्रत्यक्षपरिच्छेदे प्रत्यक्षप्रामाण्यविचार एवानुरूपः । न तु शाब्दप्रामाण्यादेः । सत्यम् । तत्तत्परिच्छेदे तत्तत्प्रामाण्यमेव यदि न्यरूपयिष्यत् तदा, प्रामाण्यसामान्यस्य न स्वतस्त्वम् कथं प्रामाण्य-विशेषस्येति शङ्कावशिष्टाभविष्यत् । अतः प्राथम्यात्सामान्यविचारेणैव विशेषशङ्काया अपि शान्तेरत्रैव प्रामाण्यसामान्यनिरूपणं नानपपन्न मित्युत्पश्यामः—

तत्रापि—

(क) प्रामाण्यं स्वत इति वेदान्तिनः
,, परत इति नैयायिकाः

(ख) वेदाः अपौरुषेया नित्याश्चेति वेदान्तिनः
ईश्वरोच्चरिता अनित्या इति नैयायिकाः

(ग) ईश्वरस्य सार्वज्ञ्यादिकं वेदेनैव सिद्ध्यतीति वेदान्तिनः
धर्मिग्राहकानुमानैरिति नैयायिकाः

(घ) वर्णाः नित्यविभुद्रव्याणीति वेदान्तिनः
अनित्या गुणा इति नैयायिकाः

(ङ) वर्णः संयोगेन ज्ञेय इति वेदान्तिनः
समवायेनेति नैयायिकाः

(च) निर्विकल्पकज्ञानं नास्तीति वेदान्तिनः
अस्तीति नैयायिकाः

इति षोढा विप्रतिपत्तयः सन्ति । तत्र निर्णयायैव षण्णां वादानामङ्गीकारः ॥

प्रामाण्यविषयोयं परिच्छेद इत्युक्त्वा वेदेश्वरादीनां विचारणे कः प्रसङ्ग इति परं शङ्कोन्मीलति । तामेवं प्रतिब्रूमः ॥

प्रक्रान्ते प्रामाण्यस्वतस्त्वे याया बाधकाशङ्काः समापतन्ति तासामसमीकरणे सिद्धान्तस्य न सुस्थापना भविष्यतीति वादपञ्चकानां समाश्रयणमिति । ततश्चैवं पूर्वपूर्ववादाबामुत्तरोत्तरवादानुषङ्गिता ॥

ज्ञानज्ञानसाधनानां प्रामाण्यस्वतस्त्वे निरूपणीये वेदेपि तदनुवर्तमानं वेदनित्यत्वापौरुषेयत्वाभ्यां सुव्यवस्थापितम् । वेदस्य पौरुषेयत्वादिदमसंगतमिति शङ्कापनोदाय द्वितीयस्य वेदापौरुषेयत्ववादस्य रचना । पौरुषेयत्वे यानुपपत्तिस्तामेवं परिहरामीति प्रतिवादिनः प्रत्यवस्थाने तृतीयस्य वादस्यारम्भः । वर्णानामनित्यत्वात्तत्समुदायरूपवेदानामप्यनित्यत्वमिति प्रश्ने; शब्दोनित्यविभुद्रव्यं, ध्वनिराकाशगुणः, इति प्रतिपादयतश्चतुर्थस्य । यदि शब्दो नाकाशगुणः तर्हि श्रोत्रेणाकाशेन न समवायसंबन्ध इति कस्तं श्रोत्रेण जानीयादिति कोलाहलप्रशमनाय समवायानिषेधयितुः पञ्चमस्य । समवायाभावे निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षप्रमाद्वैविध्यमुन्मूलितं भवतीत्युद्घोषस्य स्वेष्टतां प्रथयतः षष्ठस्य चेति ॥

प्रतिपादनपरिपाटी.

विषयचालनरीतिमेकदेशे प्रामाण्यवादे दिक्प्रदर्शनेन प्रदर्शयिष्यामः ॥

"स्वतःप्रमाणैः" इतिश्लोके प्रामाण्यस्य स्वतस्त्वं प्रक्रान्तम् । प्रमाणशब्दः यदि भावसाधनस्तदा प्रामाण्यं ज्ञानधर्मः । अथ

करणसाधनस्तर्हि ज्ञानसाधनधर्मः । द्विविधेप्यस्मिन् प्रामाण्ये ज्ञप्तौ स्वतस्त्वं, उत्पत्तौ स्वतस्त्वं चेति द्वयीरितिरस्ति । अन्ततो ज्ञानगतस्य ज्ञप्तौ स्वतस्त्वं उत्पत्तौ स्वतस्त्वं; करणगतस्य ज्ञप्तौ स्वतस्त्वं उत्पत्तौ स्वतस्त्वं चेति चातुर्विध्यमागतम् । क्रमश एषां निरूपणमारच्यते ॥

तत्र—

किं तत्स्वतस्त्वं नाम ?

प्रकारान्तरे कानुपपत्तिः ?

किं प्रमाणम् ?

अनुपपत्तीनां कथं परिहारः ?

परतस्त्वं कुतो न ?

इति शङ्कोत्तराभ्यां सुरुचिरं भविष्यतीति तथैवानुधावति विचारणाप्रवाहः ॥

सर्वत्रापि स्वतस्त्वं नाम सहजत्वं, औत्सर्गिकत्वं वा, न त्वितरापेक्षणेनाहितत्वमितिसारम् । अत एव द्वादशतमे पुटे ' सहजत्वात् प्रामाण्यग्रहणस्यौत्सर्गिकत्वरूपस्वतस्त्वासिद्धि " रिति, २०३ तमपुटे, " प्रमाजननशक्तिः सहजा नतु भ्रमजननशक्तिवदाधेये " ति चास्ति ॥

१. ज्ञानप्रामाण्यस्य ज्ञप्तौ स्वतस्त्वम्—

एतच्च त्रिधा निरवक् । " याथार्थ्यरूपस्य तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वनैयत्यम् " इत्येकम् । " तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषकसाक्षिज्ञानविषयत्वयोग्यत्वम् " इत्यपरम् । नैयायिका यदाकारं ज्ञानमनुव्यवसायं मन्यन्ते तदेवात्र साक्षिशब्दितम् । स साक्षी यदि ज्ञानं गृह्णीयात् तर्हि तत्प्रामाण्यमपि गृह्णात्येव ।

यथा स्वयं गन्तुर्गजस्य कण्टकापसरणं प्रयोजकमेव न तु कारणं तथा प्रामाण्यविरोध्युपस्थापकनिवारणमपि। इति प्रथमनिरुक्त्या पर्यवसितोर्थः। द्वितीयया तु अग्नेर्दाहकशक्तिवत् साक्षिणि प्रामाण्यग्रहणशक्तिरस्ति। अग्नेः प्रतिबन्धकाददाहकत्ववत् अस्यापि प्रामाण्याविषयता। तथापि करतलादौ दाह्यतावत् प्रामाण्येपि साक्षिग्राह्यता। इति साक्षिविषयतायोग्यत्वं स्वतस्त्वमिति फलितम्। तृतीया निरुक्तिस्तु न स्वमतासाधरणेत्यास्ताम्॥

२. प्रकारान्तरे अनुपपत्तिः—

"तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वम्। तंदभावश्च परतस्त्वम्। इति मणौ पूर्वपक्षे मीमांसकानां स्वतस्त्वं निरुक्तम्। तस्यात्रान्ततो दूषणमिदमभिहितमस्ति। 'तत्' इति शब्देन प्रकरणप्राप्तघटज्ञानं यत्र जायते तत्र तत्प्रामाण्यं न भासते, ज्ञानं परं प्रतीयत इति बाध इति॥

तज्ज्ञानविषयकज्ञानाजन्यजन्यज्ञानविषयत्वमिति परिष्कारोपि केनाप्यजन्येश्वरज्ञानेन स्वेष्टस्यानुव्यवसायस्यापि जन्यत्वादनुपपन्नार्थकः॥

अतः तज्ज्ञानविषयक जन्यज्ञानेत्याद्युक्तौ, उभयत्र जन्यपदत्यागेन अजन्यत्वस्य स्वानुकूलतया निर्वचने वा बाधादिदोष एवोक्तः। सर्वं ज्ञानं गुण इति वाक्ये प्रयुक्ते तादृशमेव शाब्दज्ञानं जायते। तदनुव्यवसायेन तत्प्रामाण्यमवगाह्यत इति स्थितिः। अयमनुव्यवसायः अत्र यद्विशेषणमुक्तं तादृशो न भवतीति सारम्॥

३. स्वतस्त्वे प्रमाणम्—

"ज्ञानप्रामाण्यं स्वतो ग्राह्यं परतोऽगृह्यमाणत्वे सति गृह्यमाणत्वात् यद्यदन्येनागृह्यमाणत्वे सति ग्राह्यं तत्तेन ग्राह्यं यथा चक्षुरन्येनागृह्यमाणं

रूपं चक्षुर्ग्राह्यम्" इत्यादि प्रथमस्वतस्त्वनिरुक्तयनुरोधेन ; "विमतोऽनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयीकरणयोग्यः अनुव्यवसायत्वात् गृहीतप्रामाण्यसमानविषयकज्ञानान्तरानुव्यवसायवत्" इत्यादि द्वितीयानुरोधेन चोक्तम् ॥

केवलतर्कसरण्या प्रतिपादितानां विषयाणां ललितवचनानुवादो न सुकरः सूपयुक्तश्चेति तांस्तथैव परित्यजामः ॥

४. प्रामाण्यस्वतस्त्वे अनुपपत्तिपरिहारः—

इदं रजतं जानामीत्येकोऽनुव्यवसायः । एतदनन्तरं रजतं ज्ञाने प्रकारो वा न वेति न संदेहः । अतः रजतत्वप्रकारकत्वं न बहिरर्थः । अनुव्यवसायस्य विषयश्चैतत् । रजतत्वविशिष्टं न वा इति संदेह उदेति। अतो रजतत्ववैशिष्ट्यं बहिरर्थः। नानुव्यवसायविषयः । रजतत्व वैशिष्ट्यादिकं प्रामाण्ये प्रविष्टमास्ते । अतः कथं प्रामाण्यस्वतस्त्वसाधकानुमानैः प्रामाण्यमनुव्यवसायविषय इति साधनम्? एवं बाधादिति शङ्कायाम् ; व्यवसाये रजतत्ववैशिष्ट्यग्राहित्वं केन प्रमाणेन सिद्ध्यति-अनुव्यवसायेनेति ब्रूयात् । यद्यनुव्यवसायः तदविषय· तस्य सिद्धिरेव? न स्यादिति दिशा परिहारः ॥

५. ज्ञाने जाते प्रथमतः प्रमाणं न वेति संशयो भवति । स नोदियात् । ज्ञानग्रहणवेळायामेव प्रामाण्यस्यापरित्यागात् । इत्यन्यानुपपत्तिः । प्रतिबन्धकाभाव एव प्रामाण्यग्रहणनियम उक्तः । न तु प्रतिबन्धकसत्त्वे । प्रामाण्यसंशयस्थळे विरोधी वर्तत इति न प्रामाण्यं विषयो भवति, अतः संशयः इत्यादिदिशा परिहारः ॥

६. प्रामाण्यस्वतस्त्वे ये हेतव उक्तास्ते सन्तु, साध्यामाभूवन् इत्यप्रयोजकशङ्काया इत्थं परिहारः । महति कार्ये यागादौ निष्कम्पं-

प्रवर्तितुं वेदादौ प्रामाण्यमवश्यवेद्यम् । तथाचैकस्मिन् प्रामाण्यमितरेण, तत्रान्येन, तत्रापरेणेत्यनवस्था स्यादिति परतस्त्वं प्रामाण्यस्य परित्यज्य स्वतस्त्वमेवाभ्युपेयमिति ॥

परतस्त्वं कुतो न?

७. प्रामाण्यपरतस्त्वे अप्रामाण्यशङ्कापरिहरणाय प्रामाण्यनिश्चयावश्यकतया उक्तरीत्यानवस्था एको दोषः ॥

८. प्रामाण्यमनुमेयं चेत् कथं प्रथमतः प्रामाण्यज्ञानं, साध्याप्रसिद्धिरित्यपरो दोषः ॥

९. "स्वाश्रयविषकनिश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयविषयीभूतं ज्ञानप्रामण्यं, ग्राह्यज्ञानप्रकारप्रकारतया तद्वद्विशेष्यकतया च स्वाश्रयग्राहकयावज्ज्ञानाग्राह्यं, स्वाश्रयविषयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयकोटित्वात्, अप्रामाण्यवत्" इत्यस्य—अप्रामाण्यं स्वतो न गृह्यते । ज्ञानानन्तरं तृतीयक्षणे अप्रामाण्यसंशयोदयात् । तथा प्रमानन्तरं तृतीयक्षणे क्वचित्प्रामाण्यसंशयोदयात्प्रामाण्यमपि न स्वतः इति सारम् । इत्यपरः प्रत्युद्गमः । तस्येत्थं परावर्तनम् । अत्र साध्ये स्वाश्रयग्राहकयावज्ज्ञानपदं स्वेष्टामनुमितिमपि सङ्गृह्णातीति तदग्राह्यत्वसाधनमपसिद्धान्तदोषकवळितम् । बाधो व्याघातश्चेति । रीत्या नयैवानुमानान्तराण्यपि दुष्टानीति ज्ञानप्रामाण्यस्य ज्ञप्तौ परतस्त्वशङ्का न सुस्थिरा ॥

उत्पत्तौ ज्ञानप्रामाण्यस्वतस्त्वम्.

अस्मिन् स्वतस्त्वनिर्वचने न तादृशः प्रयासः । पूर्वपक्षानुमानेनैव साध्यविपरीतस्य तस्य सुखावबोधो भविष्यतीत्यत्र तदनिरुच्य

१५४ तमपुटे अष्टमपङ्क्तौ "ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्व" मित्युक्तम्॥

पूर्वस्मिन् स्वतस्त्वनिरूपणे अनुकूलान्युक्त्वा प्रतिकूलानां परिहरण-मित्यनुलोम आदृतः। इदानीं प्रतिकूलानि परिहृत्यानुकूलानां निरूपण-मिति प्रतिलोम आद्रियते॥

तथाचादौ परतस्त्वनिरासः.

१०. अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् अप्रामाण्यवत्। इत्यादीन्यनुमानानि परतस्त्वसाधकानि वर्तन्ते। यथा अप्रमा कार्यं ज्ञानविशेषोपीति सा ज्ञानसामान्यकारणा-तिरिक्तदोषजन्या तद्वदनित्यप्रमापि गुणादिजन्येति तदर्थः। इति शङ्का॥

प्रमा ज्ञानं हि। तस्या हेतुर्ज्ञानहेतुरिति निर्विवादम्। एवमपि तदतिरिक्तहेतुजन्यत्वं यदि साध्यते तर्हि भवदनुमानेषु विरोधो बाधश्च। प्रमायाः कार्यतां निर्वहन् कश्चनगुणोपि नास्ति। एवमेवे-तराण्यनुमनान्यपीतीदं दिक्प्रदर्शनमात्रम्। इति परिहारः॥

११. यद्यपि प्रमामात्रे गुणः सामान्यो मा भूत्। अनित्य प्रमामात्रे अविद्यमानासंसर्गाग्रहादिकं गुणः। इति चारु दर्शयते॥ तथापि केवलासंसर्गाग्रहस्य भ्रमेपि सुलभतया अविद्यमानविशेषणेन विषयसत्त्वमेवाभिप्रेतं ब्रूयात्। विषयसत्त्वं तु ज्ञानसाधारणकारणम्। अतः न तत्स्वतस्त्वविरोधि॥

१२. मास्त्वेकोऽनुगतो गुण अनित्यप्रमासु। अननुगतै-रनेकैरेव प्रमोत्पद्यताम्। "अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्न-कार्यताश्रयमात्रवृत्ति स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रातियोगिककार-

णत्वाश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववादित्यनुमानं तत्र बलमस्ति। अप्रमात्वं अनित्यज्ञानसामान्यकारणापेक्षया अधिकं कारणमपेक्षते यत्कार्यं तन्मात्रस्थितिकम्। अतस्तत्; स्वाश्रयजन्यभ्रमवृत्तयः येये धर्माः जन्यप्रत्यक्षभ्रमत्वादयः तत्तदवच्छिन्नकार्यताश्रयाः जन्यप्रत्यक्षभ्रमादयः। तन्मात्रे वर्तते। एवं च—अनित्यभ्रम इति नैकजातीयं कार्यम्। अपितु प्रत्यक्षानुमित्यादिभेदेन नाना। तदनुरोधेन कारणान्यप्यनेकान्येवेति फलितम्। तथैवानित्यप्रमा अपि नाना कार्याणि। तत्तत्कारणान्यपि नानैव। तत्तदनुरूपा गुणास्तत्रतत्र कारणानीति पर्यवसितम्॥

इयं यज्ञपत्युक्तपञ्चमात्रपदानुमानतः शङ्का। अस्या इत्थं परिहारः॥

सन्तु नामानित्यप्रमाकारणानि नाना। न तानि गुणाः। अपितु अस्मदनुमतास्तत्तत्प्रमाप्रागभावा एव। तथाप्युक्तानुमाने साध्यहेतुसंगतेः। अतः सिद्धसाधनं दोषः। इति॥

१३. अनित्यप्रत्यक्षप्रमात्वं कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्तित्वात् घटत्ववत्। घटत्वं कार्यमात्रे वर्तते। अतस्तत् कार्यतावच्छेदकम्। एवमनित्यप्रत्यक्षप्रमात्वमपि स्यात्। अनित्यानुमितिप्रमात्वे शाब्दप्रमात्वे चायमेव क्रमः। इत्यपरा शङ्का॥

प्रत्यक्षप्रमामात्रे इन्द्रियसनिकर्षोऽर्थश्च न हेतू। यदा शुक्तिं दृष्ट्वा रजतमिति भ्राम्यति तदा सन्निकर्षस्य शुक्तिरूपार्थस्य च तत्र सत्त्वेन शुक्तिरियमिति प्रमोदयापत्तेः। दोषः शुक्तिं न भासयतीति यदि, तर्हि दोषाभाव एव प्रमायामुपयोगी भवतु। अपरं कारणं मास्तु। इत्युत्तरम्॥

१४. अनित्यप्रमात्वं, अनित्यज्ञानत्वप्रयोजकं यावत् तदधिकप्रयोजकापेक्षं अधिकप्रयोजकसत्त्वे उत्पत्तेः अधिकप्रयोजकासत्त्वे अनुत्पत्तेः अप्रमात्ववत् । इत्यनुमानेन स्थूलावयववतो वस्तुनः प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः कारणम् । संशयविपर्ययोत्तरस्मिन् तस्मिन् विशेषप्रमा कारणम् । नियमेन प्रमारूपायामनुमितौ लिङ्गपरामर्शः कारणम् । तादृशायां शाब्दप्रतीतौ वाक्यार्थज्ञानं कारणम्' इति फलति इति पूर्वपक्षे ॥

कामिलारोगिणः शङ्खे शङ्खत्वशुक्लत्वज्ञानं भूयोऽवयवेन्द्रियसन्निकर्षश्च वर्तेते । तथापि शङ्खं पीतं भ्राम्यति । न तु शुक्लं प्रमिनोति । अतः कारणमस्ति कार्यं नैवेत्यन्वयव्यभिचारो दोषः । पुरोवर्तिनि स्थाणुर्वा पुरुषोवेति संशयः । ततः करादिकं चरणादिकं मत्वा पुरुष एवेति निश्चयो भवति । सा प्रमैव । संशयोत्तरस्मिन्नस्मिन्प्रमाज्ञाने भवदभिमतस्य विशेषप्रमारूपस्य कारणस्य क्व प्रसक्तिः ? नास्ति । अतः कारणं नास्ति कार्यमुत्पन्नमिति व्यतिरेकव्यभिचारोपि । इति समाधानम् ॥

१५. दोषाभाव एव कारणमास्ताम् । तथापि प्रामाण्यस्वतस्त्वहानेरिति न सुस्थायि । दण्डत्वदण्डगतदार्ढ्य प्रमुखानां कार्योपयोगित्वेपि कारणत्वाभाववदिहापि निर्वाहात् ॥

इयता प्रामाण्यस्योत्पत्तौस्वतस्त्वे अनुपपत्तयोपि परिहृता एव ॥

प्रामाण्यस्योत्पत्तौ स्वतस्त्वे किं प्रमाणम्

१६. अनित्ययथार्थज्ञानत्वं अनित्यज्ञानत्वानवच्छिन्न कार्यतानवच्छेदकम् अनित्यज्ञानावृत्तित्वरहितत्वात् ज्ञानत्ववत् । इत्याद्यनुमानं मानम् । ज्ञानत्वं अनित्यज्ञानावृत्ति न । अतस्तदवृत्तित्वरहितम् । तस्मादनित्यज्ञानत्वविशिष्टे सर्वत्र वर्तते या कार्यता तस्यामन-

वच्छेदकम्। ज्ञानत्वेन रूपेण ज्ञानमुत्पन्नमिति न भाष्यत इत्यर्थः। एवमेव अनित्ययथार्थज्ञानत्वमपि अनित्यज्ञाने न वर्तत इति नहि। ततः अनित्यज्ञानसामान्ये वर्तते या कार्यता तस्यामनवच्छेदकम्। अनित्ययथार्थज्ञानत्वादिना रूपेण ज्ञानं जायत इति नाह्रायते। इतीदमस्योपपादनम्। एवं च ज्ञानजनने यावदपेक्षितं तदधिकं कारणं प्रमा नापेक्षत इति फलितम्। तथा च १५४ तमे पुटे अष्टमपङ्क्तौ "ज्ञानजनकमात्राधीनजन्मत्वं" इत्युक्तस्वतस्त्वसिद्धिः॥

१७. अप्रमात्व (अभमत्व) मपि स्वत एव स्यात्। दोषस्तु प्रमायां गुण इव भवतु। इति प्रतिबन्दीत्थं परिहरणीया। दोषसत्त्वे भ्रमः, दोषाभावे न भ्रमः; इत्यन्वयव्यतिरेकयोर्न कथं कथमपि परित्याज्यतेति दोषोऽप्रमाकारणमित्यवर्जनीयमेव॥

करणप्रामाण्यस्वतस्त्वम्.

ज्ञानप्रामाण्यस्वतस्त्वे वादप्रतिवादाभ्यामेव करणप्रामाण्यस्वतस्त्वेपि प्रतिभटपरावर्तनं सुशकमिति तदर्थमत्र पृथङ्नायासः॥

१८. यथार्थज्ञानसाधनत्वमेव करणप्रामाण्यम्। तस्य ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वम् ज्ञप्तौ स्वतस्त्वम्। करणेषु ज्ञानजननशक्तिर्यथा सहजा तथा यथार्थज्ञानजननशक्तेरपि सहजत्वम्, तदभिमत्वं वा उत्पत्तौ॥

एतत्सर्वं "प्रामाण्यं स्वत एव अन्यथानवस्थानात्" "परतोऽप्रामाण्यम्" इति तत्त्वनिर्णयस्य विवरणरूपमेव॥

आदित एतावत्प्रबन्धेन—

"स्वतः प्रमाणैराम्नाये रादरेणादिवर्जितैः।
आख्यातानन्तकल्याण गुणं श्रीरमणं भजे"॥

इति देवतागुरुनमनोत्तरमत्रोक्तप्रस्तावनाश्लोकेन आदिवर्जितस्वतः-प्रमाणवेदोदितानन्तकल्याणगुणः श्रीरमण इति यदुपदर्शितं तन्नानुपपन्नम् । अपौरुषेयत्वेपि वेदस्य सहजप्रामाण्यानपायात् । इति पर्यवसितम् ॥

अतः प्रामाण्यवादान्ते तस्मात्प्रामाण्यस्य स्वत्वस्त्वादपौरुषेयोपि वेदः प्रमाणमेव" इत्युपसंहारमदर्शयत् ॥

व्याख्याविचारः.

अस्य ग्रन्थस्य द्वे व्याख्ये हस्तगते—

१. युक्तिरत्नाकराख्या एका

२. न्यायदीपाख्या इयमपरा

युक्तिरत्नाकरकारा विजयीन्द्राः । मूलकाराणामन्तेवासिनो न्यायदीपकाराणां विद्यागुरवः आश्रमतः परमगुरवश्च । इयं व्याख्या शब्दतोपि विशाला । न्यायदीपे चतुर्थपुटे "अत्र स्वतःप्रामाण्यशक्तिवादपर्यन्तं विस्तरस्तु गुरुपादकृतयुक्तिरत्नाकरे द्रष्टव्यः" इत्यस्ति । इयं सम्पूर्णा उत इयत्येवेति सन्दिहामहे । पूर्णेयं विस्तरस्तु एतावत्येवेत्यनेनापि न्यायदीपोक्तिसंगीतर्भवति हि । नोपलभामहे च सम्पूर्णाम् । अतोऽपूर्णेत्यत्रैव पक्षपातो न्याय्यः ॥

अत्र—

"गुरुपादकृताप्यस्ति व्याख्या सात्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा" ॥

इति । न्यायदीपादिस्थितद्वितीयश्लोकोपि प्रमाणम् ॥

अस्या न्यायदीपाख्यायाः कर्तारो राघवेन्द्रस्वामिनः । अत्र न कोपि प्रतिवादः ॥

एतेषां जीवनचारित्रविषये राघवेन्द्रविजयाख्यं काव्यं, गुरुगुणस्तवाख्यं स्तोत्रं च मुद्रितमेवेदानीमस्ति । गुरुगुणस्तवकर्तारो राघवेन्द्रस्वामिनां पूर्वाश्रमे पौत्राः यत्याश्रमे प्रशिष्या वादीन्द्राः ॥

मूलकाराणां छात्रा विजयीन्द्राः, तेषां राघवेन्द्राः' इत्यनेनैषां कालोपि विवृतप्राय एव । एषां बृन्दावनं रायचूरुपुरसमीपवर्तिनि मन्त्रालयाख्यग्रामे भक्तेष्टवितरणविचक्षणो विराजते । इमे इतरसन्यासिन इव मरणानन्तरं न बृन्दावनं प्रवेशिताः । अपि तु सर्वेद्दग्विषयतापरितित्यक्षिषवो बृन्दावनं कल्पयित्वान्तरुपाविशन् । प्यधापयंश्च । इति सांप्रदायिकानां तथ्यवादः ॥

मध्वसिद्धान्तस्यैभिः कृतमुपकारमेवं स्मरन्ति—

"व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पादलब्धाङ्कुरश्रीः
प्रज्ञैरीषत्प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीशव्यासराजादुदितकिसलयः पुष्पितोयं जयीन्द्रादद्य श्रीराघवेन्द्राद्विकसति फलितो मध्वसिद्धान्तशाखी । इति ॥

इतोप्यधिके एतदीयचरिते निर्दिष्टं काव्यं स्तोत्रं चास्तां मार्गदर्शीति शम् ॥

परिशिष्टम्.

अस्य सम्पुटस्य मुद्रणायोपयुक्तान्यादर्शपुस्तकान्याहृत्य चतुर्दश (14). तत्र मूलपुस्तकान्यष्टौ (8). व्याख्यानस्य षट् (6) इत्थमत्र विवेकः.

मूलस्य.

1 काङ्कम्—अस्मत्कोशागारस्य C. 13 संख्याङ्कम्. पूर्णम्.
2 गाङ्कम्— ,, C. 937 ,, ,,
3 'ख' संज्ञम्— ,, C. 1938 ,, पु. 449–पं. 1 "गुणक्रिया" इत्यन्तम्.
4 'च' संज्ञम्—D. Sreenivasachar, M.A., Professor of Sanskrit and Curator, Oriental Library, Mysore इत्येषाम्. पूर्णम्.
5 'छ' संज्ञम्—D. Sreenivasachar, M.A., Professor of Sanskrit and Curator, Oriental Library, Mysore इत्येषाम् पूर्णम्.
6 'मु' संज्ञम्—मुळबागलुग्रामस्थश्रीश्रीपादराजस्वामिनां मठस्य पूर्णम्.
7 'कुं' संज्ञम्—कुम्भकोणपुरे मुद्रितम्. पु. 390 पं. 8 "चक्षुरादिग्राह्यत्वात्" इत्यन्तम्.
8 'रा' संज्ञम्—मैसूरुशासनागारोपाध्यक्षाणां R. रामराव्, B.A., इत्येतेषाम्. पूर्णम्.

व्याख्यानस्य.

1 'अ' संज्ञितम्. एतत्कोशागारस्थम्. C. 306 संख्याङ्कम्. पूर्णम्.
2 'आ' ,, ,, C. 1919 ,, पु.195 प. 5 "ननु गुणव्यति" इत्यन्तम्.
3 'इ' संज्ञितम्. एतत्कोशागारस्थम्. C. 189 ,, पूर्णम्.

4 'इ' संज्ञितम्. मैसूरुराजकीयसंस्कृतमहापाठशालाद्वैतप्रधानोपाध्यायानां विदुषां डि. वासुदेवाचार्याणाम्. पूर्णम्. 369 पुटेभ्य उपर्युपयुक्तम्.

5 'मु' सञ्ज्ञितम्. मुळबागलुग्रामस्थोक्तमठस्य. पूर्णम्.

6 'कुं' ,, कुम्भकोणमुद्रितम्. पु. 390, पं. 3 "तार्किक" इत्यन्तम्.

विना 'कुं' पुस्तकं सर्वाणीमानि प्राचीनान्येव. 'च-छ-मु' संज्ञानि तु प्राय अत्यन्तं शुद्धानि. अध्ययनाध्यापनपरिष्कृतानि च कादिचिन्हं विना पाठान्तरदर्शकाटिप्पण्यां क्वचित्प्रदर्शितान्यस्माभिः सम्भावितानि.

व्याख्यानस्य 3, 4, पुस्तकयोः 'इ' इत्येक एव सङ्केतः कृतः. उभयोः प्रायः सारूप्यमत्र कारणम्.

तर्कताण्डवप्रथमसम्पुटविषयानुक्रमणिका.

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
	मङ्गलाचरणम्	1	....
	विषयप्रसञ्जकः श्लोकः	3	3
	प्रामाण्यवादः I	4	1
1	स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः—		
	प्रथमा	4	1
	द्वितीया	10	5
	तृतीया	13	2
	निरुक्तिश्रयस्यसुधारूढता दर्शनम्	16	8
2	परोक्तस्वतस्त्वनिरुक्तिभङ्गः—		
	प्रथमः	18	2
	द्वितीयः	26	4
	तृतीयः	28	5
	चतुर्थः	30	5
3	स्वतस्त्वे प्रमाणम्—		
	प्रथमम्	33	3
	द्वितीयम्	46	8
	तृतीयम्	56	1
	चतुर्थम्	57	7
	पञ्चमम्	58	1
	अस्य मूललभ्यतोपपादनम्	62	1
4	स्वतस्त्वानुमानेषु बाधोद्धारः	62	6
	अनुव्यवसायस्य वैशिष्ट्यविषयकत्वसाधनम्	65	6
	अनुव्यवसायस्य तद्विशिष्टविशेष्यकत्वविषयकत्व साधनम्	69	1.

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
	अनुव्यवसायस्य अर्थसत्त्वविषयकत्वसाधनम्	70	6
	उक्तार्थे मूलकृत्संमतिः	81	5
5	स्ततस्त्वे संशयोपपादनम्	81	10
	अत्र मूलानुमतिः	90	2
6	प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्	90	6
	स्वतस्त्वहेतूनां सामान्यतोऽप्रयोजतकत्वपरिहारः	,,	,,
	अर्थनिश्चयस्य प्रवर्तकत्वखण्डनम्	92	9
	प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेनोपयोगखण्डनम्	102	8
	अत्र मूलानुमतिः	103	7
7	परतस्त्वेऽनवस्थोक्तिः	104	1
	धर्म्यज्ञानादिनाप्रामाण्यशङ्काभावसिद्धिखण्डनम्	104	2
	विशेषदर्शनेनाप्रामाण्यशङ्काभावसाद्धिखण्डनम्	108	1
	अत्र मूलसंमतिः	109	1
	स्वमते अनवस्थापरिहारः	,,	3
	अत्र मूलानुमतिः	,,	10
8	परतस्त्वे प्रथमप्रामाण्यानुमित्यसंभवः	110	1
	परतस्त्वे अप्रसिद्धविशेषणत्वम्	110	2
	परतस्त्वे हेतोः प्रमित्यसिद्धिः	116	9
	परतस्त्वे सप्तहेतुनिराकरणम्	118	3
	स्वमते अप्रामाण्यपरतस्त्वे अनवस्थापरिहारः	119	1
	मूलानुमतिः	120	8
9	ज्ञप्तौ परतस्त्वानुमानभङ्गः	120	13
	मणिपूर्वपक्षः....	,,	,,
	समाधानम्	128	11
	अनुमान्तरनिरसनम्	136	6
	आदितः कथितानां निगमनम्	138	4
	मूलारूढताप्रदर्शनम्	139	1

10	उत्पत्ता परतस्त्व चिरन्तनानुमानभङ्गः—		
	प्रथमः	139	5
	द्वितीयः	142	3
	तृतीयः	143	7
	चतुर्थः	144	5
	पञ्चमः	145	5
	मूलाभिप्रेतत्वम्	148	1
11	अनित्यप्रमामात्रानुगतगुणभङ्गः	148	8
	मूलानुमतिः	157	1
12	यज्ञपत्युक्तवक्यानुमानभङ्गः	....	....
	पूर्वपक्षः	157	6
	समाधानम्	163	5
13	प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः. पूर्वपक्षः	166	3
	समाधानम्	168	6
	प्राचीनमतनिरासः	171	3
	मण्युक्तपक्षान्तरनिरासः	178	7
	उपसंहारः	188	5
	मूलानुमतिः	189	4
14	स्थूलवयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्नि-		
	कर्षादेर्हेतुत्वभङ्गः	190	1
	पूर्वपक्षः	,,	,,
	अन्वयव्यभिचारेण समाधानम्	191	6
	व्यतिरेकव्याभिचारेण समाधानम्	194	1
	उपसंहारः	201	3
	मूलसम्मतिः	,,	5
15	प्रमायां दोषाभावस्य हेतुत्वभङ्गः	202	4
	प्रयोजकत्वे इष्टापत्तिः	202	5
	कारणत्वनिरासः	204	2
	मूलसंमतिः	208	3

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
16	उत्पत्तौ स्वतस्त्वे अनुमानानि	208	8
	अनित्यप्रमामात्रानुगतो गुण इतिपक्षे	,,	,,
	प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुण इतिपक्षे	212	5
	यक्षपतिमते	215	5
	भ्रमे पित्तादिरिव प्रमायामनुगता गुणा हेतव इति मते	218	4
	मूलानुकूल्यम्	220	3
17	अप्रामाण्यस्य परतस्त्वम्	220	7
	मूलाभ्युपगमः	225	13
18	करणप्रामाण्यस्य स्वतस्त्वम्	226	4
	ज्ञप्तौ ,, ...	226	5
	अप्रामाण्यपरतस्त्वम्	226	7
	उत्पत्तौ करणप्रामाण्यस्य स्वतस्त्वम्	228	1
	अप्रामाण्य परतस्त्वम्	228	5
	मूलानुमतिः	230	1
	आदितः निगमनम्	230	2
	वेदापौरुषेयत्ववादः II	230	6
19	वेदापौरुषेयत्वे अनुमानानि	230	6
	पौरुषेयत्वे प्रमाणम्	230	7
	(1) अपौरुषेयत्वानुमानम्	231	2
	(2) ,, ...	233	3
	(3) ,, ...	235	3
	वेदाभावे धर्माद्यसिद्धिकथनम्	236	1
	अत्र मूलानुमतिः	238	1
	अपौरुषेयत्वे लाघवम्	238	6
	अत्र मूलावलम्बः	239	6
	पौरुषेयत्वे गौरवम्	240	3
	अत्र मूलानुकूल्यम्	241	10

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
	(4) ईश्वरज्ञानं न प्रमेतिमतेऽनुमा	242	1
	प्रमेतिमते (त्रीणि)	242	4
	अनुकूलतया मूलोक्तिः	247	4
	(5) अनुमान्तरम्	247	7
	(6) अनुमान्तरम्	248	7
	अनुकूलतया मूलोक्तिः	250	7
	(7) अनुमान्तरम् (त्रीणि)	250	8
	अपौरुषेयत्वपर्यवसानम्	251	4
	अत्र मूलावलम्बः	251	10
20	अपौरुषेयत्वे अनुकूलतर्कः	252	1
	(1) कर्तृप्रसिद्ध्यभावस्मृतिः	252	1
	(2) कल्पनागौरवम्	253	4
	(3) धर्माद्यसिद्धिः	254	9
	(4) प्रामाण्यासिद्धिः	255	1
	अत्र मूलानुग्रहः	257	11
	(5) श्रुतिस्मृतिविरोधः	258	1
	मूलसंगमनम्	260	1
21	वेदपौरुषेयत्वानुमानादिभङ्गः	260	4
	(1) अनुमाननिरसनम्	260	5
	वैदिकोत्तमपुरुषेण पौरुषेयत्वस्य खण्डनम्	272	11
	वैदिकयुष्मच्छब्देन „ „	273	7
	वैदिकयत्तच्छब्दाभ्याम् „ „	274	1
	मूलानुकूल्यम्	275	4
	समाख्यया पौरुषेयत्वस्य खण्डनम्	275	5
	अनुमान्तरनिरसनम्	276	3
	मूलावलम्बः	280	8
	(2) श्रुत्यादिकं न प्रमाणम्	280	10
	मूलानुकूलत्वम्	282	12
	अनित्यत्वनिरसनम्	283	11

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
	ईश्वरवादः III	286	....
22	**ईश्वरस्यानुमानिकत्वभङ्गः—**		
	कार्यत्वहेतुकपूर्वपक्षानुमानम् (१)	286	4
	क्षितेः पक्षत्वम्	295	2
	पूर्वपक्षदूषणम् (1)	309	4
	मूलसंवादः	313	3
	दूषणम् (2)	314	4
	मूलसंवादः	315	1
	दूषणम् (3)	315	2
	मूलसंवादः	316	3
	साध्यादिपूर्वपक्षोक्तांशानां क्रमशो दूषणम्	317	1
	शरीराजन्यत्वे व्याप्यत्वासिद्धिरिति मण्युक्तस्य निष्कृष्यानुवादः	339	3
	अस्य समाधानम्	347	1
	व्यर्थविशेषणस्य दूषणतारूपम्	356	9
	कार्यायोजनस्येश्वरासाधकत्वम् (२)	359	5
	धृतेरीश्वरासाधकत्वम् (३)	361	3
	पदस्येश्वरासाधकत्वम् (४)	362	5
	प्रत्ययादीश्वरसिद्धिनिरसनम् (५) ...	364	1
	संख्याविशेषस्येश्वरासाधकत्वम् (६)	365	1
	उपसंहारः	376	10
	वर्णवादः IV		
23	**वर्णानित्यत्वस्य प्रत्यक्षत्वभङ्गः**	377	4
	पूर्वपक्षः	377	4
	अभ्युपेत्य समाधानम्	378	1
	स्वमतम्	386	1
	अधिकरणयोग्यताया अभावप्रत्यक्षतश्चता	388	2
	अत्रानुव्याख्यानसंमतिः	390	10

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
24	वर्णानित्यत्वेनुमानभङ्गः (1)	394	6
	,, (2)	395	1
	,, (3)	395	5
25	वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः	400	4
	प्रत्यभिज्ञाभ्रान्तित्वापादकबाधकखण्डनम्	405	1
	ध्वनेरेवानित्यत्वव्यञ्जकत्वे	410	9
	उत्पत्त्यादिधियो बाधकत्वखण्डनम्	415	1
26	वर्णानां नित्यत्वे अनुमानानि (नव)	419	4
27	वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम्	428	1
	नेत्याशङ्का	429	1
	समाधानम्	432	2
	वर्णोत्पत्तौ कल्पनागौरवम्	438	3
	मूलकारसंमतिः	440	9
28	वर्णानां नित्यत्वेपि क्रमोपपादनम्	441	1
	वर्णानामनित्यत्वेपि वेदनित्यत्वाहानिः ...	443	4
	समवायवादः V	444	....
29	समवाये प्रमाणभङ्गः	,,	....
	आशङ्का	,,	4
	आन्तराळिकाशङ्का	,,	,,
	तत्समाधानम्	449	1
	मूलाशङ्कासमाधानम्	,,	6
	अस्य सूत्रारूढता	450	3
	समवायसाधकानुमाने तर्कपराहतिः	451	5
	अस्य सूत्राल्लाभः	,,	11
	समावायानुमाने व्यभिचारः	452	1
	हेतोरप्रयोजकता	453	1
	उक्तस्य सूत्राल्लाभः	455	3
	मणिकृत्सिद्धान्तितानुमाननिरासः	,,	9

वादसंख्या	विषयः	पुटसंख्या	पङ्क्तिः
	अस्यसूत्रालाभः	456	9
	अभावप्रतीत्यापादनपरिहारः 1	457	1
	परिहारः 2	461	8
	आपादनान्तरपरिहारः	462	6
	समवायसाधकमण्युक्तानुमान्तरनिरासः	465	6
	अयुतसिद्धविशिष्टबुद्धीनां साजात्याय समवाय इतिशङ्कानिरासः	467	6
30	समवाये बाधकम्	471	1
	समवायस्य संबन्धत्वनिरासः	471	1
	समवायस्यैकत्वनिराकरणम्	474	5
	अस्य सूत्रारूढता	475	7
	समवायस्यानित्यत्वोक्तिः	477	13
	समवायाभावे मानम्	480	12
	निर्विकल्पकवादः VI	483	....
31	निर्विकल्पके प्रमाणभङ्गः	483	6
	प्रमाणाशङ्का	484	4
	आन्तराशङ्का	484	4
	अस्योत्तरम्	485	7
	प्रथमाशङ्कासमाधानम्	487	6
	नाना पूर्वपक्षसमाधानानि	488	12
	विशेषणज्ञानस्य कारणत्वमङ्गीकृत्यापि निर्विकल्पकासिद्धिकथनम्	496	4
	केचिन्मतम्	497	12
32	निर्विकल्पके बाधकम्	499	10
	इष्टासिद्धिः	499	10
	प्रमाणविरोधः	504	1
	अस्य पद्धत्यारूढता	504	9
	परिच्छेदार्थोपसंहारः	505	13

तर्कताण्डवप्रथमसम्पुटे ग्रन्थकृन्नामानि.

		पुटम्	पङ्क्तिः
मणिकारः	....	10	1
भगवत्पादाः (मध्वाचार्याः)	....	62	1
,, ...	....	92	1
,, ...	....	109	9
,, ...	....	120	3
,, ...	....	225	13
,, ...	....	237	8
,, ...	....	241	9
,, ...	....	313	3
,, ...	....	413	11
,, ...	....	440	9
टीकाकाराः (जयतीर्थाः)	....	12	4
,, ...	....	131	9
,, ...	....	358	1
,, ...	....	378	7
यज्ञपतिः	....	215	5
व्यासः	....	271	7
,, (सूत्रकृत्)	....	450	3
प्रभाकरः	....	290	12
,, ...	....	397	1
न्यायसूत्रभाष्यकारः	....	291	1
उदयनः	....	383	3
पक्षिलः	....	384	10
भट्टः	....	391	11
काळीदासः	....	271	8

तर्कताण्डवप्रथमसम्पुटोद्धृतानि ग्रन्थनामानि.

सुधा—16-9, 119-3, 154-8, 203-9, 206-1, 5, 227-8, 247-3, 443-7.
मणिः—18-2, 262-1, 384-5, 396-3, 415-6, 434-3, 449-1, 485-9.
टीका—84-8, 246-10.
वादावळी—119-9.
ब्रह्मतर्कः—203-1, 393-9.
प्रमाणलक्षणम्—203-3, 392-6, 393-10.
भाष्यटीका—203-5, 206-4, 5.
विष्णुतत्त्वनिर्णयटीका—119-5, 205-5, 206-4.
पद्धतिः—227-3, 9, 388-1, 504-9.
श्रुतिः—230-8, 258-3, 260-1, 280-10 **इत्यादौ**
स्मृतिः—231-1, 252-5, 259-1, 4, 281-3, **इत्यादौ.**
भारतम्—253-1, 271-4.
वेदः—271-2 **प्रायस्तत्रतत्रास्ति.**
भाष्यम् (न्यायस्य)—293-4.
सूत्रम् (व्याकरणस्य)—349-5.
भाष्यम् (पक्षिलस्य)—384-10.
अनुव्याख्यानम्—390-10, 475-1, 479 5.
प्रमाणलक्षणटीका—393-12.

तर्कताण्डवप्रथमसम्पुटे धृता ग्रन्थानुपूर्व्यः

विषयः		पुटसंख्या	पङ्क्तिः
'साक्ष्येव ज्ञानं तत्प्रामाण्यं च'	इत्यादिः	12	5
ज्ञानगतयाथार्थ्यस्य	,, ...	16	9
तदप्रामाण्याग्राहक	,, ...	18	2
प्रामाण्यं च स्वत एव अन्यथानवस्थानात्	....	62	1
,,	....	148	1
ऋषिभिर्बहुधागीतम् इत्यादिः	.. ....	73	4
तदेतदचाभ्युक्तम्	. ....	73	5
'अन्यथा'	....	81	5
,, ...	....	90	2
आकाङ्क्षाया एव बुद्धिदोषात्मकत्वात्	....	92	2
अप्रामाण्यसंशयेनार्थनिश्चयम् इत्यादि	....	98	9
"अन्यथा" ...	. . ....	103	7
,, ...	....	109	1
न परीक्षानवस्था इत्यादि	... ...	109	10
अनुमेयमेवाप्रामाण्यम्	. . ....	119	5
नपुनर्ज्ञानग्राहकमात्रग्राह्यत्वं	....	119	8
अप्रामाण्यस्यानुमेयत्वावसायात्	....	119	9
न चाप्रामाण्यं	इत्यादि	120	1
यत्कचिद्व्यभिचारि स्यात्	,, ...	120	4
सुदृढो निर्णयो ...	,, ...	120	6
'अन्यथा'	....	120	9
नहि गोक्षुरकापसर्पण	,, ...	131	10
अन्यथा	....	139	1
ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्वम्	....	154	8
अन्यथा	....	157	1
,, ...	... .	189	4
,, ...	....	201	5

विषयः			पुटसंख्या	पङ्क्तिः
अदुष्टमिन्द्रियन्त्वक्षम्	इत्यादि	...	202	8
निर्दोषार्थेन्द्रिय	,,	...	203	1
दोषाभावस्य कारणत्वे च	,,	....	203	3
इन्द्रियादीनामौत्सर्गिकी	,,	....	203	9
दोषाभावोपि न प्रामाण्यकारणम्	इत्यादि	.	205	5
तर्हि दोषाभावः कारणमित्यायातम्	,,	...	206	1
तस्माद्गुणेभ्या	.. ,,	....	207	1
अन्यथा ...	....	...	208	3
,, ...	.	....	220	3
परतोऽप्रामाण्यम्	.	....	225	13
,, .	.	....	230	1
करणप्रामाण्यज्ञप्तिस्तु	इत्यादि	..	227	3
करणानां तु ज्ञप्तौ स्वतस्त्वं	नास्त्येव	.	227	8
अथवा ज्ञानजनकत्वं	इत्यादि	.	227	10
छन्दांसि जज्ञिरे	.	.	230	7
प्रतिमन्वन्तरम्	,,	.	230	8
तदभावे सर्वसमयाभिमत	,,	.	238	1
अपौरुषेयवाक्याङ्गीकार	,,	.	239	6
अविप्रलम्भस्त्वज्ञानम्	,,	.	241	10
क्रमस्य कृतकत्वेपि	..	...	246	10
नियतैकप्रकारत्वमपौरुषेयत्वम्		..	247	3
गौरवदोषेण	....	....	247	4
,, ..	.	....	250	7
,, ...	..	....	251	10
,, ..	....	....	257	11
,, ...	....	...	260	1
,, ...	....	....	275	4
,, ...	....	....	280	8
,, ...	....	....	282	12
यतस्ता हरिणा दृष्टा	इत्यादि	....	252	3

विषय	पुटसंख्या	पङ्क्तिः
वाचा विरूपनित्यया इत्यादि	258	1
श्रुतिर्वाव नित्या अनित्या वाव स्मृतयो इत्यादि	258	1
अनादिनिधना नित्या इत्यादि ..	258	4
नित्यावेदाः समस्ताश्च	258	5
सर्गेसर्गेऽमुनैवैते ,, ..	259	5
तदुत्पत्तिवचश्चैव ,, ...	259	8
विज्ञेयं परमं ब्रह्म ,, ...	259	10
यावद्ब्रह्मविष्ठितम् तावती वाक्	259	14
,, ...	412	7
शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तम	271	2
,, ,, ...	272	1
,, ,, ...	272	4
किं नो राज्येन गोविन्द	271	5
शिष्यस्तेहं शाधि मां त्वां प्रपन्नम्	271	6
त्वां प्रपन्नम्	273	9
वाच्यस्त्वया मद्वचनात्स राजा	271	7
स राजा	273	9
,, ...	274	4
मामुपास्व	272	7
गृभ्णामि ते सौभगत्वाय हस्तम्	273	1
वयं स्याम पतयो र्यीणाम्	273	3
भूयिष्ठां ते नम उक्तिं विधेम	273	4
योस्मान्द्वेष्टि	274	4
छन्दांसि जज्ञिरे	280	10
तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु	280	12
अवान्तराभिमानानां इत्यादि	281	1
तत्क्रमेणैव	282	5
ऋग्वेद एवाग्नेरजायत ,, ...	282	7
यो ब्रह्माणं विदधाति ,, ...	283	6
विपर्ययेणाप्यनुमातुं शक्यत्वात्	313	3

विषयः		पुटसंख्या	पङ्क्तिः
विपर्ययेण	....	315	1
,, ...	....	316	3
नित्यवीप्सयोः	....	349	5
पक्षधर्मतासिद्ध्यर्थत्वात् ...	..	358	1
प्रागुच्चारणादनुपलब्धा इत्यादि	.. .	378	8
अनुपलब्धिस्त्वर्जनीयसन्निधिरेव	....	388	1
शास्त्रगम्यपरेशानात् इत्यादि	....	390	11
योग्यानुपलब्धेश्चालिङ्गत्वम्	....	392	6
क्वचिद्घटाद्यभावोपि ,,	....	393	8
अभावोनुमाप्रत्यक्षं च ,,	....	393	9
प्रायेणानुमानेन्तर्भावज्ञापनाय ,,	....	393	10
नच सादृश्यात्प्रत्यभिज्ञा ,,	....	413	11
प्रत्याभिज्ञानन्तरं ,,	....	415	1
प्रदीपे व्यज्यते जातिर्न तु नीरजनीलिमा	....	430	11
अत आकाशगुणे शब्दे इत्यादि	....	440	9
वस्तुतत्त्वविचारकं प्रति ,,	....	443	7
समवायाभ्युपगमाच्च साम्यादनवस्थितेः	....	450	3
अनवस्थितेः	....	451	11
,, ...	....	455	3
,, ...	....	456	9
भूधरस्याग्निसंयोगः इत्यादि	....	475	2
समवायः	....	475	7
उपाधिजन्यं तद्गम्य ,, .. .	....	479	6
एतज्जन्मनि प्राथमिकम्,, .. .	....	485	7
द्रव्यादिविकल्पानां ,, ...	....	504	9

शुद्धाशुद्धपत्रिका,

पृष्ठम्	पङ्क्तिः	अशुद्धम्.	शुद्धम्,
16	23	सुथा	सुधा
19	1	ज्ञाननां	ज्ञानानां
,,	9	अप्रमामा	अप्रामा
,,	18	चोप्त	चोत्प
22	13	स्वाश्रप्र	स्वाश्रयप्र
25	21	विषयता	विषयतया
27	16	रनु	रानु
29	17	कोनुऽव्य	कोऽनुव्य
30	15	प्रग	प्राग
34	20	विशिशेण	विशेषण
36	3	(प 8)	(प 4)
,,	18	यस्म	यस्य
40	11	बन्दिका	बन्धिका
41	7	सुस्व	सुख
42	16	वेत्ति	वेति
46	17	तद्द	तद्दृ
51	6	नुव्वय	नुव्यव
52	4	व्वतिरेक	व्यतिरेक
55	9	दृष्टान्त	दृष्टान्त
63	13	तद्वद्दि	तद्वद्धि
64	10	र्व्यव	व्यव
76	18	व्यसाय	व्यवसाय
83	1, 2	बयध्य	बध्य
84	6	" अप्रा	अप्रा

पुटम्.	पङ्क्तिः	अशुद्धम्.	शुद्धम्.
84	8	हानिः "	हानिः
85	8	स्त्वाहानेः	स्त्वहानेः
86	4	दप्यते	दप्येत
88	20	स्मतस्त्व	स्वतस्त्व
89	19	संशवान्	संशयवान्
94	7	यत्वेकः	यस्त्वेकः
106	16	निरहि	निराह
111	10	स्वर्थानु	स्वार्थानु
122	11	कत्ये	केत्य
124	8	र्थलक्ष	र्थक्ष
127	9	सवत्र	सर्वत्र
138	11	मप्राणं	मप्रमाणं
143	19	निर्देष	निर्दोष
149	18	योस	योऽस
150	3	णाय	णाया
152	8	पदस्तेः	पपस्तेः
157	18	अतित्य	अनित्य
160	1	पादा	पदा
166	17	ङ्कते	शङ्कते
181	6	पूर्वक्त	पूर्वोक्त
187	4	नीस्य	नीयस्य
,,	11	नयो	नायो
,,	18	रित्ये	रीत्ये
204	1	प्रमाण्य	प्रामाण्य
207	6	त्रत	तत्र
228	3	सादिता	दिता
235	7	त्रेव	त्रैव
237	9	प्रक्ष	प्रत्यक्ष
,,	19	विशेण	विशेषण
239	3	सर्वज्ञथ	सर्वज्ञ

पुटम्.	पङ्क्तिः	अशुद्धम्.	शुद्धम्.
241	10	स्त्वज्ज्ञा	स्तज्ज्ञा
242	20	कण	करण
243	11	माङ्क्य	माशाङ्क्य
246	14	ल्पीये	ल्पीय
250	19	स्स्मृतिः	स्मृतिः
251	11	29	19
254	5	दिशाति	दिशति
256	20	तयहो	तहो
258	15	श्रुति	श्रुति
263	2	क्रमणो	क्रमेणो
264	11	मुनिनां	मुनीनां
267	16	यज्ञानं	यज्ञा
268	21	प्राण्य	प्रामाण्य
273	15	उद्धोदु	उद्धोढृ
275	4	दोषण	दोषेण
276	11	बलेन	बलेन
277	3	च्छुति	च्छुति
,,	8	र्विकत्व	र्वीकत्व
279	18	वशीय	वशीयं
283	1	वितस्य	विरतस्य
286	20	दुपदा	दुपादा
287	17	उत्तरा	उत्तराः
288	9	तान्निव्य	तन्निवृ
298	16	मानाभा	मानभा
,,	17	स्यैव	स्येव
299	18	र्वाच्या	र्वाच्यो
307	16	योऽय	योऽवय
310	15	परमणु	परमाणु
319	21	दिभावः	दितिभावः

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
328	22	वथितो	वस्थितो
334	3	मदच्छे	मवच्छे
341	13	दाच्यम्	वाच्यम्
348	1	वए	एव
360	18	शेण	शेषण
362	11	पिप	दिप
,,	15	व्यहा	व्यवहा
363	18	इत्यदि	इत्यादि
366	13	रूपावया	रूपावयवा
390	7	ता । सिद्धा	ता सिद्धा ।
392	4	लाको	लोका
403	18	व्त्के	व्यक्ते
,,	20	यवा	यावा
404	17	स्तेवं	स्त्वेवं
410	21	सयुक्ति	सयुक्तिक
412	3	धन्वि	ध्वनि
,,	18	दाषेः	दोषः
416	3	ज्ञनां	ज्ञानां
421	12	कालयो	कालत्वयो
,,	20	द्धाप्यं	द्धयाप्यं
425	5	त्वीदावव्यभ	त्वादावव्यभि
,,	19	कव	केव
426	6	घ्राणे	घ्राणे
427	8	विची	वीचि
432	8	गाह्य	ग्राह्य
436	16	वाकस्येव	वारकस्येव
438	9	घत	घात
440	2	मग	म
444	17	ह्यक	ह्यौक
445	11	वदस	वदयंस

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
447	13	कतैं	कत्रैं
449	15	राया भाव	राय भाव
450	4	सध्य	साध्य
452	13	क्त एव	क्ते एव
456	16	वा अविशि	वा विशि
462	4	मिति । न	मिति न
463	14	थद्वयै	यद्वै
470	13	प्रतक्तेः	प्रसक्तेः
480	3	नेनं	नेन
486	18	वदवे	वदेवे
487	13	थत्सा	तत्सा
494	14	ज्ञात	ज्ञा
,,	17	रिव	रेव
496	10	त्वेव	त्वैव
499	8	स्था	स्या
502	12	ससं	संस

287 पुटे "स्वजनकाद्यष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा" इति लुप्तम्.

3 पुटे, "वेदास्ते" इत्यारभ्य "तत्त्वनिर्णयोक्तेः" इत्यन्तं "आख्यातेति" इत्यतः प्राक् स्यात्.

———

तर्कताण्डवस्थाणुवादानां नैजानि सङ्कोचितानि च नामानि.

अङ्कः	नैजनामानि	सङ्कुचितानि	पुटम्
1	स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः	स्वम-ज्ञ-स्व-नि	4
2	परोक्तस्वतस्त्वनिरुक्तिभङ्गः	परो-स्व-नि-भं ..	18
3	स्वतस्त्वे अनुमानानि	स्वत-अनु	33
4	स्वतस्त्वानुमानेषु बाधोद्धारः	स्व-अ-बा द्धारः	63
5	स्वतस्त्वे संशयोपपादनम्	स्वत-सं-दनम्	81
6	प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्	प्र (प्रा)नि-प्र-कत्वम्	91
7	परतस्त्वे अनवस्थोक्तिः	प-अन-क्तिः ...	104
8	परतस्त्वे प्रथमप्रामाण्यानुमित्यसंभवः	पस्त्वे-प्रप्रा-ण्यात्य-भवः	110
9	ज्ञप्तौ परतस्त्वानुमानभङ्गः	ज्ञप्तौ-पस्त्वा-न-भङ्गः	121
10	उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः	उ प-त्ति-नुन-भङ्गः	139
11	अनित्यप्रमामात्रानुगतगुणभङ्गः	अ-प्रत्रा-गु ङ्गः ...	148
12	यज्ञपत्युक्तवक्रानुमानभङ्गः	यपक्त-वनुन-ङ्गः	157
13	प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः	प्रदि-प्रसु-प्रत्येत-गुङ्गः	166
14	स्थूलावयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्व-भङ्गः	स्थू-प्रप्रदौ-भूवें-सदेर्हेङ्गः	189
15	प्रमायां दोषभावस्य हेतुत्वभङ्गः	प्रयां-दोभास्य-हेङ्गः	203
16	उत्पत्तौ स्वतस्त्वे अनुमानानि	उत्तौ-स्वस्त्वे-नुनि	208
17	अप्रामाण्स्य परतस्त्वम्	अप्रास्य-पस्त्वम्	220
18	करणप्रामाण्यस्य स्वतस्त्वम्	क प्रास्य-स्वस्त्वम्	226
19	वेदापौरुषेयत्वे अनुमानानि	वेदापौत्वे-नुनि	231
20	अपौरुषेयत्वे अनुकूलतर्कः	अपौत्वेऽनु-तर्कः	253

अङ्कः	नैजनामानि	संकुचितानि	पटम्
21	वेदपौरुषेयत्वानुमानादिभङ्गः	वेद-पौत्वानु-दिङ्गः	260
22	ईश्वरस्यानुमानिकत्वभङ्गः	ईस्या-नुकत्व-भङ्गः	287
23	वर्णा (शब्दा) नित्यत्वस्य प्रत्यक्षत्वभङ्गः	वर्णा-त्वस्य-प्रत्व-भङ्गः	379
24	वर्णानित्यत्वे अनुमानभङ्गः	वर्णा-त्वेऽनु-मान-भङ्गः	394
25	वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः	वर्णा-नित्वे प्रज्ञा-विधः	401
26	वर्णानां नित्यत्वे अनुमानानि	वनां-नित्वे-ऽनुनि	419
27	वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम्	वनां-प्रत-व्यंक-व्यंत्वम्	428
28	वर्णानां नित्यत्वेपि क्रमोपपादनम्	वनां-नित्वेपि-क्रपा-दनम्	441
29	समवाये प्रमाणभङ्गः	सये-प्रण-भङ्गः ...	444
30	समवाये बाधकम्	समवाये-बाधकम्	471
31	निर्विकल्पके प्रमाणभङ्गः	निर्वि-कके-प्रण-भङ्गः	483
32	निर्विकल्पके बाधकम्	निर्वि-कके-बाधकम्	499

तत्त्वम्, सत्त्वम्, आपत्त्या, व्यावृत्त्या, असिद्ध्या, इत्यादिषु क्वचित् तद्वयसंयोगः दधसंयोगश्च प्रच्युतः। अयं मुद्रणेषु प्रायः सार्वत्रिको दोष इति अनुभवरसिकानुदारमानसान्न व्याकुलयेदित्याशासे ॥

———

तर्कताण्डवम्.

प्रथमःपरिच्छेदः

॥ श्रीमद्धनुमद्धीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥

॥ ॐ ॥

अनन्तकल्याणगुणैकराशिमशेषदोषोज्झितमप्रमेयम् ।
मुमुक्षुभिः सेव्यमनन्तसौख्यप्रदं रमेशं प्रणमामि
नित्यम् ॥ १ ॥

न्यायदीपाख्याव्याख्या.

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
प्रणम्य पूर्णबोधादीन् व्याकुर्वे तर्कताण्डवम् ॥ १ ॥
गुरुपादकृताप्यस्ति व्याख्या साऽत्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा ॥ २ ॥

ग्रन्थादौ[1] विशिष्टेष्टदेवतानतिरूपं मङ्गलमाचरति—**अनन्तेति**। सत्वादिषु गुणत्वप्रसिद्धेर्दुःखादीनां गुणत्वेन परैः परिगणनाच्च तद्व्युदासाया-नन्दज्ञानबलद्युतिप्रभृतिशुभधर्मलाभाय कल्याणगुणेत्युक्तिः । तार्कि-करीत्या गुणगुणिनोर्भेदभ्रमनिरासाय गुणैकराशिमित्युक्तिः । 'अष्टावे-वेश्वरे गुणा' इति धीनिरासायानन्तेति। "दोषैकदृक्पुरोभागी" इत्यमरे "ह्रादैकमयीं" इत्यादिकाव्यप्रकाशादौ प्रयोगदर्शनात्संख्यार्थकस्यैवैक-शब्दस्य "पूर्वकालैक" इति पूर्वनिपातो न केवलार्थस्येति तत्वनिर्णय-

[1] अथादौ.—अ.

श्रीशपादाम्बुजासक्तः करुणापूरशीतलः ।
मध्वाख्यो मरुदंशो मे सन्तापान्हन्तु सन्ततम् ॥ २ ॥
आनन्दतीर्थोपदिष्टो निधिर्नारायणाह्वयः ।
प्रदर्शितो येन सम्यक् जयतीर्थं तमाश्रये ॥ ३ ॥

टीकाद्युक्त्या गुणैकराशिमित्यस्य साधुत्वं ध्येयम्। उक्तरूपगुणानां मुख्यराशिमिति वा भेदशून्यराशिमिति वार्थः । गुणवद्दोषो नाशङ्क्य इत्याह—**अशेषेति** । चिन्तासन्तापादिदोषहीनमित्यर्थः । ननु गुणविशिष्टस्य मायाशबलत्वात्क[1]थं दोषोज्झितत्वमित्यतो नेदं मायाशबलमिति भावेनोक्तं अप्रमेयं–देशतोऽपरिच्छिन्नमिति । शबलं तु परिच्छिन्नमित्यभ्युपेतत्वादिति भावः । तत्र हेतुर्नित्यमिति–अनिवर्त्यं । शबलं तु मिथ्यात्वान्निवर्त्यमित्यर्थः । एवं देशकालगुणानन्त्यरूपब्रह्मशब्दार्थस्यात्रोक्त्या रमेश एव ब्रह्मशब्दार्थ इति सूचितम् । अत एव मुमुक्षुभिः सेव्यं ; न तु मन्दोपास्यमित्यर्थः । किंफलं? अनन्तसौख्यप्रदं–अविनाशिसुखप्रदमित्यर्थः । स्वार्थे ष्यञ् । अत्र न्यायचिन्तापरे ग्रन्थे ब्रह्मतन्त्राध्यायचतुष्टयोक्तगुणवैशिष्ट्योक्तिः—

"प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रतः ।
मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशोधनम्" ॥

इत्युक्त्या ब्रह्मतन्त्रोक्तप्रमेयनिर्णयोपयुक्तप्रमाणन्यायचिन्तापरत्वात्तद्विषयादिनैवास्य विषयादिमत्तेति सूचनार्था । एवं च न्यायपञ्चाध्यायानुरोधेन कुसुमाञ्जलौ पञ्चपरिच्छेदकृतिवद्ब्रह्मतन्त्रानुरोधेन परिच्छेदचतुष्टये कार्येपि प्रमाणत्रित्वद्योतनाय परिच्छेदत्रयकृतिरिति ॥ १ ॥ देवतानतिसमनन्तरं भाष्यकर्तृनर्थयते—**श्रीशेति** । अत्राद्येन विशेषणेन

[1] कथमशेष.—अ.

श्रीमदानन्दतीर्थार्यस्वामिनः कमलापतेः ।
प्रीतये क्रियते व्यासयतिना तर्कताण्डवम् ॥ ४ ॥
स्वतःप्रमाणैराम्नायैरादरेणादिवर्जितैः ।
आख्यातानन्तकल्याणगु[1]णं श्रीरमणं भजे ॥ ५ ॥

सौरभ्यस्य द्वितीयेन शैत्यस्य अंश इति मान्द्यस्य वायुगुणस्योक्तिर्ज्ञेया॥२

टीकाकर्तृन्नमति—**आनन्देति** ॥ ३ ॥

फलोक्तिपूर्वं चिकीर्षितं प्रतिजानीते—**श्रीमदिति** ॥ ४ ॥

आनुमानिकत्वादीश्वरात्मनो नाष्टगुणाधिकगुणवत्त्वमित्यत आद्यपद्योक्तरमेशविशेषणानि मानोक्त्या स्थिरीकुर्वंस्ताण्डवकरणस्य प्रसञ्जकं पूर्वरङ्गं निबध्नाति—**स्वत** इति । आम्नायैः—सजातीयानुपूर्वीविशिष्टवेदै ॥ **आख्यातेति**—नित्यसापेक्षत्वात्समासः ।

"वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथापाठात्" ।

इति तत्वनिर्णयोक्तेः । गुणमिति निर्दोषतादेरुपलक्षणम् । गुणपदेन वा निर्दोषत्वमुमुक्षुसेव्यत्वानन्तसौख्यप्रदत्वरूपधर्मग्रहः । आम्नायत्वे हेतुरादिवर्जितैरिति—स्वतन्नपुरुषाप्रणीतैरित्यर्थः । नन्वपौरुषेये वेदेऽदृष्टार्थके चाप्तोक्तत्वफलसंवादादिहेतो प्रामाण्यनिश्चायकस्याभावात् निश्चितप्रामाण्यकस्यैव प्रमाणस्यार्थसत्त्वनिर्णायकत्वस्याग्रे प्रामाण्यनिश्चयप्रवर्तकत्ववादे व्यक्तत्वात् कथं वेदे प्रामाण्यनिश्चयः । आप्तोक्तत्वगुणाभावात्प्रामाण्यं वा कथमित्यतो "न विलक्षणत्वादस्य" इत्यधिकरणसिद्धमाह—**स्वतः प्रमाणैरिति** । करणे ल्युट् [2]ज्ञानजननशक्तिग्राहकमात्रग्राह्यप्रमाजननशक्तिमद्भिरित्यर्थः । तथा ज्ञानजननशक्तित

[1] गुणश्रीरमणम्.—**क**. [2] स्वतः ज्ञानजननशक्तिग्राहकमात्रात्.—**मु**.

याथार्थ्यरूपस्य तत्तज्ज्ञानप्रामाण्यस्य

एव प्रमाजनकैरित्यर्थः। ज्ञप्तावुत्पत्तौ चान्यानपेक्षणाज्ज्ञानजननशक्तिग्राहकेणैव प्रमाजननशक्तिग्रहरूपप्रामाण्यग्रहस्य, ज्ञानजननशक्त्यैव प्रमोत्पादक[1]त्वस्य च संभवादपवादकस्य च दोषस्य वेदापौरुषेयत्ववादे वक्ष्यमाणदिशाऽपौरुषेयेऽभावनिश्चयादिति भावः। ननु प्रमाणेनापि तात्पर्याविषयोऽर्थो न सिध्यतीत्यत उक्तं—आदरेणाख्यातेति। आङो मुख्यत्वमर्थः। तात्पर्यपूर्वं मुख्यवृत्त्योक्तेत्यर्थः। लक्षणयोदितत्वे गुणासिद्धेः। तादृशगुणे विष्णौ वेदानां शक्तितात्पर्ये इत्येतदन्यत्र व्यक्तम्। अत्र स्वतःप्रामाण्यज्ञप्तिवादपर्यन्तं विस्तरस्तु गुरुपादकृतयुक्तिरत्नाकरे द्रष्टव्यः।

वेदरूपकरणप्रामाण्यस्य स्वतस्त्वं निश्चितप्रामाण्यकज्ञानेन ज्ञातव्यम्। तथा[2] तज्जन्यज्ञानप्रामाण्योत्पत्तिस्वतस्त्वसिद्ध्यधीनोत्पत्तिस्वतस्त्वमिति क्रमाज्ज्ञप्तावुत्पत्तौ च तदेवादौ समर्थयितुं "ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्व" मिति टीकाकृदुक्तं वाक्यं विवृण्वानो [3]ज्ञप्तौ स्वतस्त्वं तावन्निर्वक्ति—**याथार्थ्यरूपस्येति**। अर्थं—ज्ञेयम् अनतिक्रम्य वर्तमानं यथार्थं। "यथाऽसादृश्य" इत्यव्ययीभावः। य[4]थार्थभावो याथार्थ्यं; यथावस्थितज्ञेयविषयीकारित्वरूपं ज्ञेयाव्यभिचारित्वं तद्रूपस्येत्यर्थः। एतच्च परोक्षापरोक्षजन्याजन्यसर्वप्रमितिमात्रनिष्ठमित्युपेत्य ज्ञानप्रामाण्यस्येत्युक्तम्। अनुभूतित्वानधिगतार्थगन्तृत्वप्रमाकरणत्वसाधनाश्रययोरन्यतरत्वप्रमाव्याप्तत्वादेरव्याप्त्यसंभवादिदुष्टत्वादिति भावः। अस्यानुप्रमाणसाधारण्येपि साक्षाज्ज्ञेयविषयीकारित्वलाभायापि ज्ञानप्रामाण्यस्येत्युक्तम्। एतच्च भिन्नं भिन्नमेवेति सर्वप्रमितिनिष्ठप्रामाण्यस्वतस्त्वद्योतनाय तत्त-

[1] 'कत्व' इति न.—कुं. [2] तथाच.—कुं. [3] ज्ञप्तेरेव.—कुं. [4] यथार्थ.—मु.

दिति ज्ञानविशेषणम्। तस्यतस्य ज्ञानस्य यत्तत्तदर्थाव्यभिचारित्व-रूपं प्रामाण्यं तस्येत्यर्थः। प्रमापदप्रवृत्तिनिमित्तप्रामाण्यस्येति यावत्। "याथार्थ्यमेव मानत्वं" इति द्वितीयाद्यपादीयानुभाष्योक्तेः। निर्धारितं चैतद्याथार्थ्यं तत्रैव सुधायाम्। प्रपञ्चितं गुरुपादैरत्रैव प्रामाण्य-स्वतस्त्वानुमानवादे। "घटत्ववति घटत्वप्रकारकत्वादिरूपं परामि मतमेवास्माकं याथार्थ्यं" इति वक्ष्यमाणादिशा स्वपरसाधारणमेवेदमिति ज्ञेयम्। उपाधिखण्डनटीकाव्याख्यानमन्दारमञ्जर्यां "अथ केयं प्रमा" इत्यादिना प्रमात्वमाक्षिप्य

"यथार्थज्ञानमित्येव प्रमाया लक्षणस्थितिः।
स्मृतेरपि च लक्ष्यत्वादतिव्याप्तिकथा मुधा"

इति प्रतिज्ञापूर्वकं "सादृश्यस्य यथाशब्दार्थत्वात्। सादृश्यं च ज्ञानार्थ-योस्सत्तया। न च भ्रमेऽतिव्याप्तिः। तत्र ज्ञानस्य सत्त्वादर्थस्य चा सत्त्वात् [1]ज्ञानार्थयोः सत्तया सादृश्याभावात्। एवं च यथा—सादृश्यविशिष्ट एवार्थो यस्येति बहुव्रीह्याश्रयणे यथार्थशब्दस्य यथार्था प्रतीतिरित्याद्यभिधेयवल्लिङ्गं लोकसिद्धं सिद्धम्। 'यथाश-ब्दोऽनतिक्रमे वर्तते' इति टीकाकारवचनं तु फलितप्रदर्शनपरतया व्याख्येयम्। ज्ञानार्थयोः सादृश्यकथने[2] ज्ञानस्यार्थानतिक्रमस्यावश्य-कत्वात्" इत्यादिग्रन्थेन बहुव्रीह्युपादाने[3]नोक्तार्थस्य ग्रहणे तु न स्वपरसाधारण्यं प्रामाण्यस्य लभ्यते। परमते भ्रमविषयस्य सत्त्वेन लक्षणस्यातिव्याप्तेः। यद्वा तन्मतेऽपि प्राचां रीतौ वैशिष्ट्यस्य भ्रमेऽसत्त्वान्नवीनमते च पुरतोऽसत्त्वात्तदपि तन्मतसाधारणमेवेत्याहुः। अत्र यद्यप्याम्नायजन्यज्ञानप्रामाण्यस्वतस्त्वमात्रं प्रकृतम्। तथापि तत्त्व-

[1] तत्र.—मु. [2] न.—मु. [3] न समाहितम्। उ.—मु.

ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वनैयत्यं स्वतस्त्वम् ।

रूपग्राहिप्रत्यक्षज्ञानस्य तदनुग्राहकन्यायजानुमितिरूपज्ञानस्य तत्प्रामाण्यज्ञानस्य च प्रामाण्यनिश्चयोपायस्याप्यावश्यकत्वाज्ज्ञानप्रामाण्यमात्रस्यापि धर्मित्वेनोपादानम् । यद्वा प्राचीनतार्किकमत इव क्वचित्प्रामाण्यं स्वतः क्वचित्परत इति न भ्रमितव्यम् । किं तु सर्वत्रापि । नवीनमते सर्वत्र परतस्त्वोपगमेन तद्व्युदासायेति ध्येयम् । **ग्राह्येति**— ग्राह्यप्रामाण्यस्य यद्विरोधि प्रामाण्याभावाप्रामाण्यप्रामाण्याभावव्याप्याप्रामाण्यव्याप्यरूपं तस्य या उपस्थापकसामग्री दोषशङ्कादिरूपा तदसमवहितं ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकं यत्साक्षिज्ञानं तेन गृह्यत एवेत्येवंरूपतद्विषयत्वनैयत्यमित्यर्थः । विप्रतिपत्तेरनावश्यकत्वस्य न्यायामृते व्युत्पादनान्नियत्यमस्ति न वेत्यनुक्त्वैकैव कोटिरुक्ता । अत्र प्रामाण्यविरहरूपत्वतद्व्याप्यत्वादिरूपाविरोधित्वस्य प्रामाण्याभावादिषु चतुर्ष्वेकस्याभावेपि यज्ज्ञाने सति प्रामाण्यनिश्चयः प्रतिबध्यते तज्ज्ञानविषयत्वरूपं ग्राह्यप्रामाण्यविरोधित्वं प्रामाण्याभावादौ ध्येयम् । वक्ष्यति च प्रामाण्यनिश्चयस्य प्रवर्तकत्ववादे "अभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेन" इत्यादि । प्रामाण्यनिश्चयप्रतिबन्धकत्वं [1]तदनुकूलकिञ्चिद्धर्मविघटकत्वं वा तदनुत्पादव्याप्यत्वं वा । प्रामाण्यनिश्चयस्य साक्षिरूपतया नित्यज्ञानत्वेपि प्रामाण्यविषयकत्वादिकमुत्पत्तिमदेवेति तद्विशिष्टप्रामाण्यनिश्चयानुत्पादो न दुर्लभः । उपस्थापकेत्यत्र विरोध्युपस्थितितज्जनकसामग्रीभ्यामसमवहितेत्यर्थो ध्येयः ।

[1]च.—मु.

तार्किकाभिमतानुव्यवसाय एवास्माकं साक्षी ।

तथाच प्रामाण्यविरोध्युपस्थितिवेलायां तत्सामग्र्यभावेन तदसमवहितेनापि साक्षिणा [1]गृह्यत एवेति नैयत्यं नेति शङ्कानवकाशः । असमवहितत्वं च तदसामानाधिकरण्ये सति तदसमानकालिकत्वम् । "प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन" इति प्रमाणलक्षणे, "स्वरूपेन्द्रियं साक्षीत्युच्यते" इति पद्धत्यादौ च साक्षिणोऽनुप्रमाणत्वोक्तेरिह पराभ्युपेतानुव्यवसायरूपत्वस्फोरणाय साक्षिज्ञानेत्युक्तम् ।

"साक्षिप्रत्यक्ष[2]तो ह्येव मानानां मानतेयते"

इत्यादौ ज्ञानेपि प्रयोगात् । तथा युक्तिपादे "न विलक्षणत्वात्" इति नये—

"सुखदुःखादिविषयं शुद्धं संसारगेष्वपि"

इत्यस्य व्याख्यावसरे सुधायां "स्वरूपभूतं चैतन्येन्द्रियं साक्षीत्युच्यते तदभिव्यक्तं ज्ञानं च" इत्युक्तत्वाच्च ॥ नन्वात्मस्वरूपज्ञानत्वादिरूपसाक्षित्वस्य परमतेऽप्रसिद्धिरित्यत आह—**तार्किकेति** । स्वतस्त्वानुमानवादे वक्ष्यमाणदिशा व्यवसायप्रकारप्रकारकतया व्यवसा[3]यप्रकारवद्विशेष्यकतया च तद्विषयक प्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वाऽनुव्यवसायत्वम् । साक्षित्वमप्येवं रूपमेवात्र स्वतस्त्वनिरुक्तौ प्रविष्टमित्यर्थः । यन्मते वैशिष्ट्यमनुव्यवसायविषयोऽपि न स्वातन्त्र्येण विषय इति तन्मतेनाद्यः कल्पः । तत्र च विषयत्वनैयत्यं स्वातन्त्र्येणेति प्रवेशनीयम् । यन्मते वैशिष्ट्यमनुव्यवसायविषय एव नेति तन्मतेनान्त्यः । तत्र तु न स्वातन्त्र्येणेति विवक्षणीयम् । लौकिकत्वं च पराभिमतसामान्यादिप्रत्यासत्तित्रयाजन्यत्वम् । ज्ञानांश इति विशेषणात्स्मृत्युपनीतेऽतीते

[1] न.—कुं. [2] माण.—मु. [3] तत्.—मु.

**अत्र च नियमोक्तया न्यायमतेपि क्वचिदनुव्यवसा-
येनप्रामाण्यग्रहस्य[1] वक्ष्यमाणत्वात्सिद्धसाधनमिति
शङ्का साक्षीत्युक्तया घटज्ञानमस्तीत्यादिशब्द-
जन्यमप्रतिबद्धं घटज्ञानविषयकं[2] ज्ञानं प्रति घट-**

घटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तेन प्रामाण्याग्रहणा[3]द्बाधवारणमिति ध्येयम् । वस्तुतस्त्वत्रान्त्यपक्षप्रवेश एव साधुः । तथाच प्रामाण्यविरोधीत्यादिविशेषणवैयर्थ्यशङ्कावकाशलेशोपि नेति ज्ञेयम् । विशेषणकृत्यानि स्वयमेव व्यनक्ति—**अत्रेति** निरुक्तिवाक्य इत्यर्थः । नियमोक्त्या—गृह्यत एवेति नैयत्योक्त्येत्यर्थः ॥ **वक्ष्यमाणत्वादिति**—बाधोद्धारग्रन्थादौ घटादिज्ञानानुव्यवसायजन्यसंस्कारोत्पन्नस्मृत्युपनीते घटादिज्ञाने घटादिज्ञानजन्यसंस्कारोत्पन्नस्मृत्युपनीतं घटघटत्वतद्वैशिष्ट्यरूपप्रामाण्यं पञ्चमानुव्यवसायेन गृह्यत इति वक्ष्यमाणत्वादित्यर्थः । शङ्का निरस्तेत्यन्वयः । एतच्च तत्प्रकारप्रकारकतयेत्युक्तानुव्यवसायत्वरूपसाक्षित्वविवक्षया बोध्यम् । अन्त्यकल्पे तु गृहीतप्रामाण्यकज्ञानसजातीयज्ञानान्तरानुव्यवसायमश्वरज्ञानं वादाय सिद्धसाधनता ध्येया । शब्दजन्यमित्युपलक्षणम् । सामान्यप्रत्यासत्तिजन्यं ज्ञानांशेऽलौकिकं ज्ञानवानहमिति ज्ञानं च प्रतीत्यापि ध्येयम् । साक्षित्वस्य द्विरूपस्यात्राभिमतत्वा[4]त्तत्प्रकारकेत्यादिरूपेण शब्दजन्यज्ञानस्य ज्ञानांशेऽलौकिकेत्यन्त्यपक्षरूपेण च सामान्यप्रत्यासत्तिजन्यस्यनिरासात् ॥ **अप्रतिबद्धमिति**—विरोध्युपस्थितितत्सामग्र्यसमवहितमित्यर्थः । यस्तु घटज्ञानमिति ज्ञानेनापि प्रामाण्यं गृह्यत इति

---

[1]ग्रहणस्य.-मु. च. [2]विषयज्ञानं.-मु. च. [3]प्राप्तबाध.-अ. [4] तेन द्विरूपेणापि. शब्दजन्यज्ञानस्य सामान्यप्रत्यासत्तिजन्याद्दिज्ञानस्य च निरासात्.—आ. अ.

ज्ञानप्रामाण्यस्याविषयत्वाद्बाध इति शङ्का ग्राह्य-प्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्तया घटज्ञानं गृह्णता साक्षिणा पटज्ञानप्रामाण्यस्याग्रहणाद्बाध इति शङ्का अवशिष्टेन मन्मतेपि दोषशङ्कादिरूपे ग्राह्यप्रामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबन्धे सति साक्षिणा प्रामाण्य[1]स्याग्रहणाद्बाध इति शङ्का च निरस्ता । अत्र यद्यपि विषयत्वं साक्षिज्ञानं प्रत्येवेति नियमो न युक्तः । मन्मतेऽपि प्रामाण्यस्यानुमित्यापिग्राह्यत्वात्। तथापि साक्षिज्ञानं

पक्षधरोद्घाटितः पक्षः; स त्वपदार्थत्वादवाक्यार्थत्वादिति रुचिदत्तादिनैव दूषितत्वादुपेक्ष्यः । अत्राविवक्षित तत्प्रकार प्रकारकतादिरूपज्ञानज्ञानत्वा भावाच्च ॥ **तत्तज्ज्ञानेति** —ग्राह्यप्रामाण्याश्रयविषयकेत्युक्तावपि घटज्ञानपटज्ञानयोर्द्वयोरपि ग्राह्यप्रामाण्याश्रयत्वेनान्यतरग्राहकेणान्यतर-प्रामाण्याग्रहणेनोक्तदोषतादवस्थ्यात्तत्तज्ज्ञानविषयकेत्यप्यनुवादः । अत एव धर्मिनिर्देशेऽपि तत्तदित्युक्ति.[2] । ग्राह्यप्रामाण्याश्रयेत्यनुक्तावप्रामाण्याश्रयस्यापि ज्ञानस्य तत्तज्ज्ञानपदेन ग्रहणप्रसङ्गात्तद्विषयकेण साक्षिणा प्रामाण्याग्रहणाद्बाध एव । साक्षिण एकत्वेपि पटज्ञानप्रामाण्यग्रहणस्य पटज्ञानग्रहणप्रयुक्तत्वेन घटज्ञानग्रहणप्रयुक्तत्वाभावाद्बाधशङ्का युक्तैवेति भावः ॥ **दोषशङ्केति** —दुष्टकरणजन्यत्वशङ्का तन्निश्चयतज्जन[3]कादिरूपेत्यर्थः । नैयत्यस्य साक्षिणैव गृह्यते साक्षिणा गृह्यत एवेति च द्वेधा संभवाद्विवक्षितमाह —**अत्रेति** । निरुक्तावित्यर्थः—**अनुमित्येति** । चैत्रज्ञानं प्रमा अर्थसंवादादित्यादिरूपेण

[1] ण्याग्रहणात्—मु. [2] क्तम्.—मु. [3] सामग्रथा.—मु.

प्रति विषयत्वमेवेति नियमो युक्त एव। मणिकृतापि हि तदप्रामाण्याग्राहकेति विशिषता प्रामाण्यग्रहणे[1]ऽ प्रामाण्योपस्थापकसामग्र्यसमवधानस्य प्रयोजकतोक्तैव ॥ १ ॥

यद्वा- तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वयोग्यत्वं स्वतस्त्वं।

मैत्रादेरनुमित्युदयादित्यर्थः। ननु ज्ञानग्राहकसाक्षिणो विरोधिसामग्र्यभावमपेक्ष्य प्रामाण्यग्राहकत्वे निरपेक्षज्ञानग्राहकग्राह्यत्वरूपस्वतस्त्वायोग इत्यत आह—**मणिकृतापीति**। परतस्त्ववादिनापीत्यर्थः। विरोध्युपस्थापकसामग्र्यसमवधानस्य प्रामाण्यग्रहणकारणत्वे हि दोषः। गमनशक्तस्य गजस्य गोक्षुरकापसा[2]रणस्येव प्रयोजकत्वे तु न दोष इति भावेनोक्तं—**प्रयोजकतेति** ॥ १ ॥ पूर्वं फलोपधानापेक्षया प्रयोजकविशेषणोक्त्या निरुक्तिः कृता अधुना तु तादृशविशेषणत्यागेन प्रका[3]रान्तरमाह—**यद्वेति**। सार्वत्रिकसार्वकालीनप्रामाण्यस्वतस्त्वलाभाय वाऽऽह—**यद्वेति**। नन्वेवं स्वतस्त्वस्याप्रतिबद्धसाक्षिवेद्यत्वरू[4]पत्वे "ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव—विसंवादलक्षणात्परतोऽपवादादप्रामाण्यं च गृह्णाति" इति तत्त्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वविरोध इत्यतस्तदनुरोधेन वा पक्षान्तरमाह—**यद्वेति**। अत्र योग्यत्वमित्युक्त्या यथोक्त[5]विशेषणेनापि साक्षिज्ञानेन प्रतिबन्धदशायां प्रामाण्याग्रहाद्बाध इति शङ्का; साक्षीत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यं घटज्ञानविषयकज्ञानं प्रति तथा ज्ञानांशालौकिकं सामान्यप्रत्यासत्ति-

---

[1] ग्रहे—**मु. च.**　[2] सारक.—**आ**　[3] पक्षा.—**आ. मु.**　[4] पक्षे.—**मु.**

[5] प्रतिबन्धस्थले यथोक्तविशेषणेनापि साक्षिणाप्रामाण्या ग्रहात्.—**मु.**

योग्यत्वं च साक्षिनिष्ठां सहजां ग्रहणशक्तिं प्रति [1]स्वविषयज्ञानद्वाराऽवच्छेदकत्वम् । एवं च प्रति-

जन्यं ज्ञानं च प्रति प्रामाण्यस्य कदाप्यविषयतया योग्यत्वं [2]नेति बाध इति शङ्का; ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घट-ज्ञानं गृह्णता साक्षिणा पटज्ञानप्रामाण्यस्य कदाप्यग्रहेण योग्यत्वं [3]नेति बाध इति शङ्का च निरस्तेति पूर्ववद्युक्तमिति भावः । अत्रापि ज्ञानपदं पूर्ववत्स्वरूपेन्द्रियभ्रमनिरासाय । साक्षित्वमपि व्यवसाय-प्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया तद्विषयकप्रत्यक्षत्वरूपं वा ज्ञानांशे लौकिकप्रत्यक्षत्वरूपं वाऽनुव्यवसायत्वमेवेति भाव । अत्रापि पूर्वत्रैव ग्राह्यप्रामाण्याश्रयेत्यंशकृत्यं बोध्यम् । नन्वत्र स्वाश्रयज्ञानग्रा हकग्राह्यत्वयोग्यत्वं स्वतस्त्वमित्युक्तं स्यात्; तच्चाप्रामाण्यस्याप्यस्ति । न च तत्र ज्ञानं साक्षिवेद्यमप्रामाण्यं त्वनुमेयमिति न दोष इति युक्तम् । प्रथममप्रामाण्यानुमित्यसंभववादे विसंवादाहितशक्तिकेन साक्षि-णैवाप्रामाण्यग्रहणस्य वक्ष्यमाणत्वादित्यतो वा; साक्षिविषयत्वयोग्यत्वं यदि साक्षिजन्यव्यवहारयोगि[4]त्वादिरूपं तदैतत्फलोपधानपर्यवसन्नमिति न प्रतिबन्धकालीनप्रामाण्यस्वतस्त्वलाभ इत्यतो वाऽऽह-**योग्यत्वं चेति सहजां**-स्वाभाविकीं विषयीकरणशक्तिं प्रति स्वस्य साक्षिणस्तच्छ-क्तेर्वा यो विषयो ग्राह्यप्रामाण्याश्रयरूपं ज्ञानं तद्वाराऽवच्छेदकत्वं—विषयतया व्यावर्तकत्वम् । ज्ञानग्रहणशक्तिरितिवत्प्रामाण्यग्रहणशक्तिरिति व्यवहारापादकत्वमेव प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वमित्यर्थः । साक्षि-शक्तिर्ज्ञानद्वारैव तन्निष्ठप्रामाण्यं गृह्णाति । न साक्षात् । यथा प्रत्यक्षं व्यक्तिद्वारैव जातिं न साक्षादिति **स्वविषयज्ञानद्वारेत्युक्तम्** ।

[1] प्रामाण्यस्य.—ख. [2] च.—कुं. [3] च.—कुं. [4] ग्या.—कुं.

बन्ध[1]दशायामपि करतलादौ दाहयोग्यतावत् प्रामाण्ये ग्रहणयोग्यतास्त्येव । तथा च प्रामाण्यग्रहणशक्तेः सहजत्वात् प्रामाण्यग्रहणस्यौत्सर्गिकत्वरूपस्वतस्त्वसिद्धिः । उक्तं च टीकाकारैः "साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः ।

ज्ञानग्राहकैकशक्तिविषयत्वं प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वम् । नैतदप्रामाण्येऽस्ति । भिन्नशक्तिविषयत्वादित्यग्रे व्यक्तम् । गुरुपादास्तु—स्वपदेन प्रामाण्यम् । बहुव्रीहिसमासः । स्वविषयकं यज्ज्ञानं साक्ष्येव । साक्षिनिष्ठशक्तिं प्रति प्रामाण्यस्य न साक्षाद्विषयत्वमित्यतः स्वविषयज्ञानद्वारेत्युक्तमित्याहुः । परमते शक्तेरप्रसिद्धावपीदं स्वमतासाधारणमिति वा परेणापि शक्तिमङ्गीकारयिष्यामीति वा ज्ञानग्रह[2]णसामग्रीमात्रं प्रति स्वविषयज्ञानद्वारावच्छेदकत्वमिति वा ज्ञानग्राहकतावच्छेदकधर्मावच्छिन्नग्राहकताकत्वं वा तदर्थ इति भावः । नन्वेतावतापि कथं प्रतिबन्धदशापन्न [3]ज्ञानप्रामाण्यस्य स्वतस्त्वलाभः येन सर्वप्रामाण्यानां स्वतस्त्वं स्यादत्यत आह—**एवं चेति** । योग्यतारूपे स्वतस्त्वे सतीत्यर्थः । योग्यत्वस्योक्तरूपत्वे सतीति वार्थः—**दाहेति** । दाहविषयत्वयोग्यतावदित्यर्थः । द्वितीयनिरुत्क्याऽन्यदप्यनुकू[4]लितमित्याह—तथाचेति । उक्तरूपयोग्यत्वगर्भनिरुक्तौ सत्यामित्यर्थः—**औत्सर्गिकत्वेति** । "ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव" इति तत्त्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वेत्यर्थः—**उक्तं चेति** । प्रामाण्यस्य सहजशक्तिविषयत्वं प्रति-

[1] बन्धक.—मु. च. छ.
[2] ग्राहक.—मु.
[3] पुस्तकेनास्ति.—मु.
[4] लं.—मु.

किं तु प्रतिबद्धो ज्ञानमात्रं गृहीत्वा [1]तत्प्रामाण्यग्रहणस्य नेष्टे" इति ॥ २ ॥ यद्वा—उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानविषयत्वनैयत्यं स्वतस्त्वम्। तत्र प्रामाण्याविषयकज्ञानाभिन्नेत्युक्तया

बन्धस्थले योग्यतास्तीत्येतच्चोक्तं तत्वनिर्णयटीकायामित्यर्थः । कारणान्तरोपनिपातेन मानसापराधेन प्रतिबद्ध–इत्येवंरूपेण तत्र पाठेऽप्ययमेकदेशानुवाद इत्यदोषः ॥ २ ॥ प्रौढ्या स्वतस्त्ववादिमात्रसाधारणं पक्षान्तरमाह––यद्वेति । तत्तज्ज्ञानप्रामाण्यस्येत्यनुषङ्गः ; साध्ये ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेति ग्राह्यम् । स्वतस्त्ववादिनो [2]ह्यनेके । ग्रन्थकर्तैकः । भट्टो गुरुर्मुरारिमिश्र इति च त्रयः । [3]मायावाद्यादयो[3] वेदान्ति[3]नश्च । तत्र भट्टो ज्ञानातीन्द्रियत्ववादी । गुरुर्ज्ञानमात्रस्वप्रकाशत्ववादी । मिश्रस्तु न्यायमत इवास्वप्रकाशानुव्यवसायवादी । तत्रोभयेत्यस्य सिद्धान्तितार्किकोभयेति भट्टतार्किकोभयेति गुरुतार्किकरूपोभयेति मिश्रतार्किकोभयेति मायिता[4]र्किकोभयेत्येवंरूपेणेत्यर्थः । एकदाऽनेकैः सह विवादायोगात् । उभयसिद्धं यत्प्रामाण्याविषयकं ज्ञानं प्रामाण्याविषयकत्वेनोभयसंमतं यज्ज्ञानं अयं घट इत्यादिरूपं ज्ञानं तद्भिन्नं ग्राह्येत्यादिरूपं च यज्ज्ञानं सिद्धान्ते प्रागुक्तरूपसाक्षिज्ञानं भट्टमते ज्ञानानुमितिरूपं गुरुमते स्वप्रकाशघटादिज्ञानं मिश्रमते तदनुव्यवसायः । तेन गृह्यत एवेत्येवंरूपं तद्विषयत्वनैयत्यं तत्तन्मते स्वतस्त्वमित्यर्थ. । न च गुरुमते सर्वज्ञानयाथार्थ्यस्वप्रकाशत्वयोरुपगमेन प्रामाण्याविषयकं ज्ञानं नास्त्येवेति शङ्क्यम् । इदं ज्ञानमप्रमाणमित्याद्यप्रामाण्या-

[1] प्रामाण्य.–मु. छ. "तत्" इति नास्ति.–घ. [2] हि चत्वारः.–कुं.
[3] नास्ति.–कुं [4] नास्ति.–कुं.

घटोऽयमित्यादिघटादिविषयकप्रत्यक्षज्ञानं प्रति ज्ञानं गुण इत्यादिशब्देन घटज्ञानमित्यादिशब्देन च जन्यं[1] ज्ञानविषयक ज्ञानं प्रति प्रतिबद्धानुव्यव-

रोपस्थले ज्ञानस्य प्रामाण्याविषयकत्वस्य गुरुतार्किकसंमतेः । आरोपस्तु गुरुमते इच्छास्थस्य व्यधिकरणप्रकारकत्वरूपाप्रामाण्यस्यासंसर्गाग्रहो न्यायमते विशिष्टज्ञानमित्यन्यदेतत्। अत्र ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्तया तदंश एवोक्तरूपज्ञानभिन्नत्वस्याभिमतत्वाज्ज्ञानविषयकं ज्ञानं प्रमेति ज्ञानस्याद्यज्ञाने प्रामाण्याविषयकत्वेपि ग्राह्यप्रामाण्याश्रयज्ञाने प्रामाण्याविषयकभिन्नत्वसत्त्वान्न दोषः । प्रामाण्यपदं ग्राह्यतत्तत्प्रामाण्यपरं वा । तथाच यथान्यासेनैवोक्तस्थले न दोषः । अत्र नञ्द्वयाप्रवेशेनोभयसिद्धप्रामाण्यविषयकज्ञानविषयत्वनैयत्यमित्युक्ते तादृशानुमित्यादिना सिद्धसाधनम् । अतोऽविषयकभिन्नेत्युक्तिः । अत्राद्यज्ञानपदं यथोक्तरूपघटादिभिन्नेन घटज्ञानादिना प्रामाण्याग्रहाद्बाध इति शङ्कानिरासाय । अन्त्यं तु तादृशज्ञानभिन्नघटादिविषयत्वाभावेन बाध इति शङ्कानिरासायेति व्यक्तमिति शिष्टपदकृत्यान्याह—**तत्रेति** । प्रामाण्याविषयक ज्ञानभिन्नेत्यनुक्त्वोभयसिद्धज्ञानविषयत्वनैयत्यमित्येतावत्युक्ते सति प्रष्टव्यं—उभयसिद्धज्ञानपदेन किं प्रत्यक्षज्ञानमभिमतं उत शाब्दं अथानुव्यवसायरूपम्? द्वितीयेऽपि किं ज्ञानविषयकं विषयालिङ्गितज्ञानविषयकं वेति विकल्पान्वा; विषयग्राहिज्ञानमिति वा ज्ञानग्राहिज्ञानमिति वा उभयग्राहि ज्ञानमिति वा उभयग्राह्यनुव्यवसायरूपप्रत्यक्षं वेति विकल्पान्वा हृदि निधाय क्रमेण निराह—**घटोयमित्यादिना** । प्रत्यक्षज्ञानं प्रतीत्यादेः प्रामाण्यस्याविषयत्वादित्यन्वयः । गुरुमते घटोयमिति ज्ञानेनापि

[1] जन्य.—**मु. च.**

सायं प्रति च स्वतस्त्वपक्षेपि प्रामाण्यस्याविषयत्वा[1]-द्विषयत्वनैयत्यसाधने बाध इति शङ्का निरस्ता। उक्तस्य त्रिविधस्यापि ज्ञानस्य प्रामाण्याविषयक-त्वेन तद्भिन्नत्वाभावात्। उभयसिद्धेत्युक्तया न्या-यमतेऽ[2]प्रतिबद्धस्याप्यनुव्यवसायस्य प्रामाण्याविष-य[3]कत्वेन तद्भिन्नत्वाभावात्सिद्धान्त्यभिप्रेतस्याप्रति-बद्धानुव्यवसायं प्रति विषयत्वस्यासिद्ध्याऽर्थान्त-

प्रामाण्यग्रहादिदं ज्ञानमप्रमाणमित्यादिज्ञानं प्रतीति ग्राह्यम्। शङ्कानिरासं व्यनक्ति—**उक्तस्य त्रिविधस्यापीति**। यत्तु—घटज्ञानमिति शब्दजन्यज्ञा-नेन घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं गृह्यत इति; तत्त्व-पदार्थत्वादवाक्यार्थत्वादयुक्तम्। प्रतिबद्धानुव्यवसायं प्रतीत्यत्र गुरुमते इदं ज्ञानमप्रमाणमित्यादिप्रतिबद्धज्ञानं प्रतीति भट्टमते प्रतिबद्धज्ञाना-नुमितिं प्रतीत्यपि ध्येयम्। **उभयसिद्धेत्युक्त्येति**—प्रामाण्याविषयकेत्या-दावुक्ते सत्यन्यतरसिद्धं प्रामाण्याविषयकं यदप्रतिबद्धानुव्यवसायरूपं ज्ञानं तद्विषयत्वमादाय प्रामाण्यस्य स्वतस्त्वं सिद्धान्ते न सिध्येत्। तस्य प्रामाण्याविषयकभिन्नत्वाभावात्। उभयसिद्धेत्युक्तौ अप्रतिब-द्धानुव्यवसायस्य प्रामाण्याविषयकत्वेनोभयसिद्धत्वाभावादुभयसिद्धता-दृशज्ञानभिन्नत्वमस्त्येवेति नार्थान्तरत्वदोष इत्यर्थः। अनुव्यवसाय-स्येत्युपलक्षणम्। अप्रतिबद्धज्ञानानुमितेरप्रतिबद्धस्वप्रकाशज्ञानस्येत्यपि ध्येयम्। एवमग्रेपि। अप्रतिबद्धत्वं च प्रामाण्यविरोध्युपस्थितितत्सामग्र्य-समवहितत्वम्। शङ्कानिरासप्रकारं व्यनक्ति—**अप्रतिबद्धेति**। उभयसि-द्धादित्यादेः प्रामाण्याविषयकत्वेनोभयसिद्धाद्भिन्नत्वसंभवादित्यर्थः॥

[1] यत्वेन.—मु. च. छ. [2] मतेप्य.—क. [3] यत्वेन.—छ.

रमिति शङ्का परास्ता[1]। अप्रतिबद्धानुव्यवसायस्य न्यायमते प्रामाण्याविषयकत्वेपि मन्मते तदभावेनोभयसिद्धात्प्रामाण्याविषयकाद्भिन्नत्वसंभवात्। नैयत्यमित्युक्त्या न्यायमते प्रामाण्यस्यैवंविधां प्रामाण्यानुमितिं प्रति क्वचिदनुव्यवसायं प्रति च विषयत्वात्सिद्धसाधनमिति शङ्का व्युदस्ता। अत्राद्यं पक्षद्वयं स्वमतासाधारणम्। तृतीयं तु मीमांसकादिमतसाधारणमिति ज्ञेयम्। एतदेव पक्षत्रयमभिप्रेत्योक्तं सुधायां "ज्ञानगतयाथार्थ्यस्य ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वं" इति। अत्राद्ये[2] पक्षे सुधा[3]स्थेन ज्ञानग्राहकशब्देन ग्राह्यप्रामाण्याश्रयत-

---

एवंविधामिति। उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानरूपां इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वादित्यनुमितिं प्रति वक्ष्यमाणादिशा स्मृत्युपनीते व्यवसाये स्मृत्युपनीतप्रामाण्यावगाह्यनुव्यवसायं गृहीतप्रामाण्यकज्ञानसजातीयज्ञानगोचरानुव्यवसायं च प्रति॥ अत्रेति—उक्तस्वतस्त्वनिरुक्तित्रयमध्य इत्यर्थः॥ स्वमतेति—तार्किकमतसाधारण्येपि मीमांसकत्रितयसाधारणं नेत्यर्थः। मीमांसकादीत्यादिपदेन मुरारिमिश्रः सिद्धान्ती मायावादिप्रभृतिर्वा ग्राह्यः। उक्तपक्षत्रयं सुधावाक्यारूढं करोति—एतदिति। उक्तमिति॥

"प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि"

इति जिज्ञासानयानुव्याख्यानव्याख्यावसर उक्तमित्यर्थः। तद्व्यनक्ति—अत्रेत्यादिना।

---

[1] आपास्ता.—च. छ. निरस्ता.—ग. [2] अत्राद्य.—मु. च. [3] सुधायाम्.—क.

तज्ज्ञानविषयकसाक्षिज्ञानं ग्राह्यशब्देन तद्विषयत्वं मात्रपदेन[1] कात्स्न्यर्यपरेण तन्नियमः अवधारणपरेण प्रतिबद्धव्यवच्छेदश्च विवक्षितः। द्वितीय[2]पक्षे ग्राह्यशब्देनोक्तसाक्षिज्ञानविषयत्वयोग्यता अवधारणपरेण मात्रपदेन[3] ज्ञानत्वग्रहणशक्तिवत्प्रमात्वग्रहणशक्तेरपि सहजत्वं विवक्षितम्। तृतीय[4]पक्षे ज्ञानग्राहकशब्देन साक्षितदितरसाधारणं ज्ञानम् मात्रशब्देनावधारण[5]परेणोभयसिद्धप्रामाण्याविषयक-ज्ञान[6]व्यवच्छेदः, कात्स्न्यर्थेनाप्रतिबद्धसर्वानुव्यवसायसंग्रहश्च विवक्षित इति ज्ञेयम् ॥ ३ ॥

मात्रपदस्य व्यर्थत्वमुपेत्याह—**कात्स्न्यर्थेत्यादि**। यावन्तिज्ञानग्राहकाणि तावद्भिर्ग्राह्यत्वोक्तौ ज्ञानग्राहकेण गृह्यत एवेति नियमलाभादिति भावः॥ **प्रतिबद्धेति**। ज्ञानग्राहकेणैव गृह्यत इत्युक्ते न तु विरोधिसामग्रीसमवहितेनेत्यर्थलाभादिति भावः। अर्हार्थण्यत्प्रत्ययान्तत्वमुपेत्याह—**ग्राह्यशब्देनेति**। **प्रमात्वेत्यादि**। ज्ञानग्राहकमात्रेणेत्यस्य ज्ञानग्राहकेणैव न त्वधिकेनेत्युक्तौ प्रमात्वग्रहणशक्तेरपि सहजत्वलाभादिति भावः। यद्यपि शक्तेरेकत्वमेव लभ्यते। तथापि प्रतिबन्ध[7]स्थले साक्षिणः प्रामाण्यग्रहणशक्तेः प्रतिबन्धेऽपि न ज्ञानत्वग्रहणशक्तेरिति शक्तिद्वित्वमुपेत्य सहजत्वं विवक्षितमित्युक्तम्—**तदितरेति**। साक्षीतरस्वप्रकाशा[8]नुमित्यनुव्यवसायरूपमित्यर्थः। नैयत्यलाभ[9]प्रकारमाह—**कात्स्न्यर्थेनेति**। **अप्रतिबद्धेति**। विरोधिसामग्र्यसमवहितज्ञानगोचरसर्वज्ञानग्रहश्च विवक्षित इत्यर्थः॥ ३ ॥

---

[1] शब्देन–छ. क. [2] ये.–कुं. [3] शब्देन.–कुं. छ. क. [4] ये.–कुं. [5] णार्थेनो–कुं. छ. क. [6] ज्ञानपदं न.–छ. क. [7] द्ध.–कुं. [8] अनुमितिपदं न.–कुं.–इ. [9] भाया.–कुं.इ.

स्वमते ज्ञप्तौ स्वतस्त्व निरुक्तिः ॥ १ ॥

यत्तु मणावुक्तम्। "तदप्रामाण्याग्राहकयावज्ज्ञान-ग्राहकसामग्री ग्राह्यत्वं स्वतस्त्वं तदभावश्च[1] परतस्त्वम्" इति तन्न ।

स्वमते [2] ज्ञप्तौ स्वतस्त्वनिरुक्तिः ॥ १ ॥

मीमांसकत्रितयसाधारणीं परोक्तस्वतस्त्वनिरुक्तिमनूद्य निराह—**यत्त्विति**। मणिग्रन्थे "ज्ञानप्रामाण्यमिति पूर्ववाक्यनिर्दिष्टं ज्ञानं तदिति परामृश्यते। तत्र ग्राह्यप्रामाण्याश्रयेऽयं घट इत्यादिज्ञाने अप्रामाण्याग्राहिका यावती ज्ञानग्राहिका सामग्री गुरुमते घटमहं जानामीत्येवमाकारस्वप्रका[3]शव्यवसायजनिका चक्षुर्घटसंयोगादिरूपा मिश्रमते तदनुव्यवसायजनकमनःसंयोगादिरूपा भट्टमते घटो ज्ञानविषयः ज्ञाततावारत्वादित्याद्यनुमितिजनकव्याप्तिज्ञानादिरूपा। तावत्या ग्राह्यत्वं स्वतस्त्वमित्यर्थः। अत्र निरुक्तौ तत्रेत्युक्त्या यत्र शुक्तिरजतादिज्ञाने विसंवादादिलिङ्गेनाप्रामाण्यानुमित्यनन्तरमिदमप्रमात्वेन जानामीत्यनुव्यवसायः तत्राप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपाप्रामाण्यघटितानुमितिनिष्ठप्रामाण्यस्य प्रथमज्ञाननिष्ठाप्रामाण्यग्राहिणैवानुव्यवसायेन ग्रहणाद्बाध इति शङ्का अप्रामाण्याग्राहकेत्युक्त्या इदं ज्ञानमप्रमेत्यादिव्यवसायाप्रामाण्यग्राहकसामग्र्या तज्ज्ञाननिष्ठस्यप्रामाण्यस्याग्रहणा[4]द्बाध इति शङ्का यावदित्युक्त्या न्यायमते ज्ञानग्राहकानुमितिसामग्र्या क्वचिदनुव्यवसायेन च प्रामाण्यग्रहात्सिद्धसाधनमिति शङ्का निरस्ता। विधिकोटौ बाधवारकाणां तदभावकोटौ सिद्धसाधनतावारकत्वं

[1] 'च' इति नास्ति—छ. [2] 'ज्ञप्तौ' इति नास्ति—आ. इ. [3] शानु—कुं.

तद्वारकस्य च बाधवारकत्वं ज्ञेयम् । गुरुमते सर्वज्ञाननां प्रमात्वेपि तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्येच्छायां प्रसिद्धस्येदं ज्ञानमप्रमेत्यादौ स्मरणसंभवेनागृहीतासंसर्गरूपाप्रामाण्यग्रहसंभवात्तन्मतेप्यप्रामाण्याग्राहकपदवैयर्थ्यं नेति ॥ अत्र यदुक्तं प्रामाण्यघटकाप्रामाण्यग्राहिणा ज्ञानेन प्रामाण्यग्रहणाद्बाधवारणाय तत्र ग्राह्यप्रामाण्याश्रयज्ञाने इत्यर्थकं तत्पदमिति तन्न । इमौ वह्नी इति वह्निद्वयगोचरैकज्ञानविषयकानुव्यवसायादिरूपज्ञानेन दोषवशादन्यतरांशाप्रामाण्यग्राहिणा[1]प्यन्यतरांशे प्रामाण्यग्रहणेन बाधात् । यत्तु तदित्यस्य तत्र तदंशे ग्राह्यप्रामाण्याश्रयज्ञानांशे अप्रमामाण्याग्राहकेत्यर्थत्वान्न दोष इति तन्न । तथापि तदंशे भावरूपाप्रामाण्याग्राहिणापि नेदं ज्ञानं[2] प्रमाणमिति तदंशे प्रामाण्याभावावगाहिना प्रामाण्याग्रहेण बाधादिति मूलोक्तदोषग्रासात् । यदपि तत्पदं ग्राह्यपरं [3] सत्प्रामाण्यपदेनान्वीयमानं ग्राह्यप्रामाण्यविरोधीत्यर्थलाभार्थमतो न दोष इति तदपि न । तथात्वेऽतत्प्रामाण्येति निर्देशापातेन यथोक्तनिर्देशे तत्पदस्य प्रामाण्यपदेनासामर्थ्यात् । गुरुमते इदं ज्ञानमप्रमेत्यादावप्रमेति स्मृतेरप्रामाण्यग्राहकत्वेपि इदं ज्ञानमितिग्रहानुकूलाप्रामाण्यस्मृतिप्रतिबन्धेन प्रामाण्या[4]ग्रहेण बाधापत्त्योक्तस्वतस्त्वनिरुक्ते र्गुरुमतसाधारण्यायोगाच्च । न चोत्पत्तिप्रामाण्यग्रन्थे मणिकृतैव "प्राभाकरास्त्वि" त्यादिना गुरुमते संशयानुपपत्त्युपपादनप्रस्तावे इदं ज्ञानं प्रमा न वेत्त्यादावपि प्रामाण्यग्रहोस्तीत्युपेत्य संशयस्यान्यविषयत्वोपपादनात्तादृशस्थलेपि प्रामाण्यग्रहसद्भावान्न बाध इति शङ्क्यम् । तथात्वे तन्मते तदप्रामाण्या-

[1] 'प्य' इति नास्ति-कुं. [2] ज्ञानपदं न-अ. [3] सदप्रामाण्य-मु. अ. [4] ग्रहेण-अ.

तदभाववति तत्प्रकारकत्वरूपाप्रामाण्याग्राहकस्यापि तद्वति तत्प्रकारकत्वरूपप्रामाण्यात्यन्ताभावविषयकस्य ज्ञानज्ञानस्य प्रामाण्याग्राहकत्वेन बाधात् ।

अप्रामाण्यपदेन प्रामाण्यविरोधिविवक्षायामपि

ग्राहकपदवैयर्थ्यापत्तेः । तादृशस्थले प्रामाण्यग्रहमुपेत्याग्राहकपदेन ग्राहकसामग्र्यसमवधान विवक्षायां च मिश्रादिमतेऽप्रामाण्यग्रहस्थले तत्सामग्र्यभावेन तदसमवहितेनापि ज्ञानग्राहकेण तत्र प्रामाण्याग्रहाद्बाध[1]एवेत्यादिदूषणं स्फुटत्वादुपेक्ष्योक्तनिरुक्तौ यावज्ज्ञानविषयकज्ञानविषयत्वमित्येव सामंजस्ये ग्राहकसामग्रीत्युक्तिवैयर्थ्यात्[2]द्वौरवाच्चेत्युपेत्य ग्राहकसामग्रीपदत्यागेन ज्ञानपदेन[3] वानुवदन्यथाश्रुताप्रामाण्यपदार्थे तावद्दोषमाह—**तदभाववतीति । अप्रामाण्याग्राहकस्यापीति ॥** उक्तविधभावरूपाप्रामाण्याविषयकस्यापीत्यर्थः । प्रामाण्यात्यन्ताभावेत्युपलक्षणम् । अप्रामाण्यव्याप्यप्रामाण्यात्यन्ताभावव्याप्यविषयकस्येत्यपि ज्ञेयम्[4] । तेन नञोऽभावार्थविवक्षापि प्रत्युक्ता ध्येया ।

ननु नञो विरोधार्थत्वे प्रामाण्याभावतद्व्याप्याप्रामाण्यतद्व्याप्यानां चतुर्णामप्यप्रामाण्यपदेन प्रामाण्यविरोधिवाचिना ग्रहणसंभवान्नोक्तदोषः । विरोधित्वस्य प्रामाण्यनिश्चयप्रतिबन्धकज्ञानविषयत्वरूपत्वादित्याशयेन पक्षधराद्युक्तविवक्षामनूद्यनिराह—**अप्रामाण्येति** । अपिपदेनैतत्सूचयति। यद्यपि ग्राह्यप्रामाण्यविरोधिलाभो नैतावता भवति । तत्पदमिलितेनाप्यसामर्थ्यादलाभ एव । विरोधितामात्रत्वप्रयोजकम् । तथाप्यभ्युपगमोय-

[1] बाध इत्यादि–कुं. [2] गौरवपदं नास्ति–अ. [3] नैवा–कुं [4] ध्येयम्–कुं.

ज्ञानं गुण इत्यादिवाक्यजन्यस्य ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्तिजन्यस्य च ज्ञानज्ञानस्य प्रामाण्याविषयक[1]त्वाद्बाधतादवस्थ्यात्[2]। ज्ञानग्राहकपदेन स्वविषयघटितत्वेन ज्ञानग्राहकत्वविक्षायामपि घटज्ञानमित्यादिशब्दजन्यस्य[3] ज्ञानज्ञानस्य प्रामाण्याविषयकत्वेन बाध एव।

मिति—**इत्यादिवाक्येति**। ज्ञानं समवेतं ज्ञानममूर्तमित्यादिवाक्यजन्यस्य गुणत्वादिप्रकारकज्ञानविशेष्यकस्येत्यर्थः। ज्ञानज्ञानस्येत्यन्वयः। साक्षाज्ज्ञानत्वव्यापकधर्माप्रकारकेत्यपि ग्राहकविशेषणमस्त्वित्यत उक्तम्—**ज्ञानं प्रमेयमितीति**। ज्ञाने प्रमेयत्वं ज्ञातं सत् प्रत्यास[4]त्तीभूय स्वविशेषणतासंबन्धेन स्वाश्रयभूतानि सर्वज्ञानरूपवस्तून्युपस्थापयतीति प्रमेयत्वप्रकारकज्ञानविशेष्यकज्ञान[5]ज्ञानस्य प्रमेयत्वाश्रयज्ञाने प्रामाण्याविषयकत्वादित्यर्थः। उक्तदोषपरिहाराय[6] शङ्कते—**ज्ञानग्राहकपदेनेति**। **प्रामाण्याविषयकत्वेनेति**। अपदार्थत्वादवाक्यार्थत्वाच्च घटत्ववद्विशेष्यकत्वादेस्तेन सर्वथा भानाभावादिति भावः। यत्तु शब्दानुपस्थितमपि प्रामाण्यमन्वयितावच्छेदकतया घटज्ञानमिति ज्ञाने भातीति पक्षधरोत्प्रेक्षितं मतं [7]तत्तेनैव दूषितमित्युपेत्योक्तम्—**बाध एवेति**। विवृतं [8]चैतद्गुरुपादैः। ननु शब्दान्यत्वे सति स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षास्त्विति चेन्न। तथाप्ययं घटज्ञानवान् तद्व्यवहारवत्वात् इत्याद्यनुमानजन्यज्ञानज्ञानस्यापि प्रामाण्याविषयकत्वेन बाधात्। ज्ञानं प्रमेति शब्दजन्यज्ञानस्य प्रामाण्याविषयकत्वापाताच्चेति भावः॥

[1] त्वेन–क. [2] स्थ्यम्–कुं. छ. क. [3] जन्यज्ञान–कुं. [4] त्तिरूपं–अ. [5] 'ज्ञान' इति नास्ति–कुं. [6] या–कुं. [7] त्तु–कुं. [8] च गुरु–कुं.

ननु ज्ञानग्राहकपदेन ग्राह्यप्रामाण्याश्रयज्ञानप्रकार-प्रकारकतया तत्प्रकारवद्विशेष्य[1]तया च तद्विषयत्वं विवक्षितम्। अत्र च विशेषणद्वयेन तवघटविशेष्यकं ज्ञानमिति, तव घटत्वप्रकारकं ज्ञानमिति च शब्दाभ्यां जन्ययोः घट[2]ज्ञानविषयकज्ञानयोः प्रामाण्याविषयकत्वाद्बाध इति शङ्काद्वयं क्रमेण निरस्तमिति चेदुच्यते। त्वदुक्तं यद्ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यतया च तद्विषयत्वं तत्प्रामाण्यविषयकत्वमेव। स्वप्रकारवद्विशेष्यकत्व-

नन्वस्तु तर्हि स्वाश्रयप्रकारप्रकारकतया स्वाश्रयविशेष्यविशेष्यकतया स्वाश्रयग्राहकग्राह्यत्वमिति यज्ञपतिनोक्तं मतम्। तत्र यद्यपि यथाश्रुते घटत्वप्रकारकं किंचिद्विशेष्यकं इति[3] ज्ञानेनापि प्रामाण्याग्रहात्स्वाश्रयप्रकारप्रकारकतया स्वाश्रप्रकारवद्विशेष्यकतयेति वाच्यम्। तत्रापि प्रकारवदित्यत्र प्रकारस्योपलक्षणत्वे प्रागुक्तदोषापत्त्या तत्प्रकारविशिष्ट[4]विशेष्यविशेष्यकतयेत्युच्यते। अतो न कोपि दोष इति भावेन शङ्कते—**नन्विति। तत्प्रकारवदिति।** तत्प्रकारविशिष्टविशेष्यकतयेत्यर्थः—**तद्विषयत्वम्।** व्यवसायविषयत्वम्। [5]अस्मिन्पक्ष इत्यादि वक्ष्यमाणदोषदार्ढ्याय दलद्वयकृत्यं व्यनक्ति—**अत्रचेति। विवक्षायामित्यर्थः।** किमेतद्वादिमते तद्वत्त्वरूपं वैशिष्ट्यमनुव्यवसायविषय एव नेति मतिरुत स्वातन्त्र्येण? आद्ये दोषमाह—**त्वदित्यादिना। स्वप्रकारवदिति।** स्वप्रकारविशिष्टेत्यर्थः। सिद्धसाधनाप-

[1] क-छ. कुं. [2] 'घट' इति नास्ति-कुं. छ. क. [3]घटत्वप्रकारककिंचिद्विशेष्यकं-कुं. [4] 'विशेष्य' इति नास्ति-कुं. 'धर्मि' इत्यधिकं-अ. [5] अ. पुस्तके नास्ति.

स्यैव प्रामाण्यरूपत्वात्। तथा च यावती प्रामाण्यविषयिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्युक्तं स्यात्। तथा चैतादृशस्वतस्त्वस्य परतस्त्वपक्षेपि सत्वात्सिद्धसाधनम्। एतदभावरूपपरतस्त्वसाधनेऽपसिद्धान्तश्च। न हि परतस्त्वपक्षे अनुव्यवसायाविषयोपि प्रामाण्यं प्रामाण्यानुमितेरप्यविषयः।

सिद्धान्तौ व्यनक्ति—**नहीति। प्रामाण्यमिति।** तद्वत्त्वादिरूपमित्यर्थः। वैशिष्ट्यमनुव्यवसायविषय एव नेति पक्षे तादृशानुव्यवसायविषयत्वमादाय सिद्धसाधनादिदोषाभावेपि इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् इत्यनुमितिसामग्रीरूपा यावती त्वदुक्तलक्षणा ज्ञानग्राहिका सामग्री तावत्त्यापि प्रामाण्यग्रहात्सिद्धमाधनतापसिद्धान्ताविति्यर्थः। अनुमितिविषयत्वोक्तौ तत्सामग्रीविषयत्वं सिद्धमेवेत्युपेत्य अनुमितेः इत्येवोक्तम्। न त्वनुमितिसामग्र्या अपीति। यद्वातेन सामग्रीत्युक्तावपि ग्राहकज्ञानेत्येव युक्तम्। न तु सामग्रीत्युपेत्यैवमुक्तम्। द्वितीये स्वातन्त्र्येण तद्वद्विशेष्यकत्वग्राहकत्वमिति मतम्, उत ग्राहकत्वमा[1]त्रमिति? आद्येप्येतदेवोत्तरम्—**त्वदुक्तमित्यादि।** प्रामाण्यविषयिका स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिविषयिकेत्यर्थः—**अनुव्यवसायाविषयोपि।** स्वातन्त्र्येणानुव्यवसायाविषयोपीत्यर्थः—**प्रमाण्यानुमितेः** स्वातन्त्र्येण तद्वत्त्वविशिष्टधर्मिविशेष्यकत्वादिविषयिकानुमितेरपीत्यर्थः। द्वितीयेपि ग्राह्यमित्यत्र ग्राह्यत्वमात्रमभिमतम् उत स्वातन्त्र्येण? आद्ये तादृशानुव्यवसायविषयत्वमादायापि सिद्धसाधनतापसिद्धान्तौ स्पष्टौ। द्वितीयेतूक्तरूपानुव्यवसायं प्रति प्रामाण्यस्य न्यायमते स्वातन्त्र्येणा-

[1] मात्रं—कुं.

अस्मिन्पक्षेऽप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यं च ।

विषयतया यावतीति ज्ञानग्राहकसामग्रीविशेषणेनैव सिद्धसाधनापत्तेर्दोषान्तरमाह—**अस्मिन्पक्ष इति** । ग्राह्यत्वमित्यत्रैव स्वातन्त्र्येण ग्राह्यत्वमिति पक्ष इत्यर्थः । तथा अस्मिन्पक्ष इत्यस्य स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिग्राहिकेति पक्ष इत्यप्यर्थमुपेत्य प्राचीनपक्षेप्ययं दोषो बोध्यः । तद्वद्विशेष्यकत्वग्रहे तदभाववद्विशेष्यकत्वरूपाप्रामाण्यग्रहासंभवेनोक्तविवक्षया तद्वारणादिति भावः॥ ननु तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यग्राहिकापि तद्वद्विशेष्यकत्वग्राहिकैव । तत्प्रकारकत्ववित्तिवेद्यत्वात्तद्वद्विशेष्यकत्वस्य । तद्वद्विशेष्यकत्वाभाने तत्प्रकारकत्वग्रहणायोगादितिचेत् तर्हि अप्रामाण्याग्राहकत्वरूपविशेषणदानेऽपि तव घटत्वप्रकारं ज्ञानमिति शब्दजन्यज्ञानेनाप्रामाण्याग्राहकेण त्वदुक्तदिशा प्रकारवित्तिवेद्यतया तद्वद्विशेष्यकत्वग्राहिणापि प्रमाण्याग्रहणाद्बाधापत्तेः । यदि चात्र तद्वत्त्वेन विशेष्यस्याभानान्न बाधः । तर्हि अप्रामाण्यग्राहकसामग्र्यामपि तत्तुल्यम् । अत एव पूर्वं दलद्वयकृत्यं व्यक्तीकृतम् ॥

यदत्रोक्तं नरहरिणा "अप्रामाण्याग्रा[1]हकेत्यत्र नञ्व्यत्यासेनाप्रामाण्याभावग्रा[2]हकेत्यर्थे प्रामाण्यग्रा[3]हकेति पर्यवसानात् प्रामाण्यग्राहकयावज्ज्ञानग्राहकग्राह्यत्वं विधिकोट्यर्थ" इति तदपि "यावती प्रामाण्यविषयिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्युक्तं स्यात्" इति ग्रन्थकृदुक्त्यैव सिद्धसाधनादिदोषेण निरस्तं भवति । न च ग्राह्यपदेन स्वातन्त्र्येण ग्राह्यमित्यभिमतत्वाद्यावदित्युक्त्यैव सिद्धसाधनत्वदोषाभावः, तथात्वेऽनानुव्यवसायविषयत्वस्य न्यायमतेऽभावादिति वाच्यम् । नञो प्रामा-

1, 2, 3 हि-कुं.

ननु यया [1]ज्ञानग्राहकसामग्र्या ज्ञानग्रहार्थं यावदपेक्षितम् तावदेव विषयग्रहार्थमप्यपेक्ष्यते सैव सविषय[2]ज्ञानग्राहकसामग्री विवक्षिता ।

अनुव्यवसायसामग्री चैवं विधा । [3]तया व्यवसायग्रहेऽपेक्षितस्य व्यवसाय [4]संप्रयोगस्यैव तद्विषयघटग्रहेऽप्यपेक्षितत्वात् । 'घटज्ञानमिति शब्दस्तु ज्ञानग्रहे ज्ञानपदगतां शक्तिमपेक्षते । घटग्रहे तु घटपदगतां शक्तिमिति चे[5]न्न । तथा-

ण्याभावार्थकत्वे पूर्वपदेन समासायोगात्, नञ्द्वयवैयर्थ्यात्, तत्पदवैयर्थ्याच्चेतिध्येयम् । तदेतदाह—**अप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यमिति ।**

पक्षधरोक्तमाशङ्क्य निराह—**नन्विति । तावदेवेति ।** ज्ञानग्राहकत्वप्रयुक्तमेव यस्यां विषयग्राहकत्वं सैवेत्यर्थः । अस्मिन्मते च भ्रम इति पदजन्यज्ञानेन प्रामाण्याग्रहाद्बाधवारणायाप्रामाण्याग्राहकत्वविशेषणमर्थवत् । विषयोपरक्तज्ञानग्राहकेण प्रमेति पदजन्यज्ञानेनोक्तरूपेण प्रमाण्यग्रहणात्सिद्धसाधनवारणाय—**यावदिति** विशेषणम् । बाधः सिद्धसाधनता च नेति क्रमेण व्यनक्ति—**अनुव्यवसायसामग्रीति ।** षष्ठीतत्पुरुषः । आत्ममनःसंयोगादिरित्यर्थः । स्वप्रकाशव्यवसायादिसामग्र्यपि ग्राह्या—**व्यवसायसंप्रयोगस्य ।** व्यवसायस्य मनसा सह संयुक्तसमवायरूपसंबन्धस्यैवेत्यर्थः । बाह्यार्थरूपविषयग्रहे व्यवसायरूपप्रत्यासत्तेरपेक्षाया इवानुव्यवसायजननेपि विषयता व्यवसा-

[1] यया सामग्र्या–कुं. छ. क. [2] क–कुं. छ. क. [3] तथाहि–छ. [4] संबन्धस्यैव–छ. [5] त्–क.

प्येकयैव शक्तया प्रकरणप्राप्तघटज्ञानपरामर्शेकेन तत्पदेन जनितज्ञानस्य प्रामाण्याविषयकत्वेन बाधतादवस्थ्यात् ।

नापि तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वं स्वतस्त्वम् । अस्मिंश्च पक्षे संभवमात्रं साध्यं न तु नियमः ।

यापेक्षायास्तुल्यत्त्वादित भावः । तत्पदेनेत्युपलक्षणम् तत्पदादिनेत्यर्थः ।

यदत्र मणिसारादावुक्तम् " असर्वनामत्वेनग्राहकविशेषणान्न दोष " इति तन्न । तथापि लक्षणया घटज्ञानोपस्थापकेन लाक्षणिकज्ञानपदेन प्रामाण्याग्रहाद्बाधात् । अलाक्षणिकत्वेनापि विशेषणे [1] तु घटज्ञाने ज्ञानपदं शक्तमिति भ्रमे सति तादृशेन ज्ञानपदेनापि प्रामाण्याग्रहाद्बाध एव । भ्रमाघटितत्वेनापि विशेषणे तु अप्रामाण्याग्राहकपदवैयर्थ्यम् । प्रमायामप्रामाण्यानुमानस्य व्याप्तिपक्षधर्मतान्यतरभ्रममूलत्वादेव तत्र बाधवारणात् ।

यत्तु इदं ज्ञानमप्रमाणमिति मनसाऽप्रामाण्यारोपस्थलेऽन्यत्र गृहीताप्रामाण्यस्मृतिसंभवेन तथा भ्रमाघटितयापि सामग्र्या प्रामाण्याग्रहाद्बाधवारणायाप्रामाण्याग्राहकेति विशेषणं [2] सार्थकमिति तन्न । तत्र ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकत्वरूपसविषयज्ञानग्राहकत्वस्याभावादेव बाधवारणात् । विस्तरस्तु गुरुटीकायाम् ।

साधारणं निरुक्त्यन्तरमप्यनूद्य निराह—**नापीति । तज्ज्ञानं** प्राब्धप्रामाण्याश्रयज्ञानम् । तद्विषयकं ज्ञानं गुरुमते तदेव । भट्टमते ज्ञाततालिङ्गक[3]तदनुमितिः । मिश्रमते त[4]दनुव्यवसायः । तदजन्यं

[1] 'तु' इति न–कुं. [2] सार्थकपदं न–आ. [3] कानु–कुं. [4] त्त–आ.

स्वतस्त्वपक्षेऽपि प्रामाण्यस्य तज्ज्ञानविषय[1]ज्ञान-जन्यानुमित्यापिग्राह्यत्वेन तदजन्यज्ञानस्यैव विषय इति नियमस्य तज्ज्ञानविषयकज्ञानाजन्येन घट-ज्ञानेनाप्यग्राह्यत्वेन गृह्यत एवेति नियमस्य [2] चासं-

यज्ज्ञानं तदेव । तद्विषत्वमित्यर्थः । अत्र ज्ञानाजन्येत्युक्त्याऽनुमिति-विषयत्वेन सिद्धसाधनतेति शङ्का, ज्ञानविषयकेत्युक्त्या गुरुमतेऽनुमि-त्यादिप्रामाण्यांशे भट्टमते मिश्रमते च सर्वत्र प्रामाण्यानुमित्यनुव्यव-साययोर्व्याप्तिज्ञानव्यवसायाभ्यां जन्यत्वेन बाध इति शङ्का, तदित्युक्त्या पुनरपि गुरुमते लिङ्गज्ञानस्य स्वप्रकाशत्वेन ज्ञानविषयकज्ञानत्वात्तज्जन्या-नुमितिप्रामाण्यांशे बाध इति [3] भट्टमते ज्ञाततालिङ्गकानुमितेर्ज्ञानविषय-व्याप्तिज्ञानजन्यत्वाद्बाध इति[3] मिश्रमतेप्यनुव्यवसायस्य व्यवसायविषय-कस्य तज्जन्यतया तन्निष्ठप्रामाण्यांशे बाध इति शङ्का निरस्ता[4] । भट्टमते सामान्यप्रत्यासत्तेरभावेन व्याप्तिज्ञानस्य ग्राह्यप्रामाण्याश्रयज्ञाना-विषयत्वात् । मतान्तरे तु व्यक्तम् । अत्राद्यज्ञानपदं तत्पदस्य तद्ग्रन्थे पूर्वनिर्दिष्टप्रामाण्यपरामर्शितया सिद्धसाधनत्ववारणाय । द्वितीयं तु व्यापारनुबन्धितया तज्ज्ञानविषयकैरात्मादिभिः प्रामाण्यज्ञानजनन[5]सिद्धिवारणाय प्रतिपत्त्यनुबन्धितया तद्विषयकत्वलाभार्थम् । तृताय-मपि व्यापारानुबन्धितयात्मादिभिरेव सिद्धसाधनतावारणाय प्रतिपत्त्य-नुबन्धितया विषयत्वलाभायेत्याहुः ।

ग्रन्थकर्तुः कुतो नियमो नाभिमत इत्यत आह—**स्वतस्त्वेति । तज्ज्ञानविषयकज्ञानजन्येति** । पक्षज्ञानजन्यत्वादनुमितेरिति भावः । **ग्राह्यत्वेन**—विषयीकार्यत्वेनेत्यर्थः । **अग्राह्यत्वेन**—अविषयीकार्यत्वेन ।

[1] क-कुं-क. [2] वा—छ. [3] इयं पङ्क्तिर्नेदृश्यते-मु. [4] व्युदस्ता-कुं आ. [5] प्र-कुं. आ.

भव[1] इति वाच्यम्। स्वतस्त्वपक्षे व्यवसायप्रामाण्यग्राहकस्यानुव्यवसायस्य व्यवसायविषयकेश्वरज्ञानजन्यतया तदजन्यज्ञान[2]त्वाभावेन बाधात्। परतस्त्वपक्षे तदजन्येश्वरज्ञानविषयत्वेन सिद्धसाधनाच्च। नापि तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं वा तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानविषयत्वं वा स्वतस्त्वम्। परतस्त्वपक्षेऽपि प्रामाण्यस्यैवं विधं

गृह्यत एव—विषयीक्रियत एवेत्यर्थः। किमिदं स्वतस्त्ववादिमात्रसाधारणम् उत निरीश्वरमीमांसकमात्रसाधारणम् निर्वचनम्? आद्य आह—**स्वतस्त्वपक्ष इति**। सिद्धान्ते साक्षिशब्दितानुव्यवसायज्ञानस्य नित्यत्वेपि प्रामाण्यविषयकत्वरूपविशिष्टवैषेण जन्यत्वादिति भावः। अन्त्य आह—**परतस्त्वपक्ष इति**। एवं रूपे स्वतस्त्वे त्वां प्रत्युच्यमाने ग्राह्यप्रामाण्याश्रयविषयं[3] यदीश्वरज्ञानं तदजन्यं तदेव। तद्विषयत्वेन त्वया सिद्धसाधनताया वक्तुं शक्यत्वादिति भावः। अयं च [4]दोषः प्राचीनपक्षेपि समः। यत्त्वीश्वरनिरासाभिप्रायेणैवं साध्यस्य मीमांसकेनोच्यमानत्वान्न सिद्धसाधनता दोष इति। तन्न। अर्थान्तरानिवारणादिति रुचिदत्तेनैवदूषितत्वात्। यज्ञपतिनोक्तविवक्षामनूद्य निराह—**नापीति**। सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम्। द्वितीयन्त्वीश्वरज्ञानमादाय सिद्धसाधनतानिरासार्थम्। एवमग्रे समानाधिकरणपदद्वयकृत्यं ध्येयम्। युगपदेव विवक्षाद्वयेपि दोषमाह—**परतस्त्वेति**। **एवंविधम्**। तज्ज्ञान-

[1] वात्–कं. [2] 'ज्ञान' इति न–कुं-छ-क. [3] कं–कुं. [4] दोषपदं नास्ति–आ.

सामान्यप्रत्यासत्तिजन्यं प्रमेयमिति यज्ज्ञानं तद्विषयत्वेन सिद्धसाधनात्। विषयपदेनप्रकारत्वविवक्षायामपि स्वतस्त्वपक्षेपि प्रामाण्यस्य सर्वं ज्ञानं गुण इति शब्दजन्यव्यवसायविषयकानुव्यवसायस्य सर्वज्ञानान्तर्भूतस्वविषयकव्यवसायजन्यत्वेन तदजन्यत्वाभावेनांशे बाधात्। एतदभावरूपपरत-

---

विषयकजन्यज्ञानाजन्य[1]जन्यरूपम्। तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणरूपम् चेत्यर्थः—**प्रमेयमिति**। प्रमेयत्वप्रकारकं प्रमेयविशेष्यकं यज्ज्ञानं तद्ग्राह्यप्रामाण्याश्रयविषयकं घटादिज्ञानरूपजन्यसमानाधिकरणज्ञानाजन्यं जन्यं[2] समानाधिकरणं प्रमेयत्वप्रकारेण प्रामाण्यविषयकं चेति तद्विषयत्वेन सिद्धसाधनमित्यर्थः। एतच्चोपलक्षणम्। निरीश्वरमते व्यर्थविशेषणत्व च बोध्यम्। एतेन समानाधिकरणेति विशेषणीयमिति शिरोमणिपक्षोपिप्रत्युक्तः। ननु प्रमेयमितिज्ञाने विशेष्यतया प्रामाण्य[3]स्य विषयत्वेपि न प्रकारतया। तथात्वेन विषयत्वं च निरुक्तौ विवक्षितम्। इत्यत आह—**विषयेति**। प्रामाण्यस्येत्यस्यानुव्यवसायेनेत्यत्रान्वयः। प्रामाण्यगोचरस्येत्यर्थः। गुणत्वप्रकारकसर्वज्ञानविशेष्यकशाब्दज्ञानानिष्ठप्रामाण्यग्राहकोनुऽव्यवसायो व्यवसायजन्यः। स च व्यवसायः सर्वज्ञानविषयको ज्ञानत्वेन स्वात्मानमपि विषयीकरोतीति तत्प्रामाण्यस्य तज्ज्ञानविषयकज्ञानजन्यज्ञानप्रकारत्वमेवास्ति। तदजन्यज्ञानप्रकारत्वं नेति सर्वं ज्ञानं गुण इति ज्ञाननिष्ठप्रामाण्यांशे बाध इत्यर्थः। सर्वज्ञानान्तर्भूतं च तत्त्वं चेति विग्रहः।

---

[1] एकं जन्यपदं न–आ. [2] न्यसा–आ. [3] ण्यवि–आ.

स्त्वसाधनेंऽशे सिद्धसाधनाच्च । न चैवंविध-व्यवसायप्रामाण्यस्यापक्षत्वान्न बाध इति वाच्यम्। सामान्ये[1] विप्रतिपत्तौ विशेषे [2]साध्यसाधनेऽ-र्थान्तरात् ।

एतेन तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्व-मेव स्वतस्त्वम् । न तु जन्यपदद्वयं वा समाना-धिकरणपदद्वयं वा प्रक्षेप्यम् । न चैवं पूर्वोक्ते-श्वरज्ञानमादाय बाधसिद्धसाधनते स्याताामिति वाच्यम् । तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्व-रूपजन्यत्वस्याभावरूपमजन्यत्वं हि द्वेधा ।

स्वपदेन व्यवसायः । केनचिदुक्त[3]समाधिमाशङ्क्य निराह—**नचैवं विधेति । अर्थान्तरादिति ।** सामान्यधर्मावच्छिन्नस्वतस्त्वपरतस्त्व-संशयनिवर्तनानुपयोगादर्थान्तरादि[4]ति भावः ।

पक्षधरोक्तमप्यनूद्य निराह—**एतेनेति । तद्व्यतिरेकेति ।** अत्रोभयत्र व्यतिरेकशब्दः प्रगभावपरः । अन्यथा आद्यस्य संसर्गाभाव-मात्रपरत्वे तज्ज्ञानविषयकव्याप्तिज्ञानात्यन्ताभावरूपव्यतिरेकाप्रयुक्तप्रा-गभावप्रतियोगिनी इदं ज्ञानं प्रमेत्यनुमितिमादायैव[5] सिद्धसाधनतापत्तेः । अन्त्यस्यापि तत्परत्वे पूर्वोक्तानुमितिमादायैव सिद्धसाधनतापत्तेः । ध्वंस-रूपतद्व्यतिरेकस्य तज्ज्ञानविषयकज्ञानव्यतिरेकेण केनाप्यजन्यत्वादिति ध्येयम् । यद्यपि नैतद्रूपं जन्यत्वम् । आकाशादिजन्य शब्दादावभावात् । तथापि । व्यतिरेकिपदार्थेषु भवतीदं जन्यत्वमिति भावः—**द्वेधेति ।** उत्तरदलेन नञोऽन्वयेन पूर्वभागेन नञोऽन्वयेन वा द्वेधेत्यर्थः—

---

[1] न्यवि-कुं. [2] षसाध्य-कुं. [3] क्तं-कुं. [4] त्यर्थः-आ. [5] य सि-कुं. आ.

तद्व्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वेन वा तद्व्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगित्वेन वेति । तत्राद्यस्याजन्यत्वस्येश्वरज्ञाने सत्वेपि मया विवक्षितस्य द्वितीयस्याभावात् । न हीश्वरज्ञानं प्रागभावरूपव्यतिरेकप्रतियोगीति निरस्तम् । तथापि पूर्वोक्तस्य प्रमेयमिति ज्ञानविषयत्वेन सिद्धसाधनस्य सर्वं ज्ञानं गुण इत्यादिनोक्तस्य बाधस्य

प्रयुक्तेति । तदन्वयाद्यनुविधाय्युत्तरकालसंबन्धित्वं प्रयुक्तत्वम् । तद्भिन्नत्वमप्रयुक्तत्वमित्यर्थः—**सत्वेपीति** । तस्य व्यतिरेकमात्राप्रतियोगित्वादिति भावः—**मयेति** । स्वतस्त्वनिर्वचनकर्त्रेत्यर्थः । अभावादित्येतद्व्यनक्ति—**नहीति** । तथा च न प्रागुक्तदोषाविति भावः । एतेनेत्युक्तं व्यनक्ति—**तथापीति** । एवं विवक्षायामपीत्यर्थः । विषयपदेन प्रकारत्वविवक्षामुपेत्याह—**सर्वं ज्ञानमिति** । **बाधस्ये**[1]**ति** । एतदभारूपपरतस्त्वसाधने सिद्धसाधनाच्च । तस्या[2]पक्षत्वे चार्थान्तरता । इदं ज्ञानं प्रमेति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य प्रकारत्वेन सिद्धसाधनापरिहाराच्च । न च सामान्यस्या[3]ज्ञातस्य प्रत्यासत्तित्वेऽतिप्रसङ्गेन ज्ञातस्यैव प्रत्यासत्तित्वात्प्रमात्वज्ञानस्य चानुमित्यादिरूपस्य प्रमात्वाश्रयरूपपक्षादिज्ञानजन्यतया तज्ज्ञानविषयकज्ञानजन्यत्वमेवेत्युक्तस्थले तज्ज्ञानविषयकज्ञानाजन्यज्ञानप्रकारत्वं नेति न दोष इति वाच्यम् । इच्छायां गृहीतं तद्वति तत्प्रकारकत्वं स्मृतं सज्ज्ञानत्वेन गृह्यमाणे रूप्यभ्रमे यत्रारोप्यते यत्र वा रूप्यत्ववति रूप्यत्वप्रकारवत्त्वेन गृह्य-

[1] स्य चे-कुं. आ. [2] पि-आ. [3] अज्ञातपदं न-आ.

माणायामिच्छायां ज्ञानत्वमारोप्यते तत्रोभयत्र प्रमात्वाश्रयज्ञानविषयकज्ञानं विनापि रूप्यत्ववति रूप्यत्वप्रकारकज्ञानत्वरूपं प्रमा[1]त्वं गृहीतुं शक्यमिति ज्ञातया[2] तद्रूपसामान्यप्रत्यासत्त्या जनितं ज्ञानमादाय सिद्धसाधन[3]त्वस्य दुर्वारत्वात्। किं च त्वन्मते गङ्गास्नानादिसत्कर्मजन्यं योगिज्ञानं तज्ज्ञानविषयकज्ञानाजन्यमेवेति तादृशज्ञान[4]प्रकारत्वमादाय सिद्धसाधन[5]मेव। न हि तदपि निदिध्यासनजन्यम्। मानाभावात्। येन योगिज्ञानं तज्ज्ञानविषयकज्ञान जन्यं स्यात्। तत्तत्कर्मणां त[6]त्त्वज्ञानविशेष एव जनकत्वमित्यनुमानखण्डे त्वयैवोक्तेः। प्रमात्वस्य प्रकारत्वार्थं पूर्वोपस्थितेरावश्यकत्वेऽपि उक्तदिशा प्रमात्वाश्रयज्ञानं विनापि प्रमात्वज्ञानसंभवात्। यत्तु अनागताविषयकेति द्वितीयतृतीयज्ञानयोर्विशेषणमतो न कोऽपि दोष इति तन्न। [7]वर्तमानघटप्रमात्व प्रत्यासत्त्या दोषतादवस्थ्यात्। अनागतवृष्ट्यादिज्ञानप्रामाण्यांशे बाधात्। तदन्यस्य पक्षत्वे चार्थान्तरत्वात्। यद्यपि तज्ज्ञानविषयकज्ञानव्यतिरे[8]काप्रयुक्तव्यतिरे[9]कप्रतियोगितदेकज्ञानमात्रविषयकज्ञानग्राह्य[10]मिति तदर्थ इति। तदपि न। एवं हि पूर्वदलेन प्रामाण्यानुमिति[11]मादाय तदेकज्ञानमात्रविशेषणेन सामान्यप्रत्यासत्तिजन्यज्ञानयोगिज्ञाने[12]श्वरज्ञानान्यादाय[13]सिद्धसाधनत्वाभावेऽपि ज्ञानं गुण इत्यादि[14]ज्ञानज्ञानप्रामाण्यानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयज्ञानभिन्नप्रथमज्ञानविषयकतया तदेक-[15] विषयकत्वाभावेन तदंशे बाधात्। तदन्यस्य पक्षत्वे चार्थान्तरता। किंच

[1] ण--कुं. [2] तया--आ. [3] 'त्व' इति न--आ. [4] विषयत्वं--आ. [5] त्व--आ. [6] त्तज्ज्ञा--कुं. [7] वर्तमानपदं न--आ. [8] क-कुं [9] का--कुं. [10] त्व-आ. [11] मीश्वरज्ञानंवा--आ. [12] चादाय--आ. [13] च--कुं. [14] ज्ञानप्रा--कुं. [15] ज्ञान--आ.

चापरिहारादिति दिक् ॥

परोक्तस्वतस्त्वनिरुक्तिभङ्गः ॥ २ ॥

स्वतस्त्वे प्रमाणं तु,

प्रमावानयं समर्थप्रवृत्तिमत्त्वात् इत्याद्यनुमितिग्राह्यत्वेनार्थान्तरता । मीमांसकमते सामान्यप्रत्यासत्त्यभावेन ग्राह्यप्रमाव्यक्तेरनुमितिजनकज्ञानागोचरत्वात् । तदन्यप्रामाण्यस्य पक्षत्वं तु सामान्यविप्रतिपत्त्यननुगुणमित्याद्यभिप्रेत्याह—इति दिगिति । यद्वा एवं विप्रतिपत्त्यन्तराण्यपि तत्तद्बुध्युत्प्रेक्षितानि निरस्यानीति भावेनाह—इतिदिगिति । तन्निरासश्च गुरुटीकायां व्यक्तः ॥

परोक्तस्वतस्त्व[1]निरुक्तिभङ्गः ॥ २ ॥

तत्र किं प्रमाणमित्यत आह—**स्वतस्त्वे प्रमाणं त्विति** । अनुमानमिति वक्ष्यमाणेनान्वयः । यद्यपि—

" पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये "

इति कथालक्षणोक्तेः ग्रन्थस्य च वादकथा रूपेण प्रवृत्तेः—

" ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा
भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः ।
पुराणानि च[2] यानीह वैष्णवानि विदो विदुः
स्वतः प्रामाण्यमेतेषां नात्र किंचिद्विचार्यते " ॥

---

[1] परतस्त्व–छ.क. [2] तु–अ.

ज्ञानप्रामाण्यं स्वतो ग्राह्यं, परतोऽगृह्यमाणत्वे सति गृह्यमाणत्वात् यद्यदन्येनागृह्यमाणत्वे सति ग्राह्यं तत्तेन ग्राह्यम्। यथा चक्षुरन्ये[1]नागृह्यमाणं रूपं चक्षुर्ग्राह्यम् ॥ १ ॥

इत्यादिरागम एव वाच्यः। तथापि हैतुकस्य तार्किकस्यागमेऽत्यादराभावात्तं प्रत्यागमानुकूला न्याया एवात्रोच्यन्त इत्यदोषः।

"ज्ञानगतं[2]याथार्थ्यं तद्ग्राहकेणैव ग्राह्यं, ग्राहकान्तरानुपपत्तौ सत्यां गृह्यमाणत्वात् यद्यतोऽन्येनानुपपद्यमानग्रहणं गृह्यते तत्तेनैव[3] गृह्यते, यथा चक्षुषोन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपादि चक्षुषा साक्षात्क्रियते"

इति तत्वनिर्णयटीकोक्तमनुमानं तात्पर्यतोऽनुवदति—**ज्ञानप्रामाण्यमिति**। याथार्थ्यरूपमित्यर्थः। तत्स्वरूपमुक्तंप्रागस्माभिः। चक्षुरादिरूपानुप्रमाणव्यावृत्तस्य साक्षाज्ज्ञेयविषयीकारित्वस्य लाभाय ज्ञानेति विशेषणं तत्तज्ज्ञानपरम्। घटत्ववति घटत्वप्रकारक[4]ज्ञानत्वादिरूपं प्रामाण्यमित्यर्थः। यदा तु प्रामाण्यपदेन केवलप्रामाण्यग्रहः तदा ज्ञानपदं स्पष्टार्थम्। अत एव सुधायां "प्रामाण्य" मित्येव—पक्षोक्तिः—**स्वत इति**। ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमविहिततत्तज्ज्ञानविषयकसाक्षिविषय एवेत्यर्थः। विशेषणकृत्यं प्राग्वत्। साक्षी च लौकिकप्रत्य[5]क्षादिरूपानुव्यवसाय एव—**परत इति**। प्रामाण्यं परतो ग्राह्यं सांशयिकत्वात् इत्यादौ यत्पराभिमतं साध्यं उक्तविशेषणकसाक्षिज्ञानादन्येनैव ग्राह्यत्वादिरूपं तदभावे सति ग्राह्यत्वादित्यर्थः। तेनानु-

[1] घ्राणादि—कुं. छ. क. [2] त—कुं. [3] 'एव' पदं नास्ति—अ. [4] ज्ञानेति न—आ. [5] क्षानु—कुं. आ.

सुखमनुभवामीति प्रत्ययः (प १). दोषशङ्काद्यकलिङ्कितज्ञानस्यानुव्यवसायो वा (प २).

मित्यादिग्राह्यत्वेपि नासिद्धिः "परस्यस्वत्वात्स्वस्य च परत्वादि" त्यादि मण्युक्तखण्डनस्याप्यनवकाशः । केचित्तु परतोग्राह्यत्वं नाम उक्तविशेषणकोक्तरूप[1]प्रत्यक्षाग्राह्यत्वं साक्षिज्ञानादन्योत्पाद्यप्राथमिकप्रतीतिकत्वं [2]परतोग्राह्यत्वम् । तच्छून्यत्वे सतीत्यर्थः । तेन स्वतस्त्ववादे प्रामाण्यस्यानुमित्यादिग्राह्यत्वेपि न विशेषणासिद्धिरित्याहुः । अत्र सत्यन्तमात्रस्याप्रयोजकत्वाद्ग्राह्यत्वादित्युक्तिः । घटादिगतगन्धादौ सत्यपि ग्राह्यत्वे स्वाश्रयग्राहकोक्तरूपप्रत्यक्षाग्राह्यत्वं नेति व्यभिचारनिरासाय सत्यन्तम् ।

प्रामाण्यस्य स्वतो ग्राह्यत्वे क्वचित्संशयाद्युपपादनक्लेशनिरासाय विशिष्याप्याह—**सुखमिति** । [3]स्ववृत्तिवर्तमानसुखसाक्षात्कारगोचरः साक्षिरूपः प्रत्यय इत्यर्थः । ज्ञानांशे लौकिकप्रत्यक्षादिरूपानुव्यवसायः प्रामाण्यविषयको न वेति विप्रतिपत्त्यनुरोधेनैतत्पक्षाणामवतार इति सामान्यविप्रतिपत्त्यनानुगुण्यादर्थान्तरत्वमिति न शङ्क्यम् । बाह्याभ्यन्तरसाधारणपक्षान्तराण्याह—**दोषेति** । दुष्टकरणजन्यत्वशङ्का तन्निश्चयाप्रामाण्यादिशङ्कातन्निश्चयाद्यनास्कन्दितघटादिज्ञानस्येत्यर्थः । न चैवं अन्त्यपक्षाभेद इति शङ्क्यम् । तत्रानुव्यवसायविशेषणत्वेन इह व्यवसायविशेषणत्वेन तत्र प्रामाण्यविरोध्युपस्थापकसामग्रीत्वेन अत्र तु तत्कार्यदोषशङ्कादित्वेन च

[1] 'प्रत्यक्षाग्राह्यत्वं' इति नास्ति—कुं. आ-अ. [2] इदं नास्ति—कुं. [3] इयं पङ्क्तिः—अ पुस्तके नास्ति.

[1] निष्कम्पप्रवृत्तिहेतुभूतज्ञानस्यानुव्यवसायो वा (प ३) प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽ[2]नुव्यवसायो वा (प. ८) स्वग्राह्यज्ञान प्रामाण्य-

प्रवेशेनात्यन्तभेदात्—**उपस्थापकसामग्रीति** । उपस्थितितत्सामग्रीत्यर्थः । अत्र सर्वत्रापि ज्ञानस्येत्यनेन दोषाजन्यप्रमारूपज्ञानस्याभिमतत्वादिदं रूप्यमित्यादिभ्रमगोचरानुव्यवसायस्यापक्षतया तस्य तत्र प्रामाण्याग्राहकत्वेपि न बाध इति बोध्यम् । तत्रप्रामाण्यग्रहणस्य मानसत्वेन सिद्धान्तेपि भ्रमगोचरानुव्यवसायेन प्रामाण्याग्रहात् । यद्वा वक्ष्यमाणदिशात्राभिमतानुव्यवसायत्वस्य भ्रमानुव्यवसायेऽभावेन तस्यापक्षत्वान्न बाध । अत एव ज्ञानांशे लौकिकप्रत्यक्षादिरूपस्येहानुव्यवसायस्याभिमततया स्मृत्युपनीतप्रामाण्यविषयकानुव्यवसायमादाय न न्यायमते सिद्धसाधनं शङ्क्यम् ॥

स्वग्राह्येति ॥ स्वेन अनुव्यवसायेन ग्राह्यं यज्ज्ञानं आद्ये सिद्धान्ते सुखविषयकम् स्वप्रकाशरूपं साक्षिज्ञानमेव । परमते मानसं सुखव्यवसायरूपम् । तदन्यपक्षत्रये [3]च घटादिगोचरं मनोवृत्तिरूपं व्यवसायाख्यं साक्षिज्ञानादन्यत् । तन्निष्ठं यत्प्रामाण्यं सुखत्ववति सुखत्वप्रकारकत्वादिरूपं घटत्ववति घटत्वप्रकारकत्वादिरूपं वा तद्विषयक इत्यर्थः । घटज्ञानानुव्यवसायस्य पटज्ञानप्रामाण्याविषयकत्वाद्बाधनिरासाय स्वग्राह्यज्ञानेत्युक्तम् । यद्वा प्रामाण्यविषयक इत्येवोक्तौ स्वनिष्ठप्रामाण्यविषयकत्वमादाय सिद्धान्ते अर्थान्तरत्वनिरासाय—**स्वग्राह्यज्ञानेति** ॥ एवं च नार्थान्तरता । न चैवं साक्ष्यंशे

[1] निष्कलङ्क–क. [2] ता–कुं. [3] कुं. पुस्तके नास्ति.

विषयकः (सा. १) तत्प्रकारको वा (सा. २) तद्वि-

स्वग्राह्यव्यवसायप्रामाण्यविषयकत्वाभावाद्व्यभिचारः शङ्क्यः । स्वग्राह्यं यावत्स्वयमन्यच्च तावति प्रामाण्यग्राहकत्वलाभेन साक्ष्यंशे हेतूनामव्यभिचारात् । यद्वा सुखत्ववद्विशेष्यकज्ञानत्वादिरूपप्रामाण्यलाभाय स्वग्राह्यज्ञानप्रामाण्येत्युक्तिः । प्रामाण्यविषयकत्वं च साध्यं यन्मते वैशिष्ट्यमनुव्यवसाय वेद्यमेव न तन्म[1]तेन बोध्यम् । तद्वेद्यमपि स्वातन्त्र्येण न तद्वेद्यमिति मते तु सत्वेन प्रामाण्यविषयकत्वमभिमतम् । तेन तत्पक्षे सिद्धसाधनतेति शङ्कानवकाशः । अत एव वक्ष्यति "सत्तया तदुल्लेखस्य साध्यत्वात्" इति । न च वादिनः सत्वेनेति विशेषणं व्यर्थम् व्यावर्त्याप्रसिद्धेरिति शङ्क्यम् । शुक्तिरूप्यज्ञाने प्रामाण्यविषयकस्यापि मानसदर्शनस्य स्वविषयसत्वानिर्णायकस्यापि सिद्धान्ते सत्वात् । परप्रसि[2]द्धत्वमात्रेण व्यावर्त्यत्वोपपत्तेश्च । परार्थानुमाने परं प्रति सिद्धसाधनोद्धारस्यापि वादिप्रयोजनत्वाच्च । जन्यकृत्यज[3]न्यानीत्यत्र मीमांसकं प्रति जन्यत्वस्येवेहापि वादिनं प्रति प्रमेयत्वादिवदुपरञ्जकत्वेन विशेषणत्वोपपत्तेश्च । उक्तं च उत्पत्तिप्रामाण्यवादे मणावपि "उभयसिद्धव्यावर्तकत्वं तन्त्रम् । न तु व्यावर्त्यस्योभयसिद्धिः । गौरवात्" इति भावः ।

प्रामाण्यमनुव्यवसायविषयोपि प्रागनुपस्थितत्वान्न प्रकारस्तयेति वदन्तं प्रत्याह—**तत्प्रकारको वेति** । स्वग्राह्यज्ञानप्रामाण्यप्रकारकोवेत्यर्थः । विशेषणज्ञानहेतुताया निर्विकल्पकभङ्गे निरसिष्यमाणत्वादिति भावः—**तद्विरुद्धेति** । ग्राह्यप्रामाण्यविरुद्धं यत्प्रामाण्याभावत-

[1] ते. बोध्यम्—अ. [2] द्धिमात्रेण—कुं. [3] न्येत्यत्र—कुं.

रुद्धाविषयकत्वे सति तद्व्याप्यत्वाविषयकत्वे [1]सति तत्संशयविरोधिप्रत्ययत्वात् (हे. १) तद्व्याप्यत्वाविषयकत्वे सति तदभावनिश्चयविरोधिनिश्चयत्वात् (हे. २) तद्विषयकव्यवहारहेतुप्रत्ययत्वात् (हे. ३) तज्ज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च तद्विषयत्वाच्च (हे. ४) प्रामाण्यानुमितिवत् इत्याद्यनुमानम् ॥

द्व्याप्याप्रामाण्यादि तदविषयकत्वे सतीत्यर्थः । विरुद्धत्वं च तज्ज्ञानप्रतिबन्धकज्ञानविषयत्वम्—**तद्व्याप्यत्वेति** । सुखानुभवादिनिष्ठसुखत्ववद्विशेष्यकत्वादिरूपप्रामाण्यव्याप्यत्वेत्यर्थः—**तत्संशयविरोधीति** । प्रामाण्यसंशयविरोधित्वं नाम तदनुत्पत्तिव्याप्यत्वादिरूपं ज्ञेयम् । विशेषणकृत्यान्यग्रे व्यक्तानि—**तद्विषयकेति** । प्रामाण्यविषयकेत्यर्थः—**तज्ज्ञानेति** । ग्राह्यप्रामाण्याश्रयज्ञानेत्यर्थः । साध्यावैशिष्ट्यनिरासोऽग्रेस्फुटः—**तद्विषयकत्वात्** । व्यवसायविषयकत्वादित्यर्थः—**प्रामाण्यानुमितिवदिति** । इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वात् इति प्रामाण्यानुमितावुक्तस्य हेतुचतुष्टयस्य साध्यद्वयस्य च सत्वादिति भावः । [2]आदिपदेन "प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानसमवेतधर्मत्वात् ज्ञानत्ववत्" इत्यादि सुधोक्तानुमानग्रहः[2]। आद्यविशेषणस्य यथाश्रुतव्याप्त्याकृत्यंसभवेपि द्वितीयविशेषणे तदसंभवात् यद्यद्विरुद्धाविषकत्वे सति यद्व्याप्यविषयकत्वे सति यत्संशयविरोधिज्ञानं तत्तद्विषयकमित्यादिसामान्यव्याप्तिमुपेत्य कृत्यमाह ।

---

[1] च-कुं-क. [2] अयं ग्रन्थः-मु पुस्तके कुण्डालितः

अत्राद्ये हेतौ तद्विरुद्धाविषयकेत्युक्तत्वात्प्रामाण्य विरुद्धाप्रमाण्यनिश्चये, तद्व्याप्यत्वाविषयकेत्युक्तत्वाद्वह्निमत्वाविषयके, तत्संशयविरोधिनि तद्व्याप्यतया धूमनिश्चये, तत्संशयविरोधीत्युक्तत्वाद्घटादिज्ञाने, प्रत्ययेत्युक्तत्वाद्धर्म्यज्ञाने कोट्यस्मरणे च न व्यभिचारः। न चोल्बणविषयान्तरज्ञाने व्यभिचारः। विषयान्तरे मनःसंचारादिरूपतज्ज्ञानसामग्र्या एव तद्विरोधित्वात्।

वह्निमत्वाविषयक इति। अयं वह्निमान् धूमवत्वादित्यत्र वह्निव्याप्यधूमवानयमितिनिश्चये सति अयं वह्निमान्नवेति संशयानुदयेनोक्तरूपहेतुभावेपि वह्नि[1]त्वविषयकत्वाभावेन तत्र साध्याभावाद्व्यभिचार इति शङ्का तद्व्याप्यत्वाविषयकत्वविशेषणान्निरस्तेत्यर्थः। विशिष्यव्याप्तौ तु घटत्ववद्विशेष्यकत्वरूपप्रामाण्याविषयकेपि तत्संशयविरोधिनि तद्व्याप्यतयाकंबुग्री[2]वादिमद्विशेष्यकत्वनिश्चये व्यभिचारो नेति ज्ञेयम्—**धर्म्यज्ञाने**। व्यवसायरूपधर्मिणो ज्ञानाभाव इत्यर्थः। धर्मिज्ञानस्य संशयहेतुतया तदभावस्य कार्यानुत्पादव्याप्यत्वे न तत्र हेतुसत्वादिति भावः। धर्मिज्ञानं न संशयहेतुरीति मतेनाह—**कोटीति**। कोटिस्मरणाभाव इत्यर्थः। एतच्चोपलक्षणम्। कुंकुमगन्धादिसंशयविरोधिनि तदभिव्यञ्जकगोघृतसंयोगादौ च न व्यभिचारः इत्यपि ध्येयम्। विशिष्टस्यापि हेतोर्व्यभिचारमाशङ्क्य निराह—**न चोति। सामग्र्याएवेति**। तथा च तत्र प्रत्ययत्वाभावेन हेतोरेवाभावादिति

[1] द्वि—अ. [2] वत्वा—कुं—अ.

न च धर्मिज्ञानाद्यभावादेवासंशयात्संशयविरोधित्वमसिद्धमिति वाच्यम्। सुखादिज्ञानरूपधर्मिज्ञाने ज्ञानत्वरूपसाधारणधर्मदर्शने दैवात्कोटिस्मरणे विषयान्तरासंचारे च सत्यप्यसंशयदर्शनात्।

नचाद्यो हेतुरप्रयोजकः[1] ज्ञानस्य तत्संशयविरोधित्वं हि तन्निश्चयत्वेन वा तदभावनिश्चयत्वेन वा तदभावव्याप्यनिश्चयत्वेन वा तद्व्याप्यनिश्चयत्वेन वेति चतुर्धा। तत्र द्वितीयतृतीययोस्तद्विरुद्धाविष-

---

भावात्संशयविरोधित्वांशे तां निराह—**न च धर्मीति**। कोट्यस्मरणविषयान्तरसंचारादिरादिपदार्थ —**धर्मिज्ञान इति**। धर्मिणो ज्ञाने सतीत्यनेनान्वयः। धर्म्याख्यज्ञान इति व्याख्याने तु न सतिपदेनान्वयः। अपि तु साधारणधर्मदर्शनपदेन। न चास्मिन्पक्षे धर्मिभूतज्ञानानुक्तिः। धर्मिज्ञानस्यसाधारणधर्मदर्शनत्वेनैव हेतुत्वात्तेनैव तदुक्तेरिति[1]—**असंशयेति**। तस्य प्रामाण्यनिश्चयनिबन्धनत्वाभावे कदाचित्कस्यचित्तत्र धर्मिज्ञानाद्युदयसंभवेन रूप्यज्ञानं प्रमा न वेतिवत्सुखज्ञानं प्रमा न वेत्ति संशयः स्यात्। कदापि तददर्शनात्प्रामाण्यनिश्चयनिमित्त एव तदभाव इति तद्विरोधित्वं तस्य नासिद्धमिति भावः।

एवं व्यभिचारासिद्धी निरस्य विपक्षे बाधकाभावदोषं च निराह—**नचाद्य इति**। विपक्षे हेतूच्छित्तिं संभावितपक्षानुक्तेरव्यवच्छेदपूर्वकमाह—**ज्ञानास्येति**। स्वतो विरोधाभावात्[2] स्वविषयकृतस्यैव विरोधस्य वाच्यत्वादिति हि शब्दः।

---

[1] एके–अ. [2] स्वपदं नास्ति–मु. अ आ.

यकत्वविशेषणेन चतुर्थस्य तद्व्याप्यत्वाविषयकत्व-विशेषणेन निरस्ततया हेतोराद्यं प्रामाण्यनिश्चय-त्वरू[1]पं साध्यं विनानुपपत्तेः ।

एतेन द्वितीयहेतावप्यप्रयोजकतोद्भूता । पक्षी-कृतज्ञाने प्रामाण्यविषयकत्वं प्रामाण्यव्याप्यविष-यकत्वं प्रामाण्याभावविषयकत्त्वं प्रामाण्याभाव-व्याप्यविषयकत्वमुभयोदासीनाविषयकत्वं चेति सं-भाविते प्रकारपञ्चके द्वितीयस्य तद्व्याप्यत्वाविषय-कत्वविशेषणेन तृतीयादीनां च त्रयाणां तदभाव-निश्चयविरोधिनिश्चयत्वेन निरासाद्धेतोराद्यं प्रामा-ण्यविषयकत्वरू[2]पसाध्यं विनानुपपत्तेः । तत्राद्यं निश्चयपदं तदभावसंशयविरोधिनि तदभावनि-

---

एतेनेत्युक्तं व्यनक्ति—**पक्षीकृतज्ञानइत्यादिना** । **उभयेति** । प्रामाण्यतद्व्याप्यप्रामाण्याभावतद्व्याप्यरूपोभयोदासीनेत्यर्थः । सङ्गततया प्रसक्तमप्रयोजकत्वं पूर्वं निरस्य विशेषणकृत्यमाह—**तत्राद्यमिति** । तत्र द्वितीयहेताविवर्थः । तदभावज्ञानविरोधिज्ञानत्वादित्युक्ते व्यभि-चारादुभयत्र निश्चयपदेन तद्वारणमित्यर्थः—

तद्विषयव्यवहारहेतु प्रत्ययत्वादिति तृतीयहेतौ । **कुङ्कु-मगन्धव्यङ्ग्यव्यवहारहेतौ** घृतादिसंयोगरूपव्यञ्जकेव्यङ्ग्याविषयके व्यभि-चारवारकं प्रत्ययपदं प्रामाण्याविषयके घटादिज्ञाने व्यभिचारवा-रकं तद्विषयकव्यवहारहेत्विति**पदं इति स्पष्टमिति** विशेषणकृत्य-

---

[1] पसाध्यं–छ. [2] पं–छ.

श्चये द्वितीयं तु तदभावनिश्चयविरोधिनि तदभाव-संशये व्यभिचारवारकम् ।

सुखसाक्षात्कारस्य तत्प्रामाण्याभिलापस्य च मध्ये प्रामाण्यानुमित्यङ्गीकारे [1]चानुभवविरुद्धं व्याप्तिस्मरणादि बहु कल्प्यं स्यात् । सुख-साक्षात्कारस्य तत्साक्षात्का[2]राभिलापस्य च मध्येपि तत्कल्प्यं स्यात् प्रामाण्यानुमिति प्रा-माण्याभिलापयोर्मध्येऽपि ज्ञानान्तरं कल्प्यं स्या-दिति न तृतीयहेतुरसिद्धः । नाप्यप्रयोजकः व्यवहर्तव्यज्ञानस्य व्यवहारहेतुत्वात् ।

मनुक्त्वा सिध्यप्रयोजकत्वे क्रमेण निराह—सुखेति । सुखमनु-भवामीति प्रत्ययस्य न सुखानुभवप्रामाण्यव्यवहारहेतुत्वमस्ति किंतु सुखसाक्षात्कारानन्तरं अयं सुखानुभावः प्रमा सुखसाक्षात्कार-त्वात् पूर्वसुखसाक्षात्कारवदित्यादिलिङ्गजन्यप्रामाण्यानुमितेरेवेत्यभ्यासद-शापन्नस्थले झडिति प्रामाण्यानुमितिसामग्रीसमवधानं स्वकारणाधीन-मिति ज्ञप्तिप्रामाण्यान्ते मणिकृदुक्तदिशा प्रमाण्यानुमित्यङ्गीकार इत्यर्थः—व्याप्तिस्मरणादीति । परामर्शानुमिती आदिपदार्थः । अतिप्रसङ्गं चाह—सुखेति । तत्कल्प्यमिति । जातिव्यक्तयोरेकवित्तिवेद्यत्वनि-यममनुपेत्य [3]साक्षात्कारस्वरूपज्ञानानन्तरं सुखज्ञानमिदं साक्षात्कार-स्ववृत्तिवर्तमानविषयकत्वादिति सुखसाक्षात्कारत्त्वानुमितिमुपेत्य तद्धेतु-व्याप्तिस्मरणादिकं कल्प्यं स्यादित्यर्थः । ज्ञानान्तरं शाब्दादिरूपमित्यर्थः । अत्रापि हेतूच्छित्तिरेव विपक्षे बाधिकेत्याह—व्यवहर्तव्येति ।

---

[1] वा—ग. [2] रत्वा—मु. [3] सुख—मु. अ. आ.

न च घटविशेष्यकत्वे सति घटत्वप्रकारकत्वस्यैव प्रामाण्यरूपत्वाच्चतुर्थहेतौ साध्यावैशिष्ट्यम्। त्वयाप्यङ्गीकृतस्य प्रामाण्योल्लेखमात्रस्य हेतुत्वात्। त्वदनङ्गीकृतस्य सत्तया तदुल्लेखस्य च साध्यत्वात्। मन्मते केवलानुप्रमाणसाधारणस्य[1] याथार्थ्यरूपप्रामाण्यविषयकत्वस्य साध्यत्वात् केवलप्रमाणासाधारणस्योल्लेखस्य हेतुत्वाच्च ॥

तज्ज्ञानप्रकारेत्यादिचतुर्थहेतौ दलद्वयकृत्यं परोक्तनिरुक्तिभङ्गेन व्यक्तमिति व्यभिचारशङ्कानवकाशात्सन्दिग्धासिद्धिस्वरूपासिद्धी क्रमेण निराह—**नचेत्यादिना**। सुखं मे भूयादितीच्छायामुक्तरूपप्रकारकत्वे सत्यपि न प्रामाण्यमिति तदेव तदित्यसिद्धमिति कश्चित्। तन्न। सुखत्ववद्विशेष्यकत्वादिरूपप्रामाण्यस्येच्छायामपि सत्वात्। सुखत्ववद्विशेष्यकज्ञानत्वादिकं तदित्यशक्यशङ्कम्। मन्मत इत्यादिवक्ष्यमाणविरोधात्—**उल्लेखमात्रस्य**। विषयत्वमात्रस्येत्यर्थः। मात्रपदेन सत्वव्यावृत्तिः। एतेन यन्मते तद्वत्वमनुव्यवसायस्य सर्वथैवाविषयो न तन्मते नायंहेतुर्वक्ष्यमाणदिशा प्रसाध्याङ्गकोवेति सूचितम्। **ननु** सिद्धान्ते [2]सत्वासत्वौदासीन्येन तद्विषयकत्वाभावात्साध्यावैशिष्ट्यं स्यादित्यत आह—**मन्मत इति**। वादजल्पकथयोः प्रयोगदशायामित्यर्थः। वह्निमात्रसाधने पर्वतीयवह्निना पर्यवसानमिव ज्ञानमात्रनिष्टप्रामाण्येन पक्षधर्मताबलात्पर्यवसानमिति भावः ॥

---

[1] णया—**च. मु.** [2] सत्वा इति. न—**मु.**

[1]कोचि[2]त्तु तथाङ्गीकर्तव्यत्वं साध्यमिति न साध्यावैशिष्ट्यमित्याहुः ॥

नाप्यसिद्धिः सुखमेव सुखत्वेनानुभवामि स्तम्भमेव स्तम्भत्वेन [3]जानामीत्यनुभवात्। एतेनोक्तवक्ष्यमाणानुमानेषु बाधो निरस्तः। सुखमेव सुखत्वेनानुभवामीत्यादिज्ञाने प्रामाण्यशब्दानुल्लेखेपि तदर्थस्य सुखत्ववति सुखत्वप्रकारकत्व[4]रूपस्य प्रामाण्यस्योल्लेखात्। यद्वा विमतः प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽनुव्य-

---

एतेनेति। तद्वद्विशेष्यकत्वोल्लेखा[5]देरनुभवासिद्धत्वेनेत्यर्थः। तदेव व्यनक्ति—सुखमेवेति। अनुल्लेखेपीति। इदं ज्ञानं प्रमाणमित्यनाकारेपीत्यर्थः—उल्लेखात्। विषयीकरणादित्यर्थः।

पूर्वोक्तहेतुविशेषणेषु प्रतिवादिविप्रतिपत्तेः प्रसाध्याङ्गकत्वं मन्वानः प्रागुक्तपक्षतावच्छेदकेष्वेकं पक्षतावच्छेदकं कृत्वाऽन्यं हेतूकृत्याह—यद्वेति। यद्वा पूर्वं प्रामाण्यं क्वापि नानुव्यवसायवेद्यमिति मतमुपेत्य प्रामाण्यानुमितिदृष्टान्तेन प्रयोगा उक्ताः इदानीं तु क्वचित्तद्वेद्यमिति मतमुपेत्य तदृष्टान्तेनाह—यद्वेति। विमत इति। प्रामाण्यविषयकत्वाविषयकत्वाभ्यां विप्रतिपत्तिविषयइत्यर्थः विमतेरपि नियतविषयत्वायावच्छेदकमावश्यकमेव तत्किमित्यत आह—प्रामाण्येति। उपस्थापकेति। उपस्थितितत्सामग्रीत्यर्थः। नन्वेवमुक्तरूपानुव्यवसायत्वस्यैव पक्षतावच्छेदकत्वसंभवे किं विमत्येतिचेन्न "यद्यपि

---

[1] इयं पाङ्क्तिः नास्ति-छ-क-ग. [2] त्त-च. मु. [3] अनुभवामि-च. मु. [4] त्वादि-छ-क. मु. [5] कत्वादे-कुं.

वसायः स्वविषयव्यवसायप्रामाण्याविषयकः निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यवसायत्वात् ;

विमतिरपि नियताविषयत्वायावच्छेदकसापेक्षा । तथापि सावयवत्वसाधितेन कार्यत्वेन पृथिव्याः सकर्तृकत्वसाधनमिव स्वनियामकनियतया लघ्व्या विमत्या पक्षतावच्छेदो न विरुद्धः" इति न्यायामृतोक्तादिशोपपत्तेरिति तात्पर्यात् । अत्र प्रामाण्येत्यादि विशेषणोक्त्या प्रतिबद्धानुव्यवसाये बाधशङ्का अनुव्यवसाय इत्युक्त्या घटज्ञानमितिशाब्दज्ञाने बाधशङ्का निरस्तेति ध्येयम् । अतीताद्यविषयकप्रत्यक्षत्वादिरूपत्वादनुव्यवसायत्वस्य प्रथमज्ञानगोचरानुव्यवसायोत्र पक्षत्वेन पर्यवसितो ज्ञेयः । उत्तरज्ञानगोचरस्य दृष्टान्तत्वेनोपादानात् । स्वविषयेति साध्यांशः पूर्ववद्व्याख्येयः । प्रामाण्यप्रकारको वेत्यपि ध्येयम् । प्रागुपस्थितेरप्रयोजकताया निर्विकल्पकभङ्गे व्यक्तत्वात् । निष्कम्पप्रवृत्तिहेत्विति व्यवसायविशेषणेन[1] संशयादिगोचरानुव्यवसाये अनुव्यवसायेत्युक्त्या तादृशज्ञानगोचरशाब्दज्ञाने च न व्यभिचारः । अनुव्यवसायत्वं चातीतानागताविषयकप्रत्यक्षत्वं न तु तत्प्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया तज्ज्ञानत्वरूपमिति युक्तम् । निष्कम्पेत्यादिविशेषणवैयर्थ्यात् । पूर्वोक्तहेतुसाङ्कर्याच्च । नापि ज्ञानांशे लौकिकप्रत्यक्षत्वम् उत्तर[2]हेतुसाङ्कर्यात् । अत एव सामान्येत्यादिना वक्ष्यमाणज्ञानद्वयेपि न व्यभिचारः तस्यातीतादिविषयकत्वात् अत्र निष्कम्पप्रवृत्तीत्यस्य संवादिप्रवृत्तीत्यर्थः । तेन शुक्तिरूप्यज्ञानगोचरानुव्यवसाये साक्षिरूपे तत्र प्रामाण्यग्रहस्य मानसत्वेन तन्निष्ठप्रामाण्याविषयके

[1] णंतेन–मु. [2] हेतुपदं नास्ति–मु अ.

उक्तरूपव्यवसायांशे लौकिकप्रत्यक्षत्वाद्वा, गृहीतप्रामाण्येन ज्ञानेन समानविषयकस्योत्तरस्य ज्ञानान्तरस्यानुव्यवसायवत् ॥

अत्र द्वितीयहेतौ लौकिकपदम् सामान्यप्रत्यासत्त्या[1]दिजन्ये व्यवसायविषयके ज्ञाने व्यभिचारवारणाय। [2]ज्ञानांश इति विशेषणं तु स्मृत्युपनीतेऽतीत[3]घटज्ञाने तद्विषयकमहं घटज्ञानवाना[4]समिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्र व्यभिचारवारणार्थम्। न च तव घटज्ञानमस्तीति शाब्दजन्यं यद्घटज्ञानविषयकं ज्ञानं तद्-

---

न व्यभिचारः—**उक्तरूपेति**। निष्कम्पप्रवृत्तिहेतुव्यवसायांश इत्यर्थः। लौकिकत्वं चालौकिकप्रत्यासत्यजन्यत्वम्। संशयादिगोचरानुव्यवसाये व्यभिचारनिरासायोक्तरूपव्यवसायांश इत्युक्तिः। गृहीतप्रामाण्येनेति बहुव्रीहिः। [5]घटादिज्ञाने प्रवृत्तिसामर्थ्यादिना प्रामाण्यानुमित्यन्तरं तत्रैवायं घट इत्याद्युत्पन्नसमानाधिकरणज्ञाने प्रामाण्यं तदनुव्यवसायवेद्यमिति प्राचीनन्यायमतेऽभ्युपगमादिति भावः। उपपादयिष्यते चाग्रे ग्रन्थ एव।

सामान्यप्रत्यासत्त्यादीति। ज्ञानत्वसामान्येत्यर्थः। आदिपदेन योगजप्रत्यासत्तिज्ञानप्रत्यासत्योर्ग्रहः—**ज्ञानांश इति**। उक्तरूपव्यवसायांश इत्युक्तैकदेशानुवादः। विशिष्टस्य हेतोर्व्यभिचारमाशङ्क्य [6]**विवेकेन** समाधिमाह—**नचेत्यादिना**।

---

[1] त्तिजन्ये–**छ**. [2] व्यवसायांशे–**छ क**. [3] ते-**च छ क ग**. [4] नि-**कुं** [5] यत्र-**मु अ**. [6] व्यतिरेकेण–**आ**.

नुव्यवसाये व्यभिचारः शङ्क्यः । घटज्ञानांशे-घटत्ववति घटत्वप्रकारकत्वरूपस्य तदीयस्य प्रामाण्यस्याग्रहणेन साध्या[1]भावेपि लौकिक-प्रत्यक्षत्वाभावेन हेत्वभावात् । घटज्ञानविषयक-ज्ञानांशे तु हेतोः सत्वेऽपि घटज्ञानत्ववति घटज्ञा-नत्वप्रकारकत्वरूपप्रामाण्य[2] ग्रहणेन साध्यसङ्गा-वात् ॥

न च दृष्टान्तः साध्यविकलः । उत्तरस्य ज्ञाना-न्तरस्य पूर्वेण प्रामाण्यग्रहणेनाव्यवहितत्वे तस्यैव व्यवहितत्वे तु प्रामाण्यस्मरणस्यैव विशेषणज्ञान-

---

"स्वर्गसाधनं याग इति ज्ञानस्य प्रामाण्ये निश्चिते तत्स-मानविषयकज्ञानान्तरे अप्रामाण्यशङ्का भवतीति ज्ञानान्तरमगृहीत-प्रमाण्यमपि" इत्यादिमणिकृदुक्तेरुत्तरज्ञानानुव्यवसाये प्रामाण्यविषय-कत्वं विप्रतिपन्नमिति वदन्तं प्रति साध्यसत्वं दृष्टान्ते व्यनक्ति— **न च दृष्टान्त इत्यादिना । उत्तरस्येति ।** अनुमित्यादिना गृहीत-प्रामाण्यकात् पूर्वज्ञानादुत्तरस्येत्यर्थः—**तस्यैवेति ।** विशेषणज्ञानतये-त्यन्वयः । प्रामाण्यानुमितेरेव प्रामाण्यघटकघटत्वादिविशेषणज्ञानत्वेन प्रामाण्यानुमित्यनन्तरमेव घटघटत्वनिर्विकल्पकं विनैव घटत्वादिविशि-ष्टव्यवसायोत्पत्तौ तदुत्तरकाले विनश्यत्प्रामाण्यज्ञानसत्वादिति भावः ।

न च वक्ष्यमाणदिशा पूर्वोत्तरज्ञानयोः प्रामाण्यस्यैकत्वेप्युत्तर-ज्ञानगतत्वेन पूर्वमभानान्न तत्रोपनय इति शङ्क्यम् । यदवच्छेदेन

---

[1] ध्यस्या—छ. [2] स्य—कुं.

तया त्वदभिप्रेताया विशेषणोपस्थितिविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहरूपविशिष्टज्ञानसामग्र्याः सत्वेन ज्ञानान्तरानुव्यवसायस्य प्रामाण्यविशिष्टव्यवसायविषयकत्वात् ॥

ननु तज्ज्ञानविषयकेत्यादिस्वतस्त्वनिरुक्तौ तच्छब्देन व्यक्तिविशेषो न विवक्ष्यते। किन्तु ग्राह्यप्रामाण्याश्रयीभूतज्ञानमात्रम्। समानविशेष्य-

---

यत्र यद्गृहीतं तत्र तद्ग्रहत्वस्यैवोपनयसामग्रीत्वात्। चन्दनखण्ड इत्यादिप्रत्यक्षे तथा दर्शनात्। तथाच तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात्तद्विषयकत्वेन ज्ञाते द्वितीयज्ञाने तदुपनयो भवत्येवेति भावः—**सन्निकर्षेति**। संयुक्तसमवायरूपेत्यर्थः—**तदिति**। विशेषणविशेष्ययोः प्रामाण्यतदाश्रयज्ञानयोरसंसर्गेत्यर्थः।

यत्तु मणावुक्तं "तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं[1] स्वतस्त्वम्। तदन्य[2] ग्राह्यत्वं हि परतस्त्वम्। मनसा चैवं प्रामाण्यग्रहस्य तज्ज्ञानविषयकजन्यज्ञानजन्यत्वान्न परतस्त्वहानि-" रिति तद्धृदि कृत्वा प्रकारान्तरेण साध्यवैकल्यमाशङ्कते—**नन्विति**। ग्राह्यप्रामाण्याश्रयज्ञानविषयकज्ञानाजन्यत्वे सति स्वग्राह्यज्ञानप्रामाण्यविषयकत्त्वं साध्यार्थं मन्वानस्येयं साध्यवैकलयशङ्केति ध्येयम्। तज्ज्ञानविषयकज्ञानसापेक्षत्त्वोपपादनायाह—**तच्छब्देनेति**। **मात्रमिति**। ग्राह्यप्रामाण्याश्रययत्किंचिज्ज्ञानमित्यर्थः। पूर्वज्ञानस्य ग्राह्यप्रामाण्याश्रयत्वलाभाय सापेक्षत्त्वोपपादनाय चाह—**समानेति**। प्रामाण्यस्य भिन्नत्वे तज्ज्ञानसापेक्षत्वायोगात्। ततश्च किमित्यत

---

[1] वा—मु.　[2] था—मु.

कत्वे सति समानप्रकारकयोश्च ज्ञानयो र्विशेष्यप्रकारघटितं प्रामाण्यमेक[1]मेव । एवंचोक्तानुव्यवसायस्य ग्राह्यप्रामाण्याश्रय द्वितीयज्ञानविषयकज्ञानानपेक्षत्वेपि प्रथमज्ञानाविषयकज्ञानसापेक्षत्वा न्न स्वतस्त्वमिति साध्यवैकल्यमितिचेन्न । व्यवसायप्रामाण्यम[2]नुव्वयसायस्य[3]विषयो न वेति विप्रतिपत्ताव[4]नुव्यवसायविषयत्वमात्रसाधनात् । तस्य च दृष्टान्ते सत्वात् । तज्ज्ञानविषयकेत्यादिनोक्तस्वतस्त्वस्यापि पक्षधर्मताबलात्सिद्धेश्च ॥

आह—**एवंचेति** । तत्पदेनोक्तरूपज्ञानमात्रेऽभिमते सति प्रामाण्यस्यैकत्त्वे च सतीत्यर्थः—**सापेक्षत्वादिति** । प्रामाण्यरूप विशेषणोपनायकत्त्वेनेति भावः—**साध्यवैकल्यमिति** । ज्ञानप्रामाण्यं तज्ज्ञानाविषयकज्ञानाजन्यज्ञानग्राह्यं न वेति विप्रतिपत्तौ तादृशज्ञानग्राह्यत्त्वस्यैव स्वतस्त्ववादिना साध्यत्त्वात् । तस्य च द्वितीयज्ञानप्रामाण्येऽभावेन तदनुव्यवसाये तज्ज्ञानविषयकज्ञानाजन्यत्त्वे सति स्वग्राह्यज्ञानप्रामाण्यविषकत्वरूपसाध्यस्याभावादिति भावः । परोक्तस्वतस्त्वेपि न दोष इत्याह—**तज्ज्ञानेति** । दृष्टान्ते साध्यानुगमार्थं [5]स्वग्राह्यज्ञानप्रामाण्यविषयक इत्येव साध्यकरणेपि त्त्वदभिमतविशिष्टसाध्यसिद्धिः हेतोः पक्षधर्मतया स्यादेव । निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यवसायत्वादिरूपहेतुना प्रथमज्ञानगोचरानुव्यवसायरूपप-

[1] प्रकार–क. [2] प्य–क. [3] यवि–छ–क. [4] प्य–क. [5] स्वपदं न–आ.

यद्वा अनुमित्यनुव्यवसायो दृष्टान्तः। न च नवीननय्यायमते तत्रापि स्वतः प्रामाण्याभावात्साध्यवैकल्यम्। तथात्वे तत्प्रामाण्ये कदाचित्संशयविपर्ययव्यतिरेकप्रमान्यतरापातात्॥

क्षनिष्ठेन प्रामाण्यविषयकत्वं सिध्यत्[1] अनुव्यवसायस्य तज्ज्ञानविषयकज्ञानानपेक्षत्त्वादुक्तरूपमेव सिध्यतीति भावः॥

अनुमित्यादिप्रामाण्यं स्वत इति प्राचीनमतानुरोधेनाह—**यद्वेति**। एतेन भिन्नभिन्नदृष्टान्तकथनेन मन्मते सर्वत्र स्वतस्त्वमिव त्वन्मते न सर्वत्र प्रामाण्यस्य परतस्त्वम्। क्वचित्स्वतस्त्वस्या[2]भ्युपगमात्। तथाच किमर्धजरतीयेन सर्वत्रापि स्वतस्त्वमेवोपेयमिति सूचितम्॥

ननु मणौ "यत्त्वनुमानस्य निरस्तसमस्त[3]भ्रमाशङ्कस्य स्वत एव प्रामाण्यग्रह इत्युक्तमाचार्यैः तद्भूमवति वह्निज्ञानत्वमनुमितेः प्रामाण्यनियतमनुव्यवसायेचो[4]पनीतम् ततो विशेषदर्शनान्नतत्राप्रमाण्यशङ्केति। प्रामाण्यनिश्चयादिवाप्रामाण्यशङ्काविरहादर्थं निश्चित्य निष्कम्पव्यवहार इत्याभिप्रायम्[5]" इति प्राचीनमतस्यान्यथातात्पर्यस्योक्तत्वात्कथं तन्मतेऽयंदृष्टान्त इति भावेनाशङ्क्य तेनाप्यङ्गीकारयति—**नचेत्यादिना। संशयेति**। अनुमितिः प्रमा न वेति संशयः अप्रमैवेति विपर्ययः प्रमा न भवतीति प्रामाण्यव्यतिरेकविषयप्रमा वा स्यात्। तद्विरोधिनः प्रामाण्यनिश्चयस्यानुदयादित्यर्थः। न चेष्टापत्तिः। निरस्तसमस्तविभ्रमेत्यु-

[1] ति। प्राचीनमतस्यान्यथातात्पर्यस्यासिद्धत्वात्—अ. [2] प्य-आ मु. [3] वि—अ. [4] नो-कुं. [5] य" इत्युक्त्वा—अ.

ननु वह्निज्ञानप्रामाण्यनियतस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वस्यानुमित्यनुव्यवसायेन ग्रहणा[1]त्तत्रासंशय इति चेन्न । अनुमितेर्वह्निमत्त्वमात्रविषयकत्वेन बहिरर्थस्य धूमवत्त्वस्योपनायकाभावेनानुव्यवसायाविषयत्वात् ॥

क्तिविरोधात् । [2] व्यतिरेकप्रमापत्तेरनिष्टत्वाच्चेति भावः । अत एव न धर्म्यज्ञानादिनोपपत्तिः । कदापि विभ्रमाभावोपगमात् । अत्र संशयविपर्ययोरेकराशीकरणादन्यतरेति साधु ।

मण्युक्तमेव संशयादिनिवृत्युपायमाशङ्कते—**नन्विति । नियतस्येति** । यत्र धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वं तत्र वह्निमद्विशेष्यकत्वे सति वह्निप्रकारकत्वमिति व्याप्तारीति भावः । किं धूमवद्विशेष्यकत्वमनुमित्युपनीतमेव तदनुव्यवसायेन गृह्यत इत्युच्यते अथ परामर्शोपनीतमिति हृदि विकल्प्याद्यं निराह—**अनुमितेरिति । उपनायकेति** । अनुव्यवसाये भासकाभावेनेत्यर्थः । उपलक्षणं चैतत् । प्रामाण्यनियतस्यापि तत्वेनाभाने संशया[3]निरासात् । धूमवद्विशेष्यकत्वादेर्वह्निमद्विशेष्यकत्वव्याप्यत्वस्य बहिरर्थस्यानुमितौ सर्वथाभानाभावेन तदनुव्यवसाये तस्योपनायकाभावेनानुव्यवसायाविषयकत्वादित्यपि ध्येयम् । यत्तु प्रामाण्यव्याप्यस्य स्वरूपेणैव ज्ञानं संशयादिविरोधीत्येतादृहैवानन्यगत्या कल्प्यत इति तन्न । स्वतस्त्वेनाप्युपपत्याऽनन्यगतेरभावात् ।

---

1 न तत्र संशय-छ. 2 व्यभिचार-आ. 3 देर-मु-अ-आ.

न च लिङ्गपरामर्शस्तदुपनायकः। यत्रानुमितिद्वयेच्छा तत्र परमर्शानन्तरं प्रथमानुमितिरूपसाध्यसिद्धेः सत्वेप्यनुमित्साधीनपक्षतायाः सत्वेनानुमित्यनन्तरं तदनुव्यवसायकाले उपनायकपरामर्शनाशात्। ज्ञानान्तरोपनीतस्य ज्ञानान्तरानुव्यवसायेन ग्रहणेऽतिप्रसङ्गाच्च। वह्निमनुमिनोमीत्यनुव्यवसायेन धूमवत्वस्यानुल्लेखनात्[1]।

द्वितीयं निराह—**न चेति। अनुमितिद्वयेच्छेति।** ननु पूर्वं ममानुमितिद्वयं स्यादितीच्छा पश्चाल्लिङ्गपरामर्शः पश्चादनुमितिः। अनन्तरं द्वितीयानुमित्युत्पत्तिवेलायां धूमवत्त्वोपनायकस्य परामर्शस्यानाशेपि द्वितीयोत्पत्तिसमये पूर्वोत्पन्नेच्छाया अभावादनुमित्साया अभावेन द्वितीयानुमित्युत्पाद एवायुक्त इति चेन्न। अनुमित्सापदेनानुमित्साविषयसिध्यननुगुणानन्तरितत्वस्य विवक्षितत्त्वात्। तथैव पक्षतालक्षणेऽभिधानादिति भावः। पक्षताया इत्युपलक्षणम्। विनश्यदवस्थपरामर्शभावादित्यपि ध्येयम्।

अनुमित्यनन्तरमिति। द्वितीयानुमि[2]त्युत्पत्त्यनन्तरमित्यर्थः। अनुमित्यन्तरमिति पाठे जायत इति शेषः। ननु तदापरामर्शनाशेपि तज्जन्यसंस्कारसहितानुव्यवसायस्यास्तु तद्ग्रहणमित्यत आह—**ज्ञानान्तरेति।** घटज्ञानानुव्यवसाये पटज्ञानोपनीतस्य भानापत्तेरित्यर्थः। ननु तदुपनीतस्य तज्जन्यज्ञानान्तरानुव्यवसायेन ग्रहणमित्युक्तौ न दोष इत्यत आह—**वह्निमिति।** एतेन परामर्शनिष्ठप्रामाण्यानुमित्युपनीतं धूमवद्विशेष्यकत्वमिति प्रत्युक्तम्।

[1] लेखात्-च, लेखाच्च-कुं. [2] उत्पत्तिपदं न-मुं.

एतेनैव धूमवत्वे परामर्शोपनीतेऽनन्तरं वह्निमत्वविषयत्वेन जायमानानुमितिः सुरभिचन्दनमिति ज्ञानवद्विशिष्टवैशिष्ट्य[1]ज्ञानसामग्रीमहिम्ना लिङ्गोपहितलैङ्गिकविषयेति सैवोपनायकेति निरस्तम्। अनुमितेर्वह्निमत्वमात्रविषयत्वानुभवबलेन प्रत्यक्षज्ञान एव सामग्रीमहिम्नः संकोचात्। असंकोचे वा धूमवति धूमप्रकारकत्वरूपस्य[2] प्रामाण्यस्यानुमित्यनुव्यवसायेन ग्रहणे[3] धूमवत्त्वांशे [4]ऽनुमितेः स्वतः प्रामाण्यादृष्टान्तसिद्धिः। किंचैवं वह्निमत्वांशस्य साक्षादनुमित्युपनीतत्वाद्वह्निमद्विशेष्यकत्वे सति वह्निप्रकारकत्वरूपं प्रामाण्यमेवानुमित्यनुव्यवसायस्य[5] विषयोस्त्विति न साध्यवैकल्यम्।

सैवेति। अनुमितिरेवेत्यर्थः। एतेनैवेत्युक्तं व्यनक्ति—अनुमितेरित्यादिना। स्वत इति। ज्ञानानुव्यवसायवेद्यप्रामाण्यकत्वरूपस्वतःप्रामाण्यादित्यर्थः—दृष्टान्तेति। धूमवत्वांशे अनुमित्यनुव्यवसायवदिति दृष्टान्तेत्यर्थः। नन्वेवं तत्रैव क्वापि विप्रतिपन्नप्रामाण्यमनुव्यवसायवेद्यं न स्यात्। संशयाद्यभावस्य ज्ञानानुव्यवसाये प्रामाण्यव्याप्यविषयकत्वादेवोपपत्तेः। तत एव निष्कम्पप्रवृत्युपपत्तेश्चेत्यत आह—किंचैवमिति। धूमवत्वांशे स्वतः प्रामाण्ये सतीत्यर्थः—साक्षादिति। धूमवत्वांश इव ज्ञानान्तरनैरपेक्ष्येणेत्यर्थः। प्रामाण्यमेवे-

1 बोध—ख 2 'त्व' इति न ख ग घ ङ च 3 णात—ख.ङ.

यद्वा अहं सुखीति ज्ञानप्रामाण्यं तदनुव्यवसायविषयः तस्मिन्सत्यप्रकाशमानत्वरहितत्वात् व्यवसायवत्। न चासिद्धिः। तथात्वे[1] तत्प्रामाण्ये कदाचित्संशयाद्यापातात्।

त्येवकारेण प्रामाण्यांश एव संशयाद्यभावस्योपगमेन तत्रैव तन्निश्चयस्वीकारो युक्तो न तु व्याप्यांशे तन्निश्चयस्वीकारः प्रामाण्यव्याप्यत्वेनापि तन्निश्चयावश्यंभा[2]वश्चेत्याचष्टे।

एवं प्राचीनमतेऽविप्रतिपन्नं नवीनमते प्रसाध्याङ्गकं दृष्टान्तमुक्त्वा प्रयोग उक्तः। अधुना नवीनमतेप्यविप्रतिपन्नदृष्टान्तकं प्रयोगमाह—**यद्वेति**। यद्वा पूर्वमनुव्यवसायपक्षकान्प्रयोगानुक्त्वेदानीं तद्विषयपक्षकप्रयोगावाह—**यद्वेति। वस्तुतास्त्विति च॥**

यद्वा तद्वत्त्वादेर्बाह्यार्थस्य नानुव्यवसायविषयतेत्यतस्तर्हि सुखत्ववत्त्वादेरबाह्यत्वात्तत्रास्तु स्वतो वेद्यतेति भावेनाह—**यद्वेति। विषय इति**। सत्तेत्यपि ध्येयम्। तस्मिन्नित्यनेन तदनुव्यवसायपरामर्शः। साध्याविशेषनिरासाय नञ्द्वयम्—**तथात्व इति**। ज्ञानानुव्यवसाये सति तत्प्रमाण्याप्रकाश इत्यर्थः। [3]धर्म्यज्ञानाभावात्कोटिस्मृतेरपि कदाचित्संभवादिति भावः। ननु "आन्तरप्रामाण्यमपि न स्वतः। तस्य स्वतस्त्वे वा न सर्वस्य तथात्वम्। विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वादिकं प्रामाण्यम् स्वतो गृहीतुमशक्यमिति परत एव गृह्यत" इति मणिकृदुक्तेः कथमनुव्यवसायवेद्यतासाधनमित्यत स्तत्स्वरूपं

---

[1] कदाचित्प्रामाण्ये सं—च-छ. [2] वाचे-मु. [3] धर्मिज्ञानभावात्-मु. धर्मिज्ञानस्य भावात्-अ.

वस्तुतस्तु तद्वति तत्प्रकारकत्व[1]रूपं याथार्थ्यमेव प्रामाण्यम् तज्ज्ञानस्यैव प्रवर्तकत्वात्। तत्रानुव्यवसायस्य व्यवसायगतं यत्किंचिद्विशेष्यकत्वं रजतत्वप्रकारकत्वं[2] ज्ञानत्वं च विषय इत्यत्र न विवादः। किन्तु विशेष्यस्य यद्रजतत्ववैशिष्ट्यं तद्विषयकत्व एवेति तदेव साध्यते।

निष्कम्पप्रवृत्तिहेतुव्यवसायविषयभूतं धर्मधर्मिवैशिष्ट्यं सत्तयानुव्यवसाय[3]विषयः निष्कम्पप्रवृत्तिहेतुव्यवसायविषयत्वात् विशेष्यवत्। नचाप्रयोजकता। वैशिष्ट्यप्रतीतिसामग्र्या वक्ष्यमाणत्वात्;

निर्धारयन्नेव विशिष्याप्याह— **वस्तुतस्त्विति। तद्वतीति।** विशेष्यत्वं सप्तम्यर्थः। तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वरूपेत्यर्थः। तद्वद्विशेष्यकत्वमात्रस्य भ्रमेऽपि सत्वात्।

निष्कम्पेति। सशङ्कप्रवृत्तिहेतुव्यवसायविषये बाधनिरासाय हेत्वन्तं व्यवसायविशेषणम्। हेतौ च व्यभिचारनिरासाय। वैशिष्ट्यं च परमते समवायादिभिः सिद्धान्ते स्वरूपसम्बन्धादिभिः। यन्मते वैशिष्ट्यमनुव्यवसायविषयोपि न स्वातन्त्र्येण तद्विषय इत्यभ्युपगमस्तन्मते सिद्धसाधनतानिरासाय सत्तयेति विशेषणम्। वादिनं प्रति तत्सार्थक्यमाद्यसाध्य विवृतावस्माभिरुक्तं ध्येयम्—**वैशिष्ट्येति।** सत्तयेत्यपि योज्यम्—**वक्ष्यमाणत्वादिति।** उत्तर[4]भङ्गबाधोद्धारे नन्वेव मित्यादिग्रन्थेनेत्यर्थः। तथाच तादृशव्यवसायविषयत्वस्यैवोक्तसाध्ये सामग्र्यत्वेन

---

[1] ज्ञानत्व—छ. क. [2] ज्ञानत्वं, इतिनास्ति—कुं. [3] स्य—मु. [4] रत्रबाधो—मु-अ-आ.

यद्वा विमतोऽनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयीकरणयोग्यः । अनुव्यवसायत्वात् । गृहीतप्रामाण्यज्ञानसमानविषयकज्ञानान्तरानुव्यव्यवसायवत् । अनुमित्यनुव्यवसायवद्वा । व्यवसायविषयभूतं धर्मधर्मिवैशिष्ट्यं वा स्वविषयव्यवसायविषयकानुव्यवसायं प्रति सत्तया विषयत्व-

---

सामग्रीमुपेत्य कार्यानभ्युपगमे व्याघातप्रसङ्गान्नाप्रयोजकत्वमि[1]त्यर्थः ।

द्वितीयनिरुक्त्यनुरोधेन प्रयोगत्रयमाह—**यद्वेति** । इति सामान्यतः स्वतस्त्वं साध्यमित्यन्वयः । तत्राद्यमनुव्यवसायपक्षकम् । उत्तरं तु द्वयं तद्विषयपक्षकम् । तत्राप्याद्यं व्यवसायविषयपक्षकम् । अन्त्यं [2]तन्निष्ठप्रामाण्यपक्षकमिति व्यक्तम् । **विमत इति** । प्रामाण्यविषयीकरणयोग्यत्वतदयोग्यत्वाभ्यां विमतिविषयः । विमतेरपि नियताविषयत्वायावच्छेदकस्यापेक्षितत्वात्तदाह—**अनुव्यवसाय इति** । वक्ष्यमाणदिशा तत्प्रकारप्रकारकत्वादिरूपानुव्यवसायत्वेन नियता लघ्वी विमतिरेव पक्षतावच्छेदिकेत्यर्थः । अत एव प्रमानुव्यवसाये न बाधादिः । वक्ष्यमाणरूपानुव्यवसायत्वस्य तत्राभावात् । बाधनिरासाय **स्वग्राह्य**ज्ञानेति साध्यविशेषणम् । योग्यत्वं च स्वविषयज्ञानद्वारा प्रामाण्यावच्छिन्नसहजशक्तिकत्वं ध्येयम् । वक्ष्यमाणरूपानुव्यवसायत्वादिति हेत्वर्थो ध्येयः । तेनाप्रमागोचरानुव्यवसाये न व्यभिचारः । **गृहीतेति** । अयं च दृष्टान्तो "न च दृष्टान्तः साध्यविकलः" इत्यादिना प्रागेव साधित इति भावः । प्राचीनमतरीत्याह—**अनुमितीति** । अयमपि दृष्टान्तो नवीनमतेपि प्राक्साधितः—**व्यवसायेति** । प्रमारूपो

---

[1] ति भावः–आ. [2] तु–मु अ आ.

योग्यं व्यवसायविषयत्वात् विशेष्यवत्; तत्तज्ज्ञानप्रामाण्यं वा स्वाश्रयज्ञानविषयकानुव्यवसायविषयत्वयोग्यं तद्विषयत्वायोग्योपाध्यघटितज्ञानधर्मत्वात् तत्तज्ज्ञानत्ववदिति सामान्यतः स्वतस्त्वं साध्यम्।

न चान्त्यहेतोरसिद्धिः। प्रामाण्योपाधेर्विषयसत्वस्य व्यवसायविषयत्वेनानुव्यवसायविषयत्वयोग्यत्वात्। योग्यायोग्योपाधिघटिते प्रमाप्रमा-

---

व्यवसायोऽत्राभिमतः—**विशेष्यवदिति**। तद्विशेष्यवदित्यर्थः। "प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानवृत्तिधर्मत्वात् ज्ञानत्ववत्" इति—

"प्रत्यक्षवच्च प्रामाण्यं स्वत एव"

इत्येतद्व्याख्यानसुधायामुक्तमनुमानं परिष्कृत्याह—**तत्तज्ज्ञानेति**। **योग्यमिति**। 'योग्यत्वं च साक्षिनिष्ठां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वाराऽवच्छेदकत्व" मिति पूर्वोक्तं ध्येयम्। तद्विषयत्वायोग्योपाध्यघटितेत्युक्त्या सुधाम्बाप्रा-ाण्येनग्दाशों विवृतः। तेन विशेष्यावृत्यप्रकारक[1]त्वरूपप्रामाण्ये व्यभिचारो निरस्तः। **सामान्यतः**। प्रतिबद्धाप्रतिबद्धसाधारण्येनेति वा प्रामाण्यमात्रसाधारण्येनेति वा नत्वहं सुखीति ज्ञानप्रामाण्यमितिवद्विशिष्येत्यर्थः। वैशिष्ट्यसत्वविषयकत्व एव विवादादाह—**विषयसत्वस्येति**। **अन्यतरत्वादाविति**। तद्विषयत्वयोग्योपाधिघटित ज्ञानधर्मत्त्वादित्युक्तावुक्तस्थले हेतुसत्वेपि

---

[1] त्वादि-मु-अ.

न्यतरत्वादौ व्यभिचारनिरासाय नञ्द्वयम्। [1]अनुव्यवसायत्वं च व्यवसायप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च तद्विषयकप्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वेति न

साध्याभावाव्यभिचारः प्राप्नोतीति तन्निरासाय तद्विषयत्वायोग्योपाध्यघटितेत्युक्तिरित्यर्थः। विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वतद्वतितत्प्रकारकत्वा[2]दिरादिपदार्थः। ज्ञानधर्मत्वादित्येवोक्तावप्रमात्वादौ व्यभिचार इति भावः।

नन्वत्र सर्वानुमानेष्वभिमतमनुव्यवसायत्वं यदिज्ञानगोचरज्ञानत्वं तदा ज्ञानमिति शब्दजज्ञाने बाधादिर्दोषः। सविषयकज्ञानगोचरज्ञानत्त्वे तु घटज्ञानमिति शाब्दज्ञाने दोषः। ज्ञानगोचरप्रत्यक्षत्वेत्वप्रमागोचरानुव्यवसाये सामान्यप्रत्यासत्तिजन्यज्ञानगोचरप्रत्यक्षे च बाधादिरेव। ज्ञानगोचरनित्यज्ञानत्वे [3]ईश्वरज्ञानमादाय सिद्धसाधनतेत्यत आह—**अनुव्यवसायत्वं चेति**। एतेन "तार्किकाभिमतानुव्यवसाय एवास्माकं साक्षीति" प्रागुक्तं विवृतं ध्येयम्। अत्र दलद्वयकृत्यं प्रागेव व्यक्तम्।

ननु यदि व्यवसायप्रकारप्रकारकतयेत्यादिरूपमनुव्यवसायत्वं तर्हीदमेव प्रामाण्यविषयकत्वमिति सिद्धसाधनता [4]दोष इति चेन्न। सत्तया प्रमाण्योल्लेखस्यास्मिन्पक्षे साध्यस्याभिमतत्वात्। यदा तु प्रामाण्यविषयकत्वमात्रमेव साध्य [5]मिति मतं तत्पक्षे प्रकारान्तरेणाह—**ज्ञानांश इति।**

---

[1] इयं पङ्क्तिः छ–पुस्तके नास्ति.　[2] न्यतरत्वा–मु.　[3] त्वी–मु,
[4] दिर्दो–मु-अ.　[5] मभि–मु-अ,

काश्चिद्दोषः । अप्रामाण्यं तु विसंवादाद्यनुसंधाने सत्येव गृह्यत इति न स्वतस्तद्ग्रहः । प्रामाण्यधीस्तु संवादाद्यनुसंधानं विनापि दृष्टेति विशेषः ।

ननु गृहीताप्रामाण्यज्ञानसमानविषयकज्ञानान्तराप्रामाण्ये संशयादर्शनेन तत्रानुव्यवसायवेद्यत्वे सिद्धेऽन्यत्रापि तथेत्यप्रामाण्यधीरपि स्वतः स्यादिति चेन्न । अप्रामाण्योपाधेर्व्यवसायविष[1]याभावस्य तदनुपनीतत्वेनानुव्यवसायायोग्य-

---

लौकिकत्वं तु सामान्यप्रत्यासत्याद्यजन्यत्वम् । ज्ञानांश इति विशेषणं तु स्मृत्युपनीत अतीत[2] घटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्र बाधादिनिरासायेति भावः । नन्वेवं ज्ञानधर्मत्वबाह्यार्थत्वयोरविशेषाद्विसंवादसंवादापेक्षत्वस्योभयत्र साम्याद्प्यप्रामाण्यमपि स्वतो गृह्येतेति ततः कः प्रामाण्यस्य विशेष इत्यत आह—**अप्रामाण्यं त्विति** । विवरिष्यते चैतत्प्रामाण्यानुमित्यसंभववादे—**दृष्टेति** । अभ्यासदशापन्नस्थल इति भावः ।

ननु अनुव्यवसायः स्वग्राह्यज्ञानाप्रामण्यविषयीकरणायोग्यः । अनुव्यवसायत्वात् गृहीताप्रामाण्यकज्ञानसमानविषयकज्ञानान्तरानुव्यवसायवदित्याभाससाम्यमाशङ्क्य निराह—**नन्वित्यादिना । व्यवसायेति** । व्यवसाये इदं रूप्यमित्यादिभ्रमे अविषयो योऽभावो रजतत्वाभावस्तस्येत्यर्थः । तदभाववति तत्प्रकारकत्वरूपत्वादप्रामाण्यस्य तद्घटकोपाधिरूपस्याभावस्येदं रूप्यमिति ज्ञानेऽनुल्लेखेन नेदं रूप्य-

---

[1] यसत्त्वाभा—छ. [2] ते—मु. आ—आ.

त्वात्। तदुक्तं भगवत्पादैः "प्रामाण्यं च स्वत एव अन्यथानवस्थानात्" इति। ज्ञायत इति शेषः। उक्तानुमानसाध्यानि विनोक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः।

स्वतस्त्वेऽनुमानानि ॥ ३ ॥

ननूक्तरूपं याथार्थ्यं न साक्षिणो

मिति ज्ञान एवोल्लेखेन कथं तस्यानुव्यवसाययोग्यत्वम्। तथा च तत्र बाध एव दोष इति भावः—**तदुक्तमिति**। स्वतस्त्वे एतान्यनुमानान्यनवद्यानीत्येतद्विष्णुतत्वनिर्णय उक्तमित्यर्थः। तत्पठित्वा प्रकृतानुगुण मर्थमाह—**प्रामाण्यं चेति**।

स्वतस्त्वेऽनुमानानि ॥ ३ ॥

ननु अप्रामाण्यघटकोपाधेरभावस्य व्यवसायाविषयतया तदनुव्यवसायवेद्यत्वमप्रामाण्यस्य बाधितमिति यथोच्यते तथैव प्रामाण्यघटकोपाधेर्धर्मधर्मिवैशिष्ट्यस्य व्यवसायविषयत्वेपि न तदनुव्यवसायविषयता। तस्य बहिरर्थत्वात् अन्यथा धर्मधर्म्यंश इव वैशिष्ट्ये अस्ति न वेति कदापि संदेहो न स्यादिति भावेन "अस्तु तावदिदं प्रामाण्यं तथाप्यनुव्यवसायानन्तरं व्यवसायस्य प्रामाण्ये अर्थस्य तद्वत्वे च संशयस्यानुभवसिद्धत्वान्नार्थतद्वत्त्वं तस्य विषयः" इति मणिकृदुक्तं हृदि कृत्वा शङ्कते—**नन्विति**। **उक्तेति**। तद्वति तत्प्रकारकज्ञानत्वरूपमित्यर्थः। वक्ष्यमाणोपपादनसौकर्यायैतदुक्तिः। स्वरूपज्ञानं साक्षीति सिद्धान्ता[2] वष्टम्भेनाह—**साक्षिण इति**। मानसज्ञानानुभवो अनुव्यवसाय इति मतावष्ट-

अनुव्यवसायस्य[1] वा विषयः। रजतत्वप्रकारकत्वे सन्देहादर्शनेन तस्य तद्विषयकत्वेपि रजतत्वव-द्विशेष्यकत्वे संदेहदर्शनेन रजतत्ववत्वरूपेब-हिरर्थे तस्यासामर्थ्यात्। तथाच स्वतस्त्वा-नुमानानि बाधितविषयाणीति चेन्न। सुखत्ववत्वा-देर्बहिरर्थत्वाभावेन साक्षिवेद्यसुखादिज्ञाने स्वतः प्रामाण्याप्रतिहतेः।

किंच किं रजतत्वादिवैशिष्ट्यमनुव्यवसाया-विषय एव किं वा व्यवसायविषयतया तद्विष-योपि स्वातन्त्र्येण तदविषयः। नाद्यः। अनुव्यव-सायस्य ससंबान्धिकव्यवसायविषयकसाक्षात्कार-त्वेन संबान्धितावच्छेदकरजतत्वादिवैशिष्ट्यविष-

---

म्भेनाह—**अनुव्यवसायस्य** वेति। तद्वद्विशेष्यकत्वसन्देहस्य तद्वत्वसन्दे-हपर्यवसानाद्रजतत्त्ववत्त्वरूपेत्युक्तम्—**तस्येति**। अनुव्यवसायस्येत्यर्थ।

सर्वप्रामाण्यस्य स्वतस्त्वानापत्तेराह—**किंचेति**। "नार्थतद्वत्वं तस्य विषयः" इति मण्युक्तेरुभयथा संभवात् स्वातन्त्र्येणेति कैश्चिद्व्या-ख्यानाच्च द्वेधा विकल्पः—**संबन्धितेति**। व्यवसायसंबन्धिनि रजते या संबन्धिता तदवच्छेदकेत्यर्थः—**नियमादिति**। संयोगप्रत्यक्षादौ तथा दर्शनादिति भावः। न च संयोगनिर्विकल्पके व्यभिचारः। तदभावस्य वक्ष्यमाणत्वात्। तस्यापि संयोग्यंशे सविकल्पकत्वाच्च। साक्षात्कारपदेना-

---

[1] ससबन्धिकव्यवसायस्य—**ग**. [2] मता—**अ.-मु**.

यकत्वानियमात्। धर्मधर्म्यंशयोरिव तद्वैशिष्ट्यांशेपि व्यवसायप्रत्यासत्तेः सत्वेन तदप्रतीतौ हेत्वभावाच्च। रजतं जानामीत्यनुव्यवसायेपि रज-

साधारणधर्मप्रकारेण ससंबन्धिकसाक्षात्कारस्याभिप्रेतत्वाच्च। अत एव गुणत्वप्रमेयत्त्वादिसामान्यप्रत्यासत्तिजन्ये ससंबन्धिकसंयोगादिसाक्षात्कारे न व्यभिचारः। न चैवमपि संयोगत्वसामान्यप्रत्यासत्तिजन्ये संयोगसाक्षात्कारे व्यभिचारः। एवं हि लौकिकेत्यपि साक्षात्कारो विशेषणीयः—**धर्मेति**। बाह्यार्थत्वेपि रजतस्थं रजतत्वं तदाधारभूतं विशेष्यं च यथानुव्यवसायस्य विषयः तथा रजते रजतत्ववैशिष्ट्यमपि विषयोस्तु, तयो र्व्यवसायोपनीतत्वे तद्वत्वस्यापि व्यवसायोपनीतत्वमस्तु, न हि व्यवसायः स्वविषयमध्ये धर्मधर्मिणोरेवोपनायको न वैशिष्ट्यस्येत्यत्र हेतुरस्तीत्यर्थः। प्रत्यासत्तेरिति पररीत्योक्तम्। व्यवसायविषयत्वस्य नियामकस्य सत्वेनेति वार्थः।

ननु धर्मधर्म्यंशयोः संशयो न कदाचित् तद्वत्वांशे तु सोस्तीति संशय एव तदप्रतीतौ हेतु[1]कल्पक इति चेन्न। तस्यान्यथोपपत्तेर्वक्ष्यमाणत्वादिति भावः।

ननु वैशिष्ट्यस्यापि भाने भासमानवैशिष्ट्यप्रतियोगि[2]त्वरूपस्य रजतत्वादिगतस्य प्रकारत्वस्यापि भानप्रसङ्गेनेदं[3] रजतत्वेन जानामीत्येवानुव्यवसायो भवेन्नत्विदं रजतं जानामीत्यत आह—**रजतमिति**। अपीत्यु[4]पगमवादः। रजतत्त्वेनेत्येवाकारो नत्वेवं तथापत्यर्थः। यद्वा वैशिष्ट्यस्यानुव्यवसायाविषयत्वे दोषान्तरमाह—**रजतमिति**। न

[1] तुः—**मु.** [2] त्वादि—**मु.** [3] च—**मु.** [4] त्यभ्यु—**अ. आ, मु.**

तरजतत्वयोः स्वरूपेणैव भाने तस्य पुरोवर्ति[1]-रजतत्वे जानामीति समूहालम्बनरूपानुव्यवसायाद्विषयभेदाभावापाताच्च । व्यवसायगतस्य रजतत्ववैशिष्ट्यविषयकत्वस्यासिद्ध्यापाताच्च । नह्यनुव्यवसायादन्येन तत्सिद्धिः । न च वैशिष्ट्यमगृह्णन्नुव्यवसायस्तद्विषयकत्वग्र[2]हणे शक्तः ।

ननु वैशिष्ट्यविषयकव्यवहारादिलिङ्गकानुमित्या व्यवसायप्रामाण्यानुमित्या वा तत्सिद्धिः । न त्वनुव्यवसायेन । इदं रजतत्वेन जानामीतिहि तदाकारो नत्विदं रजतमिति । तृतीयार्थश्च न वैशिष्ट्यम् । व्यवसायेपि तदर्थोल्लेखापत्तेः । किं तु व्यवसायगतं रजतत्वप्रकारकत्वम् । तस्माद्वैशिष्ट्यं नानुव्यवसायविषय इति चेन्मैवं । वैशिष्ट्यविषयकत्वस्यानुमेयत्वेऽनुमि[3]तितः प्राक्तत्र

केवलं समूहालम्बन इत्येपरर्थः । [1]इदं रजतमिति व्यवसायसमानाकारतयोत्पद्यमानेपीति वार्थः—**स्वरूपेणैव** । असंबद्धतयैवेत्यर्थः । **असिद्धीति**—रजतरजतत्वयोः स्वरूपेणैव भान इत्यनुकर्षः । **तद्विषयकत्वेति** । वैशिष्ट्यविषयकत्वेत्यर्थः ।

व्यवहारादीति । प्रवृत्तिरादिपदार्थः । व्यवसायो वैशिष्ट्यविषयकः तद्विषयव्यवहारप्रवृत्तिहेतुत्वात् संमतवदित्यनुमित्या इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वादित्यादिप्रामाण्यानुमित्या वेत्यर्थः । तद्वद्विशे-

---

[1] रजतरजतत्वे–च. मु. [2] हे–च. छ. क. ग. मु. [3] तेः–च.
[4] इयं पङ्क्तिः–अ. पुस्तके नास्ति.

कदाचित्संशयाद्यापातात् । भासमानवैशिष्ट्यप्रतियोगित्वादन्यस्य प्रकारत्वस्याभावेनेदं रजतत्वेन जानामीत्याकारेणैवानुव्यवसाये[1] धर्मधर्म्यंशविषयकत्वस्येव वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे तत्त्यागेनान्यतस्तत्सिद्धिकल्पने धर्मधर्म्यंशाविषयकत्वस्याप्यन्यतः सिद्धिकल्पनापाताच्च । न च व्यवसायस्य वैशिष्ट्यविषयकत्वमगृह्णन् धर्म्यंशादिविषयकत्वमात्रं गृह्णन्नन्योऽनुव्यवसायोऽनुभूयते ।

न च व्यावर्तकत्वं वा तज्ज्ञानजनकज्ञानप्यकत्वस्य प्रामाण्यरूपत्वादिति भावः—**तत्सिद्धिः** । व्यवसायेवैशिष्ट्यविषयकत्वसिद्धिरित्यर्थः । "इदं रजतं जानामीति नानुव्यवसायाकारः । बहिर्विशेष्यके मनसोऽसामर्थ्यात् । किं त्विदं रजतत्वेन जानामीती" त्यादिमण्युक्तमाह—**इदं रजतत्वेनेति** । **वैशिष्ट्यविषयकत्वस्येति** । व्यवसायगतस्येत्यनुषङ्गः—**धर्म्यंशेति** । इदंत्वविशिष्टेदमंशविषयकत्वस्येत्यर्थः । विशेष्यांशेति वार्थः—**अन्यत इति** । अनु[2]व्यवसायादन्यतो व्यवहारादिलिङ्गतो व्यवसाय[3]प्रामाण्यानुमितितो वेत्यर्थः । संशयाभावतद्भावौ त्वन्यथोपपन्नाविति भावः । ननु तदंशेऽनुव्यवसायान्तरतः सिद्धिरनुभवसिद्धेत्यतो निराह—**न चेति** ।

अन्यस्य प्रकारत्वस्याभावेनेत्येतस्यासिद्धिमाशङ्क्य निराह—**न च व्यावर्तकत्वमित्यादिना** । विशेष्यनिष्ठव्यावृत्तिबुद्धिजनकत्वं व्यावर्तकत्वं—**तज्ज्ञानेति** । वैशिष्ट्यज्ञानेत्यर्थः । विशेषणज्ञानस्य विशिष्ट-

[1] न—च.मु. [2] अनु ' इति न—मु. [3] यादि—अ.

विषयत्वं वा विशेष्यानिष्ठो रजतत्वादिनिष्ठो ज्ञानेन सह स्वरूपसंबन्धविशेषो वा प्रकारत्वमिति वाच्यम् । बहिरर्थानां तेषां वैशिष्ट्यवद्व्यवसायविषयत्वाभावेनानुव्यवसाये भानायोगात् । क्लृप्तस्य भासमानवैशिष्ट्यप्रतियोगित्वस्य त्यागेन स्वरूपसम्बन्ध[1]विशेषकल्पनायोगाच्च । इदं रजतत्व[2]विशिष्टतया जानामीत्यनुव्यवसायाच्च । व्यव-

ज्ञानजनकत्वादिति भावः—**वैशिष्ट्यवदिति** । वैशिष्ट्यस्य यथा व्यवसायविषयत्वं तथाऽभावेनेत्यर्थः । वैशिष्ट्यस्य बाह्यार्थत्वेपि व्यवसायविषयत्वात्तत्प्रतियोगित्वरूपप्रकारत्वस्यानुव्यवसाये भानं युक्तमिति भावः । ज्ञानेन सह स्वरूपसम्बन्धविशेषो न बहिरर्थ इत्यत आह—**क्लृप्तस्येति** । अतीतादिस्थले व्यावृत्तिबुद्धिजनकत्वरूपव्यावर्तकत्वायोगात् । विशेषणज्ञानाहेतुत्वपक्षे च द्वितीयस्यायोगेन तत्र भासमानेत्यादिरूपस्यैव प्रकारत्वस्य क्लृप्तत्वादिति भावः । "वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे" इति प्रागुक्तमसिद्धमित्यत आह—**इदं रजतत्वे[3]ति** ।

ननु इदं विशेष्यकरजतत्ववैशिष्ट्यप्रकारकज्ञानवानहमित्यनुव्यवसायादिति ह्यस्यार्थः । न च वैशिष्ट्यं व्यवसाये प्रकारः । प्रागनुपस्थितत्वेन संसर्गमर्यादयैव भानादिति चेन्न । विशेषणज्ञानहेतुताया निर्विकल्पकभङ्गे निरसिष्यमाणत्वेन प्रागनुपस्थितस्यापि वैशिष्ट्यस्य व्यवसाये रजतत्वस्येव प्रकारतया भाने बाधकाभावादिति भावः ।

---

[1] विशेषपदं नास्ति—छ. [2] त्वेन—मु. [3] त्वेनेति—मु.

सायस्य त्वदुक्तरजतत्वप्रकारकत्वेनैवेदं रजतमित्याकारस्येदं रजतमित्यभिलपनं रजतार्थि[1]प्रवृत्तिं च प्रति हेतुत्वस्य च सम्भवे तस्य वैशिष्ट्यविषयकत्वाभावापाताच्च ।

अनुव्यवसाय एव तृतीयार्थोल्लेखस्तु तत्र वैशिष्ट्यभानेऽप्यधिकस्य रजतत्वे व्यवसायं प्रति प्रकारत्त्वस्यापि भानात् । अत एवानुव्यवसायस्येदं रजतमित्याकारत्वाभावोपि । वैशिष्ट्यस्य स्वातन्त्र्येणाभानात् ।

एवंरूपानुव्यवसाये विप्रतिपत्तिरिति चे[2]त्तर्हीदं रजतत्वेन जानामीत्याकारोपि वैशेष्ट्याभाने[3]प्युपपद्यता[4]मित्यतिप्रसङ्ग इत्याह—**व्यवसायस्येति** । इत्याकारस्य हेतुत्वस्य च संभव इत्यन्वयः ।

वैशिष्ट्यस्य तृतीयार्थत्वे व्यवसायेपि तृतीयार्थोल्लेखापत्तेरिति प्रागुक्तदोषं निराह—**अनुव्यवसाय एवेति** । **प्रकारत्वस्येति** । भासमानवैशिष्ट्यप्रतियोगित्वरूपस्येत्यर्थः । व्यवसाये त्वात्माश्रयापत्तेर्नोक्तरूपप्रकारत्वस्य भानमिति भावः । वैशिष्ट्यस्यापि भाने व्यवसायसमानाकारता स्यादित्यत आह—**अत एवेति** । अत एवेत्युक्तं व्यनक्ति—**वैशिष्ट्यस्येति** । **स्वातन्त्र्येणेति** । व्यवसाय इव ज्ञानाविशेषणतयेत्यर्थः ।

"बहिर्विशेष्यके मनसोसामर्थ्या" दिति मणौ विशेष्यपदप्रयोगसूचितं "न च तन्मात्रं प्रामाण्यम् । भ्रमसाधारणत्वात् । किं नाम

[1] नः–छ. [2] त्र । तर्ही–कुं. [3] वे–कुं. [4] तेचेत्तर्ह्युति–कुं.

नन्वनुव्यवसाये वैशिष्ट्यस्य व्यवसायगतस्य रजतत्ववद्विषयकत्वस्य च भानेपि प्रामाण्यान्तर्गतं व्यवसायनिष्ठं रजतत्ववद्विशेष्यकत्वं न भासते। न च रजतत्ववद्विषयकत्वे सति रजतत्वप्रकारकत्वमेव प्रामाण्यम् मन्मते भ्रमसाधारण्यादिति चेन्न। रजतत्वे तृतीयार्थोल्लेखबलेन प्रकारकत्वस्येव रजतेऽपि द्वितीयार्थोल्लेखबलेन विशेष्यकत्वस्या[1]नुव्यवसायेन गृहीततया समानसंवित्संवेद्यतया च व्यवसाये[2]द्विशेष्यकत्वस्यापि ग्रहणात्। अस्ति हि दोषशङ्काद्यवतारदशाया-

रजतत्ववद्विशेष्यकं रजतत्वप्रकारकमिदं ज्ञानं ' इत्यादिपक्षधरोक्तं हृदि कृत्वाशङ्कते—**नन्विति**। **न भासत इति**। मनसो बहिरसामर्थ्यादिति भाव.। त[3]द्विषयकत्वमेवास्तु प्रामाण्यम्। किं रजतत्ववद्विशेष्यकत्वेनेत्यत आह—**नचेति**। **मन्मते**। तार्किकमत इत्यर्थः। तन्मते शुक्तौ रजतत्वाद्यारोपे सति तदाश्रयस्य सत्यरजतस्यापि विषयत्वादिति भावः। द्वितीया विषयत्वरूपकर्मत्व एव शक्ता। न तु विशेष्यत्व इति वादिनं प्रत्याह—**समानेति**। प्रकारत्वविशेष्यत्वयोरिति वा प्रकारत्वतद्विशेष्यकत्वयोरिति वार्थः। नन्वेवं भ्रमेपि प्रामाण्यापत्तिरिति चेत्कस्य दोषः। मन्मत इवासत एवारोपः स्वीक्रियताम्। तदनधिकरणाविशेष्यत्वादिकमधिकं वा निवेश्यतामिति भावः। रजते द्वितीयार्थोल्लेखोऽसिद्ध इत्यत उपपादयति—**अस्तीति**। **न च बाह्यार्थे[4]षु**

[1] ध्य—**च छ क मु.** [2] द्व—**च मु.** [3] द्व—**मु आ.** [4] नुव्यवसायस्यासामर्थ्य—**मु.**

मिदं रजत्वेन जानामीत्यनुव्यवसायेऽपि तदन वतारदशायां रजतंरजतत्वेन जानामीत्यनुव्यवसायः। तस्मान्नाद्यः। द्वितीये[1] सिद्धं प्रामाण्यस्य स्वतस्त्वम्। वैशिष्ट्यरूपस्य तद्धत्वस्याप्यनुव्यवसायेन ग्रहणात्।

नन्वेवमप्यनुव्यवसायस्य श्रुतसाक्षिवाक्यवदन्यविषयतया वैशिष्ट्यग्राहकत्वेपि तत्संशयविरोधित्वरूपं[2] सत्तानिश्चयरूपत्वं नास्तीति न तद्घटितप्रामाण्ये निश्चयरूपता। न ह्यन्यविषयत-

---

व्यवसायस्यासामर्थ्यम्। उपनायके सति सामर्थ्यसम्भवात्। न चोपनीतं विशेषणत्वेन भातीति नियमः। परमाणुमहं जानामीत्यादौ व्यभिचारादिति भावः—**सिद्धमिति**। स्वातन्त्र्येण ज्ञानग्राहकग्राह्यत्वस्य स्वतस्त्वनिरुक्तावप्रवेशात्। सत्वेन तथात्वस्य [3] सत्वाच्चेति भावः।

नन्वर्थसत्वघटितस्यैव प्रामाण्यरूपत्वात्तस्यानुव्यवसायवेद्यता न प्राप्तेति भावेन शङ्कते—**नन्विति**। **श्रुतेति**। साक्षिणा श्रुतं तेनोच्चरितं वाक्यं साक्षिवाक्यं तस्येवेत्यर्थः। गृहे घटोस्तीति श्रुणोमीत्यादिसाक्षिवाक्यस्येवेति यावत्। अन्यविषयतया व्यवसायविषयतयेत्यर्थः। व्यवसायो रजते रजतत्वमस्तीत्याह नाहं तज्जानाम्यस्ति न वेत्येवं रूपतयेति भावः—**तद्घटितेति**। वैशिष्ट्यसत्वघटितेत्यर्थः। अनुव्यवसायो नार्थसत्वावधारणरूपः अन्यविषयतया तद्ग्राहकत्वात् श्रुतसाक्षिवाक्यवदित्युक्तं भवति। हेतोरप्रयोजकत्वं निराह—**नहीति**। अन्यविषय-

---

[1] ऽपि—**च मु.** [2] पस—**च.** [3] सम्भवा—**मु.**

याप्यर्थग्राहकेणार्थसत्वसिद्धिः । गेहे घटमिच्छामि गेहे घटसंशयः गेहे घटज्ञानमित्यादिवाक्यजन्य ज्ञानेनापि घटसत्वसिध्यापातादिति चेन्न । यत्र ज्ञानस्या[1]न्यद्वारेणार्थविषयता तत्र द्वारिणा द्वारं सत्वेनार्थविषयकमिति ग्रहणे द्वारिणोपि सत्वेनार्थविषयतेति दृष्टानुसारेण कल्पनेऽनतिप्रसङ्गात् । न हि द्वारमिच्छादिकं सत्वेनार्थविषयतया द्वारिणा ज्ञानेन गृहीतम् । दोषशङ्कादिनाऽनास्कन्दितो व्यवसायस्त्वनुव्यवसायेन तथा गृहीतः । गेहे घटज्ञानं साक्षिणा श्रुत[2]वाक्यं च यदिसत्वेनार्थविषयतया द्वारिणा [3]ज्ञानेन गृहीतं तदा तेनापि घटसत्वं सिध्यतया वैशिष्ट्यग्रहणे[4]पि तत्सत्वावधारणरूपत्वमनुव्यवसायस्याविरुद्धमिति [5]वक्तुं सामान्यन्यायं च[6] वदन्नतिप्रसङ्गं निराह—**यत्रेति** । पक्षे तद्दर्शयति—**दोषेति** । दुष्टकरणजन्यत्वशङ्का भ्रमत्वादिशङ्कादिनेत्यर्थः—**तथेति** । सत्वेनार्थविषयकतयेत्यर्थः । तर्हि पूर्वोक्तस्थलेऽप्येवं स्यादित्यत आह—**गेह इति** । इच्छासंशयग्राहिणोऽसत्वेनार्थविषयकतया द्वारग्रहणबाधाद्गेहे घटज्ञानमित्येवोक्तम् । एतेनानुव्यवसायः सत्तयार्थविषयकः सत्वेनार्थविषयकतया व्यवसायविषयकत्वात् तादृशं यद्गेहे घटज्ञानमिति ज्ञानं श्रुतं साक्षिवाक्यं च तद्वत् । गेहे घटसंशय इत्यादिज्ञाने[7] तु हेतोरेवाभावान्न व्यभिचार इत्युक्तं भवति । पूर्वपक्ष्युक्तो हेतुरप्र-

[1] र्थद्वारेणान्यविषयता—**क.** [2] तं—**च छ क.** [3] ज्ञानेति नास्ति—**क ग.** [4] तु—**अ.** [5] वक्तुं' इति न—मु. [6] च इति न—**मु.** [7] ग्रहे—**अ.**

त्येव। यदि च सव्यवधानत्वमात्रेण सत्वा-
निश्चायकत्वं तार्हि गेहे मम घटप्रमेत्याप्त[1]वाक्य-
जन्यज्ञानेनापि घटसत्वं न सिध्येत्।

ननु तत्रार्थतथात्वघटितं प्रमात्वं गृह्यज्ज्ञानं
घटसत्वं स्वातन्त्र्येणापि गृह्णातीति चेन्न। मम
[2]मतेऽनुव्यवसायस्यापि प्रामाण्यग्राहकत्वेनात्रापि
स्वातन्त्र्यस्य सुवचत्वात्।

योजक इत्याह—यदि चेति।

वैषम्यमाशङ्क्य प्रकृतेपि समामित्याह—नन्वित्यादिना। स्वातन्त्र्येणापीति। व्यवसायवदिति भावः—सुवचत्वादिति। व्यवसायनिष्ठस्य तद्वत्वघटितप्रामाण्यस्य ज्ञानत्ववत्साक्षादेवानुव्यवसाय-विषयता। न तु व्यवसायद्वारा। परन्तु तद्वत्वस्य तदयोग्यतया चाक्षुष-ज्ञाने सौरभस्येवोपनीतस्य भानम्। इयांस्तु विशेषः। यदत्रोपनायक-स्यापि सामग्रीसद्भावाज्ज्ञानविषयता। तत्र तु सामग्र्यभावात्तदविषय-तेति भावः।

एतेन यत्कैश्चिदुक्तं घटज्ञानवानहं अयं घट इत्यत्र वैल क्षण्यस्य सर्वसंमततया तन्नियामकस्योपनायकभानसामग्रीसमवधान तदसमवधानादेरवश्यकल्पनात्। यत्रोपनायकमपि भासते तत्रोपने[3]यांशे [4]स्वातन्त्र्यम्। अत एव सुरभिचन्दनमित्यत्र स्वातन्त्र्यम्। स्वातन्त्र्यं-च ज्ञाननिष्ठं संशयादिविरोधितावच्छेदकमेव किंचित्फलबलकल्प्यम्। स्वरूपसम्बन्धविशेषविषयत्वादिति। तन्निरस्तम्। स्वातन्त्र्येणोपना-यकत्वेऽज्ञायमानत्वस्य प्रयोजकत्वे गौरवात्। गेहे घटप्रमेत्यादि-

[1] दि-कुं. [2] मन्म-मु. [3] नयां-मु. [4] अस्वा-मु.

अर्थसत्वनिश्चयत्वमात्रेण तद्घटितप्रामाण्यनिश्चयत्वोपपत्तौ स्वातन्त्र्यस्यानपेक्षितत्वाच्च । स्वतन्त्रादप्यनाशङ्कितदोषान्यद्वारा ग्राहकस्य ।

"ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
तदेतदृचाभ्युक्तम्" ।

इत्यादिवत्संवादेनाधिक्याच्च । एवंसत्यनुव्य-

शब्दस्थले प्रमात्वेन ज्ञायमानस्यापि स्वातन्त्र्येणोपनायकत्वास्वीकारेण व्यभिचाराच्च । गृहीतप्रामाण्यकज्ञानसमानविषयकज्ञानानुव्यवसायस्थले [1]प्रमात्त्वेन ज्ञायमानस्यापि ज्ञानस्य स्वातन्त्र्येणोपनायकत्वाच्च ।

ननु विषयसत्तानियतसत्ताकज्ञानवृत्तिधर्माविशेषणत्वे सति ज्ञानविशेषणतया भानमेवास्वातन्त्र्यम् । तदभाव एव स्वातन्त्र्यमिति घटप्रमावानहमित्यादौ तथा भानेपि घटज्ञानवानहमित्यादौ न स्वातन्त्र्येण भानम् । तत्र शुद्धज्ञानविशेषणतयैव भानात् । अनुव्यवसायमात्रस्य प्रामाण्यविषयक[2]त्वविवादादित्यत आह । **अर्थसत्वेति** । ननु स्वातन्त्र्येण[3]भाने कथमनुव्यवसायस्य प्रामाण्यसंशयादिविरोधिता । कथं वा निष्कम्पप्रवृत्तिहेतुतेत्यत आह ॥ **स्वतन्त्रादपीति** । अनाशङ्कितदोषेति बहुव्रीहिः । तद्रूपान्यद्वारेणेत्यर्थः । त्रयोदशे गीतायां क्षेत्रक्षेत्रज्ञस्वरूपं ऋषिभिर्बहुधा गीतमित्यनाशङ्कितदोषऋषिगानछन्दोरूपद्वारेणार्थग्राहकस्य कृष्णवाक्यस्याधिक्यं तथा निर्दोषऋग्द्वारेणार्थग्राहकस्य छान्दोग्याद्युपनिषद्वाक्यस्य यथाधिक्यं तथेत्यर्थः । स्वातन्त्र्यस्यानपेक्षितत्वादित्यत्र विपक्षे बाधकं चाह—**एवंसतीति** । अर्थसत्व-

[1] प्रमात्वेनेति नास्ति—**मु.** [2] त्वे—**मु.** [3] णभाने—**मु.**

वसायस्य धर्म्यंशेपि प्रामाण्यनिश्चयरूपत्वाभावापातेन तत्रापि कदाचित्संदेहापाताच्च ।

ननु धर्मिणस्सदेकरूपत्वात्तत्रासं[1]शय इति चेत् । कोर्थः किं साधारणधर्मज्ञानं नास्तीति किं वा विशेषदर्शनमस्तीति? नाद्यः । प्रतीतिविषयत्वस्य सदसत्साधारण्यात् । अन्त्ये धर्मित्वस्य सदेकनिष्ठत्वेन विशेषत्वेपि तस्य सत्वानिश्चये कथं

निश्चयमात्रेणैव संशयादिविरोधितारूपप्रामाण्यनिश्चयत्वोपपत्तावपि स्वातन्त्र्याभावेन तदभाव इत्यर्थः ।

यद्वा स्वातन्त्र्याभावेऽर्थसत्व निश्चयरूपतैव न युक्तेत्यत आह— **एवंसतीति** । सव्यवधानत्वमात्रेण[2] सत्वानिश्चायकत्व इत्यर्थः । धर्म्यंशे रजतादिरूपेदमंश इत्यर्थः ।

धर्म्यंशेपि संशयानुत्पादो नार्थसत्वघटितप्रामाण्यनिश्चयरूपत्वेन "इदंत्वरजतत्ववैशिष्ट्यम् पुरोवर्तिनो नानुव्यवसायवेद्य" मिति मण्युक्तेः । "स्वातन्त्र्येण इति शेष" इति पक्षधरोक्तेः । किंत्वन्यथैवेति शङ्कते— **नान्विति । सदेकेति** । पुरतः सन्नेव धर्मी नत्वसन्निति धर्मिणः सत्वाव्यभिचारान्न तत्र संदेहो न तु तदंशे प्रामाण्यनिश्चयत्वसत्वेनेत्यर्थः— **सदसादिति** । पुरतो सदित्यर्थः । मन्मते त्वसन्मात्रेत्यर्थः— **विशेषत्वेपीति** । तथाच तद्दर्शनमात्रं न विशेषदर्शनं किंतु तद्वैशिष्ट्यसत्वदर्शनमेवेति तस्य च तत्राभावे कथं तत्र न संशयः स्यादिति भावः— **तस्येति** । धर्मित्ववैशिष्ट्यस्येत्यर्थः । तथा च धर्मित्वरूपेदंत्ववैशि-

---

[1] संदेह—**च क ग.** [2] णार्थ—**अ. मु.**

संशयविरोधिता। न हि संदिग्धसत्ताकः करादिः पुरुषत्वसंशयविरोधी।

अपिचैवं त्वदीये अयं वह्नयनुभवः प्रमा, नाप्रमा वा दाह[1]समर्थविशेष्यकत्वे सति वह्नि-

---

ष्टयांशेऽनुव्यवसायस्य तत्सत्तानिश्चयत्वरूपप्रामाण्यनिश्चयत्वाभावे धर्म्यंशेपि संशयः स्यादेवेति भावः। सत्वानिश्चयेपि संशयनिवृत्तिरस्त्वित्यत आह—**न हीति**। **संदिग्धसत्ताकः**। अनिश्चितसत्ताक इत्यर्थः। यद्वा तत्सत्वानिर्णये तत्सत्वेपि संदेहः स्यात्। ततश्च धर्मिसंदेह इति भावेनायं ग्रन्थो योज्यः।

एवमिदंत्त्वैविशिष्टयांशे तत्सत्तानिश्चयत्वरूपं प्रामाण्यनिश्चयत्वमनुव्यवसायस्य धर्म्यंशे स्वतः प्रामाण्यमुपपाद्य "ननु व्यवसायस्येदंत्त्वरजतत्त्वविशिष्टेदंविषयकत्त्वेऽनुव्यवसाय एव मान" मित्यादिना धर्म्यंशदृष्टान्तेन शङ्कितस्वत प्रामाण्यस्य "मैव" मित्यादिना "न स्वतः प्रामाण्यग्रह" इत्यन्तेन मण्युक्तखण्डनं निरस्येदानीं "ननु वह्निज्ञानस्य दाहसमर्थविषयकत्त्वं न दाहसमर्थो यमिति व्यवसायग्राह्य" मित्यादिना शङ्कितस्य "उच्यत"—इत्यादिना यत्समाधानमुक्तं तत्समानन्यायेनान्यत्राप्यनुव्यवसायस्य स्वतः प्रामाण्यं व्यनक्ति। **अपि चैवमिति**। सव्यवधानत्वमात्रेणार्थसत्त्वनिश्चयरूपत्त्वाभाव इत्यर्थः॥ **त्वदीय इति**। प्रामाण्यानुमान इत्यन्वयः। मणिकृदुक्त इत्यर्थः। प्राचीनरीत्याह—**प्रमेति**। "प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम्" इति मणिकृदुक्तेराह—**नाप्रमा वेति**।

---

[1] सामर्थ्यवह्नि—**च. मु.**

त्वप्रकारक[1]निश्चयत्वात् व्यतिरेकेणाप्रमावादिति प्रामाण्यानुमाने दाहसामर्थ्यवद्विशेष्यकत्वे सतीति विशेषणस्य केन सिद्धिः। तद्धि न तावद्दाह-ममर्थोयमिति व्यवसायेन सिद्धम्। व्यवसा-यविषयतया[2]विशेष्यस्य विशेष्य[3]त्वस्य तदविष-यत्वात्। नाप्यनुव्यवसायेन। बहिरर्थे दाहसा-मर्थ्ये मनसोऽसामर्थ्यात्।

ननु स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं व्यवसायेति। विशेष्यम्य [4]व्यवसायविषयत्वाद्धेतोः विशे-ष्य[5]त्वम्य व्यवसायाविषयत्वादित्यर्थः। क्वचिद्व्यवसायविषयताविशेषस्य विशेष्यत्वस्येति पाठः। तदा तु न क्लेशः। धर्मधर्मिवैशिष्ट्यानां व्यवसायविषयत्वेन धर्मे वैशिष्ट्ये चाविद्यमानो धर्मिमात्रनिष्ठो विषयत्व विशेष इत्यर्थः। "व्यवसायतद्विषयतयोम्तदविषयत्वात्" इति मणिवाक्यनिष्कृष्टार्थस्यायमनुवादः—**बहिरर्थ इति**। दाहसामर्थ्यवै-शिष्ट्यरूप इत्यर्थः—**असामर्थ्यादिति**। पूर्वोक्तदिशा सामर्थ्य-वैशिष्ट्यग्रहण एव वा वैशिष्ट्यग्रहणशक्तावपि स्वातन्त्र्येण तद्ग्रहणे नाऽसामर्थ्यादिति भावः।

स्मृतीति॥ अयं वन्हिरिति व्यवसायविषयकानुव्यसायजन्य-स्मृत्युपनीते अयं वन्हिरिति व्यवसाये दाहसमर्थोयमिति व्यवसायजन्य-स्मृत्युपनीतं यद्दाहसामर्थ्यवत्वं तद्वद्विशेष्यकत्वं वन्हिरित्यनुभवो दाह-सामर्थ्यवद्विशेष्यको मम वृत्त इति मनसा पारिच्छिद्यत इत्यर्थः।

---

[1] निश्चयपदं नास्ति-**क ग.** [2] ताविशेषस्य-**कुं छ क.** [3] क-**मु.**
[4] व्यवसायाविषयतया-**मु** [5] क-**मु.**

यद्दाहसामर्थ्यं तद्वद्विशेष्यकत्वं मनसा परिच्छिद्यते। नचैवं स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं यद्रजतत्वं तद्वद्विशेष्यकत्वमपि मनसा परिच्छिद्यताम्, तथा च प्रामाण्यस्य स्वतस्त्वं स्यादिति वाच्यम्। मन[1]सैवं प्रामाण्यग्रहेपि प्रथमानुव्यवसायेनागृहीततया यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य तज्ज्ञानविषयकज्ञानानपेक्षज्ञान[2]ग्राह्यत्वस्य चाभावेन परतस्त्वाहानेरिति चेत् हन्तैवं पाश्चात्यस्मृत्युपनीते दाहसामर्थ्ये मानसज्ञानमिव प्राथमिकव्यवसायोपनीते रजतत्ववैशिष्ट्येऽनुव्यवसाय एव सत्तानिश्चयरूपोस्तु।

तुल्यन्यायत्त्वात्प्रामाण्यांशेप्याशङ्क्येष्टापत्त्या निराह—**न चैवमिति** दाहसामर्थ्यवद्विशेष्यकत्वग्रह इत्यर्थः। इदं रजतमिति व्यवसायविषयकानुव्यवसायजन्यस्मृत्युपनीते तस्मिन्व्यवसाये इत्यादिरूपेण पूर्वव्याख्येयम्—**एवमिति**। पञ्चमानुव्यवसायेनेत्यर्थः—[3] **ज्ञानानपेक्षेति**। पञ्चमानुव्यवसायस्य च तादृशज्ञानसापेक्षत्वादिति भावः। हंतेति हर्षे। पाश्चात्या वा स्मृतिः तदुपनीत इत्यर्थः—**पाश्चात्येति** प्राथमिकेति[4] हेतुगर्भम्—**दाहसामर्थ्ये**। दाहसामर्थ्यवत्व इत्यर्थः—**मानसज्ञानमिवेति**। अनुव्यवसाय इवेत्यर्थः। पारतन्त्र्येण तद्विषयतोपगमादिष्टापत्तिनिरासायाह—**सत्तानिश्चयेति**।

---

1 साचैवं—**छ-क**. 2 विषयत्व—**छ**-जन्यत्वस्य-**क**. 3 ॥ प्रथमेति ॥ रजतमहं जानामीत्याद्यनुव्यवसायेनेत्यर्थः-**मु**. 4 च **मु**.

अविशेषात्। त्वत्पक्षे व्यवसायस्य यथार्थत्वेन स्मृतितोऽविशेषाच्च। अनुमितौ प्रामाण्यनियतस्य धूमवति वह्निमत्वज्ञानत्वस्यानुव्यवसायेन गृहीतत्वान्न तत्राप्रामाण्यशङ्केति वदता त्वया लिङ्गोपहितलैङ्गिकविषयानुमितिरूपव्यवसायोपनीते धूमवत्वेऽनुव्यवसायस्य सत्तानिश्चयरूपत्वाङ्गीकाराच्च।

नन्विन्द्रियस्यायं स्वभावो यदुपनीतमुपनीतान्तरवृत्तित्वेनैव गृह्णातीति चेन्न। सुरभिचन्दनमिति चाक्षुषज्ञानानुपपत्तेः। मनसस्तथा स्वभाव इत्यस्यापि मानाभावेनायुक्तत्वात्। संशयानुपपत्तिरेव मनस-स्तादृशस्वभावकल्पिकेति चेन्न। तस्या[1] अन्यथोपपादयिष्यमाणत्वात्। निमीलितनेत्रस्यापि "अहं गौर" इत्यादिप्रत्ययानापत्तेश्चेति भावेनाह—**अविशेषादिति**। विपरीत्यमेवोचितमित्याह—**त्वत्पक्ष इति**। **व्यवसायस्येति**। अनाशङ्कितदोषत्वात् ग्राह्यप्रामाण्याश्रयव्यवसायस्येति भावः।

ननूपनीतं तद्वत्वं उपनीतवृत्तित्वेन गृह्यत इति कल्प्यत इत्यतोऽयमपि नियमो नेत्याह—**अनुमितावितिः**। अनुमितौ कदापि प्रामाण्यसंदेहाभावेन तत्र प्रामाण्यं स्वत इति प्राचीनमतं दूषयता सर्वत्र परतस्त्ववादिना मणिकृतानुमितौ प्रामाण्यशङ्काभावो न प्रामाण्यनिश्चयनिबन्धनोऽपितु तत्प्रामाण्यव्याप्यस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकज्ञानत्वस्य यज्ज्ञानं तन्निमित्तक एवेति वदता त्वयेत्यर्थः। तदभियुक्तव्याख्यानानुरोधेनाह॥ **लिङ्गोपहितेत्यादि**। परामर्शोपनीतव्याप्ययुक्तव्यापकविषयकधूमवत्पर्वतोऽग्निमानित्येवंरूपेत्यर्थः।

---

[1] प्य–मु.

न च दाहसामर्थ्ये संस्कार एव प्रत्यासत्तिः। स च निर्विषयक इति न तद्विषयतया भानम्। इह तु प्रत्यासत्ती[1]भूतो व्यवसायः सविषयक इति वैषम्यमिति वाच्यम्। संस्कारे सत्यप्यस्मृतिदशायामुक्तमानसज्ञानाभावात्।

ननु मानसज्ञानस्य दाहसमर्थ एव मम वह्नित्वप्रकारकं ज्ञानं वृत्तमित्याकारत्वेन तत्र दाह-

ननु पञ्चमानुव्यवसाये प्रत्यासत्तीभूतान्याविषयतयार्थस्य भानेन तस्यार्थसत्तानिश्चयरूपत्वेपि प्रथमानुव्यवसाये तादृशान्यविषयतया तद्वत्वरूपार्थस्य भानान्न तत्सत्तानिश्चयरूपत्वमतोऽविशेषादित्युक्तहेतु रसिद्ध इत्याशङ्क्य निराह—**न चेति। दाहसामर्थ्ये**। दाहसामर्थ्यवत्त्व इत्यर्थः—**संस्कार एवेति**। दाहसमर्थोयमिति प्राचीनव्यवसायजन्यसंस्कार एव न तु तज्जन्यस्मृतिरित्यर्थः।

यद्यपि स्मृतेः प्रत्यासत्तित्वेपि तस्याः सुरभिचन्दनमित्यादौ सौरभादिज्ञानस्येव ताटस्थ्येनैव तथात्वान्नैतच्चोद्यावकाशः। तथापि सविषयकत्वात्संभावितत्वाभिप्रायेणैतच्चोद्यमपि शङ्कोत्थानदार्ढ्यार्थं कृतमिति ध्येयम्।

भानमिति। पञ्चमानुव्यवसाये दाहसामर्थ्यवत्वस्य संस्कारविषयतया न भानमित्यर्थः—**इहत्विति**। प्रथमानुव्यवसाय इत्यर्थः **अस्मृतिदशायमिति**। अत एव त्वयापि "प्राग्भवीयसंस्कारात्स्मृतं प्रामाण्यं वन्हिज्ञानादौ साध्यमान" मित्याद्युक्तम्।

---

[1] त्तिरूपो -छ. [2] अग्रिमग्रन्थो-मु, मन्दाशङ्को-आ.

सामर्थ्यं वह्निनिष्ठमेव भाति। न तु स्मृतिविषयतया। स्मृतिस्तु प्रत्यासत्तिमात्रम्। अनुव्यवसायस्य तु पुरोवृत्तिविशेष्यकं रजतत्ववैशिष्ट्यावगाहिज्ञानं 'वृत्तमित्याकारत्वेन ज्ञानविषयत्वेनैव वैशिष्ट्यं विषयः। न तु पुरोवृत्तिनिष्ठत्वेनेति वैषम्यमिति चेन्न। तत्रापि दाहसमर्थ एवेति विषयसम्यातीतव्यवसायविषयत्वेनैव दाहसामर्थ्यस्य भानात्। अत्रापि सुख[2]ज्ञानस्य दोषशङ्कादिरहितस्तम्भादिज्ञानस्य च प्राथमिक एवानुव्यवसाये मम सुख एव सुखत्वेन ज्ञानं वृत्तं स्तम्भ एव स्तम्भत्वेन ज्ञानं वृत्तमित्याकारदर्शनाच्च।

ननु तथापि [3]तत्र यस्य व्यवसायस्य विषयतया दाहसामर्थ्यं भाति स न प्रत्यासत्तिः। या तु स्मृतिः प्रत्यासत्ति र्न तद्विषयतया तद्भाति इह

एतच्चोपलक्षणं यदसाधारणं कारणमासाद्य मनोबाह्यिर्गोचरां प्रमां जनयति तन्मानान्तरमिति व्याप्तेः संस्कारस्य मानान्तरत्वापत्तेश्चेत्यपि ध्येयम्।

स्मृतेः प्रत्यासत्तित्वेप्यविशेषादिति हेतुरासिद्ध इति भावेन शङ्कते—**नन्विति**। **तत्रापीति**। पञ्चमानुव्यवसायेपीत्यर्थः—**दाहसामर्थ्यस्य**। दाहसामर्थ्यवत्त्वस्येत्यर्थः। अत्रापीत्यस्यैव विवरणं **प्राथमिक एवानुव्यवसाय इति**।

प्रकारान्तरेण वैषम्यमाशङ्क्य निराकरोति[4]। **ननु तथापीत्यादिना**। **तत्रेति**। पञ्चमानुव्यवसाय इत्यर्थः। **इहस्त्विति**॥

---

[1] मम-च, मु. [2] खादि-च, छ, मु. [3] यत्र-छ. [4] निराह-आ, मु.

तु वैशिष्ट्यं प्रत्यासत्तीभूतव्यवसायविषयतया भातीति चेन्न। अन्यविषयतया ग्रहणे श्रुतसाक्षिवाक्यसाम्येऽविशिष्टेऽस्य वैधर्म्यमात्रत्त्वात्। तस्मात्प्रामाण्यग्रहणे साक्षी समर्थ इति एतदप्युक्तं "अन्यथे" त्यादिना। साक्षी धर्म्यंश इव वैशिष्ट्यांशेपि सत्तानिश्चयरूपो न चेदस्य व्यवसायस्येदं वैशिष्ट्यं विषय इत्यादिलोकसिद्धव्यवस्थित्ययोगादित्यर्थः॥

स्वतस्त्वानुमानेषु बाधोद्धारः॥ ४॥

ननु तथापि स्वतस्त्वेऽनभ्यासदशायां संशयो न स्यात्। ज्ञानग्रहे प्रामाण्यग्रहात्। अग्रहे

इहत्विति। प्राथमिकानुव्यवसाय इत्यर्थः। अविशिष्ट इति विभागः।

स्वतस्त्वानुमानेषु बाधोद्धारः॥ ४॥

उक्तानुमानेषु प्रतिकूलतर्कपराहतिं मण्याद्युक्तामाशङ्कते—**नन्विति**। **तथापीति**। प्रबलबाधरूपदोषाभावेपीत्यर्थः—**प्रामाण्यग्रहादिति**। अन्यथा स्वतस्त्वभङ्गापत्तेरिति भावः—**अग्रहे चेति**। ज्ञानस्येत्यनुषङ्गः। यथा हि त्वन्मते जातिव्यक्त्योरेकवित्तिवेद्यत्वनियमेपि दोषवशादिदं रूप्यमितिभ्रम[1] स्थले शुक्तिग्रहेपि न शुक्तित्व-

---

[1] भ्रमपदं न-कुं.

च धर्मिज्ञानाभावादिति चेन्न[1]। असति प्रतिबन्धे-साक्षिवेद्यत्वनियमो वा साक्षिवेद्यत्वयोग्यता वा-स्वतस्त्वमित्यु[2]क्तम्। अप्रामाण्यसंशयस्थले च प्रामाण्यग्रहणशक्तिप्रतिबन्धिकाऽप्रामाण्य[3] ग्रहण-सामग्रीसमवहितैव। अन्यथाऽप्रामाण्यसंशयायोगात्। एवं च ज्ञानं गृह्णता साक्षिणा शक्ति प्रतिबन्धात्प्रामाण्याग्रहणेप्यस्मदुक्तस्वतस्त्वाहान्या स्वतस्त्वपक्षेपि धर्मिज्ञानस्य प्रामाण्यानिश्चयस्य च संभवेन संशयो युक्त एव। न हि

ग्रहः तथा मन्मतेपि ज्ञानप्रामाण्ययोरेकवित्तिवेद्यत्वनियमेपि संशय-स्थले ज्ञानग्रहे सत्यपि तेन तत्प्रामाण्याग्रहेपि न स्वतस्त्वभङ्गः। अस्माभिरुक्तस्वतस्त्वस्य तत्रापि सत्वादिति भावेन "धर्म्युपलब्धा-वपि व्याघातादिदर्शनेन साक्षिणि प्रतिबद्धे प्रामाण्यविषये मनसि संशयोपपत्तेः" इति तत्वनिर्णयटीकां विवृण्वानः समाधत्ते—**असति प्रतिबन्ध इति**। प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवधाने सती-त्यर्थः। अत्र सर्वत्र साक्षी प्रागुक्तरूप[4]एव ज्ञेयः—**ग्रहणेति**। निश्चयेत्यर्थः—**अन्यथेति**। उक्तरूपसामग्र्यभाव इत्यर्थः। अस्तु सामग्री ततः किमित्यत आह—**एवं चेति**। प्रामाण्यविरोध्युप-स्थापकसामग्रीसमवधानेसतीत्यर्थः—**धर्मिज्ञानस्येति**। व्यवसायरू-पस्य संशये धर्मिणो यज्ज्ञानं तस्येत्यर्थः—**संशयो युक्त एवेति**। मानसोऽयं बोध्यः। न तु साक्षिरूपः तस्य सुदृढनिर्णयरूपत्वात्।

अस्मदुक्त स्वतस्त्वाहान्येत्युक्तं व्यनक्ति—**न हीति**। असति

[1] त्-कुं. [2] तिद्यु-छ-क. [3] ग्राहक-छ. [4] रूपपदं नास्ति-आ

ज्ञानत्वप्रमात्वग्रहण[1]शक्त्योरेकप्रतिबन्धकप्रतिबध्यत्वमपि स्वतस्त्वान्तर्गतम् ॥

तद्ग्रहणशक्त्योर्भिन्नत्वेपि ज्ञानत्वग्रहणशक्तिवत्प्रामाण्यग्रहणशक्तिः सहजा । न त्व प्रामाण्यग्रहणशक्ति[2]रिवाहितेत्येतावतैव प्रामाण्यस्य स्वतस्त्वात् । दृश्यते च वह्नौ दाहप्रकाशनशक्त्योः सहजत्वेपि प्रतिबन्धकभेदः ॥

अस्तु वा[3] तयोरेकैव ग्रहणशक्तिस्तथापि तस्या

प्रतिबन्धे ज्ञानगोचरसाक्षिवेद्यत्वनैयत्यमित्यस्य प्रतिबन्धे सति साक्षिणा ज्ञानं प्रामाण्यं चोभयं न गृह्यत इति यद्यर्थस्तदा परं स्वतस्त्वहानिः । नह्येवं विवक्ष्यत इति भावः ।

ननु ज्ञानत्वप्रमात्वग्रहणशक्त्योरैक्योपगमेऽन्यत[4]राग्रहणे द्वयोरप्य[5]ग्रहणमवर्जनीयम् । भेदे तु स्वतस्त्वहानिरेव । ज्ञानग्रहणशक्त्यतिरिक्तशक्तिग्राह्यत्वात् । अन्यथाऽप्रामाण्यस्यापि स्वतस्त्वापत्तिरित्यतो "मानस्यादोषशङ्कया प्रामाण्यग्रहणशक्तिः प्रतिबद्धा" इति प्रकृतिनयसुधावाक्येन भेदपक्षस्य "करणानां[6] ज्ञानजननशक्त्यैव तद्यथार्थ्यजनकत्वं स्वतस्त्व" मित्यादिजिज्ञासानयसुधावा[7]क्येनाभेदस्य च-प्रतीतेर्भेदाभेदरूपपक्षद्वयेपि समाधिमाह—**तद्ग्रहणेति ॥ न त्वप्रामाण्यग्रहणशक्तिरिति ॥** सहजेत्यनुकर्षः । किं तु दोषाहितेत्यर्थः ॥

---

[1] योरेक-**ख.** [2] रित्ये-**कुं छ क-ग.** [3] यद्वा-**कुं.** [4] र-**कुं.** [5] पि-**कुं.** [6] च-**मु.** [7] वाक्यादिना-**आ अ.**

एनं मा दहेत्यादौ दाहशक्तेरिव विषयभेदेन प्रतिबन्धाप्रतिबन्धौ युक्तौ ।

नचैवं प्रतिबन्धकाभावरूपस्याधिकस्य हेतोरनुप्रवेशात्सिद्धसाधनम् । न्यायमतेऽप्रतिबद्धेनाप्यनुव्यवसायेन प्रामाण्या[1]ग्रहणात् ।

नाप्यपसिद्धान्तः । "अप्रामाण्यग्रहणकारणाभावस्यापि प्रामाण्यग्रहणोपयोगाङ्गीकारेपि न कदाचिदस्माकं हानिः" इति टीकोक्तेः । "प्रतिबन्धकाभावो न हेतुः" इत्युत्पत्तिस्वतस्त्व[2]वादे वक्ष्यमाणत्वाच्च ।

मादहेतीति । "अमानोना प्रतिषेध" इति निषेधार्थकमाशब्दोऽयम् । न माङ् । तेन "माङि लु" ङित्युक्तलुङभावः साधुः—**टीकोक्तेरिति** ॥ तत्वनिर्णयटीकोक्तेरर्थतोऽनुवादोयम् ।

ननु तत्र "न प्रकृते काचिदस्माकं हानिः" इति हि पाठः । तथा च प्रकृते वेदापौरुषेयत्वे काचिद्धानिर्नेत्यभ्युपगमवादेनाप्युपपन्नासा टीकोक्तिः । एवं च ज्ञानग्रहहेत्वतिरिक्तहेतुसापेक्षग्राह्यत्वे कथं न प्रामाण्यस्य स्वतस्त्वहानिरित्यतस्तत्वनिर्णयटीकास्थं "न हि दाहाभाव एव वेत्रबीजं वेत्राङ्कुरं जनयतीत्येतावता दाहाभावो वेत्राङ्कुरस्य कारणं भवति । किं तु ततो विपरीतकार्यानुत्पादे सति वेत्रबीजं स्वमहिम्नैवाङ्कुरं करोति । अन्यथोत्सर्गापवादौ क्वापि न स्यातां" इति पूर्ववाक्यं हृदि कृत्वाह—**प्रतिबन्धकेति** ।

---

[1] ग्रहात्—ख. [2] वादपदं न—मु ख.

यत्र पूर्वं दोषशङ्कादेरभावेपि कारणान्तरोप-निपातात्पश्चात्तत्संशयस्तत्र पूर्वं प्रामाण्यं निश्चीयत एव । तदा प्रतिबन्धकाभावात् ।

एवं प्रतिबन्धकेन प्रामाण्यानिश्चयमुपेत्य संशयमुपपाद्य क्वचित् प्रामाण्यनिश्चयमुपेत्यापि संशयमुपपादयति—**यत्रेति** । यद्वा अस्त्वेवं प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानस्थले प्रामाण्यानिश्चयेपि विवक्षितस्वतस्त्वाहान्या संशयोपपत्तिः । तत्सामग्रीसमवधानात्प्राक्काले तु कथम् । तत्र प्रामाण्यानिश्चये स्वतस्त्वाहानेः । यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिकेत्यस्याभावात् । प्रामाण्यनिश्चये [1]वोदीरितसन्देहो न स्यादित्यत आह—**यत्रेति । निश्चीयत एवेति ।** मनसेति भावः । न तु साक्षिणा । तस्य दृढनिर्णयत्वात् ।

सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनं इति ।
मानसे दर्शने दोषा नैव स्युः साक्षिदर्शने ॥
यत्क्वचिद्व्यभिचारिस्याद्दर्शनं मानसं हि तत् ।

इति च ज्ञानपादीयानुव्याख्यानोक्तेरिति ज्ञेयम् ।

एतेन यदुक्तं मणौ " निश्चितेपि प्रामाण्ये दोषान्तरात्तत्र संशय इति चेन्न । प्रवृत्तिप्रसङ्गात् " इति तन्निरस्तम् । प्रामाण्यनिश्चयकालेऽप्रतिबन्धादिष्टापत्तेः । पश्चात्तु तस्य नाशात्प्रतिबन्धाच्चाप्रवृत्त्युपपत्तेः ।

एतेन प्रामाण्यनिश्चये जाग्रति कथं सन्देह इति निरस्तम् । उत्तरकाले तस्य नाशात् । प्रामाण्यनिश्चये प्रामाण्यसन्देहात्संशयोपपत्तेश्च।

यत्तु " न च प्रामाण्यसंशयाद्विषयसंशयवत्प्रामाण्यज्ञाने प्रामाण्यसंशयात् प्रामाण्यसंशय इति वाच्यम् । प्रामाण्यज्ञानेपि स्वतः

---

[1] चोदीचीन-**मु आ अ.**

केचित्तु धर्मिज्ञानस्य संशयाहेतुत्वात्संशयरूप एवानुव्यवसाय उत्पद्यते। धर्मिज्ञानस्याहेतुत्वेपि संशये धर्मिनियमो धर्मिज्ञानजनकनियमादेव

प्रामाण्यग्रहे संशयानुपपत्तेः" इति मणिवचनं तदप्यतेनैव निरस्तं-बोध्यम्। दोषोपनिपातस्थले मानसप्रामाण्यनिश्चये दोषवशेन प्रामाण्या-निश्चये तत्संशयोपपत्तेरिति॥

एवं वास्तवं मूलग्रन्थाद्युक्तं संशयोपपादनं प्रदर्श्याधुना यदुक्तं मणौ "धर्मिज्ञानं च संशयहेतुः। अन्यथा धर्मिनियमः कोटद्युक्तटत्वं च न स्यात्" इति ग्रन्थेन धर्मिज्ञानाभावेन संशयाभावोपपादनदूषणं तदपि नेति भावेन प्रौढ्या समाधिद्वयमन्यापदेशेनाह—**केचित्त्वित्यादिना अहेतुत्वादिति**॥ विशेष्येन्द्रियसन्निकर्षकोटिस्मृतिरूपविशेषणज्ञानत-दुभयासंसर्गाग्रहादिविशिष्टज्ञानसामान्यसामग्रीत एव तदुत्पत्तौ तद-तिरिक्ता संशये धर्मिज्ञानरूपा विशेषसामग्री न कल्प्या। तथाच संश-यस्थले धर्मिणो व्यवसायस्यैवाज्ञानेन प्रामाण्यनिश्चयोपपत्या स्वतस्त्वा-हानिः प्रामाण्यादिसंशयश्च युक्त इति भावः।

ननु तुरगादौवेगेन गच्छतः पुंसोऽनेकवृक्षेन्द्रियसन्निकर्षेपि क्वचिदेव पनसत्वादिसंदेहो न सर्वत्रेत्यवंविधो धर्मिनियम एव संशये धर्मिज्ञानहेतुतां व्यवस्थापयतीत्यत आह—**धर्मिज्ञानस्याहेतुत्वेपीति**। **धर्मिज्ञानजनकेति**। त्वयापि हि सर्वत्र सन्निकर्षेऽविशिष्टेपि क्वचि-देव धर्मिज्ञानं नान्यत्रेत्यत्र विषयमाहात्म्यादिकं नियामकं वाच्यम्। तदेव संशये नियामकमस्तु। तद्धेतोरेवास्तु हेतुत्वं मध्ये किं तेनेति न्यायात्। तेषामननुगतत्वेपि धर्मिज्ञानहेतुत्वेनानुगमसंभवादिति भावः।

युक्तः। कोट्युक्तटत्वे तु कोटेर्धर्म्यसंस्पृष्टत्वेनाज्ञातोर्ध्वत्वादिसाधारणधर्मेण भूयस्साहचर्यदर्शनमेव हेतुः। न तु संशयधर्मिनिष्ठत्वेन ज्ञातसाधारणधर्मेण भूयस्साहचर्यदर्शनम्। गौरवात्। ऊर्ध्वतादिसाधारणधर्मज्ञानं त्वनियतादृष्टादिहेतुजन्यस्मृतिरूपमित्याहुः।

यत्तु "धर्मिज्ञानसामग्रीत्वेन हेतुत्वे लाघवाद्धर्मिज्ञानत्वेनैव हेतुत्वमस्तु" इति शिरोमणिवचनम्। तन्न। क्लृप्तसामग्र्येवोपपत्तावपूर्वधर्मिज्ञानहेतुताकल्पनस्य गुरुत्वात्।

ननु धर्मिज्ञानस्याहेतुत्वे संशये कोट्युक्तटत्वं न स्यात्। तस्याव्याप्यवृत्तितया जातित्वायोगेन संशयधर्मिणि संशयकोटिसहचारितानेकधर्मोपलम्भरूपस्य वा संशयधर्मिवृत्तितया गृह्यमाणधर्मेण सह कोटेर्भूयस्सहचारोपलम्भरूपस्य वा कोट्युक्तटत्वस्य वाच्यतया तादृशस्य धर्मिज्ञानाहेतुत्वेऽनुपपत्तेरित्यत आह—**कोट्युक्तटत्वे त्विति**। दर्शनमेव हेतुरित्यन्वयः—**धर्म्यसंस्पृष्टत्वेन**। धर्म्यसंबद्धत्वेनेत्यर्थः। ननु साधारणधर्मदर्शनस्य संशयहेतुत्वाद्धर्मज्ञानार्थं धर्मिज्ञानमावश्यकमित्यत आह—**ऊर्ध्वतादिसाधारणेति**।

केचिदित्युक्तास्वारस्यबीजं तु व्यवसायरूपसंशयधर्मिणः सुखादिवत् ज्ञातैकसत्वेन कोटिस्मृतेः पूर्वं तस्य साक्षिणा ग्रहणे प्रतिबन्धाभावाद्धर्मिज्ञानमावश्यकमित्यस्मदुक्तदिशैव संशयोपपादानं साधु। न तु धर्मिज्ञानानभ्युपगमेनेति ज्ञेयम्। अत एव "ज्ञानमवश्यवेद्य" मिति वक्ष्यति। अन्यत्तु गुरुटीकायाम्।

इतरे तु अन्यत्र विपर्यये धर्मिज्ञानस्य हेतुत्वेपि वर्तमानव्यवसायधर्मिकेऽनुव्यवसायरूपेऽप्रमायां प्रमात्वविपर्यये तस्याहेतुत्ववदन्यत्र संशये धर्मिज्ञानस्य हेतुत्वेपि प्रामाण्यसंशये तस्याहेतुत्वं युक्तम्। न च प्रागारोप्यस्य प्रामाण्यस्यानुपस्थिते र्न तदारोप इति वाच्यम्। स्वतस्त्वपक्षे प्रमायां प्रामाण्यग्रमितेरिव भ्रमे प्रामाण्यारोपस्यापि तदनपेक्षत्वादित्याहुः ॥

अन्ये तु संशयस्थलेप्युक्तरीत्या सामग्रीसत्वे-

अन्यत्रेति। शुक्तिरूप्यादिविषयक इत्यर्थः। शुक्त्यादावेव रजतत्वाद्यारोपो नान्यत्रेत्येतन्नियामकतया रूप्यादिनिष्ठचाकचक्यादिमत्तया शुक्त्यादिज्ञानस्य तदारोपहेतुत्वमावश्यकमिति भावः—**वर्तमानेत्यादि**। यथा हि घटादिप्रमायां तदनुव्यवसायेन व्यवसायोपनीततद्वत्वादिघटितप्रामाण्यग्रहः, तथा शुक्तिरूप्याद्यप्रमायामपि तदनुव्यवसायेन तदुपनीततद्वत्वादिघटितप्रामाण्यं धर्मिज्ञानं विनैव तदुत्तरक्षण एव परिच्छिद्यत इत्युपेतं तद्वदित्यर्थः। प्रामाण्यानुपस्थितेः कथं तदारोप इत्याशङ्क्य निराह—**न चेत्यादिना**। अतएव पूर्वपक्षे मणिकृताप्युक्तम् "अप्रमापि प्रमेत्येव गृह्यते" इत्यादीति भावः।

अत्रारुचिबीजं तु ज्ञानग्रहस्य साक्षित्वात्प्रामाण्यसन्देहस्य मानसत्वात् ज्ञानग्रहेण च प्रामाण्याग्रहेण स्मतस्त्वभङ्गापत्तिनिरासाय प्रागुक्तरीतेरेवानुसर्तव्यत्वादिति ज्ञेयम्।

धर्मिज्ञानहेतुत्वं तेन प्रामाण्यनिश्चयं चोपेत्य संशयोपपादनं प्रकारान्तरेण दर्शयति—**अन्योत्विति**। **उक्तेति**। बाधोद्धारग्रन्थो-

नादावेवानुव्यवसायेन प्रामाण्यनिश्चयेप्यनुव्यवसायनाशानन्तरं स्मृत्युपनीते व्यवसाये तत्संशयोयुक्त एव। नह्यनुव्यवसायकाल एव संशयो न तु तदव्यवहितोत्तरकाल इति योगादिसंपत्तिं विना ज्ञातुं शक्यम्। परमतेपि न प्रामाण्यसंशयकाले व्यवसायोस्ति। धर्मिज्ञानानन्तरभाविकोटिस्मर-

---

क्तरीत्येत्यर्थः। तदा व्यवसायस्यापि धर्मिणो नाशान्न संशय इत्यत आह—**स्मृतीति**। अनुव्यवसायाहित संस्कारजन्यस्मृत्युपनीत इत्यर्थः। **ननूपनीतस्य** कथं संशये विशेष्यतया भानमित्यत आह—**परमतेपीति**।

अत्रापि कल्पे संशया[1]दिस्थले ज्ञानग्रहस्य [illegible]प्रामाण्य ग्रहस्य च मानसत्वान्मानसप्रामाण्यनिश्चयस्य नाशेपि ज्ञान[2]ग्रहसाक्षिणा [3]औत्तरिकानुस्मृतिसिद्धसौषुप्तिकात्मस्वरूपानुभवरूपस्य सदा सत्वेन तेन प्रामाण्याग्रहेण ज्ञानग्रहेण प्रामाण्यग्रहणमुपेत्य तन्नाशेन संशयोपपादनस्याशक्यतया तदुपपादनस्य प्रागुक्तदिशैव कार्यत्वात्किमनेन प्रकारेण। न च ज्ञानज्ञानं मानसम्। तथात्वे कदाचित्तज्ज्ञानत्वे संशयाद्यापातात्। उक्तं हि ज्ञानपादे।

"इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः।
साक्षिसिद्धा न कश्चिद्धि तत्र संशवान्कचित्" ॥

इत्यरुचिबीजं ध्येयम्।

सिद्धान्ताननुगुणस्याप्येतत्पक्षत्रयस्य तार्किकं प्रति दूषणतया

---

[1] यस्थले—आ. [2] ग्राहक—आ. [3] औत्पत्तिका—आ.

णकाल एव व्यवसायनाशादित्याहुः। एतदप्युक्तं "अन्यथे" त्यादिना। प्रतिबन्धदशायां कार्याजननमात्रेण शक्तेः सहजत्वाभावे वह्न्यादौ दाहादिशक्तेः सहजत्वमिति व्यवस्थित्यनुपपत्तेरित्यर्थः॥

स्वतस्त्वे संशयोपपादनम् ॥ ५ ॥

न चाप्रयोजकाः स्वतस्त्वहेतवः। परतस्त्वे प्रामाण्यज्ञानस्यापि प्रामाण्यं संवादादिलिङ्गजन्यानुमितिरूपेणान्येन [1] ज्ञानेन ग्राह्यम्, एवं तत्प्रामाण्यमप्यन्येनेति फलमुख्येकानवस्था। एवं प्रामा-

---

वक्तुं शक्यमिति भावेनात्रोपन्यास इति भावः—**एतदपीति**। उक्तरीत्या संशयस्थले स्वतस्त्वोपपादनमपीत्यर्थः।

स्वतस्त्वे संशयोपपादनम् ॥ ५ ॥

अप्रयोजका इति। हेतवः सन्तु स्वतोग्राह्यत्वरूपसाध्यं मास्त्वित्यत्र विपक्षे बाधकस्य साध्यसाधनेऽनुकूलतर्कस्याभावादिति न चेत्यर्थः। पूर्वं [2]क्वचिद्धेतावप्रयोजकत्वोद्धारस्य प्रातिस्विकरूपेण कृतत्वेपि सामान्यतोयमुद्धार इत्यदोषः। अत एव हेतव इत्युक्तिः। "तत्प्रामाण्यस्याप्यन्येन ग्रहणाङ्गीकारेऽनवस्थानात्" इति टीकां विवृण्वानो मण्याद्युक्तदिशैवानवस्थाद्वयमाह—**परतस्त्व इति**। ज्ञान [3]ग्राहकसाक्षिव्यतिरिक्तेन येन केनापि ग्राह्यत्व इत्यर्थः—**फलमुखीति**। फलं

---

[1] ज्ञानेनेति न-**ख**. [2] क्वचित्क्वचित्-**मु**. [3] ग्रहण-**आ**.

ण्यस्यानुमेयत्वे लिङ्गव्याप्त्यादिज्ञानप्रामाण्यानिश्चयेऽसिद्ध्यादिप्रसङ्गेन तन्निश्चयार्थं लिङ्गाद्यन्तरं, तज्ज्ञानप्रामाण्यनिश्चयश्च स्वीकार्यः, एवं तत्र तत्रापीति कारणमुख्यन्यायापत्त्यनवस्थाद्यापत्तेः ॥

न च यत्र दोषशङ्कादिरूपाकाङ्क्षा तत्रैव संवादापेक्षेति नानवस्थेति वाच्यम् । तथात्वे प्रतिबन्धनिरासार्थमेव संवादापेक्षा न तु प्रामाण्य-

---

प्रामाण्यज्ञानं मुखमुपस्थितिहेतुर्यस्याः सा फलमुखीत्यर्थः । कारणान्तरानवस्थोपलक्षणतयैकत्रानवस्थानिर्धारणाय वा पराभ्युपगमानुरोधेन वानुमेयत्व इत्यापादकनिर्धारणोक्तिः । पूर्वं तु सामान्यमुपेत्य परतस्त्व इत्याद्येवोक्तम् । न तु विशिष्येति ध्येयम्—**कारणमुखीति** । पूर्ववद्व्याख्येयम् । ज्ञानानां प्रामाण्यमनुमितिग्राह्यं अनुमितिप्रामाण्यं तु स्वत इति प्राचीनमते फलमुखानवस्थाभावात्कारणमुख्या अप्युक्तिरित्येके ।

अन्ये तु तन्मते क्वापि स्वप्रकाशत्वाभावात्तत्राप्यनवस्थाऽस्त्येव । अत एव परतस्त्व इति सामान्योक्तिः । न त्वनुमेयत्व इति विशिष्येत्याहुः ।

यत्र तु प्रामाण्यज्ञानेऽप्रामाण्यशङ्कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चय इत्यादिमण्युक्तमाशङ्कते—**न च यत्रेति । दोषेति** । दुष्टकरणजन्यत्वादिशङ्कारूपेत्यर्थः । "न चाकाङ्क्षायामेव प्रमाणान्तरापेक्षत्वादनवस्थाभाव" इति तत्त्वनिर्णया-

---

[1] ज्ञान्त-छ. [2] स्थाद्यु-आ.

ग्रहार्थमिति मन्मतप्रवेशापत्तेः । उक्तं हि भगवत्पादैः "आकाङ्क्षाया एव बुद्धिदोषात्मकत्वा"-दिति ॥

न चावश्यवेद्यत्वाभावान्नानवस्था । ज्ञानमवश्यवेद्यमिति वक्ष्यमाणत्वात् । कृष्यादौ सन्देहात्प्रवृत्तावपि बहुवित्तव्ययायाससाध्ये पारत्रिकफल-[1]गे यागादौ निष्कम्पप्रवृत्यर्थं प्रामाण्यस्या प्यवश्यवेद्यत्वात् ॥

ननु तत्राप्यर्थनिश्चय एव हेतुः । समानविषयत्वात् । आवश्यकत्वाच्च । न तु प्रामाण्यनिश्चय

नुकरणादाकाङ्क्षेत्युक्तिः—**उक्तं हीति** । तत्वनिर्णये । आकाङ्क्षेति बुद्धिदोषइत्यप्रामाण्यशङ्केति चानर्थान्तरम् ॥

तत्वनिर्णयटीकोक्तरीत्या प्रकारान्तरेणानवस्थाभावमाशङ्क्य निराह—**न चेति** । ज्ञानस्येति शेषः—**अवश्यवेद्यमिति** । एतेन चरमप्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यसंशयानवश्यंभावान्नानवस्थेति मण्याद्युक्तं निरस्तं ध्येयम् । नन्वस्तु ज्ञानस्यावश्यवेद्यतया ज्ञातत्वेन तत्प्रामाण्यनिश्चये तत्संशयोऽवर्जनीयः । तथापि कृष्यादाविव प्रवृत्तिरस्त्वित्यत आह—**कृष्यादाविति** ।

"यत्राप्रामाण्यशङ्का नास्ति करतलादिज्ञाने तत्र व्यवसाय एवार्थनिश्चयः तत एव निष्कम्पप्रवृत्तिः" इत्यादिमण्याद्युक्तमाशङ्कते—**ननु तत्रापीति** । पारलौकिकयागादावपीत्यर्थः—**आवश्यकत्वाच्चेति** ।

---

[1] के—**ख**.

इति चेन्न । पीतः शङ्ख इत्यादा[1]वाकारान्तरार्थो[1]-ल्लेखाभावेन शङ्खः पीतत्वेनैव भातीत्यनुभवेन चै-काकारनियते संशयान्यज्ञानरूपे निश्चये सत्यपि पीतार्थिनोऽप्रवृत्तिदर्शनात् ।

न चाप्रामाण्याज्ञान[2]रूपसहकारिविरहादप्रवृ-त्तिरिति वाच्यम् । एवं तर्ह्यप्रामाण्यस्याप्यनुमेय-त्वेन तदननुमितिदशायां पीतार्थिनः प्रवृत्तिः स्यात् ।

किञ्चाप्रामाण्याज्ञानात्प्रवृत्तौ प्रामाण्याज्ञाना-

प्रामाण्यनिश्चयप्रवर्तकत्ववादिनाप्यर्थनिश्चयस्याभ्युपेयत्वादिति भावः ॥

किमर्थनिश्चय एव प्रवर्तकः उत प्रामाण्यविरोधिज्ञानविरहसह-कारिसहितः, अथ प्रामाण्यविरोधिज्ञानविरहो न सहकारी किं तु प्रवर्तकतावच्छेदकः, यद्वा[3]ऽर्थनिश्चय एव प्रवर्तकः [3]अप्रामाण्यादि-ज्ञानं प्रतिबन्धकं प्रतिबन्धकान्तरसम्पादकं वा, इति विकल्पान् हृदि कृत्वाद्योव्यभिचारीत्याह — **पीत इति** । [4]शुक्लोवेत्याकारान्तरेत्यर्थः— **व्याकारार्थेति** । [5]अकारान्तरेति क्वचित्पाठः ॥

द्वितीयं शङ्कते— **न चाप्रामाण्येति** । प्रामाण्यविरोधिनो निश्चयसंशयसाधारणज्ञानाभावरूपसहकारीत्यर्थः । इष्टापत्तिमाशङ्क्याह— **किञ्चेति** । नन्वप्रामाण्यज्ञानस्य प्रतिबन्धकत्वं सर्वसिद्धमित्यस्तु तद्वि-रहात्तत्र प्रवृत्तिः । प्रामाण्यज्ञानप्रवर्तकत्वमद्यापि न सिद्धमिति कथं

---

[1] दौ व्याकारार्थौ—**कुं**-अनेकाकारार्थौ—**ख**. [2] रूपपदं न-**ख**. [3] एताव-न्नास्ति-**कुं**. [4] वाकारेति । शुक्लोवेति वाशब्दरूपवाकारान्तरेत्यर्थः—**कुं. आ**. [5] व्याकारार्थेति क्वचित्पाठः—**आ**.

न्निवृत्तिः स्यात् । किञ्च तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यशङ्काद्यभावोऽनेकाभावघटितत्वाद्गुरुः । प्रामाण्यनिश्चयस्तु न तथेति लघुः । एवमप्रामाण्यशङ्काद्यभाववत्तद्वतितत्प्रकारकज्ञानत्वरूपप्रामाण्यात्यन्ताभावशङ्काद्यभावः एवं तद्व्याप्यदोषजन्यत्वादिशङ्काद्यभावोपि हेतुरित्यभावा अनेके । प्रामाण्यनिश्चयत्वेकः । अभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेनैकत्वे त्वावश्यकत्वाल्लाघवाच्च प्रामाण्यनिश्चय एव सहकारी ।

न चाप्रामाण्याज्ञानमप्यावश्यकम् । प्रामाण्यनिश्चयस्याप्यप्रमात्वेन [1]ज्ञातस्याप्रवर्तकत्वादिति वाच्यम् । मन्मते तस्यापि निश्चितप्रामाण्यकस्यैव प्रवर्तकत्वात् ।

न चाप्रामाण्यशङ्काभावः क्लृप्तः प्रामाण्यनिश्चयस्तु कल्प्य इति वाच्यम् । गृहीतप्रामाण्यज्ञानसमानविषयकज्ञानान्तरे निष्कम्पप्रवृत्तिजनक[2]ज्ञान

तदभावान्निवृत्तिरापाद्यत इत्यतस्तत्साधयति—**किञ्चेति** । शङ्कादीत्यादिपदेन निश्चयग्रहः—**विरोध्यभावत्वेनेति** । विरोधिनिश्चय[3]विषयाभावत्वेनेत्यर्थः ॥

तौल्यमाशङ्क्य निराह—**न चाप्रामाण्याज्ञानमपीति** । **मन्मत इति** । अनवस्था तु निरासिष्यत इति भावः—**क्लृप्त इति** । सर्वत्र सत्वादिति भावः—**ज्ञानान्तर इति** । क्लृप्तेरुक्तत्वादित्यन्वयः ।

---

[1] ज्ञाने तस्या–**मु.** [2] ज्ञानमात्रे च–**मु.** [3] याभावत्वेनेत्यर्थः–**आ.**

त्वमात्रेण सामग्रीसत्वेन तत्कल्पेऽरुक्तत्वात्। फलमुखगौरवस्य चादोषत्वात्। अन्यथानुमितौ व्याप्तिज्ञानं न हेतुः। किं तु सहचारदर्शनवतो व्यभिचाराज्ञानम्। एवं पक्षे लिङ्गज्ञानं न हेतुः। किं तु पक्षज्ञानवतः पक्षे लिङ्गासंसर्गाग्रहः। एवं प्रवृत्तौ विशिष्टज्ञानं न हेतुः। किं तु भेदाग्रहः। एवमर्थेन्द्रियादिसबन्धेऽर्थाभावाज्ञानं प्रवर्तकम् न त्वर्थनिश्चयः। इत्याद्यतिप्रसङ्गः।

[1]एतेन उक्तरूपोर्थनिश्चय एव प्रवृत्तिहेतुः। अप्रमात्वेनाज्ञातत्वादिकं दण्डगतदार्ढ्यवत्कारणतावच्छेदकम्। तदभावात्पीतः शङ्ख[2] इति ज्ञानान्न प्रवृत्तिरिति निरस्तम्। लाघवेन प्रमात्वेन ज्ञातत्व-

---

बाधोद्धारग्रन्थ इत्यर्थः—**सामग्रीसत्वेनेति**। प्रामाण्यनिश्चयसामग्रीसत्वेनेत्यर्थः। कल्प्यत्वमुपेत्याप्याह—**फलमुखेति**। कारणताकल्पनावसरेऽवच्छेदकगौरवादेरिव प्रामाण्यनिश्चयकल्पनम्यानुपस्थितत्वात्पश्चात्तदुपस्थितावुपजीव्यविरोधेन गृहीतकारणत्वाबाधकत्वादिति भावः। विपक्षे बाधकं चाह—**अन्यथेति**। एवं क्लृप्तत्वे गौरवस्यादोषत्वे च प्रामाण्यनिश्चयस्याप्रवर्तकत्वमुपेत्याप्रामाण्याज्ञानसहितार्थनिश्चयस्यैव प्रवर्तकत्व इत्यर्थः॥

तृतीयकल्पं निराह—**एतेनेति**। **उक्तेति**। अप्रामाण्यज्ञानशून्यार्थनिश्चय एवेत्यर्थः। एतेने[3]त्युक्तं व्यनक्ति—**लाघवेनेत्यादिना**।

---

[1] एतेनैवे–अ. [2] शङ्खपदं नास्ति–कुं. [3] नैवे–अ.

स्यैव तदवच्छेदकत्वौचित्यात्। अन्यथा अनुमित्यादौ सहचारादिज्ञानमेव हेतुः व्यभिचरितत्वादिनाऽज्ञातत्वं कारणतावच्छेदकमिति स्यात्।

एतेनैवार्थनिश्चय एव प्रवर्तकः। पीतः शङ्ख इत्यादौ त्वप्रामाण्यज्ञानं प्रवृत्तिप्रतिबन्धकमिति निरस्तम्। निर्विषयस्य जातिविशेषेणैव प्रतिबन्धकस्य मण्यादेस्त्वन्मते स्वाभावरूपकारणविघटनरूपतया प्रतिबन्धकत्वेपि मन्मते शक्तिविघटकत्वेन प्रतिबन्धकत्वेपि यथा जातिविशेषरहितस्य व्यभिचारादिज्ञानस्य मतद्वयेप्यनुमित्यादिजनकीभूतव्याप्त्यादिज्ञानविघटकत्वेनैव तत्प्रतिबन्धकता तथैवाप्रामाण्यज्ञानस्यापि प्रवृत्तिहेतुभूतज्ञानविघटकत्वेनैव प्रतिबन्धकतेति वक्तव्ये अर्थनिश्चयस्य पीतः शङ्ख इत्यादौ सत्वेन तद्विघटनासंभवात्तेन वि[1]घटनीयस्य प्रामाण्य[2]ज्ञानस्य हेतुत्व-

---

चतुर्थकल्पं निराह—**एतेनैवेति**। अप्रामाण्यज्ञानं प्रामाण्यविरोधिज्ञानमित्यर्थः। एतेने[3]त्युक्तं दुर्गमत्वाद्व्यनक्ति—[4] **निर्विषयस्येत्यादिना**। [5] जातिविशेषहीनस्य साक्षादविरोधिनो ज्ञानस्य प्रतिबन्धकत्वं तज्जनकज्ञानविघटकत्वेनैवेति व्याप्तेर्यथेत्यादिना विवक्षित[6]त्वान्मण्यादौ निर्विषये व्यभिचा[7]रो नेति भावेन निर्विषयस्येत्याद्युक्तिः॥

ननु ज्ञानमपि मण्यादिवद्बाधप्रतिपक्षवच्च कारणीभूतस्वाभाव-

---

[1] त्तद्वि-**मु.** [2] ण्यादि **छ ख.** [3] एतेनैवेत्युक्तं-**मु.** [4] निर्विशेषस्येत्यादिना-**मु.** [5] यज्ञा-**मु.** [6] वक्ष्यमाणव्याप्तौ-**आ अ.** [7] रनिरासाय-**आ अ.**

सिद्धेः । ज्ञानं हि ज्ञानान्तरस्य विषयद्वारैव विरोधीति स्वविषयविरुद्धविषयकमेव ज्ञानं विघटयति। अन्यथा व्यभिचारादिज्ञानमपि स्वाभावरूपहेतुविघटनतया अनुमित्यादिप्रतिबन्धकं वा सहचारादिज्ञानगतशक्तिविघटकत्वेन प्रतिबन्धकं वा स्यात्। न तु व्याप्त्यादिज्ञानविघटकम्। बाधादिस्तु ग्राह्याभावविषयकत्वेन साक्षाद्विरोधित्वात्स्वत एवानुमितिप्रतिबन्धकः । ज्ञाननिष्ठाप्रामाण्यविषयकज्ञानं तु घटविषयकप्रवृत्तेर्न साक्षाद्विरोधि।

किञ्चोक्तप्रकारेणाप्रामाण्यज्ञानवत्प्रामाण्यात्यन्ताभावादिज्ञानानामपि प्रतिबन्धकत्वादभावकू-

---

विघटनरूपतयैवास्तु प्रतिबन्धकं किं कारणभूतज्ञानविघटकतयेत्यत आह—**ज्ञानं हीति** । स्वमतावष्टम्भेनाह—**शक्तिविघटकत्वेनेति** । बाध[1] वैषम्यमाह—**बाधादिस्त्विति** । अस्तु ज्ञानं हीत्यादिनोक्तमप्रामाण्यज्ञानं तु बाधादिवत्स्यादित्यत आह—**ज्ञाननिष्ठेति** । **अप्रामाण्येति** । प्रामाण्यविरोधीत्यर्थः । किं तु प्रामाण्यनिश्चयस्यैवेति[2] तद्विघटकतयैव प्रतिबन्धकमिति प्रामाण्यज्ञानस्य हेतुत्वसिद्धिः । तद्भत्वाभावस्य प्रवृत्तिविषयाभावत्वेपि न तन्मात्रमप्रामाण्यमिति भावः ॥

जनकज्ञानविघटकत्वमनुपेत्य बाधवत्प्रवृत्तौ स्वकारणीभूताभावविघटनरूपत्वेनैव प्रतिबन्धकत्वे दोषान्तरमाह । **किञ्चेति** । **उक्तेति**—

---

[1] धादि—आ. [2] शेषः तथा च—अ.

टस्य कारणता कल्प्येत्यतिगौरवम्। ततो वरमेकः प्रामाण्यनिश्चयो हेतुरप्रामाण्यादिज्ञानं तु तद्विघटकमिति। मण्यादौ तु त्वन्मते तद्विघटनीयस्यैकस्याभावादभावकूटस्य हेतुतास्तु।

एतेनैव उपाधिज्ञानस्याधेयव्यभिचारज्ञानरूपानुमितिप्रतिबन्धकान्तरसम्पादनेनानुमितिप्रतिबन्धकत्वमिवाप्रामाण्यसन्देहस्यापि मानसार्थसंदेहरूपप्रवृत्तिप्रतिबन्धकान्तरसंपादनेन प्रवृत्तिप्रतिबन्धकत्वम्। उक्तं हि—"अप्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशय" इतीति निरस्तम्। मानसार्थसन्देहस्यापि पीतः शङ्ख इत्यादावुक्तरीत्या-

"एवमप्रामाण्यशङ्काद्यभाववदि" त्यादिनोक्तप्रकारेणेत्यर्थः। **अतिगौरवमिति**—अप्रामाण्यज्ञानाभावः कारणमित्येतदेव प्रामाण्यज्ञानाद्गुरु। तत्राप्यभावकूटः कारणमित्युक्तावतिगौरवमित्यर्थः। शक्तेरनङ्गीकारादन्यस्य प्रतिबध्यस्याभावादप्रामाण्यज्ञानाभावादिषु चानुगतैकहेतुतावच्छेदकस्यासंभवादभावकूटस्यैव हेतुतायास्त्वया वाच्यत्वादिति भावः।

नन्वेवं मण्याद्यभावस्थले माणिमन्त्राद्यभावकूटस्य कारणता कल्प्येत्यत्रापि तथा स्यादित्यत आह—**मण्यादौ त्विति**। इह त्वस्ति विघटनीयं प्रामाण्यज्ञानमिति किमर्थमतिगौरवाश्रयणमिति भावः।

पञ्चमं पक्षं प्रत्याचष्टे—**एतेनैवेति**। उपाधेर्व्यभिचारोन्नायकत्वपक्षमुपेत्योक्तम्—**आधेयव्यभिचारज्ञानेति**। सन्देहनिश्चयसाधारणज्ञानमात्रस्य प्रतिबन्धकत्वाज्ज्ञानपदप्रयोगः—**उक्तं हीति**। मणावित्यर्थः। **एतेनैवेत्युक्तं व्यनक्ति—मानसार्थसन्देहस्यापीति**। तद्विघटकत्वा-

र्थनिश्चय[1]सद्भावेन तद्विघटकत्वायोगेन सदर्थत्व-रूपप्रामाण्यनिश्चयविघटनेनैव प्रतिबन्धकत्वस्यैवो चितत्वात् । तस्मादसंसर्गग्रहव्यभिचारज्ञानादेः प्रवृत्त्यनुमित्यादिप्रतिबन्धकत्वान्यथानुपपत्त्यैव त-द्विघटनीयस्य[2] संसर्गाग्रहव्याप्तिज्ञानादेः प्रवृत्त्यनु-मित्यादिहेतुत्ववदप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिब-न्धकत्वा[3]न्यथानुपपत्त्यैव तद्विघटनीयस्य प्रामाण्य-ज्ञानस्य तद्धेतुत्वसिद्धिः ॥

यद्यपि परप्रक्रियया न निश्चितप्रामाण्य[4]ज्ञानं प्रव-र्तकम्। प्रामाण्यलिङ्गज्ञानादिनार्थज्ञानस्य नाशात्।

योगेनेत्यादिनान्वयः । ज्ञानं हीत्यादिनोक्तरीत्या प्रमाण्यनिश्चयविघटने-नैव प्रतिबन्धकत्वस्योचितत्वादित्यर्थः । अर्थसन्देहस्य प्रामाण्यनिश्चय-विरोधित्वघटनाय सदर्थत्वरूपेत्युक्तम्—**तस्मादिति** । अन्यस्य विघट-नीयस्याभावाज्ज्ञानस्य ज्ञानान्तरविघटकत्वाच्चेत्यर्थः । अनुमित्यादीत्यादि-पदेन लिङ्गपरामर्शादिग्रहः । अप्रामाण्यज्ञानस्येत्युपलक्षणम्। अर्थसन्देहस्य चेत्यपि ध्येयम्— **तद्धेतुत्वेति** । प्रवृत्तिहेतुत्वेत्यर्थः ।

आशुविनाशिनो ज्ञानस्य प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञातस्य प्रवर्तकत्वम् । उक्तं च मणौ "ज्ञानं गृहीतप्रामाण्यं न प्रवर्तकम् । प्रामाण्यानुमितेः पूर्वमेव तस्य नाशात् । किं तु तज्ज्ञानसमानविषयक-मप्रामाण्यशङ्काशून्यज्ञानान्तरमेवे*त्यादी" त्येतच्चोद्यमनूद्य समाधिमाह—**यद्यपीति** ।

[1] स्य–ख. [2] स्यैव–छ. [3] नुपपत्यैव–ग. [4] क–कुं. * मणिपुस्तकेषु त्यादीतिनास्ति.

किं तु तत्समानविषयकमप्रामाण्यशङ्कारहितमुत्तरं ज्ञानान्तरमेव। तथापि मन्मतेपि साक्षिरूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्यनिश्चयरूपत्वात्। घटादिज्ञानस्य तु परग्राह्यत्वेपि तद्ग्राहकेण नित्येन साक्षिणा प्रमाणत्वेनैव ग्रहणात्तस्य च स्वप्रकाशत्वेनानवस्थाभावाभिश्चितप्रा-

---

स्वप्रकाशत्वेनेति ॥

" यदि साक्षी स्वयं भातो न मानं केन गम्यते।
अक्षजादेश्च मानत्वमनवस्थान्यथा भवेत् " ॥

इति वैशेषिकनयानुव्याख्याने तथा—

" नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम्।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात् " ॥

इति ज्ञानपादीयानुव्याख्याने चोक्तेरिति भावः—**घटादिज्ञानस्य त्विति**। मनोवृत्तिरूपज्ञानस्येत्यर्थः ॥

" इच्छा ज्ञानं सुखं दुःखं भया[1]भयकृपादयः।
साक्षिसिद्धा "

इत्युक्तेरिति भावः— **नित्येनेति**। औत्तरिकानुस्मृतिसिद्धात्मस्वरूपभूतसौषुप्तिकानुभवरूपस्य तस्य नित्यत्वादिति भावः—**अनवस्थेति**। पूर्वोक्तद्विविधानवस्थाभावादित्यर्थः। तथा च [2]मणावुक्तो दोषः परेषामेव। नास्माकम्। " अन्यथा भट्टमते प्रामाण्यस्यानुमितिग्राह्यत्वे अनवस्था स्यात्। गुरुमते प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यम्। स्वरूप-

---

[1] तथा—कुं. [2] मणिकृदुक्तदोषाः—अ.

माण्यमेव ज्ञानं प्रवर्तकम्। किञ्चाद्ये ज्ञाने प्रामाण्य-निश्चयेन कथं द्वितीये तच्छङ्काभावः।

ननु यदीदं रजतं न स्या[1]त्तदा रजतत्वप्रकारक-प्रमाविषयो नस्यादिति तर्कप्रभावाद्द्वितीये शङ्का-भावः। तर्केणार्थ[2]सत्त्वशङ्कानिवर्तनेन तद्घटिता-प्रामाण्यशङ्कानिवर्तनादिति चेन्न। क्लृप्तसामग्री-कस्य लघोश्चानुव्यवसायरूपप्रामाण्यनिश्चयस्य त्यागेनान्यस्य विपरीतस्योक्तरूपतर्कानुसन्धान-नियमस्य कल्पनेऽनुभवविरोधात्॥

प्रामाण्यबहिर्भूतत्वात्। किन्तु परग्राह्यत्वेऽनवस्थाना "दित्यपि मणि-कृदुक्तो दोषो नास्मत्पक्षे। स्वग्राह्यत्वस्यापि साक्षिवेद्यत्वादिति भावः।

ननु समानविषयकज्ञानान्तर इवाप्रामाण्यशङ्कानिवृत्तावेव प्रामा-ण्यज्ञप्तेरुपक्षयान्न प्रवृत्तिहेतुता कल्प्या। "अप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानं" इति मण्युक्तेरित्यतो द्वितीय-ज्ञानेपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह—**किञ्चेति द्वितीय इति**। गृहीतप्रामाण्यज्ञानसमानविषयके ज्ञानान्तर इत्यर्थः—**क्लृप्तेति**। "न च दृष्टान्तः साध्यविकलः उत्तरस्य ज्ञानस्य" इत्या दिना स्वतस्त्वानुमानावसरोक्तरीत्या क्लृप्तसामग्रीकस्येत्यर्थः। अन्यत्र क्लृप्तत्वाच्च द्वितीयज्ञानादावपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह॥

---

[1] ताहिं-मु. [2] र्था-मु.

किञ्चाप्रामाण्यशङ्कानन्तरं प्रवृत्तौ प्रामाण्यनिश्चयो हेतुरिति तावदविवादम्। तत्र[1] निश्शङ्कप्रवृत्तित्वमेव कार्यतावच्छेदकं लाघवात्। न तु शङ्कानन्तरानिश्शङ्कप्रवृत्तित्वं गौरवात्। तत्र प्रामाण्यनिश्चयोऽप्रामाण्यशङ्कानिरासोपक्षीण इति तु गौरवादिना निरस्तम्। अन्यथा व्याप्त्यादिनिश्चयोपि व्यभिचारादिशङ्कानिरासोपक्षीणः स्यात्।

किञ्च प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेनोपक्षये त्वत्पक्षे प्रामाण्यस्यानुमेयत्वेनावश्यकेन प्रामाण्यव्याप्यतया लिङ्गज्ञानेनैवाप्रामाण्यशङ्कानिवृत्तिसम्भवात्प्रामाण्यज्ञानस्य प्रवृत्तावनुपयो-

---

किञ्चाप्रामाण्येति ॥ अविवादमिति ॥ "परतः[2]पक्षे प्रामाण्यग्रहो न क्वचित्प्रवर्तकः" इति मण्युक्तेरस्ति विवादः। तथापि "यत्रचानभ्यासदशायामप्रामाण्यशङ्कयार्थनिश्चयं परिभूयार्थसंशयस्तत्र प्रामाण्यनिश्चयाधीनज्ञानादर्थं निश्चित्य निष्कम्पं प्रवर्तते" इत्युक्तया तत्र स्थले प्रामाण्यनिश्चयस्य नियतपूर्ववृत्तित्वाल्लघुत्वाद्धेतुत्वमवश्यं वाच्यमिति भावेनैवमुक्तिः। अन्यत्रोपक्षयात्कथं हेतुतेत्यत आह—**तत्र प्रामाण्येति ॥ गौरवादिनेति**। गौरवातिगौरवा[3]दिना पूर्वमेव निरस्तमित्यर्थः। अतिप्रसङ्गं किञ्चिद्व्यनक्ति—**अन्यथेति**।

यदपि मणौ "नन्वेवं बहुवित्तव्ययायाससाध्ये" इत्यादिना प्रामाण्यज्ञानस्यानुपयोगमाशङ्क्याप्रामाण्यशङ्कानिवर्तकत्वेनोपयोगकथनं तदप्ययुक्तमित्याह—**किञ्च प्रामाण्येति**। अप्रामाण्यशङ्कानिवृत्तिस्थले

---

[1] च-मु. [2] स्त्व-मु. [3] तिप्रसङ्गा—कुं. आ अ मु.

गात्तद्ग्रहणाचिन्ता व्यर्था। यद्यपि व्यवसायः शङ्का-निवर्तकपरीक्षाकाले नास्ति। तथापि स्मृत्युपनीतस्य व्यवसायस्य प्रामाण्यनिश्चय एव प्रवर्तकः।

यद्वा त्वन्मते गृहीतप्रामाण्येन ज्ञानेन समान-शीलत्वादप्रामाण्यशङ्कारहितं ज्ञानान्तरमिव मन्मते निरस्तप्रतिबन्धेन साक्षिणा गृहीतप्रामाण्यं ज्ञानान्तरमेव प्रवर्तकम्। एतदप्युक्तम् "अन्यथे" त्यादिना। प्रामाण्यनिश्चयस्याप्रवर्तकत्वे व्याप्त्यादिनिश्चयोऽनुमित्यादिहेतुरितिव्यवस्थायोगादित्यर्थः॥

प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्॥ ६॥

व्यवसायस्य नाशेन प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञातं ज्ञानं प्रवृत्तिहेतुरित्याशङ्क्य द्वेधा समाधिमाह—**यद्यपीत्यादिना**। **स्मृतीति**। पररीत्येदम्। यद्वा सिद्धान्ते साक्षिरूपनित्यज्ञानविषयस्यापि स्मृत्युपनीतत्वप्रकारो जिज्ञासानयभाष्यटीकाभावदीपेऽस्माभिरुक्तो ध्येयः—**एतदपीति**। प्रामाण्यनिश्चयस्याप्रवर्तकत्वेऽतिप्रसङ्ग इत्येतदपीत्यर्थः॥

प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्॥ ६॥

एवं [1]प्रामाण्यनिश्चयस्य प्रवर्तकत्वसाधनेन तन्निश्चयस्य परतो-[2]ज्ञायमानत्वेऽनवस्थाद्वयमुक्त्वा अप्रामाण्यशङ्काशून्यस्यार्थनिश्चयस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्चयस्यावश्यकत्वादनवस्थाद्वयं दुर्वा-

[1] एवं इति न—अ. [2] जा—मु. आ.

किञ्चाप्रामाण्यशङ्काभावस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्चयो वाच्यः। ननु धर्म्यज्ञानादिनापि शङ्काभावो युक्तः। न हि ज्ञानं ज्ञातं सदेव प्रवर्तकम्। सत्यप्यर्थज्ञाने तदज्ञानेनाप्रवृत्त्यदर्शनादिति चेन्न। न तावद्धर्म्यज्ञानं युक्तम्।

रमेव परतस्त्वपक्ष इत्याह। **किञ्चेति।** [1]यद्वा प्रामाण्यनिश्चयस्य प्रवर्तकत्वपक्षे तस्यावश्यवेद्यत्वेप्यप्रामाण्यशङ्काशून्यार्थनिश्चयस्य प्रवर्तकत्वपक्षे तदनावश्यकत्वान्नानवस्थेत्यत आह[1]। **किञ्चेति। प्रवर्तकत्वेपीति**—प्रवर्तकार्थनिश्चयसहकारित्वेपीत्यर्थः। यद्यपि सिद्धान्ते परीक्षयाऽप्रामाण्यशङ्कानिवृत्तावेव साक्षिणा प्रामाण्यनिश्चयेन प्रामाण्यनिश्चयस्याप्रामाण्यशङ्काभावार्थत्वं नास्ति। "सा च बुद्धिदोषमात्रं निरस्यति। तस्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति" इति तत्वनिर्णयटीकाद्युक्तेः। तथापि "यत्र तु प्रामाण्यज्ञानेऽप्रामाण्यशङ्कया प्रामाण्यसंशयः तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः" इतिमण्युक्तेस्तं प्रत्येतदापादनामित्यदोषः।

ननु तच्छङ्काभावः प्रामाण्यनिश्चयरूपप्रतिबन्धादिव स्वहेत्वभावादपि संभवतीति भावेन "प्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यनिश्चयानवश्यंभावात्" इति मण्याद्युक्तमाशङ्कते। **नन्विति।** तथात्वे प्रवृत्तिर्न स्यादित्यत आह। **न हीति**—"ज्ञानं बुबुभुत्सितप्राप्यतया 'तीव्रसंवेदनं" इत्यादिप्रथमपादीयसुधावाक्यं विवृण्वन्नाह। **न तावदिति**—कोट्यस्मरणं चायुक्तमिति कल्पापेक्षया तावच्छब्दः। * अज्ञानं हि तदर्थयोग्यत्वाभा

[1] अयंग्रन्थः. कुं. पुस्तके कुण्डलितः, [2] समस्तंपदम्–अ. कुं.

योग्यस्य धर्मिणो ज्ञानस्य मनस्संयुक्तात्मसमवायरूपसम्प्रयोगवत्त्वेनैवोत्पत्त्या ज्ञानत्वेन [1]ज्ञानज्ञानसामग्र्याः सत्वात् ।

न च ज्ञानज्ञाने बुभुत्सा हेतुः सा च सार्वत्रिकीति वाच्यम् । ज्ञानस्य सुखादिवद्योग्यात्मविशेषगुणत्वेनाबुभुत्सितग्राह्यत्वात् । बुभुत्साया ज्ञानरूपधर्मिज्ञानसाध्यत्वेनानवस्थानाच्च ।

वेन वा सन्निकर्षादिसामग्र्यभावेन वा सहकारिविरहप्रयुक्तसामग्र्यभावेन वा प्रतिबन्धेन [2]वेति चतुर्धा[2] । आद्यद्वयं न प्रकृत इत्याह ***योग्यस्येत्यादिना**—मनस्संयुक्तेत्याद्युक्तिः पररीत्या । सिद्धान्ते त्वात्मसंयुक्तमनस्समवायेत्यर्थः । समवायस्तादात्म्यं ज्ञेयम् । सु[4]खाद्यनुभवरूपसाक्ष्याशयेन वायं ग्रन्थः सिद्धान्ते योज्यः । सत्यपि धर्मिज्ञाने साधारणधर्मादर्शनादसन्देह इति शङ्कापनोदायोक्तं **ज्ञानत्वेन ज्ञानज्ञानेति** ॥

न च ज्ञानत्वनिर्विकल्पकविलम्बात्तदभावः । निर्विकल्पकस्याप्यनुत्पत्तौ बीजाभावान्निरसिष्यमाणत्वाद्वेति भावः । एतेन "सुखादिवत्सत्यां सामग्र्यां वेद्यत्वापरिहारात्" इति तत्त्वनिर्णयटीका विवृता ॥

सहकार्यन्तरविरहान्न ज्ञानज्ञानमिति तृतीयमाशङ्क्य निराह ॥ **न चेति** ॥ **अनवस्थानाच्चेति** ॥ बुभुत्साहीच्छाविशेषः । तस्याः स्वविषयज्ञानसाध्यत्वाद्बुभुत्साहेतुज्ञानस्य धर्मिज्ञानविषयकस्य तद्विषयबुभुत्सासाध्यत्वात् सा च तद्विषयज्ञानसाध्येति पूर्वपूर्वज्ञानव्यक्तिबुभु-

[1] एकं ज्ञानपदंन-**मु.** [2] पुस्तके नास्ति—**मु.** * अज्ञानं हि द्वेधा । योग्यत्वाभावेन वा सन्निकर्षादिसामग्र्यभावेन वा । न द्वयं प्रकृत इत्याह—**अ.** [4] सुखानु—**आ.**

वर्तमानस्वीयज्ञाने बुभुत्साया अदर्शनाच्च ॥

न च धर्म्यज्ञानरूपफलबलात्सुखादिसामग्री तज्ज्ञानसामग्री वा [1]ज्ञानप्रतिबन्धिका कलप्यत इति वाच्यम्। धर्म्यज्ञानस्याद्याप्यसिद्धयान्योन्याश्रयात्। ज्ञानस्याज्ञाने तत्र कदाचित्संशयाद्यापाताच्च। कोट्यस्मरणं चायुक्तम्। ज्ञानत्वरूपसाधारणधर्मदर्शनस्य यागादौ निष्कम्पप्रवृत्यर्थं प्रामाण्यादिरूपविशेषबुभुत्सायाश्च सत्वेन तत्स्मरणसामग्र्याः सत्वात्।

त्साव्यक्तिपरम्परयानवस्थानाच्चेत्यर्थः । भविष्यदादिज्ञानज्ञाने कथंचिद्बुभुत्सासम्भवेपि न वर्तमाने। तथाच तत्र व्यभिचारान्नकापि सा ज्ञानज्ञानहेतुरित्याह—**वर्तमानेति। स्वीयेति**। यद्यपि स्वस्येदमित्यर्थेऽणिकृते स्वशब्दस्य द्वारादिषु पाठेन "द्वारादीनांचे "तिसूत्रेण वकारात्पूर्वमैजागमेनौकारे सति सौवेति भाव्यं। तथापि स्वस्मै हितमित्यर्थे "प्राक् क्रीताच्छ" इति छप्रत्यये स्वीयेति साध्विति ज्ञेयम्।

चतुर्थं ानरहि। **न च धर्म्यज्ञानेति**—व्यवसायरूपधर्मिणोऽज्ञानेत्यर्थः। **ज्ञानस्याज्ञान इति**। अननुव्यवसाय इत्यर्थः—**संशयेति**। ज्ञानं वृत्तं न वेत्येवं संशयेत्यर्थः। एतेन "न च जिज्ञासायामेवानुभवोऽनुभूयते" इत्यादिभाष्यटीका विवृता ध्येया। **कोट्यस्मरेणनेत्येतन्निराह। कोट्यस्मरणं चेति**—"ज्ञाने हि ज्ञाते तत्प्रामाण्यानुपलब्धौ कथं संशयो न स्यात्" इति तत्वनिर्णयटीकां विवृण्वा[2]न आह—**ज्ञानत्वेति**।

[1] ज्ञानज्ञान—कुं-छ-ख-ग-क. [2] ज्ञाह—मु.

न च विषयान्तरसञ्चारादसंदेह इति युक्तम्। यागादौ निष्कम्पप्रवृत्तिहेत्वसंदेहप्रयोजकविशेषावधारणाय विषयान्तरसञ्चारस्यैव निरोद्धव्यत्वात्। न हि प्रेक्षावन्तो बहुवित्तव्ययायाससाध्ये साधनत्वानिश्चयेपि [1]विषयान्तरसञ्चारसम्पादितासन्देहमात्रेण चैत्यवन्दनादौ प्रवर्तन्ते।

किञ्चोक्तरीत्या सम्पन्नसामग्रीकेण क्लृप्तेन प्रामाण्यनिश्चयेनैवासन्देहसम्भवे कथं विषयान्तरसञ्चारादिकल्पनम्।

अपि च विषयान्तरसञ्चारेपि सुखादिज्ञानप्रामाण्ये नियमेनासन्देहो दृश्यत इति नासावसन्देहहेतुः। अन्यथा सुखादिकमपि सुखत्वादिना नावश्यवेद्यम्। तत्रासन्देहस्तु धर्म्यज्ञानादिनेति स्यात्। तत्र सामग्रीसत्वादवश्यवेद्यतेति चेत्समं प्रामाण्येपि।

मण्युक्तमन्यदपि निराह ; न चेति—परकीयप्रवृत्तिहेतुभूतः शङ्काभावः प्रामाण्यनिश्चयहेतुक एव। न तु विषयान्तरसञ्चारहेतुक इति तु दुर्ज्ञानमित्यत आह—किञ्चोक्तरीत्येति। बाधोद्धारग्रन्थोक्तरीत्या सम्पन्नसामग्रीकेण प्रामाण्यनिश्चयप्रवर्तकत्ववादोक्तरीत्या क्लृप्तेनेत्यर्थः। व्यभिचाराच्चासन्देहहेतुरेवायं न भवतीत्याह। अपि चेति। अन्यथेति—क्लृप्तासन्देहहेतुत्यागेनाक्लृप्तहेतुकल्पन इत्यर्थः। समामिति—अत्रापि सामग्र्याः बाधोद्धारग्रन्थ उपपादितत्वादिति भावः।

---

[1] संदेहसंभवे—क.

एतेन शङ्काविश्रान्तिभूमौ सुखादिज्ञाने प्रामाण्यव्याप्यस्य सुखज्ञानत्वादेर्विशेषस्य दर्शनादेवासंशय इति निरस्तम्। प्रामाण्यव्याप्यतया सुखज्ञानत्वदुःखज्ञानत्वादिज्ञानादपि प्रामाण्यज्ञानस्य लघुत्वात्। सुखज्ञानत्वादेः प्रामाण्यव्याप्यत्वाग्रहेप्यसंशयदर्शनाच्च। जन्मान्तरीयव्याप्तिग्रहकल्पनस्य[1] चातिप्रसक्तित्वात्। तस्मात्प्रामाण्यस्यावश्यवेद्यत्वादनवस्थाद्वयं दुष्परिहरम्।

यदपि "विशेषदर्शनान्न तत्राप्रामाण्यशङ्का" इति मणिवचनं तद्विवरणपूर्वं तदपि नेत्याह। **एतेनेति। व्याप्यतयेति**—स्वरूपज्ञानमात्रस्याप्रयोजकत्वादिति भावः। प्रामाणिकं गौरवं न दोषावहमित्याह। **सुखज्ञानत्वादेरिति**—यद्वा व्यभिचारान्नायमसंशयहेतुरित्याह। **सुखेति**—व्यभिचारासिद्धिमाशङ्क्य निराह। **जन्मेति-अतिप्रसक्तित्वादिति**—ज्ञानहेतुकत्वव्यभिचारस्थले सर्वत्रैवं परिहारसम्भवादिति भावः। यद्वा[2] नारिकेल द्वीपवासिनो वह्न्यनुमानापत्तेरिति भावः[2]। एवमियता ग्रन्थेन "अवश्यवेद्यत्वाभावान्नानवस्थेत्यभिप्राय इति चेन्न। निश्शङ्कं प्रवृत्तावश्यवेद्यत्वात्" इति तत्वनिर्णयटीकावाक्योक्तं निश्शङ्कप्रवृत्यर्थं तद्धेत्वप्रामाण्यशङ्काभावार्थं चावश्यवेद्यमित्यतीतवादत्रये चोपपाद्योपसंहरति। **तस्मादिति**—अतीतवादोक्तदिशा निश्शङ्कप्रवृत्यर्थं अत्र वादे उक्तदिशा धर्म्यज्ञानादिना शङ्काभावायोगेनाप्रामाण्यशङ्काभावार्थं च प्रामाण्यनिश्चयस्यापेक्षितत्वादित्यर्थः।

---

[1] स्याति—ख. [2] इयं पङ्क्तिः नास्ति—अ.

एतदप्युक्तं "अन्यथा" इत्यादिना। परतस्त्वे उक्तानवस्थाद्वयापत्तेरित्यर्थः।

ननु त्वन्मते[1] यद्यपि प्रामाण्यग्रहणार्थं संवाद-विसंवादभावाभावरूपपरीक्षा नापेक्षिता। तथापि दोषशङ्कादिरूपप्रतिबन्धनिरासार्थं साऽपेक्षितैव। तथा च तत्रापिदोषशङ्कायां तन्निरासाय परीक्षान्तरमित्यनवस्था तुल्यैवेति चेन्न। साक्षिवेद्यसुखदुःखादिज्ञाने दोषशङ्काया अभावेन परीक्षानवस्थाभावात्। उक्तं हि भगवत्पादैः।

"न परीक्षानवस्था स्यात्साक्षिसिद्धे त्वसंशयात्" इति॥

परतस्त्वे अनवस्थोक्तिः॥ ७॥

एतदपीति—परतस्त्वे प्रामाण्यज्ञानस्यापीत्यादिनोक्तमित्यर्थः।

"अवश्यं तत्स्वतःप्रामाण्यग्रहणवादिनाप्यङ्गीकर्तव्यं" इत्यादि टीकार्थं निष्कृष्य वक्तुं स्वमतेऽनवस्थादोषं शङ्कापूर्वमुद्धरति—नन्वित्यादिना। उक्तं हीति। ज्ञानपादीयानुव्याख्यान इत्यर्थः॥

परतस्त्वे अनवस्थोक्तिः॥७॥

एवं परतस्त्वे अनवस्थाद्वयोक्तया स्वतस्त्वहेतूनामप्रयोजकत्वं निरस्य विपक्षेऽनुमित्यसंभवरूपबाधकान्तरादपि नाप्रयोजकाः स्वतस्त्व-

[1] तेऽपि—ख.

किञ्च प्रामाण्यमनुमेयं चेत्कथं प्राथमिकं तज्ज्ञानम् । अप्रसिद्धविशेषणत्वेनानुमानाप्रवृत्तेः । प्रवृत्तिगतसंवादरूपवैचित्र्येण तद्धेतुज्ञाने वैचित्र्यानुमानेपि वह्न्यर्थिप्रवृत्तिहेतोर्वह्नित्ववति वह्नित्वप्रकारकत्वादिरूपप्रामाण्यस्य विशिष्याप्रसिद्धेः ॥

न च प्रामाण्यमात्रनिषेधे व्याघातदण्डभयेन विशेष्यवृत्तिप्रकारकत्वरूपं प्रामाण्यं सामान्यत[1] एव प्रसिद्धं वह्निज्ञाने साध्यमानं पक्षधर्मताबलाद्वह्नित्ववति वह्नित्वप्रकारकत्वादौ पर्यवस्यति ।

हेतव इति भावेनाह—किञ्चेति ॥ ननूक्तमत्र मणौ "प्रथमं च प्रामाण्यज्ञानं व्यतिरेकिणा" इति तत्राह—अप्रसिद्धेति[2] ॥ साध्याप्रसिद्धौ तन्निरूपितव्याप्तयज्ञानादिति भावः । ननु संवादप्रवृत्तिर्विसंवादप्रवृत्तिहेतुविलक्षणहेतुसाध्या तद्विलक्षणकार्यत्वादित्यनुमानेन सिद्धयद्वैलक्षण्यं प्रामाण्यरूपमेव सेत्स्यतीत्यत आह—प्रवृत्तीति ॥ दाहसमर्थविशे[3]ष्यवृत्तिप्रकारकत्वादिरादिपदार्थः ॥

प्रकारान्तरेणप्रसिद्धिमाशङ्क्य निराह । न चेति—विशेष्यवृत्तिप्रकारकज्ञानं नास्ति, प्रमा नास्तीत्यादिनिषेधस्य क्वचित्प्रमाप्रसिद्धिं विनानुपपत्तेस्तदर्थं तत्प्रसिद्ध्य[4]भ्युपगमे व्याघातरूपदण्डप्रसङ्गात्तद्भयेन क्वचित्प्रसिद्धेरवश्यवाच्यत्वात्—सामान्यतः सिद्धमित्युक्तम् । साध्यमानमिति—वह्निज्ञानं विशेष्यवृत्तिप्रकारकं समर्थप्रवृत्तिहेतुत्वादिति

---

[1] तः सिद्धं—कुं-ग-ख. [2] अप्रसिद्ध इति—मु. [3] ष्यकत्वादि—कुं वह्न्यवृत्तिप्रकारावाच्छिन्नत्वादिरादिपदार्थः—अ. [4] द्धयन—कुं.

एवं च नाप्रसिद्धविशेषणत्वं नाप्यसाधारण्यमिति वाच्यम्। प्रथमे स्वार्थानुमाने परकीयस्य प्रामाण्यनिषेधस्याभावेन व्याघातानुपस्थितेः। स्वयं निषेधस्य च तद्धीपूर्वकत्वात्।

न च तत्र[1] प्राग्भवीयसंस्कारजन्या स्मृति रूपा तत्प्रसिद्धिः। प्रथमप्रामाण्यज्ञानस्य प्रामाण्यस्वतस्त्वेनैवोपपत्तौ तत्कल्पकाभावात्।

अथ प्रथमं अयं वह्नित्वेनानुभवो वह्नित्वप्रका-

व्यतिरेकिणा साध्यमानमित्यर्थः। **नाप्यसाधारण्यमिति**—व्यक्तिविशेषे साध्यस्यानिश्चयेन सपक्षानिर्णयादिति भावः। ननु स्वर्थानुमाने परकीयव्याघातानवतारेपि स्वकीयप्रामाण्यनिषेधानुपपत्त्यैव तत्सिद्धिः स्यादित्यत आह। **स्वयमिति**—तथा च सा धीरेव कथं स्यादिति मृग्यत इति भावः।

"प्राग्भवीयसंस्काराद्विशेष्यावृत्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा तत्प्रामाण्यं तन्मात्रं स्मृतं वह्निज्ञानादौ साध्यमानं" इत्यादिना मणिकृदुक्तं तत्सम्प्रदायविदां मतमनूद्य निराह। **न च तत्रेति**—प्रथमप्रामाण्यानुमितिस्थल इत्यर्थः। **उपपत्ताविति**—तदुपपत्तिप्रकारश्च बाधोद्धारग्रन्थे संशयोपपादनग्रन्थादौचोक्त इति भावः।

"वयं तु ब्रूमः प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यं" इत्यादिनोक्तं मणिकृदभिमतं पक्षमाशङ्कते—**अथेति**। भ्रमव्यावृत्यर्थमयमित्युक्तिः। द्रव्यत्वादिना वह्नयनुभवेऽबाधाय[2] वह्नित्वेने-

[1] **ख क.** पुस्तके "तत्र" इति नास्ति. [2] बाधवारणाय—**अ.**

रकत्वे सति वह्नित्वाभाववद्विशेष्यको न समर्थ-प्रवृत्तिजनकत्वात् व्यतिरेकेणाप्रमावदित्यनुमाने-नाप्रामाण्याभाव एवानुमेयः। तत एव निष्क-म्पप्रवृत्तेः। न च तत्रापि साध्याप्रसिद्धिर्दोषः। अभावसाध्यके[1] व्यतिरेकिणि साध्यप्रसिद्धिं वि-नैव साध्याभावरूपस्य[2] भावस्य हेत्वभावव्याप्य-

---

त्युक्तिः। "वह्नित्वाभाववति वह्नित्वप्रकारकोन" इति मण्युक्तसाध्यस्य यज्ञपतिटीकानुरोधेनार्थोक्तिर्वह्नित्वप्रकारकत्वेसतीत्यादिसत्यन्तं न[3] नञ्-र्थभूताभावविशेषणम्। [4]एवं च अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्वह्नित्वविशेष्यकत्वसत्वेपि विशेषणाभावप्रयुक्तविशिष्टाभावरूपसाध्यसत्वान्न व्यभिचारः। अत एव[4] मणौ "दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वा" दित्यादिहेतूक्तावपि "वह्नित्वाभाववति वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वाभावयोः" इत्यग्रे तदीयग्रन्थानुरोधात्समर्थेत्यादिहेतूक्तिः। [5]अन्यथा साध्ये विशेष्यवैयर्थ्यात्[5]। वह्निविषयकेति समर्थप्रवृत्तिर्विशेषणीया। तेन न घटादिज्ञाने व्यभिचारः। एवमप्यत्र वह्नित्वमिति ज्ञाने व्यभिचार इति चेत्। एवं तर्हि वह्नित्वप्रकारकत्वेसतीति विशेषणीयम्। ननु प्रामाण्यनिश्चयाभावे कथं प्रवृत्तिरित्यत आह—**तत एवेति**। अप्रामाण्याभावज्ञानत इत्यर्थः। प्रामाण्यनिश्चयस्यापि तन्मते तत्रैवोपयोगादिति भावः—**अभावसाध्यक इति**। व्याप्तिज्ञानार्था हि साध्यप्रसिद्धिः। व्याप्तिश्च साध्या-

---

[1] केवल-**ग.** [2] पभा-**कुं.** [3] "न" पदं नास्ति-**मु आ.** [4] अयं ग्रन्थः-**मु आ.** पुस्तके नास्ति. [5] **मु आ.** पुस्तके नास्ति.

त्वग्रहात् । यद्वा वह्नित्वाभाववद्विशेष्यको नेत्येव साध्यम् । पक्षधर्मतावलादप्रामाण्याभावसिद्धिः । न च घटादिरूपात्सपक्षाद्व्यावृत्त्याऽसाधारण्यम् । तस्यानित्यदोषत्वादिति चेन्नैवम् । प्रथमस्य प्रामाण्यग्रहणस्योपाये पृष्टेऽप्रामाण्याभावग्रहणोपायकथनस्य व्यधिकरणत्वात् ॥

भावहेत्वभावयोरेव । तथाच तयोरेव ज्ञानमावश्यकम् । तत्र च साध्याभावोऽप्रामाण्यमेव । तच्चभावरूपंसाध्यभूतस्वाभावरूपप्रतियोगिज्ञानं नापेक्षते इति तदप्रसिद्धावपि यत्राप्रामाण्यं तत्र समर्थप्रवृत्तिजनकत्वाभाव इति हेत्वभावेन व्याप्यत्वग्रहसम्भवा[1]दिति भावः ।

वह्नित्वप्रकारकत्वे सतीति विशेषणवैयर्थ्यं मन्वानः पक्षधरादयुक्तसाध्यनिष्कर्षमाह—**यद्वेति** ॥ कथं तर्हि तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्याभावः सिद्ध्येदित्यत आह—**पक्षेति** ॥ उक्तहेतोर्वह्नित्वप्रकारकानुभवरूपपक्षे वह्नित्वप्रकारकत्वविशिष्ट[2]वह्निमत्वाभाववद्विशेष्यकत्वरूपाप्रामाण्यनिषेधो विशेषणाभावे बाधाद्विशेष्याभावमादायैव विशिष्टनिषेधे पर्यवस्यतीति तन्मात्राभावसाधने विशिष्टाभावः सिद्ध्यतीत्यर्थः । [3] अत्रापि पूर्ववद्धेतुविशेषणं ध्येयम् । तेन न प्रागुक्तव्यभिचारः—**घटादिरूपात्सपक्षादिति** । तस्य निर्विषयकत्वेन तत्र साध्यसत्वनिश्चयादिति भावः—**अनित्येति** । अनुकूलतर्काभाववेलायामेव दोषत्वादिह च हेतूच्छित्तिरूपविपक्षबाधकस्यानुकूलतर्कस्य सत्वेनादोषत्वादित्यर्थः—**व्यधिकरणत्वादिति** । अर्थान्तरत्वरूपनि-

---

[1] दित्यर्थः—आ-कुं. [2] वह्नित्वा—आ, मु. [3] अत्र च वह्नित्वप्रकारकनिश्चयत्वादित्यपि हेतुविशेषणं ध्येयम्-अ.

न चोक्तव्यतिरेक्येव पक्षधर्मताबलाद्वह्नित्ववद्विशेष्यकत्वरूपं प्रामाण्यं गृह्णातीति वाच्यम्। व्याप्त्या व्यापकतावच्छेदकावच्छिन्नत्वेनोपस्थापितस्यापूर्वस्य व्यक्तिविशेषस्यैव पक्षधर्मतया पक्षसम्बन्धसिध्या तथानुपस्थापितस्योक्तरूपप्रामाण्यस्य पक्षसम्बन्धबोधने तस्या असामर्थ्यात्।

एतेन अप्रामाण्याभावानुमित्यनन्तरं अयं वह्नित्वेनानुभवो वह्नित्ववद्विशेष्यकः अवन्ह्यवि-

---

ग्रहस्थानापत्तेरिति भावः। इदं प्रमेयमित्यादौ प्रमेयत्वाभावाप्रसिद्धया तद्घटिताप्रामाण्याभावानुमानासंभवाच्चेत्यपि ध्येयम्।

ननु विरुद्धप्रकारद्वये तदभाववद्विशेष्यकत्वाभावे तद्वद्विशेष्यकत्वमादायैव पर्यवसानम्। अन्यथा हेतोः पक्षसंबन्धो न घटत इत्याशयेन "तदभाववति तत्प्रकारकत्वव्यतिरेकः सिद्ध्यंस्तद्वति तत्प्रकारकत्वमादाय सिद्ध्यति। तृतीयप्रकाराभावात्" इति मण्युक्तमाशङ्क्य निषेधति—**नचेति। व्याप्त्येति॥** यद्धर्मावच्छिन्ननिरूपितव्याप्तिर्यद्धर्मावच्छिन्नस्य गृहीता तद्धर्मावच्छिन्नस्य पक्षधर्मतया तद्धर्मावच्छिन्नस्यैव सिद्धिः स्यात्। न तु प्रामाण्यस्येत्यर्थः।

न चायं नियमोऽन्वयिनि हेतौ न व्यतिरेकिणीति शङ्क्यम्। व्यतिरेकसहचारेणान्वयव्याप्तिं गृह्णत इति मताभिप्रायेण वा व्यतिरेकिण्यपि हेत्वभावव्याप्याभावविषयत्वनैयत्याभिप्रायेणैवमुक्तिः—**तस्या इति।** "[3]इदं वह्नित्वप्रकारकं ज्ञानं वह्नित्ववद्विषयकं" इत्यादिना मण्युक्तं पक्षान्तरं निराह—**एतेनेति।** विषयपदं विशेष्यपरमिति तदीय

---

[1] स्थित—ग. [2] स्थि—कुं-च-ग. [3] यद्वेदं—अ.

शेष्यकत्वे सति सविशेष्यकत्वादिति व्यतिरेक्यन्तरेण तत्सिद्धिरिति निरस्तम्। वैशिष्ट्यमनुव्यवसायावेद्यमिति परतः[1]पक्षे साध्याप्रसिद्धेः॥

किञ्चाप्रामाण्यमपि यद्यनुमेयं तर्हि कथं तत्प्रसिद्धिः। येनाप्रामाण्याभावसाधकहेतौ साध्याभावरूपाप्रामाण्यव्यापकाभावप्रतियोगित्वज्ञानम्।

यदि तु बाधानन्तरं स्मृत्युपनीते भ्रमे वह्नित्वाभाववति वह्नित्वेन ज्ञानं मम वृत्तमित्यप्रामाण्यं मनसा परिच्छिद्यते तर्हि प्रवृत्ति-

---

व्याख्यानोक्तेर्विशेष्यक इत्युक्तम्॥

साध्याप्रसिद्धेरिति। न च प्राग्भवीयसंस्कारानुसरणाददोष इति शङ्कयम्। निरस्तत्त्वात्। आदावेवैवमनुमानसम्भवे प्रथममप्रामाण्याभावानुमानस्य व्यर्थत्वाच्चेत्यपि [3]ध्येयम्। अप्रामाण्याभावानुमानेपि व्यतिरे[4]कव्याप्त्याप्रसिध्या व्याप्त्यसिद्धिरिति भावेनाह—**किञ्चेति**। द्वितीयानुव्यवसाये[5]नाप्रामाण्यं प्रसिद्धमित्याशङ्कते—**यदित्विति**। नायं वह्निरितिबाधानन्तरमित्यर्थः—**स्मृतीति**। वह्निभ्रमानुव्यवसायजन्यस्मृतीत्यर्थः—**अप्रामाण्यमिति**। बाधरूपानुभवजन्यस्मृत्युपनीतमित्यर्थः। प्रामाण्यस्यापि पञ्चमानुव्यवसायवेद्यत्वमस्त्वित्याह—**तर्हीति**। तथा च पञ्चमानुव्यवसायमादाय साध्यप्रसिद्ध्या प्रामाण्यानुमानस्यैव प्राथमिकत्वसंभवे किं प्रामाण्याभावानुमानेनेति भावः। अभ्युपेत्य चेदमुक्तम्। वस्तुतस्तु प्रामाण्यानुमानमेवा-

---

[1] परपक्षे–मु. [2] बोध्यम्–मु-अ. [3] के–मु. [4] नुमाने–कुं.

सामर्थ्यानन्तरं स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं वह्नित्ववैशिष्ट्यविषयकत्वमेव मनसा परिच्छिद्यताम्। आदावेव वा व्यवसायगतं तदुपनीतवह्नित्ववैशिष्ट्यविषयकत्वमनुव्यवसायेनैव परिच्छिद्यताम् किमनया कुसृष्ट्या ॥

एतेन वह्नित्ववद्विशेष्यकत्वमिच्छादौ मनसा प्रसिद्धमिति निरस्तम्। तथात्वे उक्तरीत्या प्रामाण्यस्यैव मनसा परिच्छेदसम्भवात् ॥

किञ्च प्रमासमर्थप्रवृत्त्योः कार्यकारणभावो नियमगर्भः। नियमश्चानन्त्यव्यभिचाराभ्यां न

युक्तम्। पञ्चमानुव्यवसायवेद्यत्वोपगमे च प्रथमानुव्यवसायवेद्यत्वस्य सुतरामुपेयत्वस्योपपादितत्वादिति भावेनाह—**आदावेव वेति। कुसृष्ट्येति।** पूर्वमप्रामाण्याभावानुमानं पश्चात्प्रामाण्यानुमानं अप्रामाण्यप्रसिद्ध्यर्थं पञ्चमानुव्यवसायानुसरणमित्यादिरूपकुसृष्ट्येत्यर्थः।

ननु वह्नि[1]त्ववति वह्नित्वेनेच्छावानहमित्यनुव्यवसायेनेच्छोपनीतं त[2]द्वत्वमिच्छायां गृह्यते। एवं द्वेषादाविति तत्र प्रसिद्धं वह्निज्ञाने साध्यताम्। एवं च नाप्रसिद्धिरित्यत आह—**एतेनेति। उक्तरीत्येति।** बाधोद्धारग्रन्थोक्तरीत्या व्यवसायोपनीतस्येत्यर्थः।

एवमनुमेयत्वपक्षे प्रामाण्यस्याप्रामाण्यस्य चाप्रसिद्ध्युक्त्या तन्निरूपितव्याप्त्यसिद्धिमुक्त्वा हेतोः प्रमित्यसिद्धिमाह—**किञ्चेति। नियमेति।** या प्रमा सा समर्थप्रवृत्तिपूर्वभाविनीत्येवंरूपनियमेत्यर्थः—**व्यभिचा[3]राभ्यामिति।** एतत्प्रमाव्यक्त्यभावेपि व्यक्त्यन्तरेण

[1] त्वाभाववति—आ. [2] दभाववत्व—आ. [3] रेति—मु-आ-अ.

व्यक्तयोरेव । किन्तु प्रमात्वावच्छेदेनेति प्रमात्वे ज्ञाते प्रवृत्तिकारणत्वज्ञानं तेनैव च प्रमात्वज्ञानमित्यन्योन्याश्रयः ॥

न च गुणजन्यत्वाद्यवच्छेदेन नियमः । जन्य-

प्रवृत्तिदर्शनादित्यर्थः । "नियमश्च न व्यक्तयोरेव व्यभिचारादतिप्रसङ्गाच्च" । इत्युत्पत्तिप्रामाण्ये त्वयैवोक्तेरिति भावः—**अन्योन्याश्रय इति** । यदि क्वचिन्मनसा प्रामाण्यग्रहोपगमेन तत्र प्रवृत्तिकारणत्वग्रहान्नान्योन्याश्रयस्तर्हि प्रथममेव प्रामाण्यं मनसा गृह्यताम् । किमनुमानेनेति भावः । एतच्च प्रामाण्य[1]ज्ञानं प्रवृत्तिकारणमित्युपेत्योक्तम् । अप्रामाण्याभावज्ञानमेव प्रवृत्तिकारणमिति पक्षे प्रमात्वपदमप्रमात्वाभावपरं ज्ञेयम् ।

यद्वा "तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यंस्तद्वृत्ति तत्प्रकारकतामादाय सिध्यति । तृतीयप्रकाराभावेन तेन विना साध्यस्योपसंहर्तुमशक्यत्वात्" इति ग्रन्थेनाप्रामाण्याभावानुमानमेव प्रामाण्यानुमानमित्युक्तत्वात्प्रमात्वपदप्रयोगः ।

एतेन दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वादित्यपि हेतुः परास्तः । प्रथमं जनकत्वस्य दुर्ज्ञानत्वात् । दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वादित्यादिरपि दाहसमर्थविशेष्यकत्वस्यादौ दुर्ज्ञानत्व[2]स्य प्रागेवोक्तत्वान्निरस्तप्रायः । दाहसमर्थत्वेवमादिरूपेहेतूनां प्रमात्वसामान्या[3]ननुमापकत्वाच्च ।

प्रमात्वसमनियतधर्मावच्छेदेनास्तु तद्ग्रह इत्याशङ्क्य निराह—**न चेति** । आदिपदेन दोषाभावजन्यत्वादुष्टकरणजन्यत्वादिग्रहः—

---

[1] प्रमात्व–मु-अ. [2] नस्य–कुं. [3] न्यानु–मु.

तावच्छेदकस्या[1] प्रमात्वस्या[1]ज्ञाने गुणजन्यत्वस्यैव दुर्ज्ञानत्वात् ॥

किञ्च न प्रवृत्तिसामर्थ्येन प्रामाण्यानुमानम् । चन्द्रतारादिज्ञाने तदभावात् । प्रवृत्तेः प्रामाण्यज्ञानाधीनत्वेनान्योन्याश्रयाच्च। मणिप्रभायां मणिभ्रमे व्यभिचाराच्च । नापि संवादेन । ज्ञानान्तरसंवादस्य व्यभिचारात् । प्रमासंवादस्याद्याप्यसिद्धेः । विसंवादाभावस्य चानुपसञ्जातबा[2]धभ्रमेपि सत्वात् । विसंवादयोग्यत्वाभावस्य च प्रमात्वाज्ञाने दुर्ज्ञानत्वात् । गुणजन्यत्वस्य दोषाभावजन्यत्वस्य [3]दोषाजन्यत्वस्य[3] च प्रमारूपकार्यकल्पयत्वेन जन्यतावच्छेदकप्रमात्वाज्ञाने गुणजन्यत्वादेर्दुर्ज्ञानत्वेन चान्योन्याश्रयात् ॥

प्रमात्वस्येति । अनित्यज्ञाननिष्ठस्येत्यर्थः । युक्तिपादीयसुधोक्तदिशा वादावल्युक्तदिशा च प्रामाण्यानुमापकसप्तहेतूनपाकरोति—**किञ्चेति** ॥ **सामर्थ्येन** ॥ विषयलाभरूपेणेत्यर्थः । तदन्यस्यास्तु पक्षतेति वादिनं प्रत्याह—**प्रवृत्तेरिति** । **प्रामाण्यज्ञानाधीनत्वेनेति** ॥ साधितत्वात्परमतेप्यप्रामाण्य[4]ज्ञानाभावार्थमप्यपेक्षितत्वादिति भावः । मन्मते प्रवृत्तिमात्रं न प्रामाण्यज्ञानाधीनमिति वदन्तं प्रत्याह—**मणीति** । **व्यभिचारादिति** ॥ भ्रमान्तरसंवादिभ्रम इति भावः ।

ननु भवन्मतेप्यप्रामाण्यस्य परतस्त्वात्साध्याप्रसिद्धिस्तदनुमाने

---

[1] छ-क-ख-पुस्तके समस्तं पदं वर्तते. [2] घे-कुं-छ-ग-ख-क.

[3] एतन्नास्ति-मु. [4] अभावज्ञानार्थ-मु.

मन्मते तु उत्सर्गतः प्रामाण्यं गृह्णन्नपि साक्षी बाधानन्तरमुक्तरीत्या विसंवादलक्षणादपवादाद-प्रामाण्यमपि गृह्णाति। [1]उक्तं हि सुधायाम्। साक्षी अपवादकसद्भावेऽप्रामाण्यमपि गृह्णाति इति ॥

या तु विष्णुतत्वनिर्णयटीकायां "अनुमेय-मेवाप्रामण्यं" इत्युक्तिः सा साक्षिणो[2]ऽप्रामाण्य-ग्रहणे विसंवादापेक्षा नियतेत्यभिप्रेत्य। अत एव तत्रैव "न पुनर्ज्ञानग्राहकमात्रग्राह्यत्वं" इत्युक्तम्। वादावल्यां च "अप्रामाण्यस्यानुमेयत्वावसायात्"

स्यात्। तत्र जन्मान्तरीय संस्कारानुसरणस्य वा प्रथमं प्रामाण्याभा-वानुमानद्वारानुसरणस्य वा पञ्चमानुव्यवसायप्रसिद्धत्वानुसरणादेर्वा कार्यत्वे ममापि साम्यादित्यत आह—**मन्मते त्विति। उत्सर्गतः** स्वस्वभावसामर्थ्यत इत्यर्थः। स्वत एवास्तु किं विसंवादेनेत्यत आह—**उक्तरीत्येति।** "अप्रामाण्यं तु विसंवादाद्यनुसन्धाने सत्येव गृह्यते "इत्यादिना" स्वतोऽप्रामाण्यग्रहे असामर्थ्यात् इत्यादेः स्वतस्त्वा-नुमानवादे उक्तत्वात्तत्रोक्तरीत्येत्यर्थः—**उक्तं हीति।**

आद्यपादे—

प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि।
अनवस्थान्यथा हि स्यादप्रामाण्यं तथान्यतः ॥

इत्येतद्व्याख्यावसर इत्यर्थः। सुधावाक्यस्यार्थतो नुवादः—**साक्षीत्यादि। उक्तिरिति ॥** "दुष्टबुद्धीनामेवाप्रामाण्यशङ्का" इत्येतद्व्याख्यावसर इत्यर्थः। नन्वेवामिदमप्रमाणं न वेति सन्देहादिरपि

---

[1]उक्तमपि-**छ.** [2] णा-**क-ख.**

इत्युक्त्वा "न चाप्रामाण्यं क्वचिदपि निरपेक्षेण साक्षिणा निश्चितचरं" इत्युक्तम्। अप्रामाण्यशङ्कादिकं तु मानसमेव। उक्तं हि भगवत्पादैः।

"यत्क्वचिद्व्यभिचारिस्याद्दर्शनं मानसं हि तत्" इति।

"सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनम्"॥

इति च। तस्मात्प्रामाण्यस्य परतस्त्वे प्राथमिकं तज्ज्ञानमेव न सम्भवतीति। एतदप्युक्तं "अन्यथा" इत्यादिना। परतस्त्वे प्राथमिक[1] प्रामाण्यानुमितेरेवासम्भवेनेयं प्रमा इयं त्वप्रमेति व्यवस्थित्यसम्भवादित्यर्थः॥

परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः॥ ८॥

यच्चोक्तं स्वाश्रयविषयकनिश्चयावधिकतृतीय-

साक्षी किं नेत्याह—अप्रामाण्येति। उक्तं हीति। ज्ञानपादे॥

परतस्त्वे प्रथमप्रामाण्यानुमित्यसंभवः॥ ८॥

एवं स्वतस्त्वानुमानानां बाधं विपक्षेऽनवस्थाद्वयस्यानुमित्यसम्भवस्य चोक्तयाऽप्रयोजकत्वं चोद्भृत्य परोक्तानुमानविरोधनिरासाय तानि दूषयितुमनुवदति—**यच्चेति**। परोक्तस्वतस्त्वनिरुक्तिभङ्गेन संशयस्यान्यथोपपादनेन च परोक्तहेतूनामप्रयोजकत्वाद्युक्तावपि प्रबलदोषोक्त्यर्थं पुनरारम्भः।

---

[1] प्रथम-कुं-छ.

क्षण[1]वृत्तिसमानाधिकरणसंशयविषयी[2]भूतं ज्ञान-प्रामाण्यं ग्राह्यज्ञानप्रकारप्रकारकतया तद्विशेष्य-विशेष्यकतया च स्वाश्रयग्राहकयाव[3]ज्ज्ञाना-

"विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यं स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे अप्रामाण्यसंशयं विना[4] सन्दिह्यमानत्वादप्रामाण्यवत्" इति मण्युक्तावापि "विप्रतिपत्तौ यथा साध्यमुक्तं तदभाव इह साध्यं ज्ञेयं" इति पक्षधरादितदीयटीकोक्तरीत्या परिष्कारपूर्वकं तदीयप्रयोगानुवादं करोति—**स्वाश्रयेति** । किमवच्छेदेन विवादविषयइत्यज्ञानात्तदभिमतं विवादनियामकं पक्षतावच्छेदकं टीकाद्यनुक्तमपि स्वयं व्यक्तीकृतवानिति ज्ञेयम् । स्वस्य प्रामाण्यस्याश्रयो व्यवसायः । तद्विषयकनिश्चयोऽनुव्यवसायः । तदुत्पत्तिक्षणावधिको यस्तृतीयः क्षणः तद्वर्ती स्वाश्रयनिश्चयसमानाधिकरणो यः संशयः तद्विषयी[5]भूतं ज्ञानप्रामाण्यमित्यर्थः । संशयाविषये प्रामाण्ये तथा निश्चिते व्यधिकरणसंशयविषये तथा चतुर्थक्षणवर्तिसंशयविषये[6] यत्किञ्चिदवधिकतृतीयक्षणवर्तिसंशयविषये चासिद्धिरित्यतो विशेषणानि । ज्ञानप्रामाण्यांशस्याधिकस्यात्रप्रवेशान्न[7] पक्षतावच्छेदकैक्यनिमित्तं सिद्धसाधनं शङ्कयम्। अप्रामाण्येन सिद्धसाधनतानिरासाय ज्ञानप्रामाण्यमित्युक्तिः । तादृशानुमित्यादिग्राह्यत्वेन बाधनिरासाय साध्ये यावदित्युक्तिः । ज्ञानं घटज्ञानमित्यादिशब्दजन्यज्ञानाग्राह्यत्वस्य स्वतस्त्वेपि सत्वाद्ग्राह्यज्ञानप्रकार [8]इत्युक्तिः । दलद्वयकृत्यमपि प्रागेव व्यक्तम् ॥

---

[1] वर्ति-क-ग-च. [2] य-कुं-छ-ग-क. [3] ज्ञानग्राहकाग्रा-क-छ. [4] वा-कुं-अ-आ. [5] य-कुं-अ. [6] तथा-अ. [7] हेतुप-अ-आ. [8] रेत्यायु-कुं-अ-आ.

ग्राह्यम्। तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्य-समानाधिकरणज्ञानाप्रकारो वा। स्वाश्रयविषयक-निश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशय कोटित्वात्। स्वाश्रयविषयकनिश्चयसमानकालीन-सामग्रीजन्यसंशयविषयत्वात्। स्वाश्रयविषयक-किंचिन्निश्चयधर्मिकप्रामाण्यसंशयजन्यसंशयाविष-

अत्र मण्युक्तमेकं साध्यं विप्रतिपत्तावुक्तसाध्यान्तरस्याप्युपलक्षणं मत्वा दूषणसौकर्याय स्वयमाह—**तज्ज्ञानेति**। [1]तदर्थो विशेषण कृत्यं च परोक्तस्वतस्त्वनिरुक्तिभङ्गे व्यक्तम्। मतद्वयेपीश्वरज्ञानसत्वात्क्रमेणाप्रसिद्धिबाधवारणाय समानाधिकरणपदद्वयम्—**निश्चयावधिकेति**। निश्चयोत्पत्तिक्षणावधिकत्येर्थः। तेन स्वाश्रयविषयकनिश्चयस्थितिक्षणावधिकतृतीयक्षणवृत्त्यर्थसंशयकोटावर्थेव्यभिचारो न शङ्कयः॥

"स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे सन्दिह्यमानत्वात्" इति मण्युक्तहेतोस्सप्तमीबलेन सामानाधिकरण्यलाभरूपं तट्टीकोक्तमेकमर्थमुपेत्यैको हेतुरुक्तः। समानकालीनता[2]रूपमर्थान्तरं चोपेत्य हेत्वन्तरमाह—**स्वाश्रयविषयकेत्यादि**। [3]संशयविषयत्वादित्यस्य पूर्ववत्संशयकोटित्वादित्यर्थः। तेनात्र पूर्वत्र च न व्यवसाये व्यभिचारः[3]॥

स्वाश्रयनिश्चयेऽप्रामाण्यसंशयं विना[4] सन्दिह्यमानत्वात् इति मण्युक्तयाभिमतं हेतुं व्यनक्ति—**स्वाश्रयविषयककिंचिदित्यादि**। स्वाश्रयविषयकनिश्चयशब्देन यावन्निश्चयो मणिकृतो नाभिमतः।

---

[1] एतद्–कुं-अ-आ. [2] लाभ–कुं-अ-आ. [3] अयं ग्रन्थः–अ. पुस्तके नास्ति. [4] वा–कुं-अ-आ. [5] संशयविषयत्वादित्यस्य पूर्ववत्संशयकोटित्वादित्यर्थः—अ.

यत्वाच्च । अप्रामाण्यवत् ॥

यद्वा उक्तहेतुत्रयमध्ये एकं पक्षतावच्छेदकं कृत्वाऽन्यौ हेतूकर्तव्यौ ॥

यद्वा एतज्ज्ञानप्रामाण्यमेतज्ज्ञानप्रामाण्यसंशय-पूर्वकालीनैतन्निश्चयाविषयः । एतज्ज्ञानविषयकनि-श्चयावधिकेत्याद्युक्तहेतुत्रयात् । * अप्रामाण्यवत् ॥

प्रामाण्यानुमितेरपि प्रमाण्याश्रयविषयकनिश्चयत्वेन तद्धर्मिकप्रामाण्य-संशयजन्यसंशयविषयत्वेनासिद्ध्यापत्तेः । किंन्तु यत्किंचिदनुव्यव-सायरूपनिश्चय एवाभिमत इति भावेन किञ्चिन्निश्चयधर्मिकेत्यु-क्तम्—**अप्रामाण्यवदिति** । पक्षीभूतप्रामाण्यसंशयकोटीभूताप्रामाण्यव-दित्यर्थः । मतद्वयेपि तस्य परतस्त्वेन साध्यहेतू संमताविति भावः ॥

हेतुपक्षतावछेदकैकयनिबन्धनासिद्धसाधनता[1]शङ्कापि यथा न भवति तथा पक्षान्तरमाह—**यद्वेति** । **एकमिति** । आद्यं द्वितीयं वा पक्षतावच्छेदकीकृत्य द्वितीयतृतीयौ वाद्यतृतीयौ वा हेतूकर्तव्यावित्यर्थः ॥

[2]"अनभ्यासदशापन्नैतज्ज्ञानप्रामाण्यं" इत्यादिना मण्युक्तं पक्षान्तरं चाह—**यद्वैतज्ज्ञानप्रामाण्यमिति** । वस्तुतो यदनुव्यव-सायानन्तरं तृतीयक्षणे संशयविषयीभूतं प्रामाण्यं तद्व्यक्तेरवैतत्पदेन ग्रहणम् । अतो नासिद्धिर्हेतूनामिति भावः । बाधवारणाय कालीने-त्यन्तम्—**पूर्वेति** । अव्यवहितपूर्वकालीनेत्यर्थः । एतज्ज्ञाननिश्चया-नन्तरं सन्दिह्यमानत्वादित्युक्तहेतुमुपलक्षणं मत्वाह—**हेतुत्रयादिति** ।

एवं स्वतस्त्ववादिमात्रसाधारणं वा गुरुभिन्नस्वतस्त्ववादिमात्र-

---

* एतावत् नास्ति-**छ**. [1] नशं-**कुं**. [2] यद्वा अन-**अ**.

विमतं व्यवसायप्रामाण्यं [1]न तदनुव्यवसाय-वेद्यम्। तदवधिकतृतीयेत्याद्युक्तहेतुत्रयात्* अप्रा-माण्यवदिति विशिष्य प्रयोक्तव्यम्। तस्मादनुमान-विरुद्धानि स्वतस्त्वानुमानानि ॥

अत्र साध्यविशेषणप्रयोजनं स्वतस्त्वनिरुक्ता-वुक्तप्रायम्। आद्य[2]हेतौ रजतत्वादिरूपेऽर्थेपि किंचिदवधिकतृतीयक्षण[3]वृत्तिसंशयविषयत्वस्य, तथा स्वाश्रयनिश्चयावधिकचतुर्थलक्षणवृत्तिसंशय-विषयत्वस्य, तथा चैत्रीयस्वाश्रयनिश्चयावधिक-तृतीयक्षणवृत्तिमैत्रीयसंशयविषयत्वस्य च सत्वा-

साधारणं वा द्वेधा प्रयोगं मण्यभिमतं प्रदर्श्य अनभ्यासदशापन्नज्ञान-प्रामाण्यं न स्वाश्रयग्राह्यमिति गुरुमतासाधारण्येन प्रयोगोक्तिमुपलक्षण-[4]मभिप्रेत्य सिद्धान्तविरोधिप्रयोगान्तरमाह—**विमतमिति**। यद्वेत्यनु-षङ्गः। उक्तरूपसंशयविषयीभूतप्रामाण्यस्यैव व्यवसायप्रामाण्यपदेन ग्रहण-मिति द्योतनाय विमतमित्युक्तिः—**तस्मादिति** ॥ उक्तरीत्या प्रयोग-सम्भवादित्यर्थः—**स्वतस्त्वेति** ॥ सामान्यतः प्रागुक्तस्वतस्त्वसाधका-नुमानानीत्यर्थः। न तु संशयानवतारस्थलीयपक्षकानुमानानि। मण्या-द्युक्तानां संशयस्थलीयपक्षकाणां भिन्नविषयतया विरोधाभावात्। यद्वा संशयस्थले तथात्वसिद्धावन्यत्रापि तथात्वमेव कल्पयम्। न वैरूप्य-मित्याशयेन सर्वानुमानानीत्यर्थः।

दूषणसुज्ञानतायै पदकृत्यं विवेचयति—**अत्र साध्येत्यादिना। स्वतस्त्वनिरुक्ताविति** ॥ परोक्तस्वतस्त्वनिरुक्तिभङ्गप्रस्ताव इत्यर्थः

---

[1] नैत-क. [2] द्वे-कुं-ग. [3] जन्य-ग. [4] मुपे-कुं-अ.

त्तत्र व्यभिचारः । [1]तद्वारणाय क्रमेण स्वाश्रय-निश्चयावधिकत्वेन तृतीयक्षण[2]वृत्तित्वेन समानाधिकरणत्वेन च संशयो विशेषितः ॥

प्रथमं व्यवसायः, अनन्तरं ज्ञानत्वनिर्विकल्पकं विना ज्ञानांशे निर्विकल्पस्य घटांशे सविकल्पकस्य नरसिंहाकारस्य धर्मिज्ञानरूपस्यानुव्यवसायस्योत्पत्तिः, अनन्तरं द्वितीये [3]तदनुव्यवसायस्य स्थितिक्षणे कोटिस्मरणं, अनन्तरं तृतीयक्षणे

आद्ये पूर्वदलद्वयेन तव घटत्वप्रकारकं ज्ञानं तव घटत्ववद्विशेष्यकं ज्ञानमितिशाब्दज्ञानयोः सिद्धसाधननिरासः । यावदित्युक्त्या न्यायमते पञ्चमानुव्यवसायादौ बाधनिरासः फलम् । द्वितीये आद्येन ज्ञानपदेन तत्पदस्य प्रामाण्यपरामर्शितापत्त्या बाधनिरासः, द्वितीयेन तु व्यापारानुबन्धितया तादृशात्मादिनाऽप्रसिद्धिनिरासः फलम् । तृतीयेनापि व्यापारानुबन्धितयात्मादिग्राह्यतया बाधनिरासः फलम् । समानाधिकरणपदद्वयेन [4]तादृशेश्वरज्ञानग्राह्यतया तदग्राह्यत्वाभावाद्बाधनिरासः फलमुक्तप्रायमित्यर्थः ।

उक्तार्थपरिज्ञानाय पक्षधराद्युक्ततदीयप्रक्रियामाह—**प्रथममिति**। **निर्विकल्पकस्येति** । ज्ञानत्ववैशिष्ट्यविषयकस्येत्यर्थः । **सविकल्पकस्येति** । घटत्वप्रकारकत्वपुरोवृत्तिविशेष्यकत्वविषयकस्येत्यर्थः । संशयहेतुत्वोपपादनायैवमुक्तिः । घटांशेपि निर्विकल्पकस्य तदयोगात्—**कोटीति**। कोटिद्वयस्मरणं समूहालम्बनरूपमित्यर्थः । साधारणधर्मदर्शन-

[1] रात्त-कुं. [2] वर्तित्वेन-कुं. [3] येऽनु-क-ख-ग-च-छ. [4] नातादृ-मु-अ, येता-आ.

प्रामाण्यसंदेहः, तदनन्तरं चतुर्थक्षणेऽर्थसंदेह इति स्थितिः ॥

द्वितीयहेतावपि तृतीये प्रमाण्यसंदेहक्षणेऽनुव्यवसायनाशात्प्रामाण्यसंशयघटिता याऽर्थसंदेहसामग्री तस्या [1]अनुव्यवसायसमकालीनत्वं नास्तीति नार्थे व्यभिचारः। न तु स्वाश्रयविषयकनिश्चयसमानकालीनसंशयविषयत्वं हेतुः। प्रामाण्यसंशयोत्पत्तिक्षणेऽ[2]नुव्यवसायस्य नाशेनासिद्धेः।

तृतीयहेतावपि घटविषयकनिश्चयधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वं पटेप्यस्तीत्यर्थे व्यभिचारः। तद्वारणाय [3]ग्राह्यप्रामाण्याश्रयविषय-

---

रूपधर्मिज्ञानस्योभयकोटिसाधारण्यादिति भावः—**अर्थेति**। इदं रजतं न वेत्येवं रूपेणार्थसन्देह इत्यर्थः। अर्थघटितपूर्वभाविप्रामाण्यसन्देहस्यैव कोटिस्मृतिरूपत्वाच्चतुर्थक्षणेऽर्थसन्देह इति भावः ॥

प्रामाण्यसंशयघटितेति। कोटिस्मृतिरूपत्वात्तस्य तद्घटिता [1]मनस्संयोगादिरूपा या सामग्रीत्यर्थः। सामग्रीजन्येति विशेषणं व्यर्थं एवं च नार्थे नैकान्त्यमित्याशङ्क्य तत्सार्थक्यं वक्तुमाह—**नत्विति**। द्वितीयहेतुर्मणिकृदभिमतएवोत्प्रेक्षितो न साक्षादुक्त इति एवमेव तस्याभिमतिः [5]किं सामग्रीपदप्रक्षेपेणेत्यतोऽसिद्धिरूपबाधकोपदर्शनमेतत्कृतम्। असिद्धिवारकत्वेपि यथोक्तविशेषणाविशेष्यभावेन वैयर्थ्यमिति भावः—**पटेपीति**। पटज्ञानस्यापि ग्राह्यप्रामाण्याश्रयतया

---

[1] म-कुं. [2] तदनु-कुं. [3] ग्राह्यपदं न-क. [4] तात्म-मु-अ-आ. [5] कुतोन। इत्यधिकं-अ-आ.

कत्वेन निश्चयो विशेषितः। तथापि व्यवसाय-प्रामाण्यस्य स्वाश्रयविषयिका या [1]प्रामाण्यानुमितिस्तद्धर्मिकप्रामाण्यसंशयजन्यसंशयविषयत्वादसिद्धिः। तद्वारणाय किञ्चिदिति विशेषणम्। एवं च नासिद्धिः। [2]अनुमितिप्रामाण्यसंशयेन व्यवसायप्रामाण्यसंशयेप्यनुव्यवसाय[2]प्रामाण्यसंशयेन तत्संशयाभावात्। न तु प्रामाण्यसंशयाजन्यसंशयविषयत्वं हेतुः। अर्थस्यापि तदजन्यसंशयं प्रत्यपि विषयत्वेन व्यभिचारात्। अत्र सर्वत्र विपक्षे हेतूच्छित्तिरेव बाधिका। स्वतस्त्वपक्षेऽनुव्यवसायस्यैव प्रामाण्यनिश्चयरूपत्वात् द्वितीये तत्स्थितिक्षणे तदभावघटिता या संशयसामग्री तदभावेन तृतीयक्षणे प्रामाण्यसंशयानुपपत्तेः॥

तद्ग्राहकानुव्यवसायग्राह्यत्वेन साध्याभावादिति भावः—**विशेषित इति**। तथा च तस्याप्यनुव्यवसायग्राह्यतया तद्धर्मिकप्रामाण्यसंशयजन्यसंशययोग्यत्वेन हेत्वभावान्न व्यभिचार इति भावः—**नासिद्धिरिति**। अखण्डाभावत्वान्नासिद्धिवारकत्वं दोष[3] इति भावः—**अनुव्यवसायेति**। तस्य प्रामाण्यनियमेन कदापि तत्र[4] सन्देहाभावादिति भावः। हेतूच्छित्तिं व्यनक्ति—**स्वतस्त्वेत्यादिना। प्रामाण्यनिश्चयेति**। तथा च विशेषदर्शने कथं सन्देह इति भावः—**तदभावेति**। प्रामाण्यनिश्चयरूपविशेषदर्शनाभावेत्यर्थः॥

---

[1] प्रामाण्यपदं न–**कुं-क-ख-ग-छ.** [2] अनुमितिप्रामाण्यसंशयेनेवानुव्यवसाय–**ग.** [3] दूषणं–**आ** [4] प्रामाण्यसं–**मु,अ-आ.**

अतएव द्वितीये प्रामाण्यनिश्चयस्थितिक्षणे तदभावघटितसंशयसामग्र्यभावेन प्रामाण्यस्य स्वाश्रयनिश्चयसमानकालीनसामग्रीजन्यसंशयविषयत्वायोगात्। अनुव्यवसायस्य प्रामाण्यग्राहकत्वे ग्राहकप्रामाण्यसन्देहे ग्राह्यसन्देहनियमेन व्यवसायप्रामाण्यानुमितेः[1] प्रामाण्यसन्देहेनेवानुव्यवसाय[2]प्रामाण्यसन्देहेनापि कदाचिद्व्यवसायप्रामाण्यसन्देहापातात्। न चेष्टापत्तिः। अनुव्यवसायस्य प्रामाण्यनियमादिति ॥

उच्यते।

आद्ये साध्येऽपसिद्धान्तो बाधो व्याघातश्च।

अत एव। प्रामाण्यनिश्चयस्य तन्निश्चयत्वादेवेत्यर्थः। द्वितीय इत्यस्य विवरणं स्थितिक्षण इति। तृतीये हेतूच्छित्तिं व्यनक्ति—**अनुव्यवसायस्येति ॥**

प्रतिज्ञादोषांस्तावदाह—**आद्ये साध्य** इत्यादिना ॥ उक्तरूपेण स्वाश्रयग्राहकत्वस्य प्रामाण्यग्राहकत्वरूपतया तादृशेनानुमित्यादिना ग्राह्यत्वस्य परमतेपि सिद्धत्वात्तदभावसाधनेऽपसिद्धान्तः। प्रामाण्यग्राहकेण प्रामाण्यं न ग्राह्यमित्युक्ते बाधो व्याघातश्च स्फुट एव। स्वातन्त्र्येणेत्युक्तावपि बाधोद्धारग्रन्थोक्तरीत्या बाध एव। उक्तरूपसाध्यस्यार्थेपि सत्वेन व्यभिचाराप्रसक्त्या तद्वारकहेतुविशेषणवैयर्थ्याच्चेति भावः ॥ **अंश इति** ॥ सर्वं ज्ञानं गुण इति शब्द जन्यज्ञानप्रामाण्यांश इत्यर्थः। तत्पक्षीकरणस्यापि प्रागुक्तत्वादिति

---

[1] तिप्रा–कुं. [2] स्य–क-ख-छ.

द्वितीयेंऽशे सिद्धसाधनम्। उपपादितं चैतत्परोक्त-स्वतस्त्व[1]निरुक्तिभङ्गे ॥

किञ्च साध्ये स्वशब्दः किं पक्षीकृतप्रामाण्यमात्र[2]परः? किं वा समभिव्याहृतपरः। नाद्यः। अप्रामाण्यस्याप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूप-प्रामाण्याश्रयग्राहकेण ज्ञानेन ग्राह्यतया तद्-ग्राह्यत्वरूपसाध्यस्याप्रामाण्यरूपे दृष्टान्तेऽभावात्। नान्त्यः। घटरूपेऽर्थे व्यभिचाराप्रसक्त्या हेतौ[3] तृतीयपदस्य व्यर्थत्वात्।

अस्मिन्पक्षे हि समभिव्याहृतो घट एव

भावः। अत एवाह—**उपपादितं चैतदिति**। बाधव्याघातयोः कण्ठतोऽनुक्तावपि उपपादितप्रायत्वादुपपादितमित्युक्तम्॥

दृष्टान्तहेतुदोषौ पक्षभेदेनाह — **किञ्चेति**। **अप्रामाण्यस्येति**। शुक्तौ रूप्यत्वभ्रमानन्तरं बाधावतारादिदं ज्ञानमप्रमेत्यनुव्यवसाये यदप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपं प्रामाण्यं तस्यापि पक्षत्वेन तत्प्रामाण्याश्रयग्राहकेण तद्घटकीभूताप्रामाण्यस्य ग्राह्यतया तत्र साध्यवैकल्यमित्यर्थः। अप्रामाण्यवादित्यत्र[4] पक्षीभूतप्रामाण्य-संशयकोटिभूताप्रामाण्यवदित्यर्थस्य तट्टीकोक्तावपि तादृशप्रामाण्यघटकस्यापि तथात्वादिति भावः। व्यभिचाराप्रसक्तिं व्यनक्ति। **अस्मिन्पक्ष इति**

---

[1] परतस्त्व इत्यधिकं—कुं-क-ग-छ. [2] मात्रपदं न—कुं ग. [3] हेताविति न—कुं-क-ख-ग-छ. [4] स्य—मु-अ-आ.

स्वशब्दार्थः। घटे च घटाश्रयी[1]भूतकपालग्राहकयावज्ज्ञानाग्राह्यत्वरूपं साध्यमस्त्येवेति कथं तत्र व्यभिचारप्रसक्तिः।

किञ्चैतैरनुमानैः प्रामाण्यस्य किं साक्षिग्रहणयोग्यत्वाभावः साध्यते [2]निश्चयरूपफलाभावो वा। नाद्यः धर्म्यंश इव वैशिष्ट्यांशेपि त्वन्मते व्यवसायोपनीतत्वरूपा मन्मते व्यवसायोपनीते तस्मिन्साक्षिणः सहजशक्तिरूपा योग्यतास्तीत्युक्तत्वेन बाधात्। संशयस्य निश्चयरूपफलाभावेनैवोपपत्त्या योग्यत्वाभावसाधनेऽप्रयोजकत्वाच्च। अन्त्येऽपि फलाभावसाधनं किं दोषशङ्कादिरूपेण प्रमाण्यविरोध्युपस्था-

---

ननु ग्राह्यज्ञानप्रकारेत्यत्र ग्राह्यज्ञानशब्दस्यापि स्वाश्रयपरतया घटाश्रयकपालस्य निष्प्रकारतया घटाश्रयप्रकारप्रकारतया तद्विशेष्यावशेष्यकतया घटाश्रयग्राहकयावज्ज्ञानमप्रसिद्धमिति चेन्न। तादृशज्ञानाप्रसिद्धेरेव तद्ग्राह्यत्वं नेति तदभावरूपसाध्यसत्वात्। अत एव "साध्यमस्त्येव" इत्युक्तम्।

यद्वा[3] कपालविषयतादृशज्ञानाप्रसिद्धेरेव तद्विषयत्वरूपफलाभावो घटे न सिद्धः। येन तत्र व्यभिचारप्रसक्तिर्न स्यादित्य[4]रुचेराह—**किञ्चेति**। धर्म्यंश इत्युपलक्षणम्। धर्मधर्म्यंशयोरित्यर्थः—**अस्मिन्निति**। वैशिष्ट्यांशविषय इत्यर्थः — **उक्तत्वेनेति** ॥ बाधोद्धारग्रन्थे —

---

[1] यभू-कुं-क-ग-ख. [2] उत-ख. [3] ननु-आ. [4] त्यत आह-अ.

पकसामग्रीसमवधानेनाप्रतिबन्धदशायामुत प्रतिबन्धदशायाम्। नाद्यः। तदा प्रामाण्ये[1]संशयाभावेनाश्रयासिद्धेः। स्वरूपासिद्धेश्च। नान्त्यः। इष्टापत्तेः।

न च फलाभावेनैव योग्यत्वाभावसिध्यति। बाधस्योक्तत्वात्। वह्नौ दाहशक्तेरिव साक्षिणि प्रामाण्यग्रहण[2]शक्तेः सहजत्वेपि मण्यादिप्रतिबन्धेनादाहस्येव दोषशङ्कादिप्रतिबन्धेन प्रामाण्याग्रहणस्योपपत्तेश्च। उक्तं हि टीकाकारैः। "न हि गोक्षुरकापसर्पणसापेक्षत्वेन गजस्य गमनशक्तिः परतन्त्रा" इति।

अप्रतिबन्धेति। साध्ये संशयवेलायामग्राह्यमित्यनुक्तेर्विकल्पद्वयावकाश इति भावः—इष्टापत्तेरिति। अप्रतिबद्धसाक्षिवेद्यत्वस्य साक्षियोग्यत्वस्य वा स्वतस्त्वस्यास्मदभिमतस्यानपायादिति भावः॥

ननु फलाभावेन योग्यत्वाभावानुमानात्स्वतस्त्वहानिरेवेत्यत आह—न चेति। बाधस्योक्तत्वादिति। त्वन्मत इत्यादिनेत्यर्थः। शक्तिरूपयोग्यत्वसत्वे तदग्रहोऽयुक्त इत्यत आह—वह्नाविति। प्रतिबन्धाभावसापेक्षत्वे कथं न स्वतस्त्वहानिरित्यत आह—उक्तं हीति। वादावल्यामित्यर्थः।

ननु मण्युक्तहेतूनां स्वोक्तहेतुप्रतिपक्षत्वेनात्रोपन्यासादुपाधेः प्रतिपक्षोन्नायकत्वपक्षे प्रतिपक्षे प्रतिपक्षान्तरवदुपाध्युद्भावनं व्यर्थमि-

---

[1] ण्य-ग. [2] णस्योपपत्तेश्च—इत्येतावदेववर्तते—क.

किञ्चोक्तेनानवस्थारूपेण प्रथमस्य प्रामाण्यग्रहणस्यानुपपत्तिरूपेण च तर्केण पराहतिः। अपि चोपाधेर्व्यभिचारोन्नायकत्वपक्षेऽनुव्यवसायविषयत्वयोग्यतारहितोपाधिघटितत्वमुपाधिः। तदग्राह्योपाधिघटितत्वं च तदग्राह्यत्वं विनाऽनुपपन्नम्। प्रत्यक्षाग्राह्यगुरुत्वघटितगुरुत्ववत्त्वादौ तथा दर्शनात्। [1]त्वदीयो हेतुस्तु तद्ग्राह्यत्वेपि ग्रहणरूपफलाभावेनैवोपपन्न इत्युपाधिस्साध्यव्यापकः।

त्यतो मणिकृन्मतावष्टम्भेनाह—**उपाधेर्व्यभिचारेत्यादि**।

धर्मधर्मिवद्वैशिष्ट्यांशेपि योग्यताया उपपादितत्वेनानुव्यवसाययोग्यतारहितोपाधिघटितत्वं पक्षीभूतप्रामाण्ये साधनवति नेति साधनाव्यापकत्वं स्पष्टम्। साध्यव्यापकत्वं कथमित्यतः साध्यं प्रति प्रयोजकत्वमस्य व्यनक्ति—**तद्ग्राह्येति**। पूर्वोक्तोपाधेर्निष्कृष्यानुवादोयम्।

हेतोरप्रयोजकत्वमाह—**त्वदीय**[2] **इति**। तद्ग्राह्यत्वेपि—तद्ग्रहणयोग्यत्वेपीत्यर्थः। एवं चोपाधिहेत्वोरनुकूलतर्कभावाभावोक्तया—

अनुकूलेन तर्केण सनाथे सति साधने।
साध्यव्यापकताभङ्गात्पक्षे नोपाधिसम्भवः॥

इत्यस्यानवकाश इति भावेनाह—**साध्यव्यापक इति**।

साक्षिणो ज्ञानगोचरस्य ज्ञानत्वांशेपि सविकल्पकत्वात्तत्सि-

---

[1] द्वितीयो-कुं-ख. [2] द्वितीय-कुं.

किञ्चानुव्यवसायस्य नरसिंहाकारत्वे घटविषयकं प्रमाणं न वेत्येव संशयः स्यात्। न तु घटविषयकं ज्ञानं प्रमाणं न वेति। ज्ञानत्वस्य धर्मितावच्छेदकत्वेनाज्ञानात्।

किञ्चाद्ये हेतौ संशयस्य तृतीयक्षणवृत्तित्वमसिद्धम्। असर्वज्ञेनातीन्द्रियातिसूक्ष्मक्षणेयत्ताया निश्चेतुमशक्यत्वेन स्वाश्रयनिश्चयावधिकतृतीयक्षण एव संशयो न तु चतुर्थादाविति निर्णेतुमशक्यत्वात्।

यदि त्वनुव्यवसायस्य प्रामाण्यनिश्चयरूपत्वाभावाद्द्वितीयक्षणे तन्निश्चयाभावविशिष्टकोटिस्मरणरूपसंशयसामग्र्याः सत्वेन संशयस्य तृतीयक्षणवर्तित्वकल्पनं तर्हि संशयस्य तृतीयक्षणवृत्तित्वेनानुव्यवसायस्य प्रामाण्यनिश्चयरूप[1]त्वाभावरूपं परतस्त्वं त्वया साध्यत इत्य-

---

द्धयर्थं परोक्तं निराह—किञ्चेति। अज्ञानादिति। एवं च तदर्थं ज्ञानत्वविशिष्टज्ञानान्तराङ्गीकारे च स्वाश्रयनिश्चयावधिकतृतीयक्षणवृत्तित्वमसिद्धमिति भावः।

ननु निश्चयपदेन सविकल्पक एव विवक्ष्यत इयत आह—किञ्चेति। [2]हेतुत्रयसाधारणदोषानुक्त्वा प्रातिस्विकरूपेणापि दोषमाह—किञ्चाद्य इति। असिद्धमिति। सन्दिग्धासिद्धमित्यर्थः। अन्यो-

---

[1] रूपपदं न-कुं-ग-ख-छ. [2] यद्वा एवं-मु-अ-आ.

न्योन्याश्रयः ।

न च चतुर्थादिक्षणवृत्तिनापि संशयेन परतस्त्वसिद्धिः । द्वितीयक्षणोत्पन्नेन कोटिस्मरणेन प्रामाण्यनिश्चयरूपप्रतिबन्धकवशात्तृतीयक्षणे संशयानुत्पादेपि तृतीयक्षणोत्पन्नेन प्रतिबन्धकध्वंसेन विशिष्टं तत्क्षणे[1] तिष्ठद्यत्संशयसामग्रीरूपं कोटिस्मरणं तेन चतुर्थक्षणे संशयोत्पादनसम्भवात् ।

न्याश्रय इति । सिद्धे चानुव्यवसायस्य प्रामाण्यनिश्चयत्वाभावे संशयस्य तृतीयक्षणवृत्तित्वासिद्धिः । तत्सिद्धौ च तत्सिद्धिरित्यर्थः ।

ननु मास्तु हेतुनिश्चयः चतुर्थादिक्षणवृत्तिसंशयविषयत्वेनाप्युक्तसाध्यसिद्धिरस्त्वित्यतः प्रथमक्षणे धर्मिज्ञानरूपानुव्यवसायेन प्रामाण्ये निश्चितेपि चतुर्थक्षणादौ तत्र संशयो नानुपपन्न इत्यप्रयोजको हेतु रित्याह—**न चेत्यादिना । द्वितीयेति** । अनुव्यवसायस्थितिक्षणोत्पन्नेनेत्यर्थः—**प्रामाण्यनिश्चयरूपेति** । पूर्वतनधर्मिज्ञानाख्यप्रामाण्यनिश्चयरूपेत्यर्थः—**तत्क्षण इति** । [2]तृतीयक्षण इत्यर्थः । **सामग्रीरूपमिति** । तदा तन्मते धर्मिज्ञानस्य नाशेपि तस्य कोटिस्मरण एवोपयोगेन तदभावस्यादोषत्वात् । तस्य नाशेपि स्मृत्युपनीते तस्मिन् ज्ञानं प्रमाणं न वेति संशयोपपत्तेश्च ।

न च तस्य प्रामाणत्वेनैव स्मृत्योपनयः तथैव प्रागनुभवादिति वाच्यम् । दोषेण प्रामाण्यांशप्रतिबन्धसम्भवात् । वस्तुतस्तु

---

[1] णवृत्ति—ख. [2] चतुर्थ—अ.

द्वितीयहेतावप्यनुव्यवसायस्य प्रामाण्याविषयकत्वे सिद्धे द्वितीयेऽनुव्यवसायस्य[1] स्थितिक्षणे प्रामाण्यनिश्चयाभाव[2]विशिष्टकोटिस्मरणरूपसंशयसामग्र्याः सत्वेन तस्या[3] अनुव्यवसायरूपनिश्चयसमानकालीनत्वसिद्धिः। सिद्धे च तस्मिन्नुक्तरूपसामग्रीजन्यसंशयविषयत्वेन प्रामाण्यस्यानुव्यवसायाविषयत्वसिद्धिरित्यन्योन्याश्रयः।

एवं तृतीयहेतावप्यनुव्यवसायस्य प्रामाण्यनियमे सिद्धे किं प्रमैव प्रमात्वेन गृहीता अप्रमैव वेति संशयस्य प्रामाण्यानुमितिधर्मिकत्वमेव

मन्मते दोषस्थले व्यवसायस्य साक्षिवेद्यत्वात्तत्[4]प्रामाण्यस्य च मानसत्वात्तन्मात्रोपनयो न विरुद्ध इति भावः।

द्वितीयहेतावपीति। स्वाश्रयनिश्चयसमानकालीनत्वं संशयसामग्र्यामसिद्धमिति योज्यम्।

ननु धर्मिनिश्चयरूपानुव्यवसायस्य प्रामाण्याविषयकत्वादेव विशेषादर्शनविशिष्टा कोटिस्मरणादिसामग्री तत्कालीनेति ज्ञायत इत्यतो दुर्ज्ञानमेतदित्याह—**अनुव्यवसायस्येत्यादिना**। द्वितीय इत्यस्यार्थोऽनुव्यवसायस्य स्थितिक्षण इति।

तृतीयहेतावपीति। अनुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वं दुर्ज्ञानमिति योज्यम्। अनुव्यवसायस्य प्रामाण्यनियमादेव तत्सुज्ञानमित्यत आह—**अनुव्यवसायस्येति**।

---

[1] यस्थि—क-ख-छ. [2] रूपप्रतिबन्धकाभाव—कुं-ग. [3] तस्यानिश्चय—क-ख-छ. [4] दप्रा—कुं.

न त्वनुव्यवसायधर्मिकत्वमित्यस्यार्थस्य सिद्ध्या व्यवसायप्रामाण्या [1]नुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वासिद्धिः सिद्धे [2]तस्मिन्ननुव्यवसायस्य प्रामाण्यनियमासिद्धिरित्यन्योन्याश्रय एव।

एतेन प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्। परतस्त्वं च यत्प्रतिवादिना निषिध्यते तदेव [3]साध्यते। अत्र च

सिद्धे च तस्मिन्निति। व्यवसायप्रामाण्यस्येत्यादिपरामर्शः। सिद्धान्तेपि संशयादिस्थलीयप्रामाण्यानुव्यवसायस्य [4]प्रमात्वानियमादिति भावः।

एवं मण्युक्तानुमानानि निरस्य द्वितीयस्तबके कुसुमाजलावुदयनोक्तं सुधायामाशङ्कितमनुमानं च निराह—**एतेनेति**। निरस्तमित्यन्वयः। ननु परत्वस्यान्यत्वरूपस्य केवलान्वयित्वेन स्वतस्त्वेप्युपपत्याऽर्थान्तरमित्यतस्तत्परिष्करोति—**परतस्त्वं चेति**। तत्प्रकारप्रकारेत्यादिना प्रागुक्तरूपज्ञान[5]ग्राह्यत्वं निषिध्यत इति तदेवेत्यर्थः। तथा च "स्वग्राह्यत्वेपि कदाचित्परग्राह्यत्वात्स्वस्याप्यन्यापेक्षया परत्वात्" इत्यादिमण्युक्तखण्डनानवकाश इति भावः—**अत्र चेति**।

ननु "अनभ्यासदशायामिति भागासिद्धिवारणार्थं" इति वर्धमानोक्तेः कथं भागासिद्धिशङ्केति चेन्न। प्रामाण्यमात्रस्य पक्षत्वेन सांशयिकत्वादित्युक्तौ क्वचिदसिद्धेरनभ्यासदशायामित्युक्ता[6]वभ्यासदशोत्पन्न[7]

---

[1] ण्यस्यानु—ख-छ-च. [2] तु-मु-च-ग. [3] 'साध्यते' इति न-कुं-ग-छ. [4] स्याप्रमात्वादि नि—अ. [5] ज्ञानग्रा-मु. [6] क्ता-अ. [7] ने—अ.

भागासिद्धिर्न दोषः । उद्देश्यस्य पक्षतावच्छेदकधर्मसमानाधिकरणसाध्यप्रतीतिरूपस्य फलस्य तत्समानाधिकरणसाधनप्रतीतिरूपस्य [1]करणस्य चाविघातात् । यत्र [2] सर्वत्र पक्षे साध्यप्रतीतिरुद्देश्या तत्रैव सा दोषः । अत्र च न काचन कुसृष्टिः । नापि सामान्यविप्रतिपत्त्यनानुगुण्यमिति निरस्तम् । बाधाप्रयोजकत्वाद्युक्तदोषात् ।

ज्ञानप्रामाण्ये पक्षैकदेशेऽनभ्यासोत्पन्नेपि सर्वत्र सन्देहाभावेन भागासिद्धिशङ्कायां प्राचीनमताभिप्रेतादोषत्वोक्तिरिति ज्ञेयम् ।

उद्देश्यस्येति । यथा भोगायतनत्वादिरूपा[3] व्यग्रशरीरादिलक्षणेनापि केवलव्यतिरेकिणेतरभेदादिसाधनम् अन्यथा तन्न स्यात् । तथेहापि यावति हेतुरस्ति तावति पक्षे पक्षताच्छेदकसामानाधिकरण्येन साध्यसिद्धिसम्भवात् । तावत एवोद्देश्यत्वात् । उद्देश्यसिद्धिफलकत्वादनुमानस्येत्यर्थः । तर्हि [4]स दोष एव न स्यादित्यत आह— **यत्र त्विति** । तथा च मणौ यदनभ्यासेति विशेषणमुदयनोक्तहेतुविशेषणं भङ्क्त्वा पक्षविशेषणं कृतं तदसिद्धिवारकं व्यर्थमित्युपेत्येति ज्ञेयम् ।

मण्युक्तपक्षापेक्षयात्र गुणविशेषमाह—**अत्र चेति** । प्राचीनोक्तानुमानपक्षे पक्षतावच्छेदकनिर्वचनक्लेशो वा हेतुपक्षतावच्छेदकैक्यनिबन्धनः सिद्धसाधनता क्लेशो वा नरसिंहाकारज्ञानहेतुविशेषणदुर्ज्ञानत्व-

---

[1] का—कुं-ग. [2] तु-कुं-ग-छ. [3] व्याप्त—मु-अ-आ. [4] सा—मु.

एतेनैव प्रामाण्यं परतो ज्ञायते। प्रामाण्याप्रामाण्यान्यतरमात्रकोटिकसंशय[1]विषयत्वादप्रामाण्यवदित्याद्यपि निरस्तम्।

तस्माज्ज्ञप्तावुत्पत्तौ च प्रामाण्यं स्वत एवेति।

---

[2]क्लेशो वा नेत्यर्थः। अप्रयोजकत्वादीत्यादिपदेन प्रतिकूलतर्कपराहतिसोपाधिकत्वादिग्रहः। सुधोक्तदिशा स्वतः प्रमाणत्वेनाङ्गीकृतधर्मिज्ञानानुमितिप्रामाण्ये व्यभिचारस्य च ग्रहः—**एतेनैवेति**। बाधादिनैवेत्यर्थः। दृष्टान्तघटनाय हेतावप्रामाण्यपदम्। अन्यतरशब्द उभयपरः। प्रामाण्याप्रामाण्योभयमात्रकोटिकेत्यर्थः। संशयविषये घ[3]टाद्यर्थे व्यभिचारनिरासाय प्रामाण्याप्रामाण्यान्यतरकोटिकेत्युक्तिः। इदं ज्ञानं [4]गुणो न वा प्रमाणमप्राणं वेति तदङ्गीकृतचतुष्कोटिकसंशयविषयज्ञान [5]गुणत्वे व्यभिचारनिरासाय मात्रेत्युक्तिः। [6]यदि च विषयत्वादित्यस्य कोटित्वादित्यर्थस्तदा गुणत्वे व्यभिचारवारणाय मात्रपदमिति ज्ञेयम्[6]। आदिपदेन प्रामाण्यं परतो ज्ञायते स्वतोऽग्राह्यत्वे सति ग्राह्यत्वादित्यादेर्ग्रहः।

उपपादितज्ञप्तिस्वतस्त्वेनैवोत्पत्तावपि तत्सिद्धप्रायमिति भावेनोत्तरवादोपक्षेपणायोक्तमुपसंहरति—**तस्मादिति**। स्वतस्त्वे साधक [7]भावाद्बाधकाभावात्परतस्त्वपक्षे तदुभयाभावादित्यर्थः। उत्पत्तौ स्वतस्त्वं च सुधोक्तदिशा ज्ञानजनकमात्राधीनजन्मत्वमिति स्पष्टमिति भावः।

---

[1] कोटित्वात्—कुं-ग-च-छ. [2] क्लेशादिः—मु-अ. त्वादिक्लेः—आ-मु. [3] टत्वा—मु-अ-आ. [4] गुणपदं नास्ति—अ-आ. [5] गुण इति न—मु-अ. [6] अयं-ग्रन्थः नास्ति—कुं-अ. [7] का—मु-अ-आ.

एतदप्युक्तं "अन्यथा" इत्यादिना। फलाभावमात्रेण स्वरूपयोग्यत्वाभावसाधने लोकसिद्धसर्वव्यवस्थायोगादित्यर्थः॥

ज्ञप्तौ परतस्त्वानुमानभङ्गः॥ ९॥

ननु कथमेतत् अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात्। अप्र-

---

एतदपीति। निश्चयरूपफलाभावे योग्यत्वाभावो नेत्येतदपीत्यर्थः—**लोकेति**। प्रतिबन्धकस्थलीयदाहाद्यभावेपि वह्न्यादेस्तच्छक्तास्तीति लोकसिद्धव्यवस्थेत्यर्थः।

ज्ञप्तौ परतस्त्वानुमानभङ्गः॥ ९॥

एतदिति। उत्पत्तौ च प्रामाण्यं खत एवेत्येतदित्यर्थः। कुत इत्यतः कुसुमाञ्जल्युक्तेन तत्त्वनिर्णयटीकाद्याशङ्कितेनानुमानेन विरोधं मानाभावं च हेतुद्वयमाह—**अनित्यप्रमेति**। प्रमेत्येवोदयनोक्तावपीश्वरज्ञानांशे बाधवारणाय तदभिप्रेतं स्वयमुक्तमनित्येति। अत एव अनित्यप्रमात्वं कार्यतावच्छेदकं इति रुचिदत्तोक्तिः। हेत्वधीनत्वे [1]ज्ञानहेत्वधीनत्वे च साध्ये सिद्धसाधनमतो—**ज्ञानहेत्वतिरिक्तहेतुजन्येति**। **तद्विशेषत्वात्**। ज्ञानविशेषत्वादि-

---

[1] 'ज्ञानहेत्वधीनत्वे' इति नास्ति—आ-कुं.

मावत्। अन्यथाऽप्रमापि प्रमा स्यात्। यदि दोषप्रतिबन्धान्न प्रमा [1]तर्हि ज्ञानमपि [2]सा न स्यादित्यनुकूलतर्कसनाथानुमानविरोधात्। स्वतस्त्वे च मानाभावादिति चेन्न। प्रमाया ज्ञानत्वेन तद्धेतोर्ज्ञानहेतुतया तदतिरिक्तजन्यत्वसाधने बाधात्। विरोधाच्च।

नापि ज्ञानत्वप्रयोजकहेत्वतिरिक्तहेतुजन्येति साध्यम्। प्रत्यक्षत्वादिप्रयोजकानामिन्द्रियादीनां

त्यर्थः। ईश्वरज्ञाने व्यभिचारनिरासाय—कार्यत्वे सतीति। ज्ञाने तद्दोषनिरासाय विशेष्यम्॥

एतेन मणौ जन्यत्वादिति हेत्वनुवादोऽनुचित इति सूचितम्। कुसुमाञ्जलौ मणौ चोक्तमनुकूलतर्कमाह—**अन्यथेति**। प्रमात्वस्य ज्ञानसामग्रीमात्रप्रयोज्यत्वेऽप्रमायामपि प्रमात्वं स्यात्। तत्रापि ज्ञानसामान्यहेतोः सत्त्वादिति भावः—**ज्ञानमपीति**। ज्ञानत्वप्रमात्वयोरेकसामग्रीप्रयोज्यत्वादेकांशे प्रतिबन्धेऽपरांशेपि तथात्वादिति भावः। मानाभावाच्चेति चान्वयः। व्याघातं चाह—**विरोधाच्चेति**। [3]ज्ञानाजनकजन्यत्वार्थत्वेप्युक्तदोषावेवेति भावः॥

मणिकृतोत्प्रेक्ष्य दूषितानपि पक्षान् शिष्याणां सुबोधायानूद्य निरा[4]करोति—**नापीति**। प्रत्यक्षत्वादीत्यादिपदेनानुमितित्वोपमितित्वशाब्दत्वानां तथा चाक्षुषत्वादीत्यत्र रासनत्वादीनां द्वितीयचतुर्थादिपदाभ्यां च परामर्शोपमानशब्दज्ञानानां रसनादीनं च ग्रहः।

---

[1] तदा—क. [2] 'सा' इति न—मु-च. [3] ज्ञानजनकाजन्यार्थत्वे—कुं. [4] राह—मु-आ-अ.

चाक्षुषत्वादिप्रयोजकानां चक्षुरादीनां च ज्ञानत्व-प्रयोजकातिरिक्तत्वेन यथायथं तैस्सिद्धसाधनात्।

नापि ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येति साध्यम्। सामग्रीशब्देन कृत्स्नकारणचक्रविवक्षायां सामग्रीभे[1]दे कार्यभेदनियमेन प्रमाया ज्ञानभिन्नत्वापत्तेः। कतिपयकारणच[2]क्रविवक्षायां चोक्तरीत्येन्द्रियादिभिः सिद्धसाधनात्॥

*एतेनानित्यज्ञानत्वावच्छिन्नकार्यता[3]भिन्नका-

सिद्धसाधनादित्युपलक्षणम्। ज्ञानत्वस्येश्वरज्ञानवृत्तित्वेन [4]कारणाप्रयोज्यतया तत्प्रयोजकसामग्र्यप्रसिद्धया साध्याप्रसिद्धिरित्यपि बोध्यम्॥

ननु ज्ञानत्वप्रयोजकहेत्वित्यस्य ज्ञानत्वाश्रयजनकसामग्रीत्यर्थो विवक्षितः। तेन नेन्द्रियादिभिः सिद्धसाधनम्। तेषामपि तदाश्रयजनकसामग्रीत्वेन तदन्यत्वाभावादित्यत आह—**नापि ज्ञानसामान्येति**। ज्ञानत्वाश्रयसामग्रीत्यर्थः—**सामग्रीभेद इति**। सामान्यविशेषकार्यस्थलेपि सामान्यकार्यसामग्रीतो विशेष[5]कार्यसामग्री न भिन्ना किन्तु मिलितैवेति भावः—**सिद्धसाधनादिति**। इन्द्रियादीनामपि ज्ञानत्वाश्रयकतिपयकारणान्यत्वादिति भावः॥

ज्ञानत्वस्य नित्यवृत्तितयानवच्छेदकत्वादाह—**अनित्यज्ञानत्वेति**। अनित्यज्ञानत्वेना[6]नवच्छिन्ना नियता[7] व्यावर्तिता वा[8]या

---

[1] दयनियमेन—**ग.** [2] चक्रपदं—न—**मु-च.** * अयं ग्रन्थः—**क-च.** पुस्तके नास्ति. [3] अन्य—**मु-छ-ग.** [4] करण—**कुं.** [5] कार्यपदं न—**मु.** [6] नाव—**कुं अ-आ.** [7] नित्यव्यावर्तिता—**कुं.** [8] वा इति—न—**आ-कुं.**

र्यत्वप्रतियोगिककारणजन्येति साध्यत इति निरस्तम्। इन्द्रियादिभिः सिद्धसाधनात् *।

एतेन अनित्यप्रमा प्रमा[1]ऽप्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वात्, प्रमाऽप्रमान्यतरप्रतिबन्धकजन्या वा प्रमाऽप्रमान्यतरत्वात्, स्वविरोध्यनुभ-

---

कार्यता आनित्यज्ञानमात्रवृत्तिरात्ममनोयोगादिप्रयोज्या कार्यता तदन्यकार्यत्वं प्रमानिष्ठमप्रमानिष्ठं च तत्प्रतियोगिकं तन्निरूपितं यत्कारणं-प्रमारूपकार्यकारणं [2]अप्रमारूपकार्यकारणं गुणदोषलक्षणं तज्जन्येत्यर्थः। [3]दोषजन्यत्वे बाधाद्गुणजन्यत्वेन साध्यपर्यवसानं दृष्टान्ते प्रमायां दोषजन्यत्वेन साध्यानुगमो ज्ञेयः—**सिद्धसाधनादिति**। कार्यत्वपदेन प्रमादिवृत्तिकार्यत्व[4]मिव प्रत्यक्षमात्रवृत्तिकार्यत्वमनुमित्यादिमात्रवृत्तिकार्यत्वं चाक्षुषादिज्ञानमात्रवृत्तिकार्यत्व[4]मपि भवतीति तत्तत्प्रतियोगिककारणानीन्द्रियादीन्यपि भवन्तीति तैस्सिद्धसाधनमित्यर्थः—**प्रमाऽप्रमेति**। तदुभयहेतुर्ज्ञानसामान्यसामग्र्यात्ममनोयोगादिः। तद्भिन्नहेतुर्गुणो दोषश्च। तज्जन्यत्वं च पक्षदृष्टान्तयोः प्रमाऽप्रमयोः पूर्ववज्ज्ञेयम्। प्रमेत्युक्तया सिद्धसाधनत्वस्याप्रमेत्युक्तया बाधस्य च निरासः। न च प्रागभावव्यक्तिविशेषणार्थान्तरम्। भावत्वेन विशेषणात्।

यन्मते गुणादेर्विरोधिप्रतिबन्धकत्वं स्वकार्यकरत्वं च तन्मतेनाह—**प्रमाऽप्रमान्यतरेति**॥ [5]अनित्यप्रमेत्येवं प्रागुक्तपक्षानुकर्षो[6]ऽत्रोत्तरत्र च ज्ञेयः[5]। अन्यतरप्रतिबन्धकश्च गुणो दोषश्च। तज्जन्यत्वं पूर्व-

---

[1] भ्रम-**छ.** [2] एतन्नास्ति-**कुं.** [3] अनित्यप्रमेति प्रागुक्तपक्षानुकर्षः सर्वत्र-ज्ञेयः। दोष,-**अ.** [4] एतावत्-**आ.** पुस्तके नास्ति. [5] इयं पङ्क्तिर्नास्ति-**आ अ** [6] र्षः सर्वत्र-**मु.**

वप्रतिबन्धकजन्या वा अनित्यानुभवत्वात् अप्रमावत्। चाक्षुषप्रमा चाक्षुषभ्रमाजनकजन्या अनित्यप्रमात्वात् रासनप्रमावदिति निरस्तम्। प्रमाजनकव्यक्तिविशेषस्योभयहेतुभिन्नत्वेनाप्रमाप्रतिबन्धकत्वेन [1] चाक्षुषभ्रमाजनकत्वेन च सिद्धसाधनात्।

नापि अनित्यप्रमा अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यताप्रतियोगिककारणजन्या अप्रमाविजातीय-

---

वत्। हेतौ जन्यप्रमेति योज्यम्। प्रमाऽप्रमाबहिर्भूतमीश्वरज्ञानमिति मते तु यथाश्रुतमेव। अनुमित्यादिप्रतिबन्धकप्रत्यक्षसामग्रीजन्यत्वेन सिद्धसाधनवारणाय स्वविरोधीत्यनुभवविशेषणम्। अप्रमारूपोऽनुभव इत्यर्थः। स्वशब्दस्य पक्षीभूतानित्यप्रमामात्रपरत्वेनानुमित्यादेः स्वविरोधित्वाभावान्नोक्तदोषः। स्वविरोधिस्मृतिप्रतिबन्धकानुभवसामग्रीजन्यतया सिद्धसाधनतावारणायानुभवदम्—**अप्रमावदिति** ॥ तत्र दोषजन्यत्वेन साध्यानुगमो ध्येयः—**चाक्षुषभ्रमाजनकेति** ॥ पक्षे गुणजन्यत्वेन दृष्टान्ते रसनेन्द्रियसंप्रयोगजन्यत्वेन साध्यं बोध्यम्।

आद्यद्वयं स्मृत्यनुभवसाधारणं[2]साध्यम् [3] द्वितीयमनुभवासाधारणं [4]तृतीयं चक्षुरादिप्रत्यक्षसाधारणमिति साध्य[5]त्रयं विवेक्तव्यम्—**व्यक्तिविशेषस्येति** ॥ निर्देशार्थकरणसम्प्रयोगादिरूपस्येत्यर्थः—**अप्रमाप्रतिबन्धकत्वेनेति** ॥ तदनुत्पादव्याप्यत्वरूपप्रतिबन्धकत्वेनेत्यर्थः। *अप्र-

---

[1] स्वविरोध्यनुभवप्रतिबन्धकत्वेन–छ. [2] ध्येयम्–आ. [3] तृतीयं–आ. [4] चतुर्थ–आ. [5] चतुष्टयम्–मु. 'साध्यत्रयमिति' नास्ति–आ. *इयं पङ्क्तिर्न.

कार्यत्वात्। घटवदितियुक्तम्। अप्रमाव्यावृत्त-धर्मावच्छिन्नकार्यत्वमिन्द्रिय[1]सम्प्रयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्ध-साधनात्।

नापि अनित्यप्रमा अप्रमा[2]कारणविजातीय-कारणजन्या अप्रमाविजातीयकार्यत्वात् घटवत्। अन्यथा कार्यवैजात्यमाकस्मिकं स्यादिति युक्तम्। हेतौ विजातीयत्वं यदि विरुद्धजात्यधिकरणत्वं तदा प्रमात्वस्याजातित्वेनासिद्धेः। यदि[3] तु

मायाः स्वविरोध्यनुभवत्वादप्रमाप्रतिबन्धकत्वेनेत्यनेनैव स्वविरोध्यनुभव-प्रतिबन्धकत्वेनेत्यस्याप्युक्तत्वान्न तस्य पृथगुक्तिः*—**इन्द्रियसंप्रयोग-स्येति**[4] ॥ [5]इन्द्रियसम्प्रयोगत्वस्याप्रमाव्यावृत्तत्त्वेन तदवच्छिन्नकार्यत्वं तस्येत्यर्थः। [6]इन्द्रियादिसम्प्रयोगस्ये[7]ति ध्येयम्। अत्र इन्द्रियादीति श्रवणात्—**तज्जन्यत्वेनेति** ॥ संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन जनकत्वादिन्द्रियस्यापि द्रव्यत्वादिति भावः ॥

मणिकृता सिद्धान्तितानुमानान्यप्यनूद्य निराह ॥ **नाप्यनित्यप्रमेत्यादिना**। [8]**अप्रमाविजातीयेति**। अप्रमाकारण विजातीयेत्यर्थः[8]। तदुक्तमेवानुकूलतर्कमाह—**अन्यथेति**। विजातीयकारणाजन्यत्व इत्यर्थः—**अजातित्वेनेति**। इदं रजतमित्यादौ धर्म्यंशे सत्वेपि धर्मांशेऽभावेन प्रमात्वस्याव्याप्यवृत्तित्वात्। ज्ञानत्वसमनियतत्वाच्चेति भावः ॥

---

[1] संयोगस्य-**छ.** [2] कारणपदं न-**मु·च.** [3] 'तु' इति न-**मु-च.** [4] त्वस्येति-**आ.** [5] इन्द्रियसंप्रयोगस्येत्यत्र. इ-**मु.** [6] इन्द्रियसंप्रयोगत्वस्येत्यत्र ई-**आ.** [7] त्यपि-**आ.** [8] एतन्नास्ति-**कु-आ.**

विरुद्धधर्ममात्राधिकरणत्वं तदा पटज्ञानविजातीयकार्ये घटज्ञाने व्यभिचारः। अनुमित्यादिसाधारणघटज्ञानमात्रानुगतकारणाभावात्। पाकजरूपरसादौ कारणवैजात्येपि [1] कार्यवैजात्यदर्शनाच्च।

स्यादेतत्। अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगि [2] कार्यतावच्छेदकम्। अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् अप्रमात्ववत्।

घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रियसन्निकर्षादिजन्यमिति न व्यभिचार इति मण्युक्तनिरासाय व्यभिचारं व्यनक्ति—**अनुमित्यादीति**। अप्रयोजकत्वं चाह—**पाकजेति**। न च तत्रापि तत्प्रागभावरूपहेतुवैजात्यमस्तीति वाच्यम्। भावरूपविजातीयेति साध्यार्थत्वात्। अन्यथा प्रागभावेनैव सिद्धसाधनतापत्तेरिति भावः॥

मण्युक्तानुमानान्तरमाशङ्कते—**स्यादेतदिति**। प्रमात्वस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वादनित्यप्रमात्वमित्युक्तिः। एवं साध्येपि ज्ञेयम्। अनित्यज्ञानत्वावच्छिन्नं यत्कार्यत्वं तत्प्रतियोगिका तन्निरूपिता कारणता आत्ममनोयोगादिनिष्ठा तद्भिन्ना या कारणता गुणदोषनिष्ठा तत्प्रतियोगिककार्यतावच्छेदकमित्युक्तौ पक्षे गुणजन्यतावच्छेदकत्वेन [3] दृष्टान्ते दोषजन्यतावच्छेदकत्वेन [3] साध्यसिद्धिः। अन्यथा बाधादिति भावः। हेतावनित्यज्ञानत्वे व्यभिचारनिरासाय व्याप्यान्तं धर्मविशेषणम्। अभेदेपि व्याप्यत्वमिति पक्षे तु न्यूनवृत्तित्वं व्याप्यत्वं बोध्यम्। घट [4] नित्यज्ञानत्वादौ तद्वारणाय विशेष्यम्—

---

[1] कार्यपदं न—ग-क-ख. [2] क—मु-च-ग. [3] इदं नास्ति—कुं. [4] ज्ञानादि—ख.

न च विशेष्यासिद्धिः। अनित्यप्रमात्वं कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदित्यनेन तत्सिद्धेः। नीलघटत्वादौ प्रत्येकानुगतप्रयोजकद्वयादेव नीलरूपघटत्वयोः सिद्ध्या समाजस्यार्थिकत्वं बाधकम्। जन्यघटज्ञानत्वादौ [1]तु स्वावच्छिन्नकार्यत्वप्रतियोगिककारणासम्भवो बाधक इति न तत्र व्यभिचार इति चेन्मैवम्। घटज्ञान इव वक्ष्यमाणरीत्याऽनित्यप्रमामात्रे [2]प्यनुगत [3]गुणाभावेनानुमान[4]द्वयेपि बाधात्। द्वितीये विशेषणासिद्धेश्च।

बाधकं विनेति ॥ अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वं वा स्वावच्छिन्नकार्यताप्रतियोगिककारणासम्भवो वा एकव्यक्तिकत्वं वा गौरवं वेत्यादि यत्कार्यतावच्छेदकत्वे बाधकं तद्विनेत्यर्थः—**अप्रमात्ववदिति।** तत्र बाधकचतुष्टयस्याप्यभावाद्धेतुसाध्ये व्यक्ते इति भावः ॥

हेतौ विशेषणकृत्यं मण्युक्तमेव दूषण[5]ज्ञानसौकर्यायाह—**नीलेति। प्रयोजकद्वयादिति।** घटत्वप्रयोजकान्नीलत्वप्रयोजकाच्चेत्यर्थः—**समाजस्य।** घटत्वनीलत्वयोर्मेलनस्येत्यर्थः—**आर्थिकत्वमिति।** घटत्वनीलत्वरूपावच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वमित्यर्थः—**स्वेति।** स्वावच्छिन्नं यत्कार्यत्वं तन्निरूपितानुगतैककारणासम्भव इत्यर्थः—**घटज्ञान इवेति।** जन्यघटज्ञान इवेत्यर्थः—**विशेषणेति।** स्वावच्छिन्नकार्यत्वप्रतियोगिकैककारणासम्भवरूपबाधकस्यैव

---

[1] तु इति न-कुं-ग. [2] अपिपदं न-कुं. [3] कारणाभा-कुं-क. [4] द्वयाधावेपि-ग. [5] ज्ञानपदं न-मु.

बाधकराहित्यस्यैव हेतुत्वसम्भवे व्यर्थविशेष्यत्वाच्च। साधकाभावेन सत्प्रतिपक्षत्वाच्च। अप्रमामात्रानुगतदोषाभावेन दृष्टान्तस्य साध्यसाधनवैकल्याच्च ॥

ननु प्रमाविशेषहेतूनां भूयोऽवयवेन्द्रियसन्निकर्षादीनां प्रमामात्रे सन्निकर्षत्वादिनाऽननुगमेपि गुणत्वेनानुगतिरस्तीति कथं बाध इति चेन्न। गुणत्वस्याजातित्वेन प्रमामात्रजनकत्वरूपतयान्योन्याश्र[1]यात् ॥

सत्वेन बाधकं विनेत्यस्यासिद्धेरित्यर्थः—**व्यर्थेति** ॥ ज्ञानत्वादौ नित्यवृत्तित्वबाधकाभावेनैव व्यभिचारनिरासादिति भावः ॥

न च बाधकं विनेत्यत्र प्रागुक्तबाधकचतुष्टयमेव बाधकपदेन विवक्षितम्। अतो ज्ञानत्वादौ व्यभिचारनिरासाय विशेष्यमिति वाच्यम्। सामान्यशब्दस्य विशेषपरत्वमुपेत्य विशेष्य[2]कृत्योक्तेरयुक्तत्वादिति भावः ॥

साधकेति। अनुगतकारणतावच्छेदकेन हि कार्यतावच्छेदकमुपेयम्। प्रकृते चानुगतकारणं नेति वक्ष्यमाणत्वादिति भावः—**दृष्टान्तस्येति**। अनुमानद्वयेपीत्यनुकर्षः। अनुगतदोषाभावेनाद्यहेतौ कार्यतावच्छेदकत्वस्य द्वितीये स्वावच्छिन्नकार्यतेत्यादिबाधकाभावस्य चाभावेन साधनवैकल्यम्। अनुगतकारणाभावेन साध्यवैकल्यं चेत्यर्थः—**अजातित्वेनेति**। संयोगत्वज्ञानत्वादिना साङ्कर्यादिति भावः। एतेन दृष्टान्ते भ्रमहेतूनां दोषत्वेनानुगमोपि प्रत्युक्तः—**अन्योन्याश्र-**

---

[1] त्वा—च. [2] विशेषणकृ—कुं-अ.

एतदप्युक्तं "प्रामाण्यं च स्वत एव अन्यथानवस्थानात्" इति। उत्पद्यत इति शेषः। ज्ञानात्मिकाया भ्रमेपि धमर्थशेऽनुवृत्तायाश्च प्रमायाः [1]ज्ञानहेत्वन्यहेतुजन्यत्वादिति साधने घटादिवदज्ञानत्वाद्यापत्त्या प्रमा ज्ञानं घटस्तु नेत्यादिव्यवस्थाऽयोगादित्यर्थः॥

उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः॥१०॥

अथ मतं ग्राह्यप्रमा वा विशेष्यनिष्ठविशेषणज्ञानं वा अविद्यमानासंसर्गाग्रहो वा गुणः।

यादिति। अनित्यप्रमात्वस्य कार्यतावच्छेदकत्वासिद्धावुक्तरूपगुणत्वसिद्धिः। तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयादित्यर्थः—**चिरन्तनानुमानभङ्गः**। उदयनोक्तानुमानस्यैव मणिकृता परिष्कृतत्वेन नूतनानुमानाकरणात्तद्भङ्गेन मण्युक्तानुमानभङ्गोपीति चिरन्तनेत्येवोक्तम्॥

[2]**उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः॥ १०॥**

यदुक्तमनुगतगुणाभावेनानुमानद्वये बाधादित्यादि तन्नेति भावेनानुगतगुणमाशङ्क्य निराह—**अथेति**। यद्यपि "प्रमामात्रे नानुगतो गुण" इत्येवोक्तं मणौ तथापि पक्षधरप्रगल्भादिव्याख्यातृभिरनुगतगुणस्योक्तत्वात्तन्मताशङ्केयम्—**ग्राह्येति**। येन यद्ग्राह्यं तत्र तत्प्रमाहेतुरित्यर्थः—**विशेष्यनिष्ठेति**। विशेष्यसम्बद्धेत्यर्थः। तेनाकाशो शब्द-

---

[1] ज्ञानहेत्वजन्यहेतुजन्यत्वादिसाधने-**स्व.** [2] परतस्त्वेऽनुमानभङ्गः-**आ.**

[1] प्रमामात्रेऽनुगतो हेतुः। नचात्र [2] प्रमाणाभावः। आद्ये[3]पक्षे विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यां [4] धारावाहिकोत्तरप्रमां प्रति विशेष्यमपि विषयीकुर्वन्त्याः पूर्वस्या ग्राह्यप्रमायाः कारणत्वे कल्पे प्रमान्तरंप्रत्यपीश्वरनिष्ठाया ग्राह्यप्रमाया गुणत्वकल्पनात्। द्वितीयेपि विशिष्टज्ञानरूपं सामान्यं प्रति विशेषणज्ञानस्य विशेषणज्ञानत्वरूपेण सामान्येन कारणत्वे "यत्सामान्ययोः कार्यकारणभावो बाधकाभावे सति तद्विशेषयोरपि सः" इति न्यायेन विशिष्टप्रमां प्रति विशेष्यनिष्ठविशेषणज्ञानत्वेन कारणत्वकल्पनात्। तृतीयेपि संसर्गग्रहसामान्यं प्रत्यसंसर्गाग्रह[5]मात्रस्य कारणत्वेन तद्विशेषस्याविद्यमानासंसर्ग्राग्रहस्य संसर्गप्रमां प्रति कारणत्वकल्पनात् इति॥ मैवं—

आद्यपक्षे धारावाहिकपूर्वप्रमायां ग्राह्यप्रमात्वे सत्यपि तस्या विशेषणज्ञानत्वेनैव कारणतया ग्राह्यप्रमात्वेन तदभावात्॥

इत्यादौ न दोषः। अविद्यमानो यो संसर्गः धर्मिधर्मसम्बन्धाभावः तदग्रह इति तृतीयपक्षार्थः। मतत्रयेपि क्रमेण युक्तीराह—**आद्येत्यादिना**। **प्रमान्तरं प्रतीति**। [6] अनुभवं प्रतीत्यर्थः—**विशिष्टेति**। **जन्यविशिष्टज्ञानेत्यर्थः—तदभावादिति**। [7] कारणत्वाभावादित्यर्थः।

---

[1]प्रामाण्यमात्रे–ख. [2]मानाभावः–छ-क-ख-मु. [3]द्यप–कुं-ग-च. [4]न्यधा–च-ग-ख-कुं. [5] मात्रपदं न–मु. [6] अनुत्तरप्रमां प्र–आ. [7] एतन्नास्ति–कुं-अ,

तत्र तस्याः समानाधिकरणाया एव कारणत्व-कल्पनया प्रमान्तरेपि समानाधिकरणाया एव [1] कारणत्वकल्पनया प्रमात्वेपि समानाधिकरणाय एव[1] तत्कल्पनाप्रसङ्गाच्च ॥

ईश्वरज्ञानस्य भ्रमं प्रतीवोपादानसाक्षात्कारत-यैव कारणत्वस्य कल्पनत्वेन ग्राह्यप्रमात्वेन कारण-त्वकल्पनस्य प्रामाण्यपरतस्त्वनिश्चयाधीनत्वेना-न्योन्याश्रयाच्च ॥

ग्राह्यप्रमात्वेनैव कारणत्वमित्यत्र कल्पकाभावादिति भावः ॥

न च शाब्दप्रमायां ग्राह्यविशेषस्य वाक्यार्थस्य प्रमाहेतुरिति प्रमासामान्ये ग्राह्यप्रमासामान्यं हेतुरिति वाच्यम् । तथापि ग्राह्यप्रमा-मात्रस्यातिप्रसक्ततया तद्ग्राह्यप्रमायां तद्ग्राह्यप्रमाहेतुरित्यननुगम एवेत्य-नुगतगुणालाभात् । अप्रमात्वे दृष्टान्ते साध्यवैकल्यस्यैवमप्यपरिहाराच्चेति भावः ॥

नन्वस्तु विशेषणज्ञानत्वेनैव हेतुतेत्यत आह—[2] **तत्रेति** । [3] यद्वा ग्राह्यप्रमात्वेन तत्र कारणत्वेपि न सर्वत्रानुगतगुणालाभ इत्याह— [4] **तत्रेति** । उक्तविशिष्टप्रमायां तस्याः विशेषणप्रमात्वेन हेतुभूतपूर्व-प्रमाया इत्यर्थः—**कल्पनयेति** । अन्यथातिप्रसङ्गान्निर्विकल्पकादरानाप-त्तेश्चेति भावः ॥

नन्वीश्वरज्ञानस्या[5]कारान्तरेण हेतुत्वात्कल्पे[6]र्वा प्रमात्वस्य गुणप्रयोज्यत्वान्यथानुपपत्त्यावैतत्कल्प्यत इत्यत आह—**ईश्वरेति** ।

---

[1] एतावन्नास्ति—छ-ख-मु. [2] यत्रेति—आ. [3] यद्वेत्यादि नास्ति—अ. [4] यत्रेति—आ. [5] स्यप्र—आ-अ. [6] कल्पनावप्र—आ.

लिङ्गाभासविप्रलम्भकवाक्यजन्ययोर्यादृच्छिकसंवादेन प्रमयोस्त्वदुक्तव्याधिकरणगुणजन्यत्ववत्समानाधिकरणदोषजन्यत्वस्यापि सत्त्वेनाप्रामाण्यस्याप्यापाताच्च ॥

धारावाहिके भ्रमे पूर्वस्य भ्रमस्योत्तरभ्रमं प्रति त्वदुक्तरीत्या ग्राह्यभ्रमत्वेन कारणत्वे कल्पे भ्रमान्तरेपि ग्राह्यभ्रमः कारणत्वेन कल्प्यः । स एव च भ्रममात्रेऽनुगतो दोषः । एवं च संवादिशुकादिवाक्यमूलत्वेन नित्यप्रमावद्विसंवादिशुकादिवाक्यमूलत्वेन नित्यभ्रमोपि सिद्ध्येदित्यतिप्रसङ्गाच्च ॥

आद्यद्वितीययोर्विशिष्टज्ञानं प्रति विशेषणज्ञानकारणत्वस्यैव मां प्रत्यसिद्धेश्च । वक्ष्यते चैतन्निर्विकल्पकभङ्गे ॥

यादृच्छिकेति । यादृच्छिकसंवादेन हेतुनावगतप्रमात्वयोरित्यर्थः—अप्रामाण्यस्येति ॥

नचायं दोषः सिद्धान्तेपीति वाच्यम् । विषयसत्त्वाभावविशिष्टस्यैव दोषस्याप्रमाहेतुत्वात् । नचैवं परमते युक्तम् । उक्तरूपदोषाभावादेव प्रमात्वोपपत्तौ गुणस्य हेतुतानापत्तेरिति भावः ॥

नित्यभ्रमोपीति । अन्यथा प्रागुक्ताप्रमात्वदृष्टान्ते साध्यसाधनवैकल्यापत्तेः । इतोन्यस्यानुगतदोषस्याभावेन कार्यतावच्छेदकत्वासिद्धेरिति भावः—विशेषणज्ञानकारणत्वस्यैवेति । दूरे यत्सामान्ययोरिति न्यायावतार इत्येवकारार्थः । [1]प्रामाणिकत्वेनसिद्धमित्यत आह—वक्ष्यत इति ।

---

[1] अयं ग्रन्थः नास्ति—कुं-अ—प्रामाणिकत्वमसिद्धमित्यत आह-आ,

द्वितीयतृतीययोर्निर्विकल्पक[1]रूपप्रमाननुगमाच्च ॥

ननु निर्विकल्पकेप्यविद्यमानस्यासंसर्गस्याग्रहोस्त्येवेति चेन्न। असंसर्गाग्रहस्यासंसर्गग्रहरूपो यः संसर्गग्रहप्रतिबन्धकस्तदभावतया संसर्गग्रह एव हेतुत्वात् ॥

न च निर्विकल्पकं प्रमाऽप्रमाबहिर्भूतम्। तथापि निर्विकल्पकस्य गुणाजन्यत्वेप्यप्रमावैजात्यवत्प्रमाया अपि तदुपपत्तेः। तृतीयेऽविद्यमानासंसर्ग[2]शब्देनोक्तस्य विद्यमानसंसर्गस्य योयम[3]ग्रहस्तस्य

रुचिदत्तादिस्तु विशेष्यनिष्ठविशेषणज्ञानं गुण इत्ययुक्तम्। लोहितःस्फटिक इत्यादौ लौहित्यसाक्षात्सम्बन्धविषयकभ्रमे अन्वयव्यभिचारात्। लौहित्यरूपविशेषणस्य परम्परासम्बन्धेन विशेष्यनिष्ठत्वात्। न च तत्सम्बन्धविषयकप्रमायां तत्सम्बन्धेन विशेष्यवृत्ति यद्विशेषणं तज्ज्ञानत्वेन न हेतुतेति वाच्यम्। एवं हि तत्संबन्धविषयकतद्विशेषणविशेष्यकप्रमात्वं कार्यतावच्छेदकम्। तत्संबन्धेन [4]तद्विशेषणज्ञानत्वं कारणतावच्छेदकमित्यननुगम एव। किंच। भावत्वविशिष्टप्रत्यक्षे व्यभिचारश्चेत्यदूषयत् ॥

*अननुगमाच्चेति। नन्वीश्वरज्ञानमादाय द्वितीयमपिनिर्विकल्पके अनुगमयितुं शक्यमिति चेन्न। तस्य साधारणहेतुत्वेन विशेषाकारेण हेतुत्वकल्पकाभावादितिभावः। तृतीयमनुगतमिति शङ्कते—नन्विति। अननुगमो न दोषायेति शङ्कते—नचेति। बहिर्भूतमिति।

---

[1] रूपपदं नास्ति—मु. [2] र्गाग्रहश—कुं-च-ग. [3] य ग्र—कुं-च-ग. [4] तद्विशेष्यवृत्ति—अ. *अयं ग्रन्थः नास्ति—कुं-अ.

धारावाहिकद्वितीयादिप्रमाननुगमाच्च । अविद्यमानासंसर्गस्य संसर्गरूपतया तदग्रहस्यासंसर्गाग्रहविशेषत्वाभावाच्च ॥

किञ्चानित्यप्रमामात्रानुगतगुणाङ्गीकारे प्रमारूपानुमित्यादौ प्रमात्वस्यानित्यप्रमामात्रानुगतगुणेन अनुमितित्वशाब्दत्वादेश्च लिङ्गपरामर्शशब्दकारणकत्वादिनैवोपपत्त्या यथायथं लिङ्गपरामर्शादिप्रतिनियतगुणोक्तिर्व्यर्था ॥

गुणदोषान्यतराजन्यत्वादितिभावः*—**संसर्गरूपतयेति**। नञ्द्वयेन विद्यमानसंसर्ग[1]लाभं विना पर्यवसानाभावादिति भावः—**असंसर्गाग्रहविशेषत्वाभावाच्चेति** । तथाच यत्सामान्ययोरिति न्यायावतारेण कथं तस्य गुणत्वलाभ इति भावः ॥

एवमनुगतगुणपक्षत्रयं प्रत्येकं दूषयित्वा संहत्यापि दूषयितुं "भूयोऽवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वं" इति मण्युक्तं[2] विरुद्धं चेति भावेनाह—**किञ्चेति** । यद्वा उक्तप्रकारत्रयेण वा प्रकारान्तरेण वा प्रमामात्रानुगतगुणस्वीकारपक्ष एव न युक्त इत्याह—**किञ्चेति** ॥

न च प्रमात्वानुमितित्वादिरूपकार्यतावच्छेदकबलात्तदनुगुणोनुगतगुणः कश्चित्स्वीकार्य इति शङ्क्यम् । नीलघटत्वादाविव प्रमात्वानुमितित्वादेः स्वसामग्रीमहामहिम्नैवैकत्र समाजेनावच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वरूपबाधकेन तस्य कार्यतानवच्छेदकत्वात् । अत

---

[1] र्गपर्य-मु-र्गाभावं वि-आ. [2] क्तिविरु-मु-अ-आ.

किञ्च परतस्त्ववादिना[1] हि विषयसत्वनैरपेक्ष्येण स्वत एवाप्रमाव्यावृत्तं ज्ञानसाधारणकारणादिकं किंचित्कारणं प्रमायां साधनीयम्। नतु[2] ज्ञानसाधारणकारणस्यैव विषयसत्वविशेषणेनाप्रमाव्यावृत्तिः साधनीया। स्वतस्त्ववादिनापि प्रमायां ज्ञानसाधारणकारणस्य विषयसत्वस्य[3] स्वीकृतत्वेन सिद्धसाधनात्॥

अत एव सुधायां "ज्ञानजनकमात्राधीनजन्मत्वं स्वतस्त्वं" इति मात्रशब्देन जनकान्तरमेव निषिद्धम्। न तु बिषयसत्वम्। तस्यातीतादिविषयकानु-

---

एव प्रमात्वस्यानुमितित्वादेश्चप्रयोजकसामग्रीसमाजस्य प्रमामात्रानुगत गुणेनेति लिङ्गपरामर्शशब्दकारणकत्वादिनेत्युक्तिः॥

पूर्वोक्तमतत्रयेपि विषयसत्वमेव गुण इति फलितामिति[1] 'तच्चानेन साधितमित्यादिना' वक्ष्यन् विषयसत्वं च न गुण इत्याह॥ **किञ्चेति। अप्रमेति॥** अप्रमाकारणव्यावृत्तमित्यर्थः।[5] ज्ञानसाधारणकारणस्येति पररीत्योक्तिः। स्वमते ग्राह्यज्ञानविशेषणज्ञानयोरहेतुत्वादिति ज्ञेयम्[5]—**अप्रमेति**। अप्रमाकारणव्यावृत्ति—**अत एवेति**। विषयसत्वस्यानुमतत्वादेवेत्यर्थः—**सुधायां** जिज्ञासाधिकरणसुधायामित्यर्थः॥

ननु विषयसत्वस्यापि प्रमाजनकतया जनकान्तरनिषेधे विषयसत्वमंपि सुधायां निषिद्धमेव। अतस्तदनुप्रवेशे सति न सिद्धसाधनमित्यत आह—**तस्येति**। विषयसत्वस्येत्यर्थः। **अतीतेति**

---

[1] पिहि-मु. [2] ननु-कुं-च-ग. [3] च-मु. [4] तिवक्ष्यन्-कुं-अ.
[5] इयं पङ्क्तिर्नास्ति-मु-आ.

मित्यादिसाधारणत्वेन प्रामाण्यशरीरान्तर्गतत्वेन च तदजनकत्वात् ॥

एतेन यादृच्छिकसंवादेन प्रमायां लिङ्गाभासेन शब्दाभासेन च जन्यायामनुमितौ शाब्दप्रतीतौ च पक्षस्य वस्तुतः साध्यवत्वं योग्यता च गुण इति निरस्तम् । स्पष्टयिष्यते चैतत् ॥

तच्चानेन साधितम् । विशेषणज्ञानस्यासंसर्गाग्रहस्य च भ्रमसाधारण्यात् । विशेष्यनिष्ठशब्देना-

---

अनुमित्यादिप्रामाण्याय पूर्वं तत्र विषयसत्वस्य वाच्यतया तस्येदानीन्तनानुमित्यजनकत्वादिति भावः ॥

तदजनकत्वादिति । यत्तु प्रमाणपद्धतौ साधनपदेन प्रमातृप्रमेययोर्व्यवच्छेद इति कारणत्वमात्रमुपेत्य साधकतमत्वाभाववचनं तदभ्युपेत्यवादेनेति भावः—**एतेनेति** । विषयसत्वस्य गुणत्वाभाववचनेनेत्यर्थः । वास्तवसाध्यवत्वयोग्यतयोर्विषयसत्वरूपत्वादिति भावः ॥

कथमिदं साध्यवत्वादिकं विषयसत्वगर्भमित्यत आह—**स्पष्टयिष्यत इति** । उत्तरभङ्ग इत्यर्थः ॥

नन्वस्तु विषयसत्वं न गुणः । तथापि प्राह्यप्रमेत्याद्युक्तपक्षत्रयेपि किमागतमित्यत आह—**तच्चेति** । ज्ञानसाधरणकारणस्य विषयसत्वेन विशेषितत्वमनेन पक्षत्रयेण साधितं त्वयेत्यर्थः । कथमित्यतो व्यनक्ति—**विशेषणेत्यादिना** । विशेषणज्ञानस्येत्युक्त्या प्राह्यज्ञानस्यापि ग्रहः प्राप्तः—**विशेष्यनिष्ठेति** । प्राह्यप्रमेति प्रमाशब्देनेत्यपि ध्येयम्

विद्यमानशब्देन च विषयसत्वस्यैवोक्तेः। अन्यथा भ्रमेपि विशेष्यानिष्ठविशेषणज्ञानं विद्यमानासंसर्गाग्रहश्च प्रमाव्यावृत्तत्वाद्दोष इति तज्जन्यत्वेनैव परतस्त्वं स्यात् ॥

तस्माद्भ्रमे स्वत एव प्रमाव्यावृत्तं पित्तादिकमिव प्रमायामपि स्वत एव भ्रमव्यावृत्तं भूयोवयवेन्द्रियसन्निकर्षादिकमाधिकं वाच्यमिति किमनेन ॥

एतेन अनित्यप्रमात्वं अप्रमाकारणताव[1]च्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्। भ्रमावृत्तिकार्यतावच्छेदकत्वात्। घटत्ववदित्याद्यपि निरस्तम्। [2]कार्यतावच्छेदकत्वस्यैव निरासादिति ॥

परतस्त्ववादिनाहीत्यादिनोक्तप्रमेयानङ्गीकारे बाधकमाह—**अन्यथेति**। स्वत एवाप्रमाव्यावृत्तस्य ज्ञानसाधारणकारणस्याधिकस्यानङ्गीकारे विषयसत्वेनैव परतस्त्वस्वीकार इत्यर्थः। प्राह्यभ्रमोप्यत्रोपलक्ष्यः। यद्वा आद्यपक्षस्यातिफल्गुत्वाद्द्वितीयतृतीययोरेवात्र पूवत्र च दोषोत्कीर्तनमिति बोध्यम्—**स्वत एवेति**। विषयसत्वनैरपेक्ष्येणेत्यर्थः ॥

एवं प्रमात्वमात्रेऽनुगतकारणदूषणेन मण्युक्तमनुमानान्तरमपि निरस्तमित्याह—**एतेनेति**। **अप्रमेति**। अप्रमाकारणतादोषादिनिष्ठा तदनवच्छेदकं रूपं विशेष्यनिष्ठविशेषणज्ञानत्वादिकम्। तदनव-

---

[1] नवच्छेदकरूपावाच्छिन्न-कुं-च-क. [2] 'भ्रमावृत्ति' इत्यधिकं—ख-क-ख.

एतदुक्तं "अन्यथा" इत्यादिना । अनुगतगुणाभावेप्यनित्यप्रमात्वस्य कार्यतावच्छेदकत्वे घटत्वादिकं कार्यतावच्छेदकं न तु नीलघटत्वादिकमिति व्यवस्थाऽयोगादित्यर्थः ।

अनित्यप्रमामात्रानुगतगुणभङ्गः ॥ ११ ॥

अथापि स्यात् । प्रमामात्रानुगतगुणाभावेपि

च्छिन्नकारणतानिरूपितकार्यतावच्छेदकमित्यर्थः । दृष्टान्ते दण्डत्वादिकमेवाप्रमाकारणतानच्छेदकरूपं बोध्यम् । हेतावप्रमात्वे व्यभिचारवारणाय भ्रमाद्यवृत्तीति । भ्रमनिष्ठात्यन्ताभावप्रतियोगीत्यर्थः । नित्या[1]नित्यवृत्तिप्रमात्वादौ तन्निरासाय विशेष्यम् ॥

आदिपदेन अनित्यरजतप्रमात्वं रजताप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं रजतभ्रमावृत्तिकार्यतावच्छेदकधर्मत्वाद्घटत्ववदित्यादिग्रहः—कार्यतेति । अनुगतगुणनिरासेन स्वावच्छिन्नकार्यत्वप्रतियोगिककारणासम्भवरूपबाधकस्यैव भावेन बाधकं विना कार्यमात्रवृत्तिधर्मत्वात्कार्यतावच्छेदकमित्यस्यासंभवात् । तथाच बाधासिद्धौ इति भावः । रजतानुमित्यादिसाधारणगुणाभावेन रजतप्रमात्वेपि न कार्यतावच्छेदकत्वमिति ज्ञेयम् ॥

अनित्यप्रमामात्रानुगतगुणभङ्गः ॥ ११ ॥

यज्ञपतिमतमाशङ्कते—अथापीति । अथापीत्याद्युक्तमेव व्यनक्ति ॥

---

[1] त्यवृत्ति—कुं.

परतस्त्वं सेत्स्यति । न ह्यनित्यप्रमात्वस्योक्तकार्यतावच्छेदकत्वं परतस्त्वम् । किन्तु तस्य स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति[1]त्वम्। तच्चानित्यप्रमामात्रानुगतगुणाभावेप्यननुगतगुणैरपि सेत्स्यति ।

तत्र च प्रमाणं अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणत्वाश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात् । अप्रमात्ववदित्यनुमानम् ।

प्रमेति। **उक्तेति** । अप्रमाकारणतेत्यादिनोक्तेत्यर्थः—**तस्येति** । अनित्यप्रामात्वस्येत्यर्थः—**स्वेति** । स्वस्यानित्यप्रमात्वस्य य आश्रयस्तन्मात्रवृत्तयस्तदितरावृत्तित्वे सति तद्वृत्तयो ये धर्माः जन्यप्रत्यक्षप्रमात्वादयस्तदवच्छिन्नकार्यताश्रय एव वर्तमानत्वमुक्तकार्यताश्रय [2]एव वर्तमानत्वं उक्तकार्यताश्रय[2]त्वव्याप्यत्वमिति यावत् ॥

तदुक्तमेव[3]पञ्चमात्रानुमानमाह—**अनित्यप्रमात्वमिति** । बाधनिरासाया **नित्येति**। साध्यमुक्तार्थम्। साध्यहेत्वोः स्वपदं समभिव्याहृतपरम्। एवं चानित्यप्रमात्वाश्रय एव यो न वर्तते धर्मः अनित्यज्ञानत्वादिः तदवच्छिन्नकार्यतानिरूपितकारणताश्रयो मनस्संयोगादिः तन्मात्रानुत्पाद्य कार्यमनित्यप्रमा तन्मात्रवृत्तिधर्मत्वादिति हेत्वर्थः । अनित्यज्ञानकारणमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वादिति फलितोर्थः ॥

---

[1] धर्मत्वं—**छ.** [2] एतावन्नास्ति—**मु-आ-अ.** [3] पञ्चमात्रेति नास्ति—**कुं.**

अनेन सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्ति[1]धर्मत्वरूपेण हेतुना साध्यमानं विशेषकारणजन्यत्वं सर्वप्रमानुगतगुणस्य बाधितत्वेनाननुगतगुणजन्यत्वमादाय पर्यवस्यति ॥

अत्र च साध्ये आद्यं मात्रपदं स्वतस्त्वपक्षेप्यनित्यप्रमात्वस्य स्वाधिकदेशवृत्तिनाऽनित्यज्ञानत्वे[2]नावच्छिन्नकार्यताश्रय एव वर्तमानत्वात्सिद्धसाधनमिति शङ्कानिरासाय । द्वितीयं तु सर्वासां प्रमाणां गुणजन्यत्वसिद्ध्यर्थम् ॥

हेतोरप्रयोजकतां निरस्यन् साध्यपर्यवसानप्रकारमाह—**अनेनेति [3]अननुगतेति ॥** प्रत्यक्षप्रमाद्वयेकैकानुगतेत्यपि योज्यम् । अन्यथा जन्यप्रत्यक्षप्रमात्वादेरवच्छेदकत्वायोगेन बाधापत्तेरिति भावः[3] ॥

साध्ये मात्रपदद्वयं व्यवच्छेदार्थकं न तु कात्स्न्यर्थार्थकमित्युपेत्य दूषणज्ञानसौकर्याय व्यावर्त्यं व्यनक्ति—**अत्र चेति । द्वितीयमिति ।** [4]अनित्यप्रमात्वं तादृशकार्यताश्रय एव वार्त्ति न त्वन्यत्रेत्यस्य व्यवच्छेदार्थकमात्रपदेन लाभात्तस्य[5] जन्यप्रत्यक्षप्रमात्वानुमितित्वोपमितित्वशाब्दत्वाश्रयेषु सर्वत्र वर्तनं[6] तेषां सर्वेषां गुणजन्यत्व एवोपपद्यते । अन्यथा बाधात् । कात्स्न्यर्थार्थत्वे तु यत्किंचित्तादृशधर्मावच्छिन्नकार्यताश्रये सर्वत्र वर्तित्वोपपत्येष्टासिद्धेर्व्यवच्छेदार्थ एव द्वितीयोपीति भावः ॥

हेतावपि मात्रपदानि व्यवच्छेदार्थानीत्युपेत्यानुत्पाद्यान्तविशेषण-

---

[1] धर्मपदं नास्ति—क-ख-छ. [2] त्वाव—ख. [3] अयं ग्रन्थः नास्ति—कुं. [4] अनित्यप्रमात्वमिति न—अ. [5] द—कुं. [6] लभ्यते । अन्यथा—अ.

हेतौ [1]प्रथममात्रपादाभावे एतद्घटपटान्यतरत्वे व्यभिचारः। घटत्वपटत्वयोः कार्यतावच्छेदकयोरेतद्घटपटान्यतरत्वाधिकरणमात्रवृत्तित्वाभावेन साध्याभावात्। [2]अन्यतरत्वस्य च स्वानुगतकारणाभावेन कार्यतानवच्छेदकत्वात्॥

[अतः[3] स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यत्व-

कृत्यं वक्तुमाह—**हेताविति**। घटपटान्यतरत्वे साध्यसत्वादेतदित्युक्तम्। एतद्घटपटान्यतरत्वे साध्याभावं व्यनक्ति—**कार्यतेति**। ययो[4]र्घटत्वपटत्वयोः कार्यतावच्छेदकत्वं न तयोः स्वाश्रयमात्रवृत्तित्वं ततोऽधिकदेशवृत्तित्वात्। अन्यतरत्वस्याप्यनुगतकारणाभावेन कार्यतानवच्छेदकत्वात्। एवं च *[5] स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयवृत्तित्वरूपसाध्याभावादित्यर्थः। †[6] एतेन प्रथममात्रपदस्यापि कृत्यमुक्तं ध्येयम्*। [7]प्रथममात्रपदं हित्वा स्वाश्रयावृत्तिधर्मावच्छिन्नेत्यादेरेवोक्तावेतद्घटपटान्यतरत्वस्य स्वाश्रयावृत्तिकुड्यत्वादिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयः कुड्याद्यसाधारणकारणं तन्मात्रानुत्पाद्यं यदेतद्घटपटरूपं कार्यं [8]तद्वृत्तित्वेन एतद्घटपटान्यतरत्वे उक्तहेतोः सत्वेपि मूलोक्तदिशा साध्याभावेन व्यभिचारः। दत्ते तु मात्रपदे न दोषः। कुड्यत्वस्य एतद्घटप[9]टान्यतरत्वान्यतराश्रये अवृत्तिधर्मत्वेपितद्वृत्तित्वे

---

[1] कार्यमात्रवृत्तित्वादित्येतावत्युक्ते—**कुं**, त्वाद्यमात्रपदाभावे – **क-ख-च-छ**. [2] अयं ग्रन्थः—**ग**. पुस्तकेनास्ति. [3] कुण्डलितो ग्रन्थःनास्ति—**ख-च-छ-मु**. [4] योः कार्य—**कुं**. [5] अयं ग्रन्थः नास्ति—**कुं**. [6] एतेनेत्यारभ्य 'असिद्धिरप्रसिद्धि' रितिपर्यन्तं—**अ** पुस्तके नास्ति. [7] स्वाश्रयमात्र—**कुं**. [8] तन्मात्रवृ—**मु-आ**. [9] टत्वा—**कुं अ**.

प्रतियोगिककारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितम् । तेनैतद्घटपटान्यान्यत्वाश्रयकार्यस्य तदुभयान्यान्यत्वाधिकरणमात्रावृत्तिघटत्वपटत्वावच्छिन्नकार्यत्वप्रतियोगिककारणत्वाश्रयमात्रोत्पाद्यत्वेन हेत्वभावान्न व्यभिचारः ॥

* प्रथममात्रपदाभावे] हेतु[1]स्तत्र वर्तते । अन्यतरत्वाश्रयावृत्तिकुड्यत्वादिरूपधर्मावच्छिन्ना या कार्यता तत्प्रतियोगिककारणत्वाश्रयीभूतं यत्कुड्यकारणं तन्मात्रानुत्पाद्ये एतद्घटपटरूपे कार्येऽन्यतरत्वस्य वृत्तेः। मात्रपदे दत्ते तु न व्यभिचारः ।

सति ततोधिकदेशवृत्तित्वरूपतन्मात्रावृत्तिधर्मत्वाभावेन तत्र हेतोरेवाभावात् ॥

यद्यप्यत्र विवक्षितं तन्मात्रानुत्पाद्यत्वं तदुत्पाद्यत्वे सति ततोऽधिकोत्पाद्यत्वम् । तच्चोक्तस्थले नास्ति । एतद्घटपटान्यतरत्वे कुड्यकारणोत्पाद्यत्वे सति ततोधिकोत्पाद्यत्वरूपतन्मात्रानुत्पाद्यत्वस्य बाधात् । तथाच हेत्वभावादेव न तत्र व्यभिचारः । तथापि तन्मात्रानुत्पाद्यत्वं तदितरानुत्पाद्यत्वे सति तदुत्पाद्यत्वरूपतन्मात्रोत्पाद्यत्वस्याभाव[2]त्वरूप यत्तदनुत्पाद्यत्वं तदस्त्येवैतद्घटपटान्यतरत्वाश्रये एतद्घटपटरूपेऽर्थ इति तावन्मात्रेण तत्र हेतुसत्वमुपेत्य व्यभिचारे चोदिते मात्रपदेन तन्निरासः॥

मूले तु प्रकृताभिमततन्मात्रानुत्पाद्यत्वस्य तत्राभावात् । कुड्याद्यसाधारणकारणेतरेश्वरज्ञानोत्पाद्यत्वेन तदितरानुत्पाद्यत्वस्याप्रसिद्ध्या तदभावस्य दुर्ग्रहत्वाच्च व्यभिचारचोदना न युक्तेत्यरुच्चैव प्रथममात्रपद-

---

* अयं ग्रन्थः **ग** पुस्तके नास्ति.- [1] स्तुत–**मु क ख.** [2] त्वरूपं–**मु.**

स्वाश्रयमात्रावृत्तिपदेना[1]न्यतरत्वाधिकदेशवर्तिनो-
र्घटपटत्वयोरपि सङ्गृहीतत्वेन तदवच्छिन्नकार्यता
प्रतियोगिककारणत्वाश्रयीभूतं यद्घटादिकारणं
तन्मात्रोत्पाद्ये घटादाव[2]प्यन्यतरत्वस्य वृत्त्या
तदनुत्पाद्यकार्यमात्रवृत्तित्वरूपहेत्वभावात् * ॥

द्वितीयमात्रपदाभावेऽसिद्धिः । अनित्यप्रमा-
त्वस्य स्वाश्रयाधिकदेशवृत्तिनाऽनित्यज्ञानत्वेना-
वच्छिन्ना या कार्यता तत्प्रतियोगिककारणत्वा-
श्रयो यो मनःसंयोगादिः तदुत्पाद्यप्रमारूपकार्य-
वृत्तित्वेन तदनुत्पाद्यकार्यवृत्तित्वाभावात् । मात्र-
पदे दत्ते तु नासिद्धिः । प्रमाया ज्ञानसामान्य-

स्येदं कृत्यमित्याद्यनुक्त्वा स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यत्वप्रतियोगि-
ककारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितमित्येवोक्तम् ॥

[3]केचित्तु प्रथममात्रपदाभावे इत्यादिः प्रथममात्रपदकृत्यपरत-
यापि पाठ उपलभ्यत इति पक्षे तु [4] तन्मात्रानुत्पाद्येत्यस्य तदितरानुत्पा-
द्यत्वविशिष्टतदुत्पाद्यत्वाभाववत्वरूपत [5] न्मात्रानुत्पाद्यार्थकत्वेपीहाप्रसिद्धि-
निरासाय तदितरानुत्पाद्यत्वमात्रं विवक्षणीयम् । तच्च गगनादौ प्रसिद्ध-
मिति तदभाव एतद्घटपटान्यतरत्वाश्रयकार्ये ग्रहीतुं शक्य इति व्यभिचार-
चोदनोपपाद्या † असिद्धिरप्रसिद्धिः । तथाच नासिद्धिवारकत्वं दोष
इत्याहुः ॥

[1] न्यान्यत्वादधि-कुं-ग. [2] अपिपदं न-क-छ. [3] क-मु-आ. [4] तदनु-कुं.
[5] तदनु-कुं.

कारणोत्पाद्यत्वेपि तन्मात्रा[1]नुत्पाद्यत्वात्। तथात्वे ह्यप्रमापि प्रमास्यात् ॥

तृतीयं मात्रपदं तु कार्याकार्यवृत्तिधर्मेषु व्यभिचारवारणायेति चेन्मैवम् ॥

स्वतस्त्वेप्यनित्यप्रमामात्रवृत्तिना तत्तत्प्रमात्वरूपेण धर्मेणावच्छिन्ना या तत्तत्प्रागभावनिरूपिता कार्यता तदाश्रयमात्रवृत्तित्वस्यानित्यप्रमात्वे सत्वेन सिद्धसाधनात् ॥

न च प्रागभावस्यापि तत्तत्प्रागभावत्वेन तत्तद्व्यक्तिं प्रति न हेतुता किन्तु प्रागभावत्वेन कार्यमात्रं[2] प्रति हेतुतेति वाच्यम्। उत्पन्नस्य [3]घटस्य स्वप्रागभावाभावेप्यन्यप्रागभाव[4]सत्वेन पुनरुत्पत्तिदोषतादवस्थ्यात् ॥

तथात्व इति। तन्मात्रोत्पाद्यत्व इत्यर्थः। **कार्याकार्येति**। [5]प्रमात्वादावित्यर्थः। अनित्यज्ञानत्वस्य ततोऽधिकदेशवृत्तित्वेन तत्र साध्याभावात्। प्रागभावनिरूपिता प्रागभावनिष्ठकारणतानिरूपिता [6]तत्तत्प्रमात्वावच्छिन्नकार्यतेत्यर्थः ॥

उत्पन्नस्येति। घटोत्पत्तिसमवहितोत्तरक्षणे तद्घटसामग्रीसत्वेन तया तस्यैव घटस्य पुनरुत्पत्तिप्रसङ्गदोषनिरासाय हि प्रागभावे हेतुतोक्ता। प्रागभावत्वेनैव हेतुत्वे हेतुतावच्छेदकावच्छिन्नयत्किञ्चिद्धेतुसत्वेपि कार्योत्पत्तिनियमेन तादृशप्रागभावान्तरसत्वात्पुनस्तदुत्पत्तिदोषो

---

[1] त्रोत्पाद्यत्वाभावात्-**छ.** [2] त्रहे-**ख-च.** [3] पटस्य-**ख-च-ग.** [4] वस्य स-**च-छ.** [5] प्रमेयत्वा-**कुं-अ.** [6] एतत्प्र-**आ.**

**यदि तु सिद्धसाधनवारणाय साध्ये कार्यताश-
ब्देन भावकारणनिरूपिता कार्यताऽभिप्रेता। तर्हि
सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्तित्वहेतो -
रभावरूपविशेषकारणेनाप्युपपत्त्याऽप्रयोजकता ।
तत्तद्घटत्वादौ व्यभिचारश्च । तद्वारणाय हेतावपि**

न परिहृत एव स्यादिति न प्रागभावत्वेन हेतुता किन्तु तत्प्रागभावत्वेनेति प्रागुक्तदोष एवेति भावः ॥

भावेति । भावनिष्ठकारणतानिरूपितेत्यर्थः । **अप्रयोजकतेति**। सामान्यसामग्रीमात्रानुत्पाद्य [1] कार्यमात्रावृत्तित्वस्य विशेषकारणजन्यत्वं विनाऽनुपपत्या तदाक्षेपकत्वेपि विशेषकारण[2]त्वस्य भावत्वं विनाऽनुपपत्त्यभावेन भावभूतविशेषकारणजन्यवृत्तित्वसाधनेऽप्रयोजकतैवेति भावः। **तत्तद्घटत्वेति** । घटत्वेन मृत्पिण्डत्वेनैव कार्यकारणभावो न तद्घटत्वेन [3] मृत्पिण्डत्वेन हेतुहेतुमद्भावः । एकव्यक्तिकत्वेन बाधकेन तद्घटत्वस्य कार्यतानवच्छेदकत्वात् । बाधकं विना कार्यमात्रवृत्तिधर्मत्वादिति हेतुनैव कार्यतावच्छेदकत्व[4]साधनात् । तथाच स्वाश्रयमात्रवृत्तेः स्वस्य वान्यस्य वा धर्मस्य कार्यतावच्छेदकस्याभावेन तदवच्छिन्नकार्यताश्रयमात्रवृत्तित्वरूपसाध्याभावे[5]पि न स्वाश्रयमात्रावृत्तिघटत्वरूपधर्मावच्छिन्नकार्यताप्रतियोगिक[6]कारणमात्रानुत्पाद्यकार्यं तद्घट एव । स्वप्रागभावभूताधिककारणजन्यत्वात् । तथाच तन्मात्रवृत्तित्वरूपहेतुसत्वाद्व्यभिचार इत्यर्थः ॥

---

[1] द्येन स्वकार्य-**आ**. [2] णस्य-**मु-आ**. [3] 'न' इत्यधिकमस्ति-**मु**. [4] त्वासा-**कुं**. [5] अपिपदं न-**कुं**. [6] के-**मु**.

कार्यमात्रेत्यत्र कार्यशब्देन भावकारणोत्पाद्यकार्य-विवक्षायां स्वतस्त्ववादिनं प्रत्यासिद्धिः। प्रत्यक्ष-प्रमादाविन्द्रियार्थसन्निकर्षादेर्गुणस्य सत्वान्नासि-

---

यत्सामान्यन्यायेन विशेषयोः कार्यकारणभावो न तत्वेन रूपेण किन्तु सामान्येनैव। न चैवं तन्मृत्पिण्डत्वेन हेतुहेतुमद्भावाभावे मृत्पिण्डान्तरादेतद्धटोत्पत्तिः स्यादिति वाच्यम्। मृत्पिण्डान्तरे एतद्धटप्रागभावाभावादेव तत उत्पत्त्यप्रसक्तेः। [1]तत्प्रागभावत्वेन हेतुत्व[2]कल्पनं पूर्वोक्तदिशोत्पन्नस्य पुनरुत्पत्तिबाधकादेवेति भावः—**भावकारणेति**। स्वाधिकरणमात्रावृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणमात्रानुत्पाद्यभावकारणकार्येत्युक्तौ तादृशकारणा[3]दधिकभावकारणजन्यकार्यमात्रवृत्तित्वादित्यर्थलाभात्। [4]तद्धटत्वादौ च स्वप्रागभावरूपाधिककारणजन्यकार्यमात्रवृत्तित्वेनोक्तहेत्वभावान्न व्यभिचार इति भावः—**असिद्धिरिति**। अनित्यप्रमात्वव्याप्यानित्यप्रत्यक्षप्रमात्वाद्याश्रयनिष्ठकार्यतानिरूपिता [5]नुगतगुणाभावादनित्यज्ञानसामान्यसामग्रीतोऽधिकभावकारणजन्यकार्यमात्रवृत्तिधर्मत्वस्यानित्यप्रमात्वेऽभावादिति भावः। अत एवोक्तं रुचिदत्तेनापि "सन्दिग्धासिद्धे" रिति॥

यत्तूक्तस्थले व्यभिचारवारणाय यावत्कार्यमात्रवृत्तिधर्मत्वादिति विशेषणम्। तत्तद्धटत्वादेश्च तादृशैककार्य[6]मात्रवृत्ति[7]त्वादिति तन्न। तथापि नीलघटत्वादौ व्यभिचारानिरासात्।

एतेन साध्ये स्वाश्रयमात्रवृत्त्यनेक [8]मात्रवृत्तिधर्मेति विशेषणमिति

---

[1] तत्त—कुं. [2] त्वाक—कुं-आ. [3] णाधि—कुं. [4] तत्त—कुं. [5] दनु—आ. [6] मात्रपदं न—मु. [7] धर्म इत्यधिकं—आ. [8] मात्रपदं न—अ-आ.

द्धिरित्यादित्वनुपदमेव निरसिष्यते ॥

यज्ञपत्युक्त[1]वक्रानुमानभङ्गः ॥ १२ ॥

अथ मतं अनित्यप्रत्यक्षप्रमात्वमनुमितिप्रमात्वं शाब्दप्रमात्वं च कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्ति[2]त्वात् घटत्ववदिति प्रत्येकमेव

निरस्तम् । अप्रयोजकत्वव्यभिचारयोरपरिहारात् । यज्ञपत्युक्तेरर्वाचीनत्वान्न तन्निरासो मूलारूढतया प्रदर्शितः ॥

यज्ञपत्युक्त[3]वक्रानुमानभङ्गः ॥ १२ ॥

अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् इति मण्युक्तानुमाने प्रगल्भादिनोक्तानुगतगुणपक्षं निरस्य यज्ञपत्युक्तप्रमामात्रानुगतगुण[4]माक्षिप्यानुमानं च निरस्य यत्पक्षधरेणैव पक्षान्तरमुक्तं "यद्यपि यथाश्रुतं साध्यं बाधितं अनित्यप्रमानुगतहेत्वसिद्धेः अत एव स्वरूपासिद्धिरपि तथाप्यनित्यप्रमात्वमित्यनेन अनित्य[5] प्रत्यक्षप्रमात्वादिकमेव विवक्षितं कार्यतावच्छेदकव्यापकत्वमेव साध्यं तादृशकार्यमात्रवृत्तिधर्मव्यापकत्वादितिहेतुरिति वा स्मर्तव्यमिति" तदनुरोधेन प्रमामात्राननुगतगुणपक्षमाश्रिते—**अथेति** । [6]**मतमिति** । इति प्रयोक्तव्यमित्यन्वयः—**बाधकं विनेति** । अवच्छेदकान्तरोपपन्नकार्य[7] ताश्रयवृत्तित्व[8] स्वावाच्छिन्न-

---

[1] वक्रपदं न—**च-मु.** [2] धर्म—**छ.** [3] वक्रपदं न—**मु.** [4] पक्षीयमनुमान—**मु-अ-आ.** [5] साक्षात्कार—**मु.** साक्षात्कारि—**अ-आ.** [6] प्रथममिति प्र—**मु-अ-आ.** [7] कारणत्वानाश्रयवृत्तित्वा—**आ.** [8] त्वंत्वा—**कुं-आ.**

प्रयोक्तव्यम्। बाधकं च समाजस्यार्थिकत्वमनुगतहेत्वभावश्च। तेन नीलघटत्वादौ घटज्ञानत्वादौ च न व्यभिचारः। एतादृशप्रत्यक्षप्रमात्वादिकं प्रत्यनित्यप्रमात्वस्य व्यापकत्वमेव [1]प्रमात्वस्य परतस्त्वम्। एवं च तत्तत्प्रागभावनिरूपितकार्यतया[2] नार्थान्तरम्।

न चात्राप्यनुगतहेत्वभावो बाधकः।

कार्यताप्रतियोगिककारणासम्भव इत्यादिबाधकं विनेत्यर्थः॥

नित्यवृत्तित्वादि[3]कार्यतावच्छेदकत्वबाधकस्य ज्ञानत्वादाविव नीलघटत्वादावभावात्। विशिष्टहेतोरपि तत्र व्यभिचार इत्यतो विवक्षितपक्षधराद्युक्तबाधकशब्दार्थोक्त्योक्तदोषं निराह—**बाधकं चेति**॥ समाजस्य मेलनस्य आर्थिकत्वं अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वमित्यर्थः—**अनुगतेति**। स्वावच्छिन्नकार्यताप्रतियोगिका[4]नुगतहेत्वभाव इत्यर्थः—**तेनेति**। बाधकं विनेत्यत्र विवक्षितबाधकाभावरूपविशेषणेनेत्यर्थः।

एवं जन्यप्रत्यक्षप्रमात्वादेः परतस्त्वप्राप्तावप्यनित्यप्रमात्वस्य तन्न प्राप्तमित्यत आह—**एतादृशेति**। प्रमात्वस्य अनित्येति योज्यम्। यद्वा ईश्वरज्ञानप्रामाण्यस्यापि परतस्त्वं प्राप्तमिति भावेन प्रमात्वस्येत्येवोक्तिः—**एवं चेति**। अनित्यप्र[5]त्यक्षत्वादेः कार्यतावच्छेदकत्वेनानित्यप्रमात्वस्य तद्व्यापकत्वे साध्यमाने सतीत्यर्थः—**बाधक इति**।

---

[1] 'प्रमात्वस्य' इति नास्ति **मु-च**. [2] तामादाय—**छ**. [3] रूप इत्यधिकं—**कुं**. [4] नुमानेह—**अ**. [5] प्रमात्व'दे—**आ**.

प्रत्यक्षप्रमायामिन्द्रियार्थसन्निकर्षस्यार्थस्य च अनुमितिप्रमायां यथार्थलिङ्गपरामर्शस्य शाब्दप्रमायां-यथार्थवाक्यार्थज्ञानस्य च गुण[1]स्यानुगमात् । भ्रमेत्वर्थोऽसन्निति न हेतुर्न वा [2]तस्य सन्निकर्ष इति चेदुच्यते ।

प्रत्यक्षप्रमामात्रे न सन्निकर्षार्थौ हेतू । शुक्तौ रूप्यभ्रमकालेपि[3]तयोः सत्वेन शुक्तित्वेन शुक्तिप्र-

---

स्वावच्छिन्नकार्यतानिरूपितैककारणाभावरूपबाधकसत्वाद्बाधकं विनेत्युक्तविशेषणासि[4]द्धिरिति भावः ॥

मण्याद्युक्तमेवाह—**प्रत्यक्षेति** । अनित्येति योज्यम्—**गुणस्येति** ॥ अन्वयव्यतिरेकादिति मण्युक्तेरिति भावः । सादृश्यज्ञानमुपमितौ गुण इति मण्युक्तमप्यत्र नानूदितम् । उपमानस्यानुमानानतिरेकस्यान्यत्र व्यक्तत्वात्—**सन्निकर्षार्थाविति** । अल्पनिरासत्वात्सन्निकर्षस्य पूर्वं निर्देशः ।

यद्वा "नासिकास्तनयोर्ध्माधेटो" रित्यादिनिर्देशेन "अल्पाच्तरं पूर्वं" इत्यस्य प्रायिकत्वाद[5]र्थस्य यौ सन्निकर्षाविति भ्रमनिरासायैवं निर्देशाददोषः ।

अन्वयव्यभिचारमाह—**शुक्ताविति** । तयोः शुक्तिरूपार्थतत्सन्निकर्षयोरित्यर्थः । इदंत्वेन प्रमात्व[6]स्य सत्त्वाच्छुक्तित्वेनेत्युक्तिः । * [7] तथाचानुगतहेत्वभावरूपबाधकस्यैव भावाद्बाधकं विनेत्यसिद्धमिति-

---

[1] स्य चा–**छ**. [2] तत्र–**मु-च**. [3] अपिपदं नास्ति–**छ**. [4] द्धेरि–**कुं**. [5] ददोषः–**अ**. [6] स्येष्टत्वाच्छु–**मु**. स्येष्टत्वादाह–**शुक्तित्वेनेति**–**आ**. [7] इयं पङ्क्तिर्नास्ति–**अ**.

माप्रसङ्गात्। दोषः प्रतिबन्धक इति चेत्तर्ह्यावश्यकत्वाद्दोषाभावादेव प्रमास्तु।

किञ्च षड्विधसन्निकर्षान्यतरद्योगिप्रत्यक्षादौ प्रत्याभिज्ञायां च तत्तादौ नास्ति। तत्र च योगजधर्मसंस्कारादिः प्रत्यासत्तिश्चे[1]त्तर्हि भ्रमेपि दोषस्तथा स्यात्।

भावः*। मण्यादिना दाहाभावेपि वह्नेर्दाहाहेतुत्वाभाववदिहाप्यहेतुत्वं न सन्निकर्षादेः प्राप्यत इति भावेनाशङ्क्य निराह—**दोष इति**। **दोषाभावादेवेति**। तस्य चानित्यप्रमामात्रेऽनुगतहेतुत्वात्किमुक्तकुसृष्टयेति भावः।

नन्वेवं दाहस्थलेपि मण्याद्यभाव एव हेतुः स्यान्न वह्निः। अन्वयव्यतिरेकबलाद्वह्नेर्दाहहेतुत्वे सन्निकर्षादेरप्यस्तु हेतुत्वम्। सन्निकर्षोत्कर्षेण प्रमोत्कर्षदर्शनाच्चेति चेत्। किमत्र सन्निकर्षपदेन लौकिक एवाभिमतोथालौकिकप्रत्यासत्तिसाधारणं सन्निकर्षमात्रमिति [2]कल्पौ हृदि कृत्वाऽऽद्ये व्यतिरेकव्यभिचारमाह—**किञ्च षड्विधेति**॥ संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवाय[3]समवेतसमवाय विशेषणविशेष्यभावरूपेत्यर्थः। अन्यतरदित्यस्य प्राग्वत्साधुत्वं ध्येयम्। योगिप्रत्यक्षादावित्यादिपदेन सामान्यज[4]प्रत्यक्षग्रहः। प्रत्यभिज्ञायामित्युपलक्षणम्। सुरभिचन्दनमित्यादिप्रत्यक्षं च ग्राह्यम्। तेन तत्तादावित्यादिपदेनोपनीतगन्धादिग्रहः। द्वितीयमाशङ्क्यान्वयव्यभिचारेणनिराह—**तत्र चेति**॥ संस्कारादिरित्यादिपदेन ज्ञानसामान्ययोर्ग्रहः—**तथेति**॥ प्रत्यासत्तिरित्यर्थः। तथाच तादृशप्रत्यासत्तौ सत्यामपि

---

[1] द्वमे-छ-ग-क-ख-कुं. [2] विकल्पौ-अ-आ. [3] स्वस-मु. [4] जन्यप्र-आ.

किञ्च चक्षुरादिवत्कारणत्वेन धर्मिग्राहकमानासिद्धोऽर्थः सन्निकर्षेणान्यथासिद्धत्वादतीतादिविषयकयोगिप्रत्यक्षादावसत्वाच्च न प्रत्यक्षप्रमाहेतुः। अन्यथा वर्तमानविषयकानुमितावप्यर्थो हेतुः स्यात् ॥

[1] अपि च त्वन्मते भ्रमेपि यस्मिन्नंशे भ्रमत्वं तद्रजतत्वादिकं विशेषणं सदेव। वैशिष्ट्यं त्वसदप्यसत्ख्यातिभीतस्य तव मते न भाति[1] ॥

तत्र प्रमानुदयाद्व्यभिचार इति भावः।

एवमर्थस्याप्यनन्यथासिद्धान्वयव्यतिरेकौ न स्तः। अन्यथाख्यातिविचारे सुधोक्तरीत्या क्वचिद्विशेषणाभावात्क्वचिद्विशेष्याभावादिति भावेनाह—**किञ्चेति** ॥ ननु सन्निकर्षेणैवार्थोन्यथासिद्धश्चेच्चक्षुरादिरपि तथा स्यादित्यत उक्तं **चक्षुरादिवदित्यादि** ॥ रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावदित्यनुमानेन सिध्यच्चक्षुरादिकं करणत्वेनैव सिद्धम्। नत्वर्थ इति वैषम्यामिति भावः—**अतीतेति**। अतीतानागतविषयके योगिप्रत्यक्षे सामान्यजप्रत्यक्षे चेत्यर्थः—**अन्यथेति**। उक्तदिशाऽन्यथासिद्धयकल्पन इत्यर्थः ॥

अन्वयव्यभिचाराच्चार्थो न हेतुरिति भावेनाह—**अपिचेति**। **सदेवेति**। तथा च तत्रान्वयव्यभिचारान्नार्थः प्रमायां हेतुरिति भावः। ननु वैशिष्ट्यांश एव भ्रमत्वम्। तच्चासदेव। अतो न व्यभिचार इत्यत आह—**वैशिष्ट्यं त्विति**। **तवेति**। मणिकृत इत्यर्थः। एतेन

---

[1] अयं ग्रन्थः नास्ति-**क.**

किञ्च त्वन्मते प्रत्यक्षप्रमायामपि विशेषणज्ञा-
नमेव हेतुर्न तु विशेषणम्। विशेष्यं तु भ्रमे [1]सदेव॥
ननु तथापि लौकिकप्रत्यक्षप्रमायां वैशिष्ट्य-

"भ्रमे त्वर्थोऽसन्निति न हेतुः" इति प्रागुक्तं प्रत्युक्तम्॥

[2]ननु विशेषणमन्यत्र सदपि पुरतोऽसदेवेति चेत्तर्हि विशेषण-मर्थश्चेदसम्भवि। विशेष्यं चेद्व्यभिचारीत्याह—**किञ्चत्वन्मत इत्या-दिना। सदेवेति।** तथाच शुक्तित्वेन शुक्तिप्रमास्यात्। नास्ति च सा अतो न विशेष्यरूपोर्थः प्रमायां गुणतया हेतुरिति भावः॥

[3]* ननु मणिकृन्मते वैशिष्ट्यरू[4]पार्थ एव प्रमारूपजन्यप्रत्यक्ष-मात्रे गुणोस्तु। भ्रमे च वैशिष्ट्यरूपोर्थः पुरतोऽसन्निति तस्य भ्रमा [5]हेतुतया भ्रान्तेः प्रमात्वानापत्तिः। अन्यत्र सत्वेन भ्रान्तौ भानोप-प[6]त्तेश्चेति चेन्न। यत्र [7]क च न सत्वमात्रेण तद्गोचरजन्यप्रत्यक्षं प्रत्यनन्यथासिद्धनियतपूर्वक्षण [8]वृत्तित्वाभावेन हेतु [9]त्वानिर्धारणात्पुरतोऽ-सत्वेनाहेतुत्वस्य सन्निकर्षाभावेनोपपत्त्या पुरतस्सत्वस्य सन्निक[10]र्ष एवो-पयोगेन [11]सर्वथापि [12]तदहेतुत्वस्यैव[13] न्याय्यत्वाच्चेति ध्येयम्*।

[14]प्राचां मतमाशङ्कते—**नन्विति। उक्तत्वादिति।** चक्षुरादि-वदित्यादिना ग्रन्थेनेत्यर्थः। [15]वैशिष्ट्यरूपोर्थोर्थपदेन न विवक्षितुं शक्यः। किन्तु विशेषणं विशेष्यं वा[15]। [16]तच्चान्वयव्यभिचारान्न

[1] पि-**ग-क-च-छ.** [2] अर्थो हेतुरित्यत्रार्थपदेन किं विशेषणमभिहितमथ विशेष्यं तदुभयवैशिष्ट्यं वा आद्यद्वितीयौ प्रत्याह-**अ.** [3] अयं ग्रन्थः नास्ति-**अ.** [4] पोर्थ-**कुं-अ-आ.** [5] महे-**मु.** [6] त्तिश्च-**कुं आ.** [7] चित्स-**मु,** कुत्रचित्स-**आ.** [8] वर्ति-**कुं-अ.** [9] ता निवारणात्। पु,-**मु-आ..** [10] र्षोप-**मु-आ.** [11] सर्वत्रापि-**आ.** [12] प्यर्थाहे-**मु-आ.** [13] स्यन्या-**मु-स्यैव** सत्वाच्चे-**आ.** [14] तृतीयं शङ्कते-**अ.** [15] इयं पङ्क्तिर्नास्ति-**अ.** [16] तभ्रमे अन्वयव्यभिचाराच्च नार्थःप्रमाणं हेतुरिति भावेनाह-**अ.**

रूपोऽर्थो गुणः । भ्रमे तु चिरन्तनमतेऽसदपि वैशिष्ट्यं सदुपरक्तत्वेन भातीति चेन्न । अर्थो न हेतुरित्युक्तत्वात् ॥

किञ्च यद्वैशिष्ट्यमसत् न तदंशे त्वन्मते बाधस्तत्प्रयुक्तभ्रमत्वं वा सम्भवति। त्वन्मतेऽसतोऽभावविरहात्मत्वरूपप्रतियोगित्वाभावेन स्वप्रतियोगिकाभावप्रमारूपबाधायोगात् । यत्र तु रजतत्वांशे [1]ते सम्भवतः न तदसदिति नार्थो भ्रमव्यावृत्तो हेतुः । एवं बाष्पे धूमभ्रमेणोत्पन्नायां यादृच्छिकसंवादेन प्रमायामनुमितौ न यथार्थलिङ्गपरामर्शोस्ति ।

प्रमायां हेतुरिति भावेनाह—**किञ्चेति** । यदिति [2]भिन्नं पदं—**त्वन्मते** । प्राचीनतार्किकमते—**स्वप्रतियोगिकेति** । प्रामाणिकस्य घटादेरेवात्यन्ताभावोपगमेनाप्रामाणिकात्यन्ताभावानङ्गीकारात् । तदनङ्गीकारे हेतुरभावविरहेत्यादि । बाधायोगादित्युक्त्या तत्प्रयुक्तभ्रमत्वस्याप्ययोग उक्तप्राय इति भावः । **त इति** । [3]बाधभ्रमत्वे इत्यर्थः । उक्तरूपबाधयोगादेव तत्प्रयुक्तभ्रमत्वं च सम्भवतीति भावः । प्रत्यक्षप्रमायामनुगतगुणासम्भवमुक्त्वा "दृश्यते च यादृच्छिकसंवादिना गुणाभावोपि[4] प्रमाजनकत्वं" इति तत्वनिर्णयटीकां विवृण्वन्ननुमितावपि प्रागुक्तानुगतगुणं निराह—**एवमित्यादिना** ॥

[1] तत्सं–छ. [2] न्यप–आ-कुं. [3] 'बाधभ्रमत्व इत्यर्थ' इति नास्ति-आ. [4] भ्रमाज–अ.

नचेश्वरे सोस्तीति वाच्यम् । उक्तरीत्या दोष-जन्यत्वस्यापि सत्वेन भ्रमत्वस्याप्यापत्तेः । ईश्वर-ज्ञानस्य सत्य[1]परामर्शत्वेन कारणत्व[2]कल्पनस्य पर-तस्त्वसिद्ध्यधीनत्वेनान्योन्याश्रयाच्च । भ्रमघटा-दिसाधारणेनोपादानाद्यपरोक्षज्ञानत्वेन कारणत्वे[3] च तस्य न गुणता । अन्यथास्मदादिनिष्ठानां संशयप्रत्यक्षानुमिति[4]निर्विकल्पकानां यथाक्रम-मीश्वरनिष्ठैर्विशेषदर्शनलिङ्गपरामर्शवाक्यार्थज्ञान--

ननु समानाधिकरणस्य तस्य तत्राभावेपि कार्यमात्रं प्रति कारणस्येश्वरीयज्ञानस्य सलिङ्गविषयकस्य तत्रापि सत्त्वमस्ति सामा-नाधिकरण्यस्याप्रयोजकत्वात् । अतो न व्यतिरेकव्यभिचार इति भावेनाशङ्क्य निराह—**नचेति । दोषेति** । अस्मदी[5]यासलिङ्गपरा-मर्शरूपेत्यर्थः ।

ईश्वरज्ञानमपि किं सलिङ्गपरामर्शत्वेन हेतुरुतोपादानादिज्ञान-त्वेन । आद्ये दोषमाह--**ईश्वरेति** । अन्त्ये तु न तस्य गुणत्वेन हेतुत्वम् । तथात्वे भ्रमस्यापि गुणजन्यतापात्तिरिति भावेनाह—**भ्रमेति** । भ्रमसाधारणेन घटादिसाधारणेनेत्यर्थः । उपादानादिप्रत्यक्षत्वेन हेतु-तेत्युपपादनाय घटादीत्युक्तिः । विपक्षेऽनिष्टप्रसङ्गद्योतनाय भ्रमेत्युक्तिः । अतिप्रसङ्गान्तराण्याह—**अन्यथेति** । तेनापि रूपेण हेतोस्सलि-ङ्गविषयकत्वमात्रेण गुणत्व इत्यर्थः ।

येन केनापि रूपेण हेतोरपीश्वरज्ञानस्य गुणत्वकल्पनेतिप्र-

---

[1] लिङ्गपरा-**मु-च**. [2] त्वस्य-**कुं-क-ग-छ-ख**. [3] न तस्य गुणता-**मु-ग-क-च**. [4] शाब्दज्ञाननिर्वि-**ग**. [5] यसर्लि-**मु-आ**. 'अस्मदीयेति नास्ति' **अ**.

विशेषज्ञानैर्जन्यत्वाद्यथाक्रमं निश्चयत्वानुमितित्व-शाब्दज्ञानत्वसविकल्पकत्वानि स्युः ।

अपिचैवं व्यधिकरणस्य [1] परामर्शस्य गुणत्वे दोषत्वमपि तस्यैव[2] स्यात् । सामानाधिकरण्यस्याप्रयोजकत्वात् । तथाचाभासानुमितिमूलत्वेन नित्यभ्रमः सिद्ध्येत् । किञ्चैवं सति स्थाणौ करादिविपर्ययजन्यस्य पुरुषत्वभ्रमस्येश्वरनिष्ठया वक्रकोटरत्वादिप्रमया जन्यत्वात्स्थाणुप्रमात्वं स्यात् ।

सङ्गान्तरं चाह—**अपिचेति** । एवमित्यस्य व्यक्तीकरणं व्यधिकरणस्येत्यादि ।

नित्यभ्रम इति । ननु सति सम्भवे त्यागायोगात्तत्र समानाधिकरण[3]एवासल्लिङ्गपरामर्शरूपदोष[4]सम्भवान्न व्यधिकरणदोषकल्पनेति चेन्न । गन्ध[5]प्रागभावावच्छिनो घटो गन्धवान् पृथिवीत्वादित्यादा[6]वाभासानुमितौ समानाधिकरणदोषासम्भवे व्यधिकरणस्यैव[7] कल्प्यत्वेऽनुगतिलाभाय सर्वत्र तस्यैव दोषत्वकल्पनौचित्यादिति भावः ।

ननु गुणे सामानाधिकरण्यमप्रयोजकम् । दोषे तु तन्नियमः प्रयोजकः । गन्धप्रागभावावच्छिन्न इत्यादौ [8]बाधितत्वप्रमादिरेव काश्चित्कल्प्यत इत्यत आह—**किञ्चैवं सतीति** । व्यधिकरणस्यापि गुणस्य हेतुत्वे सतीत्यर्थः ।

स्थाणुप्रमात्वमिति । न च तत्र समानाधिकरणो दोषः

[1] परामर्शस्येति नास्ति-कुं. [2] तवेत्याधिकं-क. [3] णस्येवासल्लिं-कुं. [4]षस्य सं-कुं. [5] नायं प्राग-अ. [6] वभावानु-आ. [7] दोषत्वकल्पनौ-अ. [8] बाधितत्व इति नास्ति-आ.

ननु तर्ह्यनुमितिसमानाधिकरणं वस्तुतःसाध्यव्याप्यवतः पक्षस्य व्याप्यवत्त्वेन ज्ञानं गुणोस्त्विति चेन्मैवम् । लाघवेन वस्तुतः साध्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । स च विषयसत्वोपहितत्वान्न गुण इत्युक्तम् ।

किञ्च [1]प्रागभावावच्छिन्नो घटो गन्धवान् पृथवीत्वादित्यनुमाने वस्तुतोऽनेककर्तृके लाघव-

---

प्रबल इति शङ्क्यम् । यादृच्छिकसंवादिनि प्रमानुदयापातात् । न चारोपे सति निमित्तानुसरणमिति न्यायेन तत्र[2] प्रमात्वादृष्ट्या न विशेषप्रमात्वेनेश्वरज्ञानं हेतुरिति युक्तम् । प्रामाण्यस्य स्वतस्त्वे नाप्युपपत्त्या ईश्वरज्ञानस्याप्यनुमितिप्रमायां न गुणत्वेन हेतुत्वमिति सुवचत्वादिति भावः ।

एवं यादृच्छिकसंवादिनि पूर्वोक्तगुणव्यभिचारमुक्त्वा [3]तत्स्थैर्याय व्यधिकरणस्य गुणत्वमनेकदोषोक्तया निरस्येदानीं प्रकारान्तरेण तत्र गुणव्यभिचाराभावमाशङ्क्य दोषान्तरमाह । **नन्वित्यादिना** । यादृच्छिकसंवादिनि धूमाभावेपि वह्निव्याप्यस्यालोकादेः सत्वेन तादृशे [4]पक्षे बाष्पे धूमज्ञानं व्याप्यवत्वज्ञानं भवतीति न तत्र व्यभिचार इति भावः—**वस्तुत इति** । वस्तुतः साध्यवान् [5]यः पक्षः तादृशपक्षज्ञानेनैवेत्यर्थः—**स चेति** । उक्तरूपपक्षस्य ज्ञानमित्यर्थः । तच्चेति वक्तव्ये विधेयगुणा[6]पेक्षया पुल्लिङ्गप्रयोगः ।

उक्तरूपगुणस्यान्वयव्यभिचारं चाह—**किञ्चेति । अनेकेति ।**

---

1 गन्धप्रा–ग-ख-च-छ-क. 2 तत्प्र–मु-अ. 3 त्सौकर्या-मु. 4 दोषान्तरप-अ. 5 यः इति नास्ति–कुं-अ. 6 णपदापे–अ.

तर्कानुग्रहादेककर्तृकत्वविषयानुमानेचोक्तगुणस - द्भावात्प्रमा ज्ञायेत ।

न च बाधा[1]भावसहकृतसत्यपरामर्शादिर्गुण इति वाच्यम् । आवश्यकत्वाद्बाधा[2]भावेनैव प्रमात्वसम्भवेन गुणस्य हेतुत्वासिद्धेः । एवं विप्रल-

---

प्रासादः सकर्तृकः कार्यत्वात् घटवदित्य[3]नुमान इत्यर्थः—**उक्तेति** । वस्तुतः साध्यव्याप्यवत इत्यादिनोक्तेत्यर्थः ।

एतेन पक्षतावच्छेदकावच्छेदेन ज्ञाप्यवति पक्षे लिङ्गज्ञानं गुण इति रुचिदत्तोक्तं निरस्तम् । वस्तुतोनेककर्तृकइत्यादिनोक्तदोषानतिलङ्घनात् । लाघवेन वस्तुतो ज्ञाप्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । तस्य च विषयसत्वोपहितत्वेनागुणत्वात् ।

एतेनैव पक्षतावच्छेकाविरोधिसाध्यकानुमितिप्रमायां यथार्थलिङ्गपरामर्शो गुण इति पक्षधरोक्तमपि प्रत्युक्तम् । गन्धप्रागभावेत्युक्तस्थले त्वदुक्तगुणे सत्यपि पक्षतावच्छेदकाविरोधिसाध्यप्रमाया अनुदयात्—**बाधाभावेनैवेति** । स च विषयसत्व[4]पर्यवसन्न इति न गुण इति भावः ॥

एतेन बाधितत्वज्ञानं गुण इति प्रत्युक्तम् । विषयसत्वोपहितत्वात् । घनगर्जितस्थले व्यभिचाराच्च । " दृश्यते च यादृच्छिकसंवादिनोऽनाप्तवाक्यस्य गुणाभावेपि यथार्थज्ञानजनकत्वं " इति तत्वनिर्णयटीकावाक्यं विवृण्वानः प्रागुक्तं शाब्दप्रमायामप्यनुगतगुणं निराह—**एवमिति** । घटोस्तीति वक्तव्ये प्रमादादिना पटोऽस्तीत्युक्तवाक्यमादिपदार्थः ॥

---

[1] धका–क-छ. [2] धका–क. च. [3] त्यानु–आ. [4] एवप–आ.

म्भकादिवाक्यजन्यायां शुकादिवाक्यजन्यायां च यादृच्छिकसंवादेन प्रमायां न यथार्थवाक्यार्थ-ज्ञानमस्ति । [1]न च तत्रापीश्वरे तदस्तीति शङ्क्यम् । व्यधिकरणगुणजन्यत्वेन प्रमात्ववत्स-मानाधिकरणदोषजन्यत्वेनाप्रमात्वं च स्यादित्या-द्यतिप्रसङ्गात्[1] । किञ्च तद्धि न साक्षाच्छाब्दप्रमा-जनकम् । वक्तृनिष्ठे तस्मिंश्चिरध्वस्तेपि श्रोतरि प्रमोत्पत्तेः । किन्तु वाक्यरचनाद्वारा । रचनायां च न तत्कारणम् । शुक[2]बालादीनामिव तादृश-पदावलीज्ञानमात्रेण तदुपपत्तेः ।

ननु तद्वाक्ये तादृशगुणाभावेपि [3]तज्जातीये वाक्यान्तरेऽस्ती-त्यतस्तत्रापि तस्य न हेतुत्वमित्याह – किञ्चेति । चिरध्वस्तेपि तस्मि-न्निति पूर्वेणान्वयः ॥

ननु कार्यमात्रं प्रति कारणीभूतमीश्वरज्ञानमेव यथार्थवाक्यार्थ-[4]ज्ञानरूपं सद्रचनाद्वारा प्रमां प्रति गुणत्वेन कारणमस्तु । अतो न यादृच्छिकप्रमायां व्यभिचारः । नापि तेन विना वाक्यरचनोपपत्तिः । तस्य कार्यमात्रं प्रति हेतुत्वेन रचनायां तज्जन्यप्रमायां च हेतुत्वात् । शुकादिवाक्यजन्यप्रमायामपीश्वरीयप्रमामादायैव न व्यभिचार इति तदीयव्याख्या[5]त्रुक्तेः । " भ्रान्तप्रतारकवाक्ये [6]शुकादिवाक्ये चेश्वरस्यैवं यथार्थवाक्यार्थज्ञानं जनकं " इति मण्युक्तेरिति भावेन शङ्कते ।

---

[1] अयं ग्रन्थः नास्ति–कुं ग-ख-क-छ. [2] वाक्यादी–कुं. [3] " यथार्थ-ज्ञानजनकत्वं इति तत्वनिर्णयटीकां विवृण्वानः " इत्यधिकमस्ति–आ. [4] ज्ञानपदं–न. आ. [5] भिन्नं पदं–मु. [6] शुकादिवाक्येचेति नास्ति–आ.

न च तत्रापीश्वरनिष्ठं यथार्थवाक्यार्थज्ञानं रचनाद्वारा हेतुरिति वाच्यम्। तस्य ज्ञानसामान्यं भ्रमं च प्रतीवोपादानापरोक्षत्वेनैव हेतुतया प्रमां प्रत्यसाधारण्याभावात्। अन्यथोक्तातिप्रसङ्गात्। विसंवादिशुकादिवाक्यरचनाहेतुत्वेन भ्रमोपि कल्प्यत इति नित्यप्रमावन्नित्यभ्रमप्रसङ्गाच्च॥

ननु शाब्दप्रमायां योग्यता तत्प्रमा वा गुणः। स च सर्वत्र प्रमाणवाक्येऽस्तीति चेन्न। मदिष्टवेदापौरुषेयत्वाविरोधिनस्त्वदिष्टेश्वरसिद्धिविरोधिनश्चैवंविधगुणजन्यत्वस्य साधनेऽर्थान्तरात्॥

न च तत्रापीति। यादृच्छिकसंवादिन्यामपीत्यर्थः—उक्तेति। अन्यथाऽस्मदादीत्यादिनोक्तेत्यर्थः॥

"वयन्तु ब्रूमः" इत्युपक्रम्य "[1]शाब्दप्रमायां वक्तुर्यथार्थवाक्यार्थज्ञानं न गुणः। किन्तु योग्यत्वादिकं यथार्थतज्ज्ञानं वेति मण्यु[2]क्तं पक्षान्तरमाशङ्कते। नन्विति। योग्यता स्वरूपसती न हेतुरतो न गुणः, इत्यतस्तत्प्रमा[3]वेत्युक्तम्—त्वदिष्टेति।

"प्रमायाः परतन्त्रत्वात्सर्गप्रलयसम्भवात्।
तदन्यास्मिन्ननाश्वासान्नविधान्तरसम्भवः॥"

इति कुसुमाञ्जल्युक्त्या प्रामाण्यपरतस्त्वस्येश्वरसिध्यर्थत्वोपगमा[4]द्यथार्थवाक्यार्थज्ञानस्य गुणत्वपक्ष एव वेदे तादृशयथार्थवाक्यार्थज्ञा[5]नत्वेने[6]श्वरसिद्धेरिति भावः॥

---

[1] शब्द-मु-अ. [2] क्तपक्ष-कु-आ. [3] चेत्यु-अ-आ. [4] दिति भावः। ननु-अ. [5] नत्वेने-मु. [6] शज्ञानत्वेने-आ.

किञ्च योग्यता [1]किं शब्दप्रतिपाद्यस्य संसर्गस्य सत्वं किं वा संसर्गसत्वाविनाभूतं धर्मान्तरम् ॥

नाद्यः । शाब्दप्रमायां शाब्दप्रमाया वा तद्विषयस्य वाऽजनकत्वात् । विषयसत्वस्य प्रमात्वान्तर्गतत्वेन तद्धेतुत्वायोगाच्च । [2]प्रत्यक्षादिप्रमास्वपि [3]नियतविषयसत्वस्य सद्भावेन त्वदुक्तस्य शाब्दा[4]साधारण्यस्यायोगाच्च । अप्रमायामपि विषयासत्वस्यैव दोषत्वापाताच्च[2] ।

ननु "न वैदिकप्रमाया गुणजन्यत्वेनेश्वरसिद्धिः" इति मणिकृदुक्तेरेतन्मते हेत्वन्तरेणा[5]स्त्वीश्वरसिद्धिरित्यत आह—किञ्चेति । "वाक्यार्थाबाधो योग्यता" इतीहैव प्रामाण्यवादे मण्युक्तेराद्यः कल्प । योग्यता[6]बाधोक्त्यनुरोधेनान्त्यः—धर्मान्तरमिति । एतच्चाग्रे व्यक्तम्—अजनकत्वादिति । आद्य आत्माश्रयात् । अन्त्येऽतीतादिसाधारण्या[7]दिति भावः । [8]तद्धेतुत्वायोगाच्चेति । आत्माश्रयादिति भावः[8]—विषयासत्वस्यैवेति । गुणविरोधिन एव दोषत्वादनुगतिसम्भवाच्च । तथाच भ्रमे[9]ऽसतोपि भानं त्वयापि स्वीकार्यम् । अन्यथा भ्रमत्वमेव न स्यादिति भावः ॥

ननु शुकबालादिवाक्यजन्यप्रमायामन्यस्य प्रमात्वप्रयोजकस्याभावादनन्यगत्या विषयसत्वरूपापि[10] योग्यतैव गुणः इत्येव वाच्यमित्यत

---

[1] किं शब्दो न-छ. [2] अयं ग्रन्थो नास्ति-ख. [3] नियतपदं नास्ति-च-छ. [4] ब्दप्रमाऽसा-मु-च. [5] णेश्वर-आ. [6] बादो-कुं. [7] अभावेत्याधिकमस्ति-कुं. [8] इयं पङ्क्तिर्नास्ति-अ. [9] प्यस-मु-अ. [10] अपिपदं न-आ.

आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तेश्च ॥

नान्त्यः । त्वया ह्येकपदार्थसंसर्गेऽपरपदार्थ-निष्ठात्यन्ताभावप्रतियोगित्व[1]प्रमाविशेष्यत्वाभावो वा एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं वा योग्यतेत्युक्तम्॥

आह—**आवश्यकेनेति** । वक्तु[2]र्भ्रमविप्रलम्भादिदोष[3]भावे योग्यता या अप्यभावेन तदर्थं तस्यापेक्षणीयत्वेनावश्यकत्वमिति भावः योग्यतावादोक्तमाह—**एकेति** ॥

जलेन सिञ्चतीत्यादौ सेकरूप[4]एकोयः पदार्थः तत्संसर्गेऽपरपदार्थभूतजलनिष्ठात्यन्ताभावप्रतियोगी [5] सेकसंसर्ग इति कदापि प्रमित्यभावेनापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारिका[6] या प्रमा । तद्विशे[7]ष्यत्वाभावोस्तीति तद्योग्यवाक्यम् । वह्निना सिञ्चतीत्यादौ [8] तु सेकनिरूपितसंसर्गे वह्निनिष्ठात्यन्ताभावप्रतियोगी सेकसंसर्ग इति प्रमित्युदयेन तत्रापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वमेवास्तीति तदयोग्यवाक्यम् । अतो नाव्याप्त्यतिव्याप्ती । अत्र आकाशे शब्द इति योग्यवाक्ये शब्दनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वमवृत्तिपदार्थे अकाशेऽस्तीत्यव्याप्तिनिरासाय एक[9]पदार्थ इत्यनुक्त्वा एकपदार्थसंसर्ग इत्युक्तम् । आकाशसंसर्गस्तु न तथेति न दोषः । अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभाव इत्येव पूर्तौ तादृशप्रतियोगित्वप्रमाविशेष्यत

---

[1] प्रकारकप्रमा-मु-च. [2] कृभ्र.मु-अ. [3] षाभा-आ. [4] पोयः-कुं [5] सेकपदं नास्ति-अ-आ. [6] याः प्रमात्वात्-तद्वि-आ. [7] ष्याभा-कुं. [8] तु इति न-मु. [9] कः प-अ-आ.

तत्र चाद्य[1]पक्षेऽनन्वयप्रमाविरहो योग्यता-द्वितीये जलेन सिञ्चतीत्यत्र सेकानन्वयप्रतियोगितावच्छेदका येऽग्नित्वादयो धर्मास्तच्छून्यत्वं जले विद्यामानं योग्यतेति पर्यवस्यति। तत्र यद्यपि इदं द्वयं संसर्गसत्वाविनाभूतं न तु संसर्गरूपमिति न पूर्वोक्त[2]दोषः। तथाप्यत्र पक्ष-

---

प्रतिबन्धकमिति मतावष्टम्भेन तत्प्रमाविशेष्यत्वाभाव इत्यन्तमुक्तमित्याहुः॥

नरहरिस्तु उक्तात्यन्ताभावप्रतियोगित्वाभाव इत्येवोक्तौ वाक्यार्थ एव योग्यता स्यादिति तत्प्रमाविशेष्यत्वाभाव इत्युक्तमित्यब्रवीत्। तथाच योग्यतावादे स्पष्टयिष्यामः। घटसंसर्गत्वं गेहनिष्ठात्यन्ताभावप्रतियोगीति-प्रमाविषयत्वस्य घटसंसर्गेऽपि सत्वेन गेहे घटोस्तीति वाक्येऽव्याप्तिनिरासाय प्रमाविशेष्यत्वाभाव इत्युक्तम्॥

अत्र स्वपरसाधारणप्रमाविशेष्यत्वाभावनिश्चयस्याशक्यत्वात्प्रमा-प्रवेशे गौरवाच्चेत्यादिदोषाद्वितीयं लक्षणम्। वन्हिसंसर्गत्वं हि सेकपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मः तच्छून्यत्वं जलसं[3]-योगेऽस्तीति जलेन सिञ्चतीत्यादिवाक्यं योग्यम्। अग्निनेति वाक्यं त्वयो-ग्यमिति नाव्याप्त्यादिदोषः। अत्रो[4]क्तरूपप्रतियोगि[5]त्वाभावस्य वाक्या-र्थरूपसंसर्गसत्वपर्यवसन्नतया तज्ज्ञानस्य शाब्दप्रमायामहेतुत्वादेतत्प्रति-योगितावच्छेदकधर्मशून्यत्वमित्युक्तम्॥

अनन्वयेति। एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियो-गित्वस्यानन्वयरूपत्वादिति भावः—अग्नित्वादय इति। अग्नित्व-

---

[1] व्यस्तं पदं—ख-ग-क-च-छ. [2] क्ता दोषाः—छ. [3] सर्गेऽस्ती—आ.
[4] अत उक्तं—मु. [5] ताभावा—आ.

वयेऽनन्वयप्रमाविरहो वा अनन्वयप्रमाविरहप्रमा वा अनन्वय प्रतियोगितावच्छेदकधर्मशून्यत्वं वा तच्छून्यत्वप्रमा वा गुण इति फलिता[1]र्थः। स चायुक्तः। आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तौ संसर्गव्याप्यस्य संसर्गाभावप्रमाविरहस्य वा तत्प्रमाया वा संसर्गाभावप्रतियोगितावच्छेदकधर्मशून्यत्वस्य वा तत्प्रमाया वा गुणत्वकल्पनेऽतिगौरवात्। न हि निर्दोषत्वे सति तयोर्वा तत्प्र-

---

मृत्वपाषाणत्वादयः। सेकानन्वयः सेकनिष्ठान्वयाभावः। अग्नि "संसत्वादेः सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्याग्नित्वादिधर्मनिबन्नत्वादग्नित्वादय इत्युक्तम्। प्रतियोगितावच्छेदका इत्यस्याधिकरणतवच्छेदका इत्यर्थ इत्य[3]प्याहुः। "योग्यता तत्प्रमा वा" इति प्रागुक्तकल्पद्व[4]योक्त्यनुरोधादाह। **अनन्वयप्रमाविरहो वेत्यादि। आश्यकेनेति।** उक्तप्रमाविरहादेर्वाक्यगतनिर्दोषत्वेनैव सम्भवादिति भाव **संसर्गव्याप्यस्येत्येतत्प्रमाविरहस्य** विशेषणम्। ननु निर्दोषत्वस्येव तयंरप्यन्वयव्यतिरेकसिद्धकारणत्वस्य त्यागायोगा[5]दित्यत आह। **न हीति तयोरिति।** उक्तरूपप्रमाविरहधर्मशून्यत्वयोरित्यर्थः। विसंवादिशुकदिवाक्येऽपि निर्दोषत्वं न सिद्धम्। भ्रान्त्यादिदोषाभावेप्यन्यस्य कचित्कल्प्यत्वादिति भावः। गुणजन्यत्वान्यथानुपपत्त्यै[6]व तत्कल्प्य

---

[1] तोऽर्थः—क-ख-च-छ. [2] निष्ठसं—आ. [3] त्याहुः—कुं. [4] यानु—अ
[5] ग इत्या—कुं-आ. [6] एवकारो नास्ति—मु-अ—त्यैतत्क—आ.

मयोर्वा व्यतिरेकेण शाब्दप्रमाव्यतिरेको दृष्टः । न च शाब्दप्रमाया गुणजन्यत्वमद्यापि सिद्धम् । येन तन्निर्वाहाय तयोर्वा तत्प्रमयोर्वा गुणत्वं[1] कल्प्यते[2] ॥

किञ्च प्रत्यक्षादावपि विषयसत्वाविनाभूतस्य विषयासत्व[3]प्रमाविरहादे· सत्वात्स एव गुणः स्यात् । अतीन्द्रियार्थसन्निकर्षादेर्गुणत्वोक्तिरयुक्ता स्यात् । तत्र सतोपि तस्य गुणत्वेन जनकत्वे मानं नेति चेत्समं प्रकृतेपि ॥

अपिचैवमप्रमायामपि विषयासत्वाविनाभूत-विषयाभावप्रमा वा विषयासत्वावच्छेदकधर्मवत्वं वा तयोः प्रमा वा दोषः स्यान्न तु काचादिः ॥

इत्यत आह—**न च शाब्देति** । **अद्यापीति**। अनुगतगुणकल्पनवेलायामपीत्यर्थः ॥

स्वतन्त्रान्वयव्यतिरेकाभावेऽपि हेतुत्वकल्पनेऽतिप्रसङ्गमाह—**किञ्चेति** । प्रमाविरहादेरित्यादिपदेन तत्प्रमावच्छेदकधर्मशून्यत्वतत्प्रमयोश्च ग्रहः—**सन्निकर्षादेरिति** । सन्निकर्षपरामर्श आदिपदार्थः ।

अपिचैवमिति । विषयसत्वाविनाभूतस्य गुणत्व इत्यर्थः—**विषयासत्वाविनाभूतेति** विषयाभावप्रमाविशेषणम्। प्रमाविशेष्यत्वमित्यर्थः—**तयोरिति** । विषयाभावप्रमाविषयासत्वावच्छेदकधर्मवत्वयोरित्यर्थः—**नत्विति** । तथाच भ्रमे काचादिर्दोष इति मण्याद्युक्तिरयुक्ता

---

[1] गुणजन्यत्वं-**ख.** [2] कल्प्येत-**ख-क-च-छ.** [3] प्रमापदं नास्ति-**ग.**

किञ्च शाब्दी [1]संसर्गप्रमा नियमेन संसर्ग-व्याप्यधीजन्या चेदनुमितिः स्यात् ॥

किञ्च असंसर्गप्रमाविरहो वाऽसंसर्गप्रमाविरह-प्रमा वा गुण इति मते अग्निना सिञ्चेदित्यादौ श्रोतुर[2]न्वयप्रमाविरहदशायां संसर्गप्रमा स्यात् ॥

स्यात् । तदन्वयव्यतिरेकविरोधश्च स्यादितिभावः ॥

ननु विषयासत्वाविनाभूतधर्म[3]प्रमादेर्विषयसत्वभ्रमविरोधित्वात्कथं दोषतेत्यतः संसर्गव्याप्यप्रमा गुण इति पक्षे दोषान्तरमाह—**किञ्च शाब्दी संसर्गप्रमेति** । पर्वतवन्हिसंसर्गादिप्रमावदिति भावः ॥

ननु संशयोत्तरप्रत्यक्षमिव व्याप्यधीजन्यमपि नानुमिति[4]रूपमिति चेन्न । *[5]तत्र बलवत्प्रत्यक्षकरणकत्वेन व्याप्यधीकरणकत्वाभावात् । इह च नियमेन व्याप्यधीजन्यत्वे तत्करणकत्वापातात् । न हि परामर्शोदपि शब्दः प्रत्यक्षसामग्रीव[6]द्बलवान् ॥

नच व्याप्यत्वप्रकारकज्ञानजन्यत्वेन तदजन्यत्वान्नानुमितित्वम् । नियमेन तज्जन्यत्वे तथात्वेन*[5] तज्जन्यत्वावश्यं भावात् । अन्यथा प्रमेयत्वादिनापि ज्ञाने तत्प्रमाया गुणत्वापत्तेः । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वापेक्षया[7] संसर्गव्याप्यत्वप्रमात्वस्य लघुत्वात् । अन्यत्र तेन रूपेण हेतुतायाः क्लृप्तत्वात् । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वस्य प्रमाया गुणजन्यत्वासिद्ध्यधीनत्वेनान्योन्याश्रयाच्चेति भावः ।

संसर्गव्याप्यप्रमा गुण इति पक्षं निरस्यासंसर्गप्रमाविरहो गुण इति पक्षेपि दोषमाह—**किञ्चासंसर्गेति** । कचित्तु असंसर्गप्रमाविरह-

---

[1] ब्दीयसं-ख. [2] नन्वयप्रमाविरहदशायां-क-ख-च-छ. [3] भ्रमा-अ.
[4] रूपपदं न-मु. [5] अयं ग्रन्थः लुप्तः-अ. [6] व बल-मु. [7] या असं-अ.

न च श्रोतुस्तद्विरहदशायामपीश्वरस्यासंसर्गप्रमास्ति सा च श्रोतुः संसर्गप्रमा[1]बन्धिकेति वाच्यम्। तथात्वे ईश्वरस्य वाक्यार्थप्रमा गुण इति चिरन्तनमतत्यागायोगात् ॥

किञ्चेश्वरस्यानन्वयप्रमा न तावद्विषयासत्वावेदनेन प्रतिबन्धिका। श्रोतुस्तदावेदनस्य व्यधिकरणया स्वरूपसत्येश्वरनिष्ठप्रमया कर्तुमशक्यत्वात्। नापि लिङ्गभूतया ज्ञातया तया तत्कर्तुं शक्यम्।

प्रमा वेत्यपि पाठः। तदा तूभयत्र दोषान्तरमाहेत्यवतार्य विरहदशायामित्यनन्तरं तत्प्रमादशायामित्यपिव्याख्येयम्—संसर्गप्रमास्यादिति। तथाचान्वयव्यभिचारान्नायं गुणत्वेन हेतुरिति भावः ॥

ननु तत्र सत्यप्युक्तरूपगुणे कार्याभावः प्रतिबन्धनिमित्तो नाहेतुत्वनिमित्त इति भावेनाशङ्क्य निराह—नचेति। चिरन्तनमतेति। "न वैदिकप्रमाया गुण्यजन्यत्वेनेश्वरसिद्धिः"। इत्यादिमण्युक्त्या प्रतीतश्चिरन्तनमतत्यागोऽयुक्तः स्यादित्यर्थः ॥

ननु व्यधिकरणस्य गुणत्वायोगेन त्यागेऽपिविरोधिविषयकत्वात्प्रतिबन्धकत्वं स्यादेवेत्यतो न युक्तं तदपीत्याह—किञ्चेति। प्रतिबन्धकत्वं किं विरोधिविषयज्ञापनरूपेणोत साक्षात्। आद्येपि किं स्वरूपसती वा ज्ञाता सती लिङ्गतया वेति विकल्प्याद्यद्वयं क्रमेण निराह—न तावादित्यादिना। तदावेदनस्य विषयासत्वज्ञापनस्येत्यर्थः। समानाधिकरणज्ञानेनै[2]तदावेदनस्य दृष्टचरत्वादिति भावः—लिङ्गभूतयेति। अग्निना सिञ्चेदिति वाक्येऽन्वयोऽसन् तथेश्वर-

---

1 [illegible] 2 [illegible]

तथात्वे ह्यनन्वयप्रमाज्ञानस्यैव प्रतिबन्धकत्वेन तत्प्रमाया अज्ञानदशायां संसर्गप्रमा स्यात्। नापि सा विषयासत्वमनावेद्य स्वरूपेणैव विषयसत्वविरोधित्वेन विषयसत्वगर्भितप्रमाप्रतिबन्धिका। तथात्वेऽनन्वयस्यैव साक्षाद्विषयसत्वविरोधित्वेन प्रमाप्रतिबन्धकत्वौचित्येन प्रमाग्रहणवैयर्थ्यात् ॥

किञ्च वस्तुगत्यानन्वयविषयाया अपि सर्वकार्यहेतुभूताया ईश्वरप्रमायाः शब्दप्रमां प्रत्यपि हेतुत्वेन कथं तत्प्रतिबन्धकत्वम्। न च प्रमाया गुणजन्यत्वमद्यापि सिद्धम्। येनेश्वरज्ञानस्योपादानापरोक्षज्ञानत्वेन हेतुत्वमनन्वयप्रमात्वेन तु प्रतिबन्धकत्वमिति कल्पेत ॥

किञ्चानन्वयप्रतियोगितावच्छेदकधर्मशून्यत्वम् प्रमागुण इति मते अतीन्द्रियविषये वाक्ये

प्रमाविषयत्वात्संमतवदित्येवं लिङ्गभूतेयत्यर्थः। अन्त्यपक्षं निराह—**नापि सेति** ॥

विरोधिविषयत्वेप्ययुक्तं प्रतिबन्धकत्वमित्याह—**किञ्च वस्तुगत्येति**। ननु प्रमाया गुणजन्यत्वान्यथानुपपत्त्यैव द्वैरूप्यमाकारभेदेनेश्वरप्रमायाः[1] कल्प्यत इत्यत आह—**न चेति** ॥

प्रागुक्तमतान्तरमपि प्रातिस्विकदोषेण निराह—**किञ्चेति**। **अतीन्द्रियेति**। "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवाक्ये-

---

[1] यां–आ.

संसर्गप्रमातः प्राक्तस्या असम्भवान्न[1] शाब्दप्रमा-हेतुता ॥

एतेनायोग्यताज्ञानेन शाब्दज्ञानप्रतिबन्धात् तद्विघटनीस्य योग्यताज्ञानस्य शाब्दधीहेतुत्वे सिद्धे तद्विशेषौ योग्यताप्रमाभ्रमौ शाब्दप्रमाभ्रमौ प्रति जनकाविति निरस्तम्। अयोग्यताया उक्त-रीत्या विषयाभावरूपत्वे बाधवद्विषयाभावव्याप्य-रूपत्वे सत्प्रतिपक्षवत्साक्षात्प्रतिबन्धकत्वसम्भवे

हेतुहेतुमद्भावादिरूपस्वर्गाद्यनन्वयप्रतियोगितावच्छेदकधर्मो ज्योतिष्टो-[2]मत्वादि र्न किन्तु कृषित्वादिरेवेति ज्ञानस्य तदन्वयप्रमित्यनन्तर-भावित्वेन तद्धेतुत्वमयुक्तमित्यर्थः। योग्यताज्ञानस्य हेतुत्वोपपादनयो-क्तमयोग्यतेत्यादि। साक्षादप्रतिबन्धकस्य कार्यानुकूलकिञ्चिद्विघटक-त्वरूपत्वात्प्रतिबन्धकत्वस्येति भावः। **तद्विशेषाविति**। "यत्सा-मान्ये यत्सामान्यं हेतुर्बाधकाभावे तद्विशेषयोरपि" इति न्याया[3]दिति भावः॥

एतेनेत्येतद्व्यनक्ति—**अयोग्य**[4]**तेति**। **उक्तरीत्येति**। "यो-ग्यता किं शब्दप्रतिपाद्यस्य [5]संसर्गस्य सत्वं" इत्यादिनोक्तरीत्येत्यर्थः—**विषयाभावव्याप्येति**। "एकपदार्थसंसर्गः" इत्यादिनोक्तरित्येत्य-नुषङ्गः। **योग्यताज्ञानेत्यादि**। तथाच योग्यताज्ञानस्यैव शब्द-ज्ञाना[6]हेतुत्वे "यत्सामान्य" इति न्यायानवतारान्न योग्यताप्रमाभ्रमौ गुणदोषौ सिद्ध्यत इति भावः॥

---

[1] तस्य शा-**मु-च.** [2] मादि-**कुं.** [3] दर्पाति-**मु.** [4] ताया इति-**कुं.**
[5] संसर्गपदं न-**अ.** [6] नहे-**अ.**

योग्यताज्ञानविघटकत्वकल्पकाभावात् । व्यभिचारज्ञानासंसर्गग्रहाप्रामाण्यज्ञानानि तु न साक्षदनुमितिप्रवृत्तिप्रतिबन्धकानि भिन्नविषयकत्वादित्यनुमितिप्रवृत्तिहेतुभूतव्याप्तिज्ञानसंसर्गग्रहप्रामाण्यज्ञानविघटकानि । तस्माच्छाब्दज्ञाने आकाङ्क्षाऽऽसत्ती अयोग्यतानिश्चयविरहश्च हेतवः । ते च भ्रमसाधारणाः । प्रमाणाबाधरूपा स्वरूप सती योग्यता तु प्रामाण्यान्तर्गतविषयसत्वात्मकत्वान्न गुणः । अप्रमा[1]सामग्रीतः प्रमासामग्र्यां विशेषस्तु निर्दोषत्वमेवे[2]ति वक्ष्यते । तस्मादनित्य-

---

नन्वेवं व्याप्तिज्ञानमप्यनुमितिहेतुर्न स्यात् । तथा वैशिष्ट्यज्ञानं प्रामाण्यज्ञानं च प्रवृत्तिहेतुर्न स्यात् । तद्विघटकस्य व्यभिचारज्ञानादेः साक्षादेवानुमितिप्रतिबन्धकत्वसंभवादित्यत आह—व्यभिचारेति । एवं योग्यतादेर्गुणत्वं निरस्य मणौ योग्यत्वादिकं गुण इत्यादिपदेन आकाङ्क्षाऽसत्त्योरप्यु[3]पादानं यत्तदप्ययुक्तमिति हेतुं वदन्नेवोपसंहरति—तस्मादिति । अयोग्यतानिश्चयविरह इति । न तु योग्यताज्ञानमित्यर्थः । विवरिष्यते चैतद्योग्यतावाद इति भावः । भ्रमसाधारण[4] इति हेतुगर्भम् । न गुण इत्यन्वयः । नन्वेवं गुणनिरासे कार्ये वैजात्यस्य कारणवैजात्यनिमित्त[5]त्वाज्ज्ञान[6]सामान्यसामग्र्या अप्रमायामपि सत्त्वेन प्रमासामग्र्या[7]मप्रमासामग्रीतो वैलक्षण्याभावे तत्कार्यवैलक्षण्यं न स्यादित्यत आह—अप्रमेति । निर्दोषत्वमेवेति ।

---

[1] ज्ञानसा–ख. [2] त्युक्तम्–कुं-ग. [3] प्युपपादनं–अ. [4] णा–कुं. [5] कत्वा–मु. [6] सामान्यपदं न–कुं. [7] ग्र्या अ–कुं-आ.

प्रमात्वपक्षकानुमानेष्विवानित्यप्रत्यक्षप्रमात्वादि - पंक्षकानुमानेष्वपि तदनुगतगुणाभावाद्बाधासिद्ध्यादीति ॥

[1]तदप्युक्तं "अन्यथा" इत्यादिना । अनुगतगुणाभावेपि जन्यप्रत्यक्षप्रमात्वादेः कार्यतावच्छेदकत्वे पूर्वोक्ता[2]व्यवस्थापातादित्यर्थः । [3]एवमुत्तरत्रापि[4]द्रष्टव्यम्[5] ॥

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः ॥ १३ ॥

यद्यपि दोषाभावोपि न प्रामाण्यहेतुरिति वक्ष्यते । तथापि भिक्षुपादप्रसारन्यायेन गुणहेतुत्वनिरासाय दोषाभावस्य प्रमानिमित्तत्वोक्तिरिति ध्येयम् । पूर्वोक्त्येति[5] । अनित्यप्रमामात्रे अनुगतगुणभङ्गान्तो[6]क्त्येत्यर्थः ॥

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः ॥ १३ ॥

यत्तूक्तं मणौ "[7]तत्तत्प्रमायां [8]भूयोवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम् । अन्वयव्यतिरेकात् । [9]तत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्ववत् प्रत्यक्षेविशेषदर्शनमपि गुणः । तदनुविधानात्" इत्यादितत्तात्पर्य[10]माशङ्कते—

---

[1] एतद्-क-ख-ग-च-छ. [2] नवस्था-छ. [3] एतन्नास्ति-मु-ग-च. [4] योज्यं-क-ख-छ. [5] क्तेति-कुं-आ. [6] क्त्येत्य-कुं-अ-आ. [7] तत्रप्र-मु-तत्प्र-आ-अ. [8] याः-कुं. [9] तद-अ. [10] र्थार्थ-अ-आ.

अथा[1]पि स्यात् भ्रमसामान्ये प्रत्यक्षादिभ्रमे [2]वानुगत[3]दोषस्याभावेपि तत्तद्भ्रमविशेषे पित्तादि[4]-रिव स्थूलावयविप्रत्यक्षप्रमायां भूयोवयवेन्द्रिय-सन्निकर्षः, संशयविपर्ययोत्तर[5]प्रत्यक्षप्रमायां विशे षप्रमा, नियमेन प्रमयोरनुमितिशाब्दप्रतीत्योः सत्यलिङ्गपरामर्शवाक्यार्थज्ञाने चान्वयव्यतिरे-काभ्यां हेतू। एवं च प्रमाया अप्रमाव्यावृत्ता-ननुगताधिकहेतुजन्यत्वात्परतस्त्वम्। त एवा-ननुगता हेतवः प्रमां प्रत्यसाधारणहेतुत्वे[6]नोपा-धिना गुणा [7]इत्युच्यन्ते। तस्मादनित्यप्रमा-त्वमनित्यज्ञानत्वप्रयोजकाधिकप्रयोज्यं तदन्वय-

---

अथापि स्यादित्यादिना। संशयेति। संशयोत्तरविपर्ययोत्तरे-त्यर्थः—विशेषेति। व्याप्येत्यर्थः। प्रमयोरिति प्रतीत्योर्विशेषणम्। तावता कथं प्रमात्वस्य [8]परतस्त्वमित्यत आह—एवं चेति। उक्त-सन्निकर्षादेर्हेतुत्वे सतीत्यर्थः। गुणजन्यत्वात्कथमेतादित्यत आह—त एवेति। असाधारणेति। भ्रमव्यावृत्तेत्यर्थः॥

मणिकृदभिमतमनुमानमाह—तस्मादिति। उक्तसन्निकर्षा-देर्गुणत्वेन तज्जन्यत्वेन प्रमायाः परतस्त्वसम्भवात्प्रयोग उच्यत इत्यर्थः—तदन्वयेति। उक्तरूपसन्निकर्षादिलक्षणाधिककारणपरामर्शः।

---

[1] अपिस्यात् इति नास्ति—ग. [2] च—क-कुं. [3] तस्यदो—मु-च-छ-ग. [4] कमिव—मु-च. [5] प्रत्यक्षपदं नास्ति—छ. [6] त्वो-मु-च-ग. [7] 'इति' इति-नास्ति—छ. [8] स्वतस्त्वमि—आ.

व्यतिरेकानुविधायित्वात्। अप्रमात्ववत्। अन्यथाऽप्रमापि प्रमा स्यात्। न चाप्रमाया[1]मधिको दोषो हेतुरस्तीति वाच्यम्। तथात्वे भ्रमस्य प्रमात्वप्रयोज[2]कजन्यत्वेसत्यधिकजन्यत्वेन प्रमाविशेषत्वापातादिति मम सिद्धान्तरहस्यमिति चेन्नैवम्।

भूयोवयवेन्द्रियसन्निकर्षे शङ्खत्वादिविशेषदर्शने च सत्यपि पीतःशङ्ख इत्यादिभ्रमस्य वंशे[3] रगभ्रमस्य बाष्पावयवे धूमावयविभ्रमेऽवयव्यंशे

हेतोरप्रयोजकत्वनिरासाय विपक्षे बाधकमाह—**अन्यथेति**। अनित्यज्ञानत्वप्रयोजकादधिकाप्रयोज्यत्वे तन्मात्रप्रयोज्यत्व इत्यर्थः। आपादकासिद्धिमाशङ्क्याह—**न चेति**। **प्रमात्वप्रयोजकेति**। अनित्येति योज्यम्। अनित्यज्ञानत्वप्रयोजकस्यैवानित्यप्रमात्वप्रयोजकत्वेन त्वदभिमतोरिति भावः—**इत्यादिभ्रमस्येति**। तिक्तो गुड इत्यादिरादिपदार्थः—[4]**वंशेति**। [5]अनुरगत्वस्य स्पर्शने दर्शने भूयोवयवेन्द्रियसन्निकर्षे सत्यपि [6]मण्डूकवसाक्तनेत्रस्य मण्डूकवसादोषेण जायमानस्य वंशे उरगभ्रमस्येत्यर्थः।

तदिन्द्रियजप्रत्यक्षप्रमायां तदिन्द्रियविशेषदर्शनं हेतुरिति विशेषदर्शनस्य हेतुत्वे भवेदेवं विशेषविवक्षा। तदेवायुक्तमिति "एवं भ्रमोत्तरप्रमायामपि" इत्यादिना वक्ष्याम इति भावेन स्थलान्तरेप्युक्तसन्निकर्षस्य व्यभिचारमाह— **बाष्पेति**। [7]* **धूमेति**। धूमरूपावयवीत्यर्थः।

---

[1] या अधि—**ग-कुं.** [2] काधिकप्रयोज्यत्वे सत्यप्यधिक—**मु-च.** [3] शे उर—**मु.** [4] विपरीतप्रत्यक्षं गुण इत्यत आह—**वंशेति-अ-आ.** [5] **अनुरगत्वस्य** इति नास्ति—**कुं.** [6] 'मण्डूकवसाक्तनेत्रस्य' इति नास्ति—**कुं.** *[7] अयं ग्रन्थः नास्ति—**मु-आ.** तदिन्द्रियजप्रत्यक्षप्रमायां तदिन्द्रियजविशेषधीतद्दर्शनं हेतुरित्यत आह—**बाष्पेति—अ.**

एव भ्रमस्य [1]दर्शनेनान्वयव्यभिचारात् ।

यदि च तत्र पित्तमण्डूकवसाञ्जनादिदोषप्रतिबन्धात्प्रमानुत्पत्तिस्तर्ह्यावश्यकत्वाद्दोषाभाव एव[2] हेतुः । मम तु दोषाभावेनाप्रमारूपविपरीतकार्यानुत्पत्तौ ज्ञानसामग्र्यैव प्रमोत्पत्तिः ।

यत्र स्थूलावयविप्रत्यक्षे भूयोवयवेन्द्रियसन्निकर्षो गुण इत्युक्तं तस्मिन्नेवेति विरोधस्फोरणायावयव्यंश एवेत्युक्तम् । [3]अञ्जनादीत्यादिपदेन सारूप्यादिग्रहः—दोषाभाव एवेति । यादृच्छिकसंवादिनि दोषाभाव प्रमाव्यभिचारीतितूत्तरभङ्गे निरसिष्यत इति भावः ॥

यत्तु सन्निकर्षाद्युत्कर्षेण प्रमोत्कर्षात्सन्निकर्षादिरेव हेतुरिति तन्न । उक्तस्थलेषु तदुत्कर्षे सत्यपि प्रमानुदयेन व्यभिचारात् ॥

ननु सिद्धान्ते दोषाभावस्य प्रामाण्यहेतुत्वादुक्तस्थले प्रामाण्यप्रयोजकज्ञानसामग्रीसत्वात्प्रमोत्पत्तिः स्यादित्यत आह—मम त्विति यद्वा तावतापि सिद्धान्ते स्वतस्त्वहानिरित्यत आह—मम त्विति ॥

[[4]विशेषदर्शनपदेन विशेषदर्शनसामान्यविवक्षायां प्रागुक्तान्वयव्यभिचारलगनेप्युक्तरूपविशेषदर्शनाविवक्षयां नोक्तदोषलगनमित्यतो [5]* अनौपाधिकभ्रमोत्तरप्रत्यक्षप्रमायामेव विशेषदर्शनं गुणोऽतो नोक्त दोष इत्यतो* विशेषदर्शनाभावे भ्रमोत्तरप्रमाभाव इति व्यतिरेकोन्यथा सिद्धो न विशेषदर्शनहेतुताकल्पक इति भावेन दोषान्तरमाह—

---

[1] चद-च-ग-ख. [2] 'तव' इत्यधिकं-छ-ख. [3] सन्निकर्षमात्रव्यभिचारोदाहरणमेतत्-अ. [4] कुण्डलितो ग्रन्थः नास्ति-मु. [5] अयं ग्रन्थ कुण्डलितः-कुं.

एवं भ्रमोत्तरप्रमायामपि तदनुत्तरप्रमायां या क्लृप्ता सामग्री भ्रमकाले सा न वर्तते चे[1]त्तदभावादेव कार्याभावो न तु विशेष दर्शनाभावादिति विशेषप्रमा न हेतुः। वर्तते चेद्विशेषदर्शनाभावेपि तदनुत्तरप्रमेव[2] तदुत्तरप्रमाप्युत्पद्येतैव। न हि कार्ये[3]वैचित्र्याभावेपि कालभेदमात्रेण विचित्रहेत्वपेक्षा।

यदि तदा संशयादिदोषः प्रतिबन्धकस्तर्ह्यावश्यकत्वाद्दोषाभावादे[4]व प्रमास्तु।

एवं भ्रमेति। संशयविपर्ययरूपभ्रमेत्यर्थः। प्रमायामपि न विशेष [5]प्रमाहेतुरित्यन्वयः। ननु भ्रमानुत्तरप्रत्यक्षसामग्र्या कथं तदुत्तरप्रत्यक्षप्रमा जायेतेत्यत आह—**न हीति**। **विचित्रेति**। विशेषदर्शनरूपेत्यर्थः—**संशयादीति**। विपर्यय आदिपदार्थः॥

ननु संशयस्य ग्राह्यसंशयपर्यवसन्नतया[6]प्रमाणापरिपन्थित्वात्कथं प्रतिबन्धकत्वशङ्का। अन्यथा तस्मिन्सति विशेषदर्शनादपि प्रत्यक्षानापत्तेरिति चेन्न। विशेषदर्शनविरहविशिष्टसंशयादेः प्रतिबन्धकत्वेन तदभिप्रायेण संशयादिदोषः प्रतिबन्धक इत्युक्तेः॥

दोषाभावादेवेति। ननु विशेषदर्शनविरहविशिष्टसंशयादिदोषाभावो हि संशयादिस्थले विशेषा[7]दर्शनरूप विशेषणाभावेनैव वाच्य इति विशेषदर्शनमेव पर्यवसन्नमिति चेन्न। तावता तस्य प्रतिबन्धक-

---

[1] चेत्सामग्र्य-**ग-कुं.** [2] मावत्तदु-**मु-च.** [3] र्यवै-**कुं.** [4] वसास्तु-**ग-कुं.** [5] प्रमापदं न-**आ.** [6] प्रामाण्या-**कुं.** [7] षद-**कुं. अ.**

किञ्च करादौ चरणादिभ्रमजन्ये संशयानन्तर-

रूपदोषाभावत्वेनैव हेतुत्वप्राप्तया तेन रूपेण हेतुत्वाप्राप्तेः । विशिष्टाभावसम्पादनेनान्यथोपक्षीणत्वाच्च ॥

रुचिदत्तादयस्तु भ्रमस्थले विशेषादर्शनसहकृतसंशयादेः प्रतिबन्धकत्वे संशयो[1]त्पत्तिकाले प्रत्यक्षापत्तिः । न च "यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिका" इति न्याया[2]त्तदा संशयसामग्रीप्रतिबन्धान्न प्रत्यक्षमिति वाच्यम् । [3]एवमपि धर्मिज्ञानकाले दैवात्पुरुषत्वादिज्ञानवतः पुरुषत्वादिनिश्चयापत्तेः । संशयस्य तत्सामग्र्या वा तदानीमभावात् । न च दोषस्य प्रतिबन्धकत्वान्न तदा प्रत्यक्ष मिति वाच्यम् । तर्ह्यावश्यकत्वात्संशयकालेपि तत एव दोषात्प्रत्यक्षानुत्पत्तिरस्तु । किं संशयस्य प्रतिबन्धकत्वाभ्युपगमेन । तथाच विशेषदर्शने सति विशेषादर्शनरूपदोषाभावादेव प्रत्यक्ष प्रमोत्पत्तिर्न तु निरुक्ताविशिष्टाभावस्य प्रत्यक्षप्रमाहेतुत्वम् । मानाभावात् । न च विशेषादर्शनस्य दोषत्वे संशयानुत्तरप्रमानुदयापत्तिरिति शङ्क्यम् । फलबलेनैतस्य क्वचिदेव दोषत्वकल्पनादित्याहुः ।

दोषाभावादेव सास्त्वित्यनन्तरं ममत्वित्यादिवाक्यमत्राप्यनु[4]वर्त्ययोज्यम् । भ्रमोत्तरप्रमाव्यतिरेकस्य विशेषदर्शनत्वेन विशेषदर्शन[5]व्यतिरेकनिमित्तता नास्ति किन्तु दोषनिमित्तेतत्यन्यथासिद्धिमुक्ता सत्यपि विशेषप्रमाव्यतिरेकादौ प्रमोत्पत्तेर्व्यभिचारान्न विशेषप्रमा[6]यथार्थलिङ्गपरामर्शादेः प्रमां प्रति हेतुत्वं दूरे गुणत्वेनेति भावेनाह —**किञ्चेति** ।

---

[1] यानु-**मु.** [2] त्तत्सं-**मु.** [3] 'एवमपि इत्यारभ्य 'तर्हि' इति पर्यन्तं-**आ.** पुस्तके नास्ति. [4] वृत्त्या-**आ.** [5] व्यतिरेकपदं न-**आ.** विशेषदर्शन इति नास्ति-**अ.** [6] याः-**कुं.**

भाविनि नियमेन प्रमारूपे पुरुषसाक्षात्कारे विशेषप्रमारूपस्य वह्न्यालोके धूमभ्रमजन्यायां नियमेन प्रमा[1]यामनुमितौ यथार्थलिङ्गपरामर्शरूपस्य भ्रान्तविप्रलम्भकवाक्यजन्यायां नियमेन प्रमा[2]यां शाब्दप्रतीतौ यथार्थवाक्यार्थज्ञानरूपस्य गुणस्याभावेपि प्रमात्वदर्शनेन व्यतिरेकव्यभिचारोपि ॥

किञ्च दुष्टायां ज्ञानसामग्र्यां सत्यामपि गुणव्यतिरेकेण प्रमाव्यतिरेको न दृष्ट इति गुणो न हेतुः । [3]दृष्टो विसंवादिशुका[4]दिवाक्ये, तत्र

ननूक्तस्थले सर्वत्रेश्वरप्रमामादाय विशेषप्रमा[5]सत्यपरामर्शयथार्थवाक्यार्थज्ञानानां न व्यतिरेकव्यभिचार इति चेन्न । अस्मिन्पक्षे 'नचेश्वरे [6]सोस्तीति वाच्यं' इत्यादिना दोषाणां पूर्वमेवोक्तत्वादिति भावः ॥

ननु गुणव्यतिरेकेण प्रमाव्यतिरेकस्यापि दर्शनादुक्तस्थलेष्वपि कश्चन गुणः कल्प्यत इत्यतो व्यतिरेकासिद्धिदोषमाह—**किञ्चेति** । शङ्कते—**दृष्ट इति** । सत्यपि दोषाभावे गुणव्यतिरेकेण प्रमाव्यतिरेक इत्यनुषङ्गः । तत्र दोषाभावसत्वमुपपादयति—**तत्रेति** । आदिपदेन प्रमादकरणापाटवयोर्ग्रहः । अप्रामाण्यस्य दोषजन्यत्ववादिना त्वयापि [7]तत्र कश्चिद्दोषः कल्प्यः । अन्यथा तस्य परत[8]स्त्वाहानेरित्याह—

---

[1] रूपेत्यधिकं-**ग-कुं.** [2] रूपेत्यधिकं-**ग-कुं.** [3] ननु इत्यधिकं-**मु-च-छ.** [4] कवा-**छ-ख.** [5] यथार्थप-**आ.** [6] सास्ती-**कुं.** [7] तत्रेति नास्ति-**कुं-आ.** [8] स्त्वहाने-**अ.**

भ्रान्तिविप्रलम्भादिदोषाभावादिति चेन्न । तत्राप्यनित्यवाक्यदोषस्य विवक्षितार्थतत्त्वज्ञानाभावस्य वा शुकवाक्य[1]मूलभूतवाक्यप्रयोक्तृपुंनिष्ठस्य भ्रान्त्यादेर्मूलदोषस्य वा सत्वात् । गुणव्यतिरेकेण प्रमात्वव्यतिरेके सिद्धेपि भ्रमत्वार्थं त्वयापि भ्रमत्वप्रयोजकत्वेन क्लृप्तस्य दोषस्य तत्र वक्तव्यत्वाच्च । अभावोपि हि करणापाटवविशेषादर्शनादिरिव लोकव्यवहारात्प्रमाव्यावृत्तकारणत्वात्तत्त्वज्ञानविरोधित्वाच्च दोष एव । अङ्गीकृतं च त्वयापि नीलं तम इति भ्रमे दोषान्तरा[2]भावेनाधिष्ठानभूत[3]स्याभावरूपस्य तमस एव दोषत्वम् । क्वचिद्गुणसन्निधानन्तु रासभवद्याद्दच्छिकं वा गन्धं प्रति क्लृप्तकारणगन्धप्रागभावसहभूतपाकजरसप्रागभाववत्प्रमां प्रति क्लृप्तप्रयोजकदोषाभावसहभूतत्वेनान्यथासिद्धं वा ॥

गुणव्यतिरेकेणेति । ननु विवक्षितार्थतत्वज्ञानाभावस्याभावरूपत्वात्कथं दोषत्वमित्यत आह—**अभावोपिहीति** । अन्वयाभावादिरादिपदार्थः—**अधिष्ठानेति** । नैल्यारोपाधिष्ठानभूतस्यालोकाभावरूपस्येत्यर्थः । कुत्र चिद्वा गुणानुविधानस्य का गतिरित्यत आह—**क्वचिदिति** । प्रमायां गुणानुविधानमभ्युपेत्यापि मण्युक्तान्यथासिद्धिमाह—**गन्धमिति** ॥

ननु रसप्रागभावोन्यत्र कार्ये क्लृप्तान्वयव्यतिरेकत्वादस्त्वन्यथासिद्धः । गुणसन्निधिस्तु नान्यत्र कार्ये क्लृप्तान्वयादिः । प्रकृतकार्येण

[1] स्य मू–क-ख-छ. [2] सम्भवेना–मु-च. [3] स्य भावाभावरू–छ.

किञ्च त्वयाप्यन[1]न्यथासिद्धशब्दस्य यौगिकत्व आत्माश्रयाल्लोकव्यवहारानुसारेण पारिभाषिक एवार्थ उक्तः। एवं च[2] भ्रमरूपविपरीतकार्योत्पादक[3]*दोषनिरासकस्य गुणस्य विपरीतकार्योत्पादक [3]*निरासकत्वरूपान्यैवान्यथासिद्धिः परिभाष्यताम्। लोके घटं प्रति दण्डत्व इव कदलीकाण्डरूप-

---

विना कार्यान्तरोपक्षीणो ह्यन्यथासिद्धः। न हि गुणः कार्यान्तरेण सिद्धः। येनान्यथासिद्धः स्यादित्यत आह—**किञ्चेति**। **आत्माश्रयादिति**। कारणलक्षणशरीरप्रविष्टस्यान्यथासिद्धशब्दस्य कार्यान्तरजनकत्वमिति [4]वा अनेन विना कारणान्तरे[5]ण कार्यं सिद्धमुत्पन्नमिति वार्थोक्तावात्माश्रयादित्यर्थः—**पारिभाषिक एवेति**। "अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं [6]वा कारणत्वम्। अन्यथासिद्धत्वं च त्रिधा। येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तथा। घटं प्रति दण्डरूपस्य। अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्तित्वमवगम्यते। शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य। अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वम्। यथा गन्धवति गन्धानुत्पादाद्गन्धं प्रति गन्धप्रागभावस्य नियतपूर्ववर्तित्वकल्पनात्पाकजस्थले गन्धं प्रति रूपादिप्रागभावानामन्यथासिद्धत्वं" इत्यादिग्रन्थेनानुमानखण्डे कारणतावाद उक्त इत्यर्थः। अन्यैवान्यथासिद्धिरित्यनन्तरं लोकव्यवहारानुसारेणेत्यनुकर्षः। स चासिद्ध इत्याह—**लोक इति**।

---

[1] प्यन्य—कुं. [2] चाप्रमा—छ. [3]* एतावन्नास्ति—ख. [4] तितेनवि—कुं. [5] रोत्पत्तिका—अ. [6] 'वा' इति नास्ति—कुं.

विपरीतकार्योत्पादकस्य वेत्रबीजसम्बन्धिदावाग्नि-दाहस्य विरोधिनि पदार्थे वेत्राङ्कुरं प्रति कारण-त्वाव्यवहारात्। [1] दाहविरोधिनो [2] हेतुत्वे क्वाप्यु-त्सर्गापवादाभावप्रसङ्गाच्च। यस्य हि स्वसामग्री[3]-वशेन प्रसक्तिस्तदौत्सर्गिकम्। सत्यामपि साम-ग्र्यां यद्वशात्तद्विपरीतं कार्यं भवति तत्तस्यापवा-दकम्[4]। न च दाहविरोधिनो हेतुत्वे दाहस्थले

दण्डत्वे यथा कारणता[5]ऽव्यवहारस्तथा कारणत्वाव्यवहारात्। किन्त्व-न्यथासिद्धत्वेनैव व्यवहारादित्यर्थः॥

एतेन "किञ्चेदं गुणान्वयव्यतिरेकित्वं अन्यत्रानुपक्षीण[6]त्वं सामान्यं वा। नाद्यः। दोषनिरासोपक्षीणत्वादि" त्यादिदेवताधिकरणटीका विवृता॥

[7] लौकिकव्यवहाराभावेप्यस्तु हेतुत्वमित्यतः "औत्सर्गिकत्वा-त्प्रामाण्यस्य" इति तत्वनिर्णयटीकोक्तं विपक्षबाधकत्वेन संयोज्य तद्व्यनक्ति—**दाहेत्यादिना**। अस्त्वेवमुत्सर्गापवादशब्दार्थः। विरोधि-नोपि हेतुत्वे तदभावप्रसङ्गः कुत इत्यत आह—**न चेति। दाहस्थल-इत्यादि**। तथाच "सत्यामपि तत्सामग्र्यां" इत्यादेरभावादुत्सर्गा-पवादाभावप्रसङ्ग इत्यर्थः॥

एतेन तत्वनिर्णयटीकायां ज्ञप्तिस्थलेऽभिहितामिदं बाधकमुत्पत्ति-स्थलेप्यनुसन्धेयमितिसूचितम्॥

---

[1] शाल्मेदाह-**ग.** [2] अभावस्येत्यधिकं-**क-ख-छ.** [3] बलप्रसंगेन-**च.**
[4] भवति-**छ.** [5] त्वा-**अ.** [6] णंसा-**मु.** [7] लोकव्य-**मु.**

वेत्राङ्कुरसामग्र्यस्ति । अन्यथा दण्डाभावाद्घटानुत्पत्तिरपि तदुत्पत्तेरपवादः स्यात् ॥

अत एव यत्र संशयादिरूपा दोषाः [1]प्रतिबन्धकाः तत्रैव तन्निरासार्थं[2] भूयोवयवेन्द्रियसन्निकर्षविशेषदर्शनादिगुणापेक्षा । अन्यथा संशयोत्तरप्रम[3]येव तदनुत्तरप्र[4]मयापि विशेषदर्शनमपेक्ष्येत ॥

किञ्च दोषनिरासेऽवश्यं कारणस्य गुणस्य प्रमायामपि कारणत्वे गौरवम् । नच प्रमारूपं कार्यमनन्यथासिद्धम् । येनोभयं कल्प्येत ॥

एतेन अप्रमापि प्रमा[5]विशेषः स्यादिति निरस्तम् । प्रमात्वप्रयोजिकाया अदुष्टसामग्र्या भ्रमेऽ-

---

अन्यथेति । सामग्र्यभावेपि कार्यानुत्पत्तेरपवादत्व इत्यर्थः—**तदुत्पत्तेरिति** । घटोत्पत्तेरित्यर्थः—**अत एवेति** । दोषनिरासोपक्षीणत्वादेवेत्यर्थः—**अन्यथेति** । सर्वत्र प्रमामात्रे तद्धेतुतायामित्यर्थः ॥

नन्वस्तु दोषनिरासकत्वं गुणस्य प्रामाण्यहेतुत्वं चास्तु । अप्रामाण्ये गुणनिरासे च दोषाणां हेतुत्वमिवेत्यतः "न चोभयकारणत्वकल्पकमस्ति" इति भाष्यटीकां विवृण्वन्नाह—**किञ्चेति** । प्रमायाः परतस्त्वान्यथानुपपत्तिप्रमाणसिद्धगौरवं न दोषायेत्यत आह—**न चेति** । **अनन्यथेति** । ज्ञानसामान्यसामग्रीतो न सिद्धमिति न चेत्यर्थः ॥

प्रागुक्तानुकूलतर्कं निराह—**एतेनेति** । प्रमायाः दोषाभा-

---

[1] दर्शनादिप्र—**क.** [2] र्थं—**क.** [3] मायामिव—**कुं.** [4] मायामपि—**कुं** [5] विशेषपदं नास्ति—**ग.**

भावात्। अन्यथा दावाग्निदग्धवेत्रबीजजन्यकदल्यङ्कुरोपि वेत्राङ्कुरविशेषः स्यात् ॥

ननु तत्र दाहेन दोषेण सहजाया वेत्राङ्कुरजननशक्ते[1]र्नाशाद्विपरीत[2]शक्तेश्चोत्पादाद्वेत्राङ्कुरसामग्रयेव नास्तीति चेत्समं प्रकृतेपि। ममापि[3]लोकसिद्धौत्सर्गिकापवादकसाम्यमेव प्रामाण्याप्रामाण्ययोरपेक्षितम् ॥

अन्ये तु यथा नीलरूपसामग्रीजन्यस्यापि चित्ररूपस्य न नीलरूपाविशेषत्वम्। *[4]यथा च विरुद्धनिश्चयद्वयसामग्रीजन्यस्य संशयस्य न निश्चयविशेषत्वं। यथा च पाकजरूपसामग्रीजन्यस्य

वसहितज्ञानसामग्रीजन्यत्वकथनेनेत्यर्थः। परमुखेनैव समाधिं वाचयति—**नन्विति**। अस्त्वेवं लोके प्रामाण्यादौ तु कथमित्यत आह—**ममापीति**। अनन्यथासिद्धशब्दार्थे तव यथा तथेत्यपेरर्थः ॥

प्रमायामभिमतसामग्र्यभावेनैव भ्रमस्य न प्रमाविशेषत्वमिति स्वयमेकं समाधिमुक्त्वाऽन्यापदेशेन समाध्यन्तरमाह—**अन्येत्विति**। **न नीलेत्यादि**। किन्तु विजातीयरूपान्तरत्वमित्यर्थः। तथैवोदयनाद्युक्तेरिति भावः—**विरुद्धेति**। "विरुद्धोभयारोपसामग्रीद्वयसमाजादुभयारोप एक एव भवति। स एव संशय" इति ज्ञप्तिप्रामाण्ये मण्युक्तेरिति भावः—**यथा च पाकजेति**। तेजस्संयो-

---

[1] विना—**ग.** [2] कार्योत्पादेत्याधिकं—**कुं.** [3] 'हि' इत्यधिकं—**च-छ-क-ख.**

रसस्पर्शादेर्न रूपविशेषत्वं[1]*तथा भ्रमस्यापि न प्रमाविशेषत्वमित्याहुः ॥

तस्मादन्वयव्यभिचाराद्व्यतिरेकव्यभिचारादन्यथासिद्धेश्च गुणो न प्रमाहेतुः । भ्रमप्रतिबन्दी तूद्धरिष्यते । एतदप्युक्तं "अन्यथा" इत्यादिना । अन्वयव्यभिचारे व्यतिरेकव्यभिचारे औत्सर्गिककार्यापवादकनिरासकत्वेनान्यथासिद्धौ च सत्यामपि गुणस्य हेतुत्वे रासभादेरपि हेतुत्वप्रस-

---

गदेशकालादृष्टादिसामग्र्यास्तुल्यत्वादिति भावः ॥

अस्मिन्पक्षे दृष्टान्तानामसत्प्रतिपत्तिर्वक्ष्यमाणादिशा प्रमासामग्र्यां दोषाभावस्यावश्यकत्वात्सामग्र्यभावादेव तद्विशेष[2]त्वाभावोपपत्तावुक्तसमाधिरयुक्ता इत्यरुचिबीजं ध्येयम् ॥

तस्मादित्युक्तं व्यनक्ति—**अन्वयेति** । पीतःशङ्ख इत्यादिभ्रम इत्यर्थः—**व्यतिरेकेति** । "करादौ चरणादिभ्रमजन्य" इत्यादिनोक्तप्रमाविशेष इत्यर्थः—**अन्यथेति** । विरोधिनिरासोपक्षीणत्वाच्चेत्यर्थः । उभयकारणत्वे गौरवात्कल्पकाभावादप्रमायाः प्रमाविशेषत्वापत्तिरूपबाधकाभावाच्चेत्यपि ध्येयम् ।

नन्वेवं दोषस्यापि भ्रमहेतुत्वखण्डनसम्भवेन भ्रमोपि स्वत एव स्यात् । तत्र या गतिः सा प्रमायामपीत्यत आह—**भ्रमेति** । स्वतस्त्वानुमानोक्त्यनन्तरमुद्धरिष्यत इत्यर्थ. । एतदपीत्युक्तमेवान्यथादिशब्दार्थविवरणेन व्यनक्ति—**अन्वयेत्यादिना** ॥

---

[1]* अयं ग्रन्थः नास्ति—**ग.** [2]णत्वा—**मु.**

क्षेन हेत्वहेतुव्यवस्थि[1]त्ययोगादित्यर्थः ॥

[2]स्थूलावयवि[3]प्रत्यक्ष[4]प्रमादौ भूयोवयवेन्द्रि-
यसन्निकर्षादेर्हेतुत्वभङ्गः ॥ १४ ॥

अस्तु तर्हि दोषाभावादेव प्रमा। तस्या-
नन्यथासिद्धान्वयव्यतिरेकित्वादिति चेन्न। कार-
णतावच्छेदकप्रतिबन्धकाभावादिसाधारणस्य प्र-
योजकत्वमात्रस्यापादन इष्टत्वात् ॥

"अदुष्टमिन्द्रियं त्वक्षं तर्कोऽदुष्टस्तथानुमा"
आगमोऽदुष्टवाक्यं च"

[5]भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः ॥ १४ ॥

अस्त्विति। तथाच ज्ञानहेतुतोऽधिकजन्यत्वात्स्वतस्त्वहानि-
रिति भावः। प्रयोजकत्वमापाद्यते कारणत्वं वा। आद्य आह— **कारणेति**। प्रतिबन्धकाभावाहेतुताया वक्ष्यमाणत्वाशयेनाह— **प्रति-
बन्धकाभावादीति**। कारणकारणादिरादिपदार्थः। **प्रयोजकत्वेति**। तद्व्यतिरेक[6]प्रयुक्तव्यतिरेकप्रतियोगित्वमात्रस्य न त्वनन्यथासिद्धस्येत्यर्थः॥

इष्टत्वमेव क्रमात्सूत्रभाष्यटीकाकृतां संमत्या द्रढयति— **अदु-
ष्टमिति**। अक्षं अनुमा आगमः इति लक्ष्यनिर्देशः। **तत्वनिर्णयो-**

---

[1] स्थायो-**मु-ख.** [2] 'इति' इत्यधिकं-**छ.** [3] व-**क.** स्थूलावयवेति नास्ति-**ख.** [4] क्षादौ-**मु-च.** [5] 'स्थूलावयविप्रत्यक्षप्रमादौ' इत्यधिकं-**कुं.** [6] प्रयोजकव्यति-**मु**-प्रयोजकप्रति-**अ.**

इति ब्रह्मतर्के, "निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् निर्दोषोपपत्तिरनुमा निर्दोषः शब्द आगमः" इति प्रमाणलक्षणे; "दोषाभावस्य कारणत्वे [1] च नास्माकमनिष्टम् तावता [2]वेदापौरुषेयत्वाव्याघातात्" इति भाष्यटीकायां चोक्तेः। दोषाभावस्यापेक्षितत्वेपि प्रमाजननशक्तिस्सहजा, न तु भ्रमजननशक्तिवदा[3]धेयेत्येतावतैव प्रामाण्यस्वतस्त्वसिद्धेश्च ॥

उक्तं हि सुधायां "इन्द्रियादीनामौत्सर्गिकी

दाहृतब्रह्मतर्क इत्यर्थः। मानत्रयेपि दोषाभावापेक्षाद्योतनाय त्रितयोदाहरणम्। **टीकायां चेति**। देवताधिकरणभाष्यस्य टीकायामित्यर्थः। तत्र कारणत्वे चेत्यु[4]क्तिः प्रयोजकत्वे चेत्यर्थ इत्यग्रे व्यक्तम् ॥

नन्वेवमपि कथं न स्वतस्त्वहानिः। ज्ञानहेत्वतिरिक्तानपेक्षत्वाभावादित्यत आह—**दोषाभावस्येति**। **एतावतैवेति**। दोषाभावस्य कारणत्वपक्षे शक्त्याधायकत्वेपि प्रयोजकत्वपक्षे तदभावादिति भावः। **उक्तं हीति**। दोषेत्यादिनोक्तं प्रमेयं जिज्ञासाधिकरणसुधायामुक्तमित्यर्थः। **औत्सर्गिकी** उत्सर्गः सामान्यं ज्ञानमात्रजनिकैवेत्यर्थः। दोषापवादादित्यस्य दोषाहितशक्तिरूपापवादादित्यर्थ इति भावः ॥

नन्वेवं गुणस्यापि प्रयोजकत्वोपपत्तौ किं तन्निरासायासेनेति चेन्न। गुणवा[5]दिनोपि दोषाभावस्याव[6]श्यकत्वोपपादनात्। गुणस्य

---

[1] पि–**मु च**-चकारो नास्ति–**ख**. [2] वेदपदं नास्ति–**ग**. [3] धास्ये–**च**. [4] क्तेः–**कुं**. [5] चि–**अ**. [6] श्योप–**अ**.

शक्तिः प्रमाण्यजनने दोषापवादादप्रामाण्यमपि जनयति[1]" इति। कारणत्वस्यापादानंत्वयुक्तम् ॥

क्लृप्तकारणं[2] चक्षुरादिकमादायैव दोषाभावस्य प्रमां प्रति नियतपूर्वभावित्व[3]ग्रहणेन दण्डत्ववत् दण्डगतदार्ढ्य[4]वत् शक्तिः कारणतावच्छेदिके[5]ति पक्षे शक्तिवत् उपस्थितेष्टभेदाग्रहः प्रवर्तक इत्यत्रोपस्थितिवत् विषयत्वेन विषयजन्यं ज्ञानं प्रत्यक्षमित्यत्र विषयत्वव[6]च्च चक्षुरादिनिष्ठकारणतावच्छेदकत्वमात्रेणान्वयव्यतिरेकयोरुपपत्तौ दो-

---

दोषनिरासोपक्षीणतोपपादनाच्चेति भावः ॥

द्वितीयं निराह—**कारणत्वस्येति** । कुत इत्यतः "येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तेनान्यथासिद्धं" इति मण्युक्तान्यथासिद्धिमत्वादित्याह—**क्लृप्तेति** । **ग्रहणेनेति** । त्वदुक्तपारिभाषिकान्यथासिद्धत्वेन हेतुनेत्यर्थः । अस्य चक्षुरादिनिष्ठकारणतेत्यादिनान्वयः ॥

गुरुमतेनाह—**उपस्थितेति** । **उपस्थितं** बुद्धौ विपरिवर्तमानं यदिष्टं रजतादि तेन पुरोवर्तिनो भेदाग्रह इत्यर्थः । उपस्थितेरपि पुरोवृत्तिगोचरप्रवृत्तिकारणत्वे वैशिष्ट्यज्ञानस्यापि हेतुतापत्त्या भेदाग्रहः प्रवृत्तिहेतुरिति मतहान्यापत्तेर्हेतुतावच्छेदकत्वं यथा तथेत्यर्थः ॥

न्यायमतेनाह—**विषयत्वेनेति** । **प्रत्यक्षमित्यत्रेति** । इति

---

[1] यन्तीति–**मु च-छ-क.** [2] समस्तं पदं–**मु-ख.** [3] हेण–**मु-च-छ-क-ख.** [4] दार्ढ्यादिव–**ख-कुं.** [5] त्यत्र श–**छ.** [6] चकारो नास्ति–**मु-च-ख.**

षाभावे कारणतायाः दोषाभावत्वे[1] कारणतावच्छेदकतायाश्च कल्पने गौरवात् । उक्तरीत्या सत्यपि दोषे प्रमात्वदर्शनेन प्रमासामान्यं प्रति व्यतिरेकव्यभिचाराच्च ॥

उक्तं हि विष्णुतत्वनिर्णयटीकायां "दोषाभावोपि न प्रामाण्यकारणम् । यादृच्छिकसंवादिषु सत्यपि दोषे प्रमाण[2]ज्ञानोदयात्" इति ॥

किञ्च प्रतिबन्धकाभावे लोके कारणत्वाव्यवहारादौत्सर्गिककार्यापवादक[3]विरोधित्वरूपान्यैवान्यथासिद्धिः परिभाष्यता[4]मित्युक्तम् । उक्तं हि

प्रत्यक्षलक्षण इत्यर्थः । अन्यथासिद्धिमुक्त्वा व्यभिचारं चाह—**उक्तेति** । "किञ्च करादौ चरणादिभ्रमजन्य" इत्यादिनोक्तरीत्येर्थः ॥

ननु दोषस्य प्रतिबन्धकतया तदभावस्य स्वतन्त्रावेव कार्यान्वयव्यतिरेकावतो न प्रागुक्तान्यथासिद्धिर्युक्तेत्यत आह—**किञ्चेति** । अन्यथासिद्धशब्दस्य त्वया यौगिकार्थं त्यक्त्वा लोकव्यवहारानुरोधेन त्रिधा पारिभाषिकार्थोक्तिरिहापि व्यवहारानुरोधेन त्वदुक्तान्यथासिद्धित्रयादन्यैवान्यथासिद्धिः परिभाष्यतामित्युक्तमतीतभङ्ग इत्यर्थः—**उक्तं हीति** । दोषाभावस्यान्यथासिद्धतया कारणत्वं नेत्येतज्जिज्ञासाधिकरणे—

"प्रत्यक्षवच्च प्रामाण्यं"

इत्यादिश्लोकव्याख्यानसुधायामुक्तमित्यर्थः ॥

---

[1] तदवच्छे–क-ख-छ. [2] माज्ञा–कुं. [3] विरहतारू–क-ख-छ.
[4] "इत्युक्तं" इति नास्ति–छ-ख.

सुधायां "तर्हि दोषाभावः कारणमित्यायातमिति चेन्न। तथा सत्युत्सर्गापवादयोः क्वाप्यभावप्रसङ्गात् इति ॥

न चैवं भाष्यटीकायाः विष्णुतत्त्वनिर्णयटीका[1]या सुध[2]या च विरोध इति शङ्क्यम्। भाष्यटीकायां कारणशब्दस्यास्मदुक्तं यद्घटं प्रति कुलालपित्रादिसाधारणं तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपं प्रयोजकत्वं तन्मात्रपरत्वात्। उक्तं हि—

उपलक्षणमेतत् "दोषाभावान्वयव्यतिरेकनियमात्प्रामाण्यस्य परतस्त्वं किं न स्यादिति चेन्न। यादृच्छिक संवादिषु प्रामाण्येपि दोषाभावाभावेन कारणत्वभङ्गात्" इत्यादिना वादावल्यामुक्तमित्यर्थः। उत्सर्गेत्यादेरर्थस्तु "दाहविरोधिनो हेतुत्व" इत्यादिना पूर्वतनग्रन्थेनैव विवृतो ध्येयः—**भाष्यटीकाया इति**। प्रागुक्ताया इत्यर्थः—**सुधया चेति**। वादावल्या चेत्यपि ध्येयम्—**तद्व्यतिरेकेति**। दोषाभावव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं प्रामाण्यस्य यत्तद्रूपं प्रयोजकत्वमित्यर्थः। स्वविरहप्रयुक्तविरहप्रतियोगिकार्यकत्वरूपं यत्प्रयोजकत्वमिति फलि[3]तोर्थः। **उक्तं[4] हीति**। वार्तिके दोषाभावस्योक्तरूपं प्रयोजकत्वमुक्तमित्यर्थः। तदभावतः गुणाधीनदोषाभावतः। अबोधकत्वरूपं विपरीतबोधकत्वरूपं वा [5] विपरीतबोधकत्वरूपमननुष्ठानरूपं वा यदप्रामाण्यद्वयं तदभावः। तेन दोषाभावस्याप्रामाण्यनिरासोपक्षयेण ज्ञानसामग्रीत एव

---

[1] काया:-**क.** [2] धायाश्च-**क.** [3] तार्थः-**मु.** [4] क्तमिति-**मु.**
[5] **विपरीतबोधकत्वामिति नास्ति-मु.**

" तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः
अप्रामाण्यव्ययाभावस्तेनोत्सर्गो[1]नपोदितः "
इति—

ननु कथं तर्हि दोषस्य प्रतिबन्धकत्वमपि । तत्रैव तस्मिन्सत्यपि प्रमाया दर्शनादिति चेन्न । त्रत यादृच्छिकस्य विषयसत्वस्योत्तेजकत्वेनोत्तेजकाभावविशिष्टस्य प्रतिबन्धकस्याभावात् ॥

न च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम् । शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेर्विषयस्य सत्वेपि दोष-[2]रूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यातिरेकात् ॥

यद्वा इमं मा दहेत्यादौ मन्त्रादेरुद्देश्यव्यक्तिविशेष इव लिङ्गाभासस्य यत्र विषयसत्वाभावस्तत्रैव प्रतिबन्धकत्वाद्यादृच्छिकविषयसत्वस्थले केवलस्य प्रतिबन्धकस्याभाव एवास्ति । दोषाभावस्य स्वरूपेण हेतुत्वे तु व्यतिरेकव्यभिचारो

प्रमा जायत इत्युत्सर्गो न भग्न इत्यर्थः ॥

प्रागुक्तप्रतिबन्धकविरोधित्वरूपान्यथासिद्धिरयुक्तेति भावेन शङ्कते—**नन्विति** । **तत्रेति** । यादृच्छिकसंवादिनीत्यर्थः । तस्मिन् दोष इत्यर्थः—**मा दहेतीति** । अस्य साधुत्वं संशयोपपादनग्रन्थोक्तं ज्ञेयम्—**व्यतिरेकव्यभिचार इति** । यादृच्छिकसंवादिनीत्यर्थः—

---

[1] ह्यपो–छ. [2] रूपपदं न–कुं.

दुष्परिहर इति दोषाभावोपि न हेतुः । तस्मात्परतस्त्वे न किञ्चिन्मानम् ॥

एतदप्युक्तं " अन्यथा " इत्यादिना । औत्सर्गिककार्यापवादकनिरासरूपस्यापि दोषाभावस्य हेतुत्वे इदमौत्सार्गिकमिदमापवादकमिति व्यव[1]स्थित्ययोगादित्यर्थः ॥

प्रमायां दोषाभावस्य हेतुत्वभङ्गः ॥ १५ ॥

स्वतस्त्वे तु अनित्यप्रमामात्रानुगतो गुण इति पक्षे अनित्ययथार्थज्ञानत्वं अनित्यज्ञानत्वानव-

---

तस्मादिति । अनुगतगुणस्याभावाद्दोषाभावस्य चाहेतुत्वादित्यर्थः ।

प्रमायां दोषाभावस्य हेतुत्वभङ्गः. ॥ १५ ॥

स्वतस्त्वे त्विति । मानमित्यनुकर्षः । उच्यत इत्यर्थः अननुगतगुणपक्षे सिद्धसाधनतावारणाय—**इति पक्ष** इति विवेकायोक्तम् । अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वादप्रमात्ववदिति मण्युक्तानुमानस्य प्रत्यनुमानमाह-**अनित्येति** । विशेष्यमात्रस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वेन सिद्धसाधनवारणायानित्येति पक्षविशेषणम् । यथार्थेत्युक्तिरपि तद्वा

---

[1] स्थाऽयो–**म-च.**

च्छिन्नकार्यतानवच्छेदकं अनित्यज्ञानावृत्तित्वरहितत्वात् ज्ञानत्ववत् । तत्समनियतधर्मघटितत्वात् यदेवं तदेवम् यथा पृथुबुध्नोदराकार[1]घटितं[2]घटत्वम्

रणार्थैव । साध्ये [3]नित्यज्ञाननिष्ठकार्यतानवच्छेदकत्वेन सिद्धसाधन-[4]वारणायानित्येतिपक्षविशेषणम् । यथार्थेत्युक्तिरपि तद्वारणार्थैव । साध्येऽनित्यज्ञाननिष्ठकार्यतानवच्छेदकत्वेन सिद्धसाधन[4]निरासायानित्येत्यादि-कार्यताविशेषणम् । प्रमानिष्ठेत्यपि योज्यम् । तेन घटादिनिष्ठकार्यतानवच्छेदकत्वेन न सिद्धसाधनम् । हेताविन्द्रियत्वादिनेन्द्रियादिनिष्ठकारणता-प्रतियोगिककार्यतावच्छेदके प्रत्यक्षत्वादौ व्यभिचारवारणाय नञ्द्वयम् । तत्रानित्यज्ञानवृत्तित्ववत्तदवृत्तित्वस्यापि सत्त्वेन तद्ग्राहित्याभावात् । उक्त-दोषनिरासायैवानित्यज्ञानेत्यप्युक्तिः । असिद्धिनिरासायानित्येति — **ज्ञानत्ववदिति** । तस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वादनित्य-ज्ञानवृत्तित्वाच्चेति भावः—**तत्समेति** । अनित्यप्रमात्वसमनियतो यो धर्मो अनित्यज्ञानत्वं तद्घटितत्वादित्यर्थः ॥

भ्रमेपि धर्म्यंशे प्रमात्वेनानित्यप्रमात्वानित्यज्ञानत्वयोरन्योन्यं व्याप्यव्यापकभावादिति भावः । अत एव तत्समनियतधर्मघटितत्व-द्योतनायैव अनित्यप्रमात्वमिति पक्षनिर्देशमकृत्वाऽनित्ययथार्थज्ञानत्व-मित्युक्तम्—**यदेवमिति** । यद्यत्समनियतधर्मघटितं तत्तदनवच्छिन्न-कार्यतानवच्छेदकमित्यर्थः—**पृथुबुध्नेति** । पृथुबुध्नोदराकार[5]घटत्वं नाम धर्मः । स्वसमनियतघटत्वधर्मघटितत्वात्तदनवच्छिन्नकार्यता पटादिनिष्ठा तदनवच्छेदक इत्यर्थः ॥

---

[1] धर्मपदं अधिकं-कुं. [2] समस्तपदं-कुं-क. [3] अनित्य-कुं.
[4] एतावन्नास्ति-मु. [5] घटपदं न-कुं.

घटत्वानवच्छिन्नकार्यतानवच्छेदकम् । भ्रमावृत्ति-कार्यतानवच्छेदकं वा भ्रमवृत्तित्वात् भ्रमत्ववत् ॥

न चै[1]तेषां हेतूनामसिद्धिः । भ्रमेपि धर्म्यंशे प्रमात्वस्य सत्त्वात् । प्रमात्वस्य ज्ञानत्वघटितत्वाच्च । नाप्यप्रयोजकता । समनियतयोरेकस्यैव कार्यतावच्छेदकत्वे आवश्यके [2]लाघ[3]वार्थे प्रमाण[4]स्वरसाल्लघुनोऽनित्यज्ञानत्वस्यैव तदौचित्यात्[5] । *भ्रमे ज्ञानत्वप्रमात्वयोर्व्याप्यवृत्तित्वा[6]व्याप्यवृत्तित्वे-

---

प्राचीनपक्षनिर्देश एव साध्यान्तरमाह—**भ्रमावृत्तीति** । भ्रमावृत्तिकार्यता प्रमादिनिष्ठा कार्यता तदनवच्छेदकमित्यर्थः । अनित्ययथार्थज्ञानत्वं तादृशज्ञाननिष्ठकार्यतानवच्छेदकमित्येव साध्यकरणेऽनित्यज्ञानत्वे व्यभिचारः । तस्यात्ममनःसंयोगादिहेतुनिरूपितकार्यतावच्छेदकत्वात् । भ्रमवृत्तित्वाच्च । अतो भ्रमावृत्तीत्येवमुक्तिः । अनित्यज्ञानत्वस्य च तादृशघटादिनिष्ठकार्यतानवच्छेदकत्वान्न दोषः—**नचैषामिति** । त्रयाणामित्यर्थः । भ्रमेपीत्यनेनाद्यन्तयोरसिद्धयुद्धारः—**प्रमात्वस्येति** । अनित्यप्रमात्वस्यानित्यज्ञानत्वघटितत्वादित्यर्थः ॥

यद्वा प्रमात्वस्य ज्ञानत्वघटितत्वेऽनित्यप्रमात्वस्यानित्यज्ञानत्वघटितत्वमर्थसिद्धमिति प्रमात्वस्येत्येवोक्तम्—**लघुन इति** । प्रमात्वस्य विषयसत्वघटितत्वेन गुरुत्वमिति भावः ॥

---

[1] चैषां–**ग-कुं.** [2] लघा–**ग.** तल्ला–**क.** [3] वप्रमा–**मु-ध्वर्ये-च.** [4] प्रसरात्–**क-छ.** [5] 'भ्रमत्ववत्' इत्यधिकं–**छ.** * अयंग्रन्थः–**कुं.** पुस्तके कुण्डलितः–**च.** पुस्तके स्खलितः हंसपादेन पूरितः–**ग.** पुस्तके 'विभागयोरिव' एतावत्पर्यन्तमेव वर्तते. [6] अव्याप्यवृत्तित्वे इति नास्ति–**छ.**

त्वेकसामग्रीप्रयोज्यत्वेपि त्वन्मते वेगविभागयोरिव युक्ते। मन्मते तु प्रकारांशे भ्रमात्वापवादक[1]स्य दोषस्य सत्वात्तद्भावो युक्तः ॥

ननु विभागस्याव्याप्यवृत्तित्वं [2]स्वात्यन्ताभावसामानाधिकरण्यम्। अत्यन्ताभावस्या[3]धिकरणविशेषसम्बन्धः स्वरूपानतिरिक्त इति न हेतुसापेक्ष इति चेत्तुल्यं प्रमात्वेपि*। अनित्यप्रमात्वं दोषविरोधिवृत्तिधर्मावच्छिन्नकारण[4]त्वप्रतियोगिककार्यतानवच्छेदकं दोषजन्यवृत्तित्वात्। भ्रमत्ववत्। दोषविरोधी गुणो दोषाभावश्चेति स्वत-

---

अनित्यप्रमात्वमप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं भ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववदिति मण्युक्तस्य प्रत्यनुमानमाह—अनित्यप्रमात्वमिति। दोषः पित्तादिः। तद्विरोधिवृत्तिधर्मो गुणत्वादिरूपः। तदवच्छिन्नेत्यर्थः। दोषजन्यवृत्तित्वादिति हेतोरसिद्ध्युद्धारः प्राग्वत् ॥

ननूक्तानुमानेन दोषविरोधिनो गुणस्या[5]हेतुत्व[6]लाभेपि दोषाभावस्य हेतुत्वानिवारणात् ज्ञानहेत्वधिकजन्यत्वात् प्रमात्वस्य ज्ञानहेतुमात्रजन्यत्वक्षतिरित्यत आह—दोषविरोधीति। विरोधित्वं च सहानवस्थायित्वं [7]वा तन्निश्चयप्रतिबन्धकनिश्चयविषयत्वं वोभयानुगतम्। प्रतिबन्धकत्वं च तदनुत्पादव्याप्यत्वमिति भावः ॥

---

[1] दस्य—कुं-ग-क. [2] स्वपदं न—क-ख-छ. [3] स्यचाधि-क-ख-च-छ. [4] ताप्र—क-च-ख. [5] स्यहे—कुं. [6] त्वाला—कुं. [7] 'वा' इति नास्ति—अ.

स्त्वसिद्धिः। अनित्यप्रमात्वं न कार्यतावच्छेदकम्। तथात्वे बाधकवत्त्वात्। घटज्ञानत्ववत्। न चासिद्धिः। अनुगतकारणाभावरूपस्य बाधकस्योक्तत्वात्॥

प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुणा इति पक्षे अनित्यप्रत्यक्षप्रमात्वं न विषयजन्यतावच्छेदकं, न षड्विधसन्निकर्षान्यतरजन्यतावच्छेदकं वा। तदजन्यवृत्तित्वात्। घटत्ववत्। न चासिद्धिः। योगिप्रत्यक्षादेर्विषयेण षड्विधसन्नि-

---

अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदिति मण्युक्तस्य प्रत्यनुमानमाह—**अनित्यप्रमात्वमिति**। अत्र पूर्वत्र च सिद्धसाधनताव्युदासायानित्येति प्रमात्वविशेषणम्—**तथात्वे**। कार्यतावच्छेदकत्व इत्यर्थः—**बाधकेति**। स्वावच्छिन्नकार्यताप्रतियोगिकानुगतैककारणासम्भवरूपबाधकवत्त्वादित्यर्थः—**घटेति**। घटज्ञानमात्रेनुगतकारणाभावाद्घटज्ञानत्वं नावच्छेदकमित्युपपादितमधस्तादिति भावः—**उक्तत्वादिति**। प्रमामात्रानुगतगुणभङ्ग इत्यर्थः—**इति पक्ष इति**। विरोध्यनुमानमुच्यत इति योज्यम्॥

विषयसत्वं गुण इति पक्षमुपेत्याह—**न विषयेति**। इन्द्रियसन्निकर्षो गुण इति पक्ष आह—**न षड्विधेति**। **अन्यतरेति**। अन्यतमेत्यर्थः। साधुत्वं पूर्वमुक्तं ध्येयम्। प्रागुपपादितमेव स्मारयति—**योगिप्रत्यक्षादेरिति**। सामान्यप्रत्यासत्तिजप्रत्यक्ष[1]मादिपदार्थः।

---

[1] प्रमा आदि-कुं.

कर्षान्यतरेण चाजन्यत्वात्। अनुमितिप्रमात्वं सत्यलिङ्गपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकं [1] असत्यलिङ्गपरामर्शजन्यवृत्तित्वात् भ्रमत्ववत्। शाब्दप्रमात्वं विवक्षितार्थतत्वज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकं विवक्षितार्थतत्वज्ञानाजन्यवृत्तित्वात् भ्रमत्ववत्॥

न [2] च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम्। शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेर्विषयस्य सत्वेपि दोषरूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यतिरेकात्[2]॥

अनित्यप्रत्यक्षप्रमात्वानुमितिप्रमात्वशाब्दप्रमात्वानि दोषविरोधवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकानि दोषजन्यवृत्तित्वात् भ्रमत्ववत्[3]॥

अन्यतरेणेति। अन्यतमेनेत्यर्थः। अनुमितिशाब्दप्रमयोरपि गुणाजन्यत्वे क्रमेणानुमाने [4] आह— **अनुमितीत्यादिना**। विवक्षितार्थतत्वज्ञानं गुण इति मत आह—**विवक्षितेति**॥

प्रत्येकमुक्ता मिलित्वापि दोषाभावस्याप्यहेतुत्वलाभायाह— **प्रत्यक्षेति**। **दोषविरोधीति**। स च गुणो दोषाभावश्चेति स्वतस्त्व-

---

[1] सत्यलिङ्गपरामर्शाजन्यवृत्तित्वादित्यपि कुण्डलिंत वर्तते—**कुं**. [2] अयं ग्रन्थः नास्ति—**कुं-छ-ग-ख** [2-3] एतन्मध्यस्थः नास्ति—**क**. [4] नान्याह—**कुं**.

नचासिद्धिः। करादौ चरणादिभ्रमजन्ये पुरुषज्ञाने प्रमात्वस्य सत्त्वात्। यथार्थयोग्यताज्ञानं न शाब्दप्रमाजनकम्। तद्व्यतिरेकापादनप्रयोजकापादनविषयव्यतिरेकाप्रतियोगित्वात्। पाकजगन्धे रसप्रागभाववत्॥

सिद्धिरिति भावः—**असिद्धिरिति**। उक्तहेतूनामित्यर्थः। अन्त्यहेतोर्धम्यंश इत्यादिपूर्वग्रन्थेनासिद्धयुद्धारप्रकारस्य द्वितीयहेतोरपि संवादिशुकादिवाक्यजन्यज्ञाने भ्रान्तप्रकारकवाक्यजन्यज्ञाने [1]च पूर्वोक्तदिशा सत्त्वेन सिद्धत्वादाद्यस्य तं व्यनक्ति—**करेति**॥

न च शुकादिवाक्यजज्ञानेपि तादृशेश्वरज्ञानजन्यत्वसत्त्वादसिद्धिरेवेति शङ्क्यम्। तस्य भ्रमसाधारणोपादानादिगोचरज्ञानत्वेनैव जनकतयात्राभिमतस्य विवक्षितार्थतत्त्वज्ञानत्वादिना रूपे[2]णाजनकत्वादित्युक्तत्वात्॥

योग्यताज्ञानं गुण इति मत आह—**यथार्थेति**। योग्यता च वाक्यार्थरूपसंसर्गसत्त्वं वा प्रागुक्तदिशा तद्व्याप्यमन्यद्वेति भावः—**तदिति**। शाब्दप्रमाव्यतिरेकापादने प्रयोजकं निमित्तं यदापादनं तद्विषयेत्यर्थः। आपादनप्रकारश्चाग्रे व्यक्तः—**पाकजेति**। तत्र यदि रसप्रागभावो न स्यात्तदा गन्धो न स्यादिति नास्ति। रसप्रागभावस्य कारणतावादे मण्युक्तदिशा क्लृप्तकारणगन्धप्रागभावसाहित्यरूपान्यथासि[3]द्धत्वेन गन्धव्यतिरेकापादनप्रयोजक[4]व्यतिरेकाप्रतियोगि-

---

[1] च इति नास्ति-कुं. [2] ण जनकत्वस्याभावादित्युक्तत्वात्-मु-अ.
[3] द्धिमत्वेन. [4] आपादनविषयेत्याधिकं-अ.

न चा[1]त्रासिद्धिः । उक्तरीत्या योग्यतायां स्वरूपतः सत्यामनन्वयनिश्चयविरहेणैव शाब्दप्रमोपपत्त्या यदि यथार्थयोग्यताज्ञानं न स्यात्तर्हि [2]शाब्दी[3]प्रमा न स्यादित्यापादनासम्भवात् ॥

यज्ञपतिमते अनित्यप्रमात्वं न स्वाश्रयमात्र-

त्वमत एव तदजनकत्वं चेति भावः—**उक्तरीत्येति** । प्रत्यक्षादावनुगतगुणभङ्ग उक्तरीत्येत्यर्थः ॥

यज्ञपतीति । तन्मते हि स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वमेव प्रमात्वस्य परतस्त्वमि[4]त्युपेत्याननुगतगुणजन्यत्वेनाप्येतत्सिध्यतीत्युक्त्वा अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तीत्याद्यनुमानमुक्तम् । तत्प्रत्यनुमानमाह—**अनित्येति** । सिद्धसाधनतानिरासायानित्येत्युक्तिः ॥

स्वेति । स्वस्यानित्यप्रमात्वस्य आश्रयमात्र[5]वर्ती धर्मः प्रत्यक्षत्वादिः तदवच्छिन्ना नानावृत्तिरनेकाश्रयवृत्तिश्च या [6]कार्यता तदाश्रयमात्रवृत्ति न भवतीत्यर्थः । अत्राद्यं मात्रपदं अनित्यप्रमात्वस्य स्वाधिकदेश [7]वृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तनाद्बाधनिरासाय । द्वितीयमपि तन्निरासायैव । अन्यथा अनित्यप्रमात्वस्य तादृशप्रत्यक्षत्वानुमितित्वचाक्षुषत्वादिधर्मावच्छिन्नकार्यताश्रयवृत्तितया बाधापत्तेः । अत्रानित्यप्रमात्वस्य स्वाश्रयमात्रवृत्तिप्रत्यक्षत्वादिधर्मसमानाधिकरणकार्यताश्रय एव [8]सत्त्वेन तद्वृत्तित्वाभावेन साध्यपर्य-

---

1 अत्रेति नास्ति-**मु-च-ख.** 2 श-**छ.** 3 यप्र-**क-कुं.** 4 त्यभिप्रे-**भ.** 5 त्रे वृत्तिधर्म-**मु.** 6 या इति नास्ति-**कुं.** 7 वर्तिना-**मु.** 8 एव इतिनास्ति-**कुं.**

वृत्तिधर्मावच्छिन्ननानावृत्तिकार्यताश्रयमात्रवृत्ति । विषयमात्रोपाधिकधर्मत्वात् । घटज्ञानत्ववत् ॥

वसाने बाधात् । जन्यप्रत्यक्षप्रमात्वादेः पराभिमतावच्छेदक[1]त्वस्याभावेनैव साध्यपर्यवसानमिति भावः । स्वपदं[2] समभिव्याहृतपरम् । [3]तेन अप्रमात्वे व्यभिचारवारणाय विषयमात्रोपाधिकेति हेतौ विशेषणम् । अप्रमात्वस्याननुगतपित्तादिदोषजन्यतावच्छेदकधर्मावच्छिन्ननानावृत्तिकार्यताश्रयमात्रवृत्तित्वेन विपक्षत्वेपि भ्रमाविषयतदभावघटितत्वेन हेत्वभावात् । विषयोपाधिकेत्युक्तावप्युक्तदोषतादवस्थ्यान्मात्रेत्युक्तिः । विषयोपाधिकत्वे सति तदितरानुपाधिकत्वं हि तदर्थः । तत्र ज्ञानान्यतदितरानुपाधिकेत्यर्थो ध्येयः । तेन च प्रमात्वस्य विषयेतरज्ञानोपाधिकत्वादसिद्धिः दृष्टान्ते साधनवैकल्यमिति शङ्कानवकाशः । विषयपदं च स्वविषयपरम् । तेन घटपटान्यतरत्वे ज्ञानविषयघटपटमात्रोपाधिकहेतुमति स्वाश्रयमात्रवृत्तिघटत्वपटत्वावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तमाने साध्याभावाद्व्यभिचार इति शङ्कानवकाशः । यद्वा विषयतयोपाधित्वविवक्षाया अग्रे [4]स्पष्टत्वात्त्वेति न देयम् । तावतोक्तस्थले व्यभिचारनिरासात् ॥

घटज्ञानत्ववदिति । तत्र तद्व्याप्यस्य कार्यतावच्छेदकस्य कस्यचिदभावात् स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वाभावरूपसाध्यमस्ति । न च तत्रापि घटप्रत्यक्षत्वं घटानुमितित्वमित्यादिरेव तद्व्याप्योस्तीति शङ्क्यम् । घटप्रत्यक्षत्वाद्यवच्छिन्नकार्यताप्रतियोगिकानुगतैककारणाभावान्न घटप्रत्यक्षत्वादिकमवच्छेदकम् । अस्तु

[1] त्वाभा-कुं. [2] च-मु-अ. [3] तेनेति नास्ति-कुं. [4] स्फुटत्वात्-मु.

तत्तत्प्रागभावानिरूपितकार्यताश्रय[1]त्वेन बाध इति शङ्कानिरासाय नानावृत्तीत्युक्तम् । [2]नात्रासिद्धिः । प्रमात्वस्य विषयमात्रोपाधिकत्वात् ॥

न च विषयजनितं ज्ञानं प्रत्यक्षमिति मते प्रत्यक्षज्ञानत्वे व्यभिचार इति वाच्यम् । विषयस्य विषयतयोपाधित्वस्य विवक्षितत्वात् । प्रत्यक्षज्ञानत्वे च तस्य जनकतयोपाधित्वात् । यथावस्थितार्थविषयकत्वरूपे[3] प्रमात्वे तु तस्य

वावच्छेदक[4]म् । अथापीश्वरज्ञानसाधारणं घटज्ञानत्वं न तन्मात्रवृत्तीति भावः ॥

ननु साध्ये परानुक्तं नानावृत्तीति कार्यताविशेषणमधिकं किमर्थमुपात्तमित्यत आह—**तत्तदिति** । तत्तत्प्रमाव्यक्तिप्रागभावनिरूपितकार्यतावच्छेदकं तत्तत्प्रमाव्यक्तित्वम् । तदवच्छिन्नकार्यता च तत्तद्व्यक्तिमात्रनिष्ठा न तु व्यक्तिद्वयनिष्ठा । तथाच तादृशकार्यताश्रयमात्रवृत्तित्त्वेन तदभावसाधने बाधः स्यात् । नानावृत्तीत्युक्त्या तदन्यकार्यतैव लभ्यत इति तदाश्रयमात्रवृत्तित्वाभावसाधने तु न बाध इति भावः ॥

इति मत इति । विषयजन्यत्वं प्रत्यक्षलक्षणमिति मत इत्यर्थः—**प्रत्यक्षेति**[5] । तत्र स्वव्याप्यचाक्षुषत्वरासनत्वादिधर्मावच्छिन्ननानाधिकरणनिष्ठकार्यताश्रयवृत्तित्वस्यैव भावेन[6]विपक्षे विषयमात्रोपाधिकधर्मत्व[7]सत्त्वादिति भावः । अप्रमात्वस्य साध्याभाववत्त्वेपि हेतोरेवा-

---

[1] वृत्ति-क. [2] नचा-छ. [3] पत्वेतु-क. [4] त्वं-कुं. [5] क्षज्ञानेति-मुक्षज्ञानत्वेति-अ. [6] वत्वेन-अ. [7] स्यसिद्धत्वात्-अ.

विषयतयोपाधित्वात्। अप्रमात्वोपाधिभूतं विषयान्यथात्वं तु नाप्रमाया विषय इति[1] नाप्रमात्वे व्यभिचारः॥

भ्रमे पित्ता[2]दिरिव प्रमायाम[3]नुगता एव गुणा हेतव इति मते। संशयोत्तरप्रमात्वं सत्यविशेषदर्शनत्वावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकं असत्यविशेषदर्शन[4]जन्यवृत्तित्वात् ज्ञानत्ववत्। संशयोत्तरप्रमा विशेषप्रमाजन्या न। तां विनाप्युपपन्नत्वात् भ्रमवत्। अत्रासिद्धिः प्रागेवो-

---

भावान्न व्यभिचार इत्याह—**अप्रमात्वेति**॥

इति मत इति। विरोध्यनुमानं स्वतस्त्वसाधकमुच्यत इति योज्यम्। संशयाद्युत्तरप्रमायां विशेषप्रमा गुण इति वादिनं प्रत्याह—**संशयेति**। एतच्च सिद्धसाधनतावारणाय विशेषणम्। संशयोत्तरप्रमा-विशेषदर्शनजन्या नेत्येवोक्तौ ज्ञानवदिति दृष्टान्तोक्तौ च तत्र साध्यहीनता स्यादतस्तत्र प्रमात्वमित्युक्तिः—**सत्येति**। यथार्थेत्यर्थः। असत्यमयथार्थं यद्विशेषदर्शनं करादौ चरणादिभ्रमरूपं तज्जन्यसंशयोत्तरप्रमावृत्तित्वादित्यर्थः॥

ननु संशयोत्तरप्रमायां न सर्वत्र विशेषप्रमाहेतुः। करादौ चरणादिभ्रमजन्यसंशयोत्तरप्रमादिभिन्नस्थल एवेत्यतस्तदनुरोधेनाप्याह—**संशयोत्तरप्रमेति**। **तां विनापीति**। दोषाभावे[5]प्युपपन्नत्वादित्यर्थः॥ **अत्रेति**। हेतुद्वय इत्यर्थः—**प्रागिति**। "करादौ चरणादिभ्रम-

---

[1] नप्र–छ. [2] दय–ग. [3] ननु–च-छ-ग-क. [4] जन्यपदं न–ख. [5] वेनाप्यु–अ.

कृता । भूयोऽवयवेन्द्रियसन्निकर्षो न प्रमाया[1] मसाधार[2]णकारणम् । भ्रमजनकत्वात् । मनःसंयोगवत् । प्रमा[3] भ्रमसाधारणकारणातिरिक्तकारणा[4]जन्या । भ्रमधर्मिकान्योन्याभावाप्रतियोगित्वात् । अनन्यथासिद्धतदन्वयव्यतिरेकानुविधानरहितत्वाच्च । भ्रमवत् ॥

जन्य" इत्यादिना "एवं भ्रमोत्तरप्रमायामपि" इत्यादिना च ग्रन्थेनानुगतगुणभङ्ग एवेत्यर्थः ॥

भूयोऽवयवेन्द्रियसन्निकर्षो गुण इति पक्षनिरासकमनुमानमाह—**भूय इति** । अत्राप्यसिद्धिः पीतःशङ्ख इत्यादिभ्रमजनकत्वाद्युक्त्या प्रागेवोद्धृतेति भावः ॥

प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्येति प्राचीनानुमानस्य प्रत्यनुमानमाह—**प्रमेति** । अतिरिक्तकारणपदेन गुणो दोषाभावश्चाभिमतः । भ्रमधर्मिकेत्यादिहेतोरप्यसिद्धिः । "भ्रमेपि धर्म्यंशप्रमायां" इत्यादिना प्रागेवोद्धृतेति भावः ॥

तार्किकमतेप्य[5]त्यन्ताभावस्याव्याप्यवृत्तित्वेन भ्रमे प्रमात्वतदत्यन्ताभावयोरंशभेदेन सत्त्वेप्यन्योन्याभावस्याव्याप्यवृत्तित्वाभावेन [6]प्रमान्योन्याभावस्याव्याप्यवृत्तित्वाभावेन[6] प्रमान्योन्याभावस्य भ्रमे सर्वथैवाभावादिति भावः—**अनन्यथेति** । अत्रापि गुणानां विरोधिदोषनिरासोपयोगस्योक्तत्वान्नासिद्धिरिति भावः ॥

---

[1] असा–कुं. [2] णं–क-च-ख-छ. [3] नभ्र–मु-च-छ-क-ख. [4] णज–मु-च-छ-क-ख. [5] अपिपदं न–मु-अ. [6] एतन्नास्ति–मु-अ.

अत्र सर्वत्रापि हेतूच्छित्तिरेव बाधिकेति नाप्रयोजकतेति दिक्।

एतदप्युक्तम् "अन्यथेत्यादिना"। उक्तसाध्यानि विनोक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः॥

[1]उत्पत्तौ स्वतस्त्वे [2]ऽनुमानानि ॥ १६ ॥

अप्रमायां त्वनन्यथासिद्धान्वयव्यतिरेकित्वादोषः कारणम्। क्वचित्सादृश्यादिके दोषे सत्यपि

दिगिति। प्रमा गुणजन्या न भवति प्रमात्वादीशप्रमावत्। [3]प्रमा दोषविरोधिजन्या न भवति प्रमात्वा[3]दीशप्रमावदित्यादिरूहनीय इति भावः॥

उत्पत्तौ स्वतस्त्वेऽनुमानानि ॥ १६ ॥

ननु प्रमायां गुणस्येव भ्रमेप्यन्वयव्यतिरेकव्यभिचाराद्भ्रमविरोधिगुणनिरासादावुपक्षयेनान्यथासिद्धेश्च दोषो न हेतुरिति सोपि स्वतः स्यादित्यतः "परतोप्रामाण्यम्" इति तत्त्वनिर्णयाद्युक्तमप्रामाण्यस्य परतस्त्वं साधयितुमुक्तदोषं निरस्यन्भ्रमे दोषस्य हेतुत्वमाह—अप्रमायान्त्विति। हेतोर्विशेष्यासिद्धिम् निराह—क्वचिदिति।

---

[1] इति—छ. [2] स्त्वानु—मु-च-ख. [3] एतन्नास्ति—अ.

भ्रमानुत्पत्तिरसंसर्गाग्रहादिहेत्वन्तरवैकल्यादिति नान्वयव्यभिचारः । विसंवादिशुकादिवाक्येपि दोषस्योक्तत्वान्न व्यतिरेकव्यभिचारोपि ॥

न च प्रमायां गुणः प्रतिबन्धकस्य दोषस्येवा प्रमायामपि दोषः प्रतिबन्धकस्य गुणस्य दोषाभावस्य वा निरासक इत्यन्यथासिद्ध इत्यप्रामाण्यमपि स्वतः स्यादिति वाच्यम् ।

"कारणे सत्यपि कार्यानुत्पादस्य सामग्र्यभावेनोपपत्तेः" इति तत्त्वनिर्णयटीकां हृदि कृत्वाह—**असंसर्गाग्रहादीति** । विशेषादर्शनादिरादिपदार्थः ॥

एतेन यादृच्छिकसंवादिन्यपि दोषस्य व्यभिचारो निरस्तः । तंत्र विषयासत्त्वादिसहकारिविरहात् ॥

उक्तत्वादिति। भूयोऽवयवेन्द्रियसन्निकर्षादिहेतुत्वभङ्गे "तत्राप्यनित्यवाक्यदोषस्य विवक्षितार्थतत्त्वज्ञानाभावस्य"[1] चेत्यादिनोक्तत्वादित्यर्थः । अनन्यथासिद्धेत्यादिहेतोर्विशेषणासिद्धिमाशङ्क्य निराह—**नचेति । प्रतिबन्धकस्येति** । प्रमाप्रतिबन्धकस्य दोषस्य यथा निरासकस्तथाऽप्रमाप्रतिबन्धकस्य गुणस्येत्यर्थः ॥

दोषस्यान्यथासिद्धिं वदता हि गुणस्य प्रतिबन्धकत्वमुपेत्य तदभावस्य भ्रमे कारणत्वं वा प्रमायां दोषाभावस्येव प्रयोजकत्वं [2]वा वाच्यं । आद्ये भ्रमस्य न स्वतस्त्वापत्तिः । द्वितीये किं गुणाभाव एव प्रयोजकोऽथोत्तेजकाभावविशिष्टगुणः प्रतिबन्धकः तदभावश्च

---

[1] स्यवाइ-कुं-स्येवे-अ. [2] 'वा' इतिनास्ति-मु.

पीतःशङ्ख इत्यादिप्रत्यक्षे भूयोऽवयवेन्द्रियसन्निकर्षे[1]शङ्खत्वादिविशेषदर्शनादिरूपे गन्धप्रागभावावच्छिन्नो घट [2]इत्याद्यनुमाने सत्यपरमार्शरूपे घटोस्तीति वक्तव्ये पटोस्तीति वाक्य[3]जन्यज्ञाने विवक्षितार्थतत्वज्ञानरूपे च गुणे सत्यपि पित्तबाधप्रमादरूपेण दोषेण भ्रमोत्पादनेन दोषस्य गुणनिरासोपक्षीणत्वायोगात् । स्वा[4]भावनिरासोपक्षीणत्वेनान्यथासिद्धौ च सहकारिमात्रापलापप्रसङ्गात्॥

प्रयोजक इति वा नाद्यः । व्यभिचारादिति भावेनाह—**पीतःशङ्ख-इत्यादिना** । **विशेषदर्शनादिरूप इति** । पीतत्वाद्यसंसर्गग्रह आदिपदार्थः । सप्तम्यन्तरूपपदानां गुणपदेनान्वयः ॥

ननु क्वचित् कश्चिद्गुण इत्यननुगतगुणपक्षे पीतःशङ्ख इत्यादौ विपरीत[5]प्रत्यक्षादिरेव कश्चिदन्यो गुणः । स तत्र नेति वदन्तं प्रत्याह—**गन्धेति** ।

[6]यद्वा विशेषप्रमा गुण इति मते व्यभिचारोक्तिरियमित्युपेत्य प्रत्यक्षादिभ्रमत्रयेपि गुणाभावव्यभिचारोक्तिरियमिति बोध्यम् ॥

पित्तेति । प्रत्यक्षे पित्तं अनुमाने बाधः शाब्दे प्रमादो-दोष इति विवेकः । दोषाभावस्य वा निरासक इत्येतन्निराह—**स्व[7]भावेति** । **सहकारीति** । दण्डचक्रादेरपि स्वा[8]भावनिरासोपक्षेयेण मृत्पिण्ड एक एव हेतुर्न त्वन्यः कश्चिदपीति स्यादित्यतिप्रसङ्ग इत्यर्थः ।

---

[1] र्ष–छ-ख-ग-कु. [2] टो गन्धवान् पृथिवीत्वादित्या–मु-च. [3] जज्ञाने–च-ग-क. [4] स्वभा–छ. [5] ताप्र-कुं. [6] यद्वा दोषप्र–अ. [7] स्वाभा–कुं. [8] स्वभा–मु.

ननु तथाप्यौत्सर्गिकस्याप्रामाण्यस्य क्वचिद्गुणः प्रतिबन्धकः । पीतःशङ्ख इत्यादौ तु विषयासत्वमुत्तेजकम् । त्वन्मते यादृच्छिकसंवादिलिङ्गाभासादौ प्रमाप्रतिबन्धकस्य दोषस्य विषयसत्त्वमिवेति चेन्न । अयथार्थधूमज्ञानेन ज्ञापनीयस्य वह्नेर्दैवात्सत्त्ववद्गुणेन ज्ञापनीयस्य श्वैत्यादेः शङ्खे सत्त्वेन [1]विषयासत्त्वस्याभावात् । आरोप्यपीतत्वासत्त्वस्य च दोषापगमदशायामपिसत्त्वेन [1]तदापि भ्रमापातात् ॥

द्वितीयकल्पेप्युत्तेजकं किं विषयासत्त्वमथ पित्तादिदोषः । आद्यमाशङ्कते—**नन्विति** । **औत्सर्गिकस्येति** । कारणगतसहजशक्तिजन्यस्येत्यर्थः—**क्वचिदिति** । प्रमोत्पत्तिस्थल इत्यर्थः—**उत्तेजकमिति** । तथाच तदभावविशिष्टगुणाभावोप्रामाण्ये प्रयोजक इत्युक्तस्थलेषु तदभावादेव प्रमाया अभावे कारणगतसहजशक्त्यै[2]वाप्रमोत्पादो न दोषरूपहेतुबलेन । दोषस्तु तत्रावर्जनीय सन्निधिरेवेति भावः—**त्वन्मत इति** । "यादृच्छिकस्य[3]विषयसत्त्वस्योत्तेजकत्वेने[4]" त्यादिना दोषाभावहेतुत्वभङ्गे तथोक्तेरिति भावः ॥

विषयासत्त्वमित्यत्र विषयपदेन गुणेन ज्ञाप्यो विषयो अभिमतः उत भ्रमविषय इति विकल्प्याद्यं निराह—**अयथार्थेति** । द्वितीयं निराह—**अरोप्येति** । **तदापीति** । प्रतिबन्धकस्य गुणस्योत्तेजकयुक्तत्वेनोत्तेजकाभावविशिष्टगुणाभावस्य सत्त्वादिति भावः ॥

---

[1] अयं ग्रन्थः नास्ति—कुं-ख. [2] वप्र-मु. [3] कवि-कुं. [4] त्वात् इ-कुं.

अस्तु तर्हि पित्तादि[1]दोष उत्तेजक इति चेत्तर्हि दोषाभावविशिष्टस्य गुणस्याभावो भ्रमे[2]प्रयोजक इत्युक्तं[3] स्यात्। ततो वरं दोष एव [4]प्रयोजक इति लाघवात्। दाहे तु नोत्तेजक एव हेतुः। तस्मिन्नसत्यपि दाहदर्शनात्। भ्रमस्तु नासति दोषे दृष्टः॥

किञ्च यादृच्छिकसंवादिलिङ्गशब्दाभासादि-

द्वितीयं शङ्कते—अस्त्विति। पित्तादिरि[5]ति। काचकामलादिरादिपदार्थः—उत्तेजक इति। औत्सर्गिका[6]प्रामाण्यप्रतिबन्धकगुणस्येति योज्यम्॥

दोष एव प्रयोजक इतीति। ननु प्रमायां दोषाभाव इव दोषो भ्रमप्रयोजकश्चेदपि नाप्रामाण्यस्य स्वतस्त्वभङ्गक इति चेन्न। तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपकुलालपितृसाधारणप्रयोजकत्वे लाघवतर्केणावश्यं प्राप्ते सति प्रतिबन्धकगुणनिरासोपक्षयाभावे चोक्तादिशा सिद्धे सति प्रागुक्तानन्यथासिद्धान्वयव्यतिरेकहेतुबलेन कारणत्वमेव दोषस्य सिद्ध्यतीति तात्पर्यात्। अत एवोत्तरवाक्ये हेतुपदप्रयोगः॥

दाहदर्शनादिति। मण्याद्यभावस्थल इति भावः। अस्तु भ्रमेप्येवमित्यत आह—**भ्रमस्त्विति**॥

दोषस्यान्वयव्यभिचारादुत्तेजकतया भ्रमहेतुत्वमयुक्तमिति भावेनाह—**किञ्चेति**। ईश्वरज्ञानस्य सल्लिङ्गपरामर्शरूपत्वेन यथार्थवा-

---

[1] दिर्दो–छ-क. [2] म–कुं. [3] क्तः–छ. [4] तत्रोत्तेजक–छ. [5] दीति–कुं. [6] कप्रा–मु.

ज्ञाने प्रतिबन्धके गुणे त्व[1]न्नयेन विद्यमाने [2]मन्नयेनाविद्यमाने चोत्तेजकस्य दोषस्य सत्त्वे-नौत्सर्गिकमप्रामाण्यं स्यात् ॥

ननूत्तेजकस्य दोषस्य विषयसत्त्वं प्रतिबन्धक-मिति चेत्तर्हि विषयसत्त्वाभावविशिष्टो यो दोष स्तदभावविशिष्टस्य गुणस्याभावो भ्रमप्रयोजक इत्युक्तं स्यात् । स च दोषापेक्षयातिगुरुः । तस्माद्भ्रमे [3]अर्थस्यासत्त्वेन सन्निकर्षा[4]सम्भवेन तत्स्थानीयस्य दोषस्यावश्यकत्वात् । पित्तादि-दोषोत्कर्षेण भ्रमोत्कर्षदर्शनात् । अनन्यथासिद्धा-न्वयव्यतिरेकित्वाच्चाप्रमायां दोषो हेतुरित्यप्रामा-ण्यं परत एव ॥

उक्तं हि भगवत्पादैः । "परतोऽप्रामाण्यं"

क्यार्थज्ञानत्वेन गुणत्वाङ्गीकारात्त्वन्नयेनेत्युक्तम् । भ्रमसाधारण्येन हेतु-तया गु[5]णत्वेनाहेतुत्वान्मन्नयेनाविद्यमान इत्युक्तम्—औत्सर्गिकं ज्ञान-जननशक्तिप्रयुक्तमित्यर्थः । सिद्धान्ते तु सत्यपि दोषे भ्रमरूपका-र्यानुत्पादो हेत्वन्तरवैकल्यादित्युक्तत्वान्नान्वयव्यभिचार इति भावः ॥

नन्वेवं सत्यप्युत्तेजके कार्यानुत्पादो हेत्वन्तरवैकल्यनिमित्तकः विषयासत्त्वरूपेहेत्वन्तरसापेक्षजन्यत्वात्तस्येति भावेन शङ्कते—**नन्विति**। **तस्मादिति** । दोषस्य गुणनिरासोपक्षयाभावादित्यर्थः । तावता कथं भ्रमहेतुत्वमित्यतो हेतुत्रयमाह—**भ्रम इत्यादिना** । **उक्तं हीति** ।

---

[1] त्वन्व–छ. [2] 'मन्नयेनाविद्यमाने' इतिनास्ति-छ. [3] विषयस्यास–छ-क. [4] भिन्न पदं–कुं-क-ख. [5] णेनाहेतुत्वान्वयेनावि–अ.

इति। परतः अपवादात् न तु प्रामाण्यमिव स्वतः उत्सर्गत इत्यर्थः ॥

[1]अप्रामाण्य[2]परतस्त्वम् ॥ १७ ॥

करणगतस्य यथार्थज्ञानसाधनत्वरूपप्रामाण्यस्य तु ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वरूपं ज्ञप्तौ स्वतस्त्वम् । अयथार्थज्ञान[3]साधनत्वरूपाप्रामाण्यस्य [4]तु ज्ञानजनकत्वग्राहकमात्राग्राह्यत्व[5]रूपं

विष्णुतत्वनिर्णय इत्यर्थः ॥

अप्रामाण्यस्य परतस्त्वम् ॥ १७ ॥

नन्वस्त्वेवमुक्तदिशा ज्ञानप्रामाण्यस्योत्पत्तिज्ञप्त्योः स्वतस्त्वमथापि स्वतः प्रमाणैराम्नायैरित्युक्तिरयुक्ता । तत्प्रामाण्यस्योत्पत्तौ [6]स्वतस्त्वेपि ज्ञप्तौ पद्धत्युक्तदिशा तदभावादित्यत आह—**करणेति**। स्वतस्त्वस्य स्पष्टत्वाय यथार्थज्ञानसाधनत्वरूपेति प्रामाण्यं विशेषितम्—**ज्ञानेति**। ज्ञानजनकत्वग्राहकं च रूपादिज्ञानं करणसाध्यं कार्यत्वाच्छिदादिकार्यवादित्याद्यनुमानं वा चक्षुरादि ज्ञानजनकमित्यादिवाक्यं वा तन्मात्रग्राह्य[7]त्वरूपमित्यर्थः। ज्ञानजननशक्तेरेव प्रमाजननशक्तित्वादिति भावः ॥

"अप्रामाण्यं तथान्यत" इत्यनुव्याख्याने "परतोप्रामाण्यम्" इति तत्वनिर्णये चोक्तेराह—**अयथार्थेति**। मात्रेत्युक्तया सूचित-

---

[1] इत्यग्रा—छ. [2] स्यप—ग-ख-क. [3] जनकत्व—छ. [4] तु-इतिन—ख. [5] त्वंपर—छ-ग-ख-क. [6] स्वतस्त्वेपि ज्ञप्तौ' इतिनास्ति—कुं. [7] ग्य रू—कुं.

परतस्त्वम्। दोषादिज्ञानं विना भ्रमजनकत्वस्याज्ञानात् ॥

या तु पद्धतौ "करणप्रामाण्यज्ञप्तिस्तु परत एव। इन्द्रियलिङ्गशब्दानां यथायथमनुमानप्रत्यक्षा[1]दिवेद्यत्वात्। यथार्थज्ञानसाधनत्वस्य [2]त्वनुमानवेद्यत्वात्" इत्युक्तिः सा करणग्राहक[3]मात्रग्राह्यत्वरूपं स्वतस्त्वं नेत्यभिप्रेत्य ॥

अत एव सुधायां "करणानां[4] तु ज्ञप्तौ स्वतस्त्वं [5]नास्त्येव" इत्यादिना पद्धत्युक्तं [6]पक्षमुक्त्वा "अथवा ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयस्य ग्राह्यत्वं स्वतस्त्वम्" इति पक्षान्तरमुक्तम् ॥

माधिकं ग्राहकं व्यनक्ति—दोषादीति। करणगतकाचकामलासिद्धव्याप्तिभ्रमप्रमादादिदोषाणामज्ञाने विसंवादाज्ञाने च भ्रमजनकत्वाज्ञानात्। पूर्वोक्तदिशा ज्ञानजनकशक्तेः सहजत्वेपि भ्रमजननशक्तेः काचादिकरणगतदोषाहितत्वेन ज्ञानजननशक्त्य[7]प्रमाजननशक्त्योर्भेदेन ज्ञानजननशक्तिग्राहकमात्रेण भ्रमजननशक्तेर्ग्रहणायोगात्। दोषादिज्ञानानुविधानाच्च भ्रमजननशक्तिग्रहस्येति भावः ॥

स्वतस्त्वोक्तेःप्रमाणपद्धतिविरोधमाशङ्क्य तदभिप्रायमाह—यात्विति। सुधायामिति। जिज्ञासाधिकरणे प्रत्यक्षवच्च प्रामाण्यमित्यत्रेत्यर्थः ॥

---

[1] क्षवे—मु. [2] तत्तदनुमा—कुं. [3] मात्रपदं न—मु-च. [4] 'तु' इति नास्ति—कुं. [5] नेत्यादिना—मु-च. [6] क्षप—च. [7] क्तिभ्रम—कुं.

उत्पत्तौ स्वतस्त्वं तु करणगतायाः यथार्थ-ज्ञान[1]जननशक्तेः करणगता या करणहेत्वासादिता सहजा ज्ञानजननशक्तिस्तद्वत्सहजत्वं वा तदभिन्नत्वं वा । अप्रमाजननशक्तिस्तु न सहजा किन्तु दोषाहितेत्यप्रामाण्यं परत इति

"करणानां च ज्ञानजननशक्तयैव तद्यथार्थ्यजनकत्वं स्वतस्त्वम्" इति सुधोक्तिं द्वेधा विवृण्वन्नाह—**उत्पत्ताविति** । करणगतस्य प्रामाण्यस्येत्यनुकर्षः । शक्तेरित्यस्य सहजत्वमित्यादिनान्वयः—**करणहेत्विति** । एतच्च जन्यकरणाभिप्रायम् न त्वपौरुषेयवेदाभिप्रायम् । शक्तिभेदमुपेत्य तद्वत्सहजत्वमित्युक्तिः दोषेण प्रमाशक्तिप्रतिबन्धेपि ज्ञानशक्तेरप्रतिबन्धनिर्वाहार्था । शक्तेरेकत्वेपि विषयभेदेन प्रतिबन्धाप्रतिबन्धयोरुपपत्तेः ॥

सुधोक्तिस्वारस्यानुरोधेनाह—**तदभिन्नत्वं चेति** । "वाक्य गता हि दोषास्तस्य यथार्थज्ञानजननशक्तिं प्रतिबध्य विपरीतज्ञानजननशक्तिमाविर्भावयन्ति" इति तत्वनिर्णयटीकायां वाक्यपदं इन्द्रियादीनामौत्सर्गिकी[2]शक्तिः प्रामाण्यजनने दोषापवादादित्यादिसुधानुरोधादुपलक्षणमुपेत्याह— **अप्रमेति** । करणगतेत्यनुकर्षः—**दोषाहितेति** ॥

ननु यदि प्रमाजननशक्तिः ज्ञानजनकत्वग्राहकमात्रग्राह्या तर्हि भ्रमजननशक्तिरपि तथास्यात् [3]दोषादिज्ञानानुविधानात्[3] । सा परग्राह्या चेत् प्रमाजननशक्तिरपि गुणदोषाभावज्ञानानुविधानात्तथैव स्यात् । अप्रमाजनकत्वशङ्का[4]दिरूपविरोधिनिरासोपक्षीणं तच्चेत् दोषादिज्ञानानु-

[1] जनकत्व—**ख.** [2] ज्ञानपदमधिकं—**कुं.** [3] एतावन्नास्ति—**कुं.**
[4] आदिरूपेति नास्ति—**मु.**

दिक् ॥

विधानमपि तथा स्यात् । तथा यदि भ्रमजननशक्तिर्दोषाहिता [1] तर्हि प्रमाजननशक्तिरपि गुणाहिता स्यात् । तस्याः सहजत्वे भ्रमजननशक्तिरपि तथा स्यात् । यदि दोषान्वयव्यतिरेकबलात् भ्रमजनकशक्तिर्दोषाधीना तर्हि गुणानुविधानात्प्रमाजननशक्तिरपि गुणाधीना स्यात् । गुणानां विरोधिदोषनिरासोपक्षयेणान्यथासिद्धौ दोषाणामपि विरोधिगुणनिरासेनान्यथासि[2]द्धेः साम्यात् । गुणाभावसहकृतस्य करणस्य भ्रमजनकत्वे[3]न करणाप्रामाण्यस्य परतस्त्वे दोषाभावसहकृतस्य प्रमाजनकत्वात्प्रमाजनकत्वं परत एवेति स्यात् । दोषाभावस्य प्रयोजकत्वमेव न प्रमाजननशक्त्याधायकत्वं तर्हि गुणाभावस्याप्येवमिति सममिति चेन्न । ज्ञानप्रामाण्याप्रामाण्यस्वतस्त्वपरतस्त्वयोरुक्तसाधककलापस्याशेषस्यापि करणप्रमाण्याप्रामाण्यस्वतस्त्वपरतस्त्वयोरनुसन्धेयत्वात् । अभ्यासदशास्थले गुणाद्यनुसन्धानाभावेपि प्रमाजनकत्वज्ञानानुभवेन व्यभिचारात् । पीतः शङ्ख इत्यादिभ्रमे विशेषदर्शनादिरूपे गुणे सत्यपि पित्तादिकरणदोषेण भ्रमोत्पादनेन दोषस्य गुणनिरासोपक्षीणत्वायोगादित्यादेरुक्तत्वादिति भावेनाह—**दिगिति** ॥

तथाह्यनुमानानि । प्रमाजननशक्तिः ज्ञानजनकशक्तिग्राहकमात्रग्राह्या तदन्याग्राह्यत्वे सति ग्राह्यत्वात् संमतवत् । यथार्थज्ञानजनकत्वं ज्ञानजनकत्वहेत्वन्यहेत्वधीनं न । ज्ञानजनकत्वाधिकरणमात्रवृत्तित्वात् ज्ञानजनकत्ववदित्यादिरूपेण ध्येयानि । भ्रमजनकेपि धर्म्यंशे प्रमाजनकत्वाभावान्नासिद्धिः । भ्रमजनकत्वे च यावज्ज्ञानजनकत्वाधिकरणे वृत्त्य-

[1] तर्हीति नास्ति—**मु.** [2] द्धिः—**मु.** [3] सम्यन्तं—**मु.**

एतदप्युक्तम् । "परतोऽप्रामाण्य" मिति ॥
तस्मात्प्रामाण्यस्य स्वतस्त्वादपौरुषेयोपि वेदः प्रमाणमेव ॥

करणप्रामाण्य[1]स्य स्वतस्त्वम् ॥ १८ ॥

प्रामाण्यवादः समाप्तः.

ननु कथं[2] वेदस्यापौरुषेयत्वं । तत्र प्रमाणाभावात् । वाक्यत्वाद्यनुमानेन "छन्दांसि जज्ञिरे" इत्यादिश्रुत्या "प्रतिमन्वन्तरं चैषां श्रुतिरन्या

भावान्न व्यभिचारः—**अप्रामाण्यमितीति** । करणगताप्रामाण्यमित्यर्थः॥

स्वतस्त्वोक्तेरुपयोगं वदन्नुपसंहरति—**तस्मादिति** । **अपौरुषेयोपीति** । आप्तोक्त[3]त्वादिगुणाभावेपीत्यर्थः ॥

करणप्रामाण्यस्य स्वतस्त्वम् ॥ १८॥

प्रामाण्यवादः समाप्तः ॥

एवं न विलक्षणत्वा[4]दस्येति नयसिद्धं स्वतः प्रमाणैरिति-श्लोकोक्तं प्रामाण्यस्वतस्त्वं समर्थ्य अधुना विलक्षणा[4-5]दति हेतोरपौरुषेयत्वरूपवैलक्षण्यवत्वादित्यर्थान्तरोपगमेन ब्रह्मसूत्राभिमतमादिवर्जितैरिति श्लोकोक्तमपौरुषेयत्वं साधयितुं मणिकृदाद्युक्तमाशङ्कते—**नन्विति** । वाक्यत्वादीत्यादिपदार्थव्यक्तिरग्रे परोक्तानुमानखण्डनप्रस्तावे ज्ञेया । मण्याद्युदाहृतश्रुतिस्मृती चाह—**छन्दांसीति** ॥

---

[1] ण्यस्व–छ. [2] मस्या–छ. [3] त्वगु–कुं. [4] अयं ग्रन्थः नास्ति–अ.
[5] णत्वादि–मु.

विधीयते"। इत्यादिस्मृत्या च पौरुषेयत्वसिद्धेश्चे-[1]तिचेदुच्यते। ज्योतिष्टोमस्य स्वर्गसाधनत्वं वेद-तात्पर्यविषयो वा पौरुषेयशब्देतरप्रमा[2]णकः पौरु-

"न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम्। तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः" इति विष्णुतत्त्वनिर्णयवाक्यसूचितानां "धर्माधर्मस्वर्गनरकादिकं प्रमाणोपेतं वस्तुत्वा" दित्यादिना जिज्ञासाधिकरणसुधोक्तसामान्यपरिशेषनिष्कर्षभूतानामुक्तया प्रमाणाभावादिति हेतुं तावन्निराह—**ज्योतिष्टोमस्येति** ॥

विशिष्यैवं पक्षनिर्देशे तद्बोधकैकवाक्यस्यापौषेयत्वसिद्धिर्न तु सर्वस्यापि वेदस्येत्यतः सामान्यपक्षनिर्देशमाह—**वेदेति**। यद्वा "यः शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्पर इति तदिच्छया वक्तृप्रयुक्तशब्दगोचरत्वमेव शब्दतात्पर्यविषयत्वमितिवेदगततात्पर्यपर्यालोचनया तस्य पौरुषेयत्वम्" इति मणिकृदुक्तिखण्डनाय वेदतात्पर्यविषय इति सामान्य[3]पक्षनिर्देशः। यद्वा अस्मिन्पक्षे सप्रमाणकत्वादिति हेतुर्वस्तुत्वादिहेतुना प्रसाध्याव्यभिचारक इति भावेनाह—**वेदेति**। आपातप्रतिपाद्ये बाधवारणाय—**तात्पर्येति**। लौकिकशब्दतात्पर्यविषये बाधवारणाय **वेदेति** ॥

ननु कोयं वेदो नाम (१) यदि वेदपदार्थो वेदस्तर्हि इतिहासपुराणतात्पर्यविषये बाधः। "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति तयोरपि वेदपदार्थत्वात्। (२) नापि वेदशब्दमुख्यार्थो वेदः। मुख्यत्वप्रयोजकप्रवृत्तिनिमित्तस्येतिहासादिव्यावृत्तस्यानिरूपणात्। (३) नापि

[1] रिति–कुं-ग. [2] पकः–ख. [3] न्येन–मु.

षेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वात्। यद्यद्-प्रमाणकत्वे सति सप्रमाणकं तत्तदितरप्रमाणकम्।

शाखासमुदायो वेद. । शाखायाः[1] वेदैकदेशत्वेनान्योन्याश्रयात् । (४) नापि सन्दिग्धकर्तृकं वाक्यं वेदः । वादिप्रतिवादिनोर्निश्चयात् । मध्यस्थसन्देहेन पक्षतावच्छेदककरणे अन्योन्याश्रयात्। वादिप्रतिवाद्यनुमानानन्तरभावित्वान्मध्यस्थसन्देहस्य । (५) नापि प्रमाणशब्दो वेद इति युक्तम् । भारतादौ गतत्वात्। (६) नापि यथार्थवाक्यार्थज्ञानाजन्य प्रमाणशब्दो वेद इति । परमतेऽप्रसिद्धेः । प्रमाणशब्दमात्रस्य तादृशेश्वरज्ञानजन्यत्वात्। (७) न च जन्ययथार्थवाक्यार्थज्ञानाजन्यप्रमाणशब्दो वेद इति युक्तम् । संवादिशुकबालादिवाक्येपि गतत्वेन बाधापत्तेः । सिद्धान्तिमते नित्यज्ञानव्यासप्रणीतभारतादावपि गतत्वाच्चेति चेत् ॥

उच्यते । " (८) शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्य विषयार्थकत्वे सति शब्दजन्ययथार्थवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्व " मिति मण्युक्तरीत्या वा (१०) " क्रम[2]विशिष्टावर्णा वेदः " इति सुधोक्तदिशा वा (११) वक्ष्यमाणदिशा साक्षाद्धर्मादिबोधकशब्दो वेद इति वा (१२) प्रमाकरणामूलकत्वे सति प्रमाणशब्दो वेद इति वा (१३) पूर्वतन्त्रे विधिमन्त्राधिकरणे मन्त्रपदार्थोक्तरीत्या वेद इत्यभियुक्तप्रयोगविषयो वा वेद इति[3] तन्निरुक्त्युपपत्तेः ।

आद्ये सत्यन्तमात्रस्य वेदसमानार्थस्मृतौ ग[4]तत्वाद्विशेष्यम् । वेदार्थस्य शब्दतदुपजीव्यनुमानविषयत्वादसम्भववारणाय शब्दतदुपजीवि-

---

1 यां–कुं. 2 विशेषविशि–मु. 3 'इति' इत्यनन्तरं 'वा' इति वर्तते–अ. 4 म–कुं.

यथा संमतम्। वक्ष्यमाणरीत्या पक्षधर्मताबलाद-पौरुषेयशब्दसिद्धिः॥

अपौरुषेयशब्दप्रमाणकत्वं वा साध्यम्। तत्र चेन्द्रियलिङ्गपौरुषेयशब्दाप्रमाणकत्वे सति सप्र-

---

प्रमाणातिरिक्तेत्युक्तिरिति। तात्पर्यं च तत्प्रमितिशेषत्वमित्यग्रे व्यक्तम्। तद्विष[1]यो ज्योतिष्टोमादिरित्यर्थः। साध्ये बाधवारणाय पौरुषेयेत्युक्तिः। स्वतन्त्रपुरुषपूर्वकशब्देत्यर्थः। पौरुषेयेतरेत्येवोक्तौ यत्किञ्चित्प्रत्यक्षादिरूप-पौरुषेयेतरप्रमाणकत्वेनाप्युपपत्तेः। पौरुषेयशब्द[2]सिध्यार्थान्तरवारणाय शब्दपदम्। पौरुषेयशब्दार्थे व्यभिचारनिरासाय [3]हेतौ सत्यन्तम्। अप्रयोजकतानिरासाय विशेष्यम्—**यथासंमतमिति**। श्रोत्राद्यप्रमाण-कत्वे सति सप्रमाणकं रूपं श्रोत्रादीतरचक्षुःप्रमाणकमित्यर्थः॥

ननु प्रत्यक्षादिप्रमाणकत्वेनापि साध्योपपत्त्यार्थान्तरमित्यत आह—**वक्ष्यमाणेति**। न चात्र हेतुत्रयेपि विशेषणासिद्धिरित्यादौ वक्ष्यमाण-दिशा प्रत्यक्षानुमानावेद्ये पक्षे उक्तरूपसप्रमाणकत्वाख्यहेतोः पक्षनिष्ठ-ताया अपौरुषेयप्रमाणकत्वेन विना पर्यवसानाभावादिति भावः॥

ननु पक्षधर्मताबलादपि साध्यं सिध्यत् [1]व्यापकतावच्छेदकधर्म-प्रकारेणैव सिध्यति नत्वन्यथा। अतिप्रसङ्गादसामर्थ्याच्च। अन्यथा प्रामाण्याभावसाध्यकमप्युक्तव्यतिरेकिखण्डनायोगादिति वदन्तं प्रत्याह—**अपौरुषेयेति**॥

नन्वेवं प्रागुक्तहेतोरिन्द्रियलिङ्गविषये व्यभिचार इत्यत आह—**तत्र चेति**। उक्तरूपसाध्य इत्यर्थः। पूर्वत्रात्र च विशेषणासिद्धि-

---

[1] यत्वाज्ज्यो–कुं. [2] न्दासि–मु. [3] हेताविति नास्ति–मु. [4] पक्षताव–मु.

माणकत्वं हेतुः। पूर्ववत्सामान्यव्याप्तिः। अप्रसिद्ध-विशेषणता तु व्याप्तौ सत्यां न दोषः। त्वन्मते अभावसाध्यके [1] व्यतिरेकिणि हेत्वभावेन साध्याभाव[2]रूपस्य भाव[3]स्य व्याप्तिग्रहरूपानुमितिकरणस्येवेहापि साध्यप्रसिद्धिं विनैव [4] सामान्यव्याप्तिग्रहरूपस्यानुमितिकरणस्य निष्पन्नत्वात् ॥

न च तन्निष्पत्तावपि विशेषणज्ञानरूपसहकारिविरहादनुमितिरूपविशिष्टज्ञानानुत्पत्तिरितिवाच्यम्। मन्मते तस्य विशिष्टज्ञानाहेतुत्वात्। त्वन्मते

निरासाय पौरुषेयेत्युक्तिः। "आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणम्" इत्यादिप्रमाणलक्षणं हृदि कृत्वाह—**नदोष इति** ॥

सा किं साध्याज्ञाने तन्निरूपितव्याप्तिग्रहायोगाद्व्याप्तिज्ञानरूपकरणविघटकत्वेन दोष उत विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वेनानुमितिरूपविशिष्टज्ञानानुत्पादकत्वेन। नाद्य इत्याह—**त्वन्मत इति**। अयं वह्नित्वेनानुभवो वह्नित्वप्रकारकत्वे सति वह्नित्वाभाववद्विशेष्यको न समर्थप्रवृत्तिजनकत्वादिति व्यतिरेकिणीत्यर्थः। उक्तमेतत्पूर्वं परतस्त्वे प्रामाण्यानुमित्यसम्भववादे ॥

द्वितीयमाशङ्क्य निराह—**न चेति**। **तस्येति**। विशेषणज्ञानस्येत्यर्थः। उपपादयिष्यते चैतन्निर्विकल्पकभङ्ग इति भावः। परमतेप्यनुमित्युत्पादप्रकारमाह—**त्वन्मतेपीति**। विशेषणज्ञानहेतुकत्वमतेपीत्यर्थः—

---

[1] केवलव्य-मु-च. [2] वस्य-मु-च. [3] रूप-मु-च [4] सामान्यपदं न-ग.

प्यभावसाध्यक[1]व्यतिरेकिणीवात्राप्यादौ साध्य-विशे[2]ष्यिकाया एवानुमितेः सम्भवात् ॥

यद्वा वेदत्वमपौरुषेयवृत्ति । तदितरावृत्तित्वे सति वृत्तिमत्वात् । यदेवं तदेवं । यथा संमतम् ॥

अभावसाध्यकेति । प्रागुक्तव्यतिरेकिणीत्यर्थः । मणिकृता ज्ञप्तिप्रामाण्य-वादे "विशेषणज्ञानं विना कथं प्रामाण्यविशिष्टानुमितिरिति चेत् । प्रथमं न कथं चिज्ज्ञाने प्रामाण्यमित्यनुमित्यनन्तरं तेनैव तत्रैव[3] प्रामाण्यविशिष्टानुमितिः । अभावविशेष्यकप्रतीत्यनन्तरमभाववद्भूतल-मिति ज्ञानवत्" इत्युक्तेरिति भावः । अप्रसिद्धिदोषहीनं प्रयोगान्तर-माह—**यद्वा वेदत्वमिति** । पक्षनिरुक्तिः पूर्ववत्साक्षाद्धर्मबोधकशब्द-त्वादिरूपेण ध्येया । साध्यस्य गगनादिवृत्तित्वे बाधादपौरुषेयशब्दवृत्तित्वे-नैव पर्यवसानमिति भावः । हेतौ तदित्यपौरुषेयपरामर्शः । सत्यन्त-मात्रस्यावृत्तिमद्गगनादौ व्यभिचारनिरासाय विशेष्यम् । घटत्वादौ तन्निरासाय सत्यन्तम् ॥ न च सिद्धान्ते—

"एकत्राप्यनवस्थस्य सर्वत्रावस्थितिः कथम्"

इत्यादिना वैशेषिकनयानुव्याख्याने गगनादेर्वृत्तिमत्वोक्तेर्विशेष्यं व्यर्थ-मिति शङ्क्यम् । असति शशशृङ्गादौ स्वमते व्यभिचारवारकत्वात् ॥

वृत्तिमत्त्वं च समवायादिवृत्त्येति ज्ञेयम् । तेन जगदाधारता-प्रयोजकसम्बन्धेनेदानीं वेदत्वमिदानीं घटत्वमित्यादिप्रतीत्या कालेपि वेदत्वादेर्वृत्तिमत्त्वेनार्थान्तरत्वं हेतौ विशेष्यवैयर्थ्यमिति च शङ्कानव-काशः ॥

यदेवमिति । यद्यदितरावृत्तित्वे सति वृत्तिमत् तत्तद्वृत्ति ।

[1] केकेवल-मु-च. [2] ष्य-मु. [3] एवेति नास्ति-कुं.

न चात्र हेतुत्रयेपि विशेषणासिद्धिः । वेदार्थे[1] धर्मा[2]धर्मादावस्मदादिप्रत्यक्षस्याप्रवृत्तेः । ईश्वर-योगिप्रत्यक्षयोश्च धर्मादिवद्वेदं विना असिद्धेः । धर्मादिकं कस्यचित्प्रत्यक्षं वस्तुत्वाद्घटवदित्यादा-

---

यथा घटेतरावृत्तित्वे सति वृत्तिमद्घटत्वं घटवृत्तीत्यर्थः । आद्ये हेतौ विशेषणासिद्धिं न चेत्यादिना[3]ग्रन्थेनोद्धरिष्यन् द्वितीयहेतावुपात्तस्येन्द्रियलिङ्गप्रमाणकत्वरूपाधिकविशे[4]षणस्यासिद्धिं सुधोक्तविवरणेन तावदुद्धरन्निन्द्रियपदेनाभिमतं प्रत्यक्षं किमस्मदादिप्रत्यक्षमुतेश्वरयोगिप्रत्यक्षे[5] आद्ये आह—**वेदार्थ इति** तस्यैव विवरणं—**धर्मेत्यादि** । ज्योतिष्टोमादिर्धर्मः । श्येनयागादिरधर्मः । आदिपदेन स्वर्गनरका[6]द्यतीन्द्रियवेदैकवेद्यार्थग्रहः । अन्त्य आह—**ईश्वरेति । असिद्धेरिति** । ईश्वरप्रत्यक्षेण योगिप्रत्यक्षेण वा धर्मादिकं सिद्धमित्यस्यास्मदाद्यप्रत्यक्षत्वेन वेदेनैव तस्यावगन्तव्यत्वात् । तथा च [7]वेदेनेश्वरादिप्रत्यक्षं विज्ञाय तेन धर्मादिस्वरूपावगत्यपेक्षया " चोदनालक्षणोर्थो धर्मः " इति जैमिन्युक्तादिशा वेदेनैव तन्निर्णयोस्तु किं बकबन्धप्रयासेनेति प्रत्यक्षाविषयत्वं तस्येति भावः ॥

अस्तु तर्ह्यनुमानेन धर्मादिगोचरेश्वरादिप्रत्यक्षसिद्धिरित्यत आह—**धर्मादिकमिति** । प्रमेयत्वादि[8]हेतुरादिपदार्थः—**अद्यापीति** । वेदेन विना धर्मादिसिद्धिर्नेति वदन्तं प्रति धर्मादिसाधकतयोपन्यस्तेश्वरादिप्रत्यक्षसाधकानुमानोपन्यासवेलायामपि । न केवलं पूर्वमित्यर्थः—

---

[1] र्थध-**छ-ग.** [2] अधर्मपदं न-**छ-क.** [3] ग्रे उद्ध-**अ.** [4] ष्यस्या-**मु.** [5] इति विकल्पौ मनसि निधाय' इत्यधिकं-**कुं.** [6] आदिपदं नास्ति-**मु.** [7] वेदेनेति नास्ति-**मु.** [8] हेतुपदं नास्ति-**मु.**

वद्यापि धर्माद्यसिद्ध्याऽन्योन्याश्रयात् । ताभ्या-
मस्मदादीन्प्रति धर्माद्यसिद्धेश्च । इष्टापूर्तयोः
प्रेक्षावत्प्रवृत्त्यन्यथानुपपत्त्या फलवत्त्वमात्रानुमाने-
प्यस्य यागहोमदानादेरिदं फलमित्यस्यातिसूक्ष्म-
स्य विशेषस्यानुमानायोग्यत्वात् ॥

फलविशेषोद्देशेन ज्योतिष्टोमादिकर्मविशेषे ब-
हूनां प्रेक्षावतां प्रवृत्तिस्तु चैत्यवन्दनादाविवोप-
पन्ना—तदुक्तं भगवत्पादैः ॥

अन्योन्येति । धर्मादिसिद्धौ तत्पक्षीकारेणेश्वरादिप्रक्षसाधकानुमानसिद्धिः अनुमानसिद्धौ च तत्सिद्धप्रत्यक्षेण धर्मादिसिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥

अस्तु वा वेदानुमानाभ्यां धर्मादिगोचरेश्वरप्रत्यक्षसिद्धिः तथाप्यस्मदादेरनुष्ठानोपयोगिधर्मादिनिश्चयो नेश्वरयोगिप्रत्यक्षाभ्यां सिध्यतीति दोषान्तरं चाह—**ताभ्यामिति** । तथाचास्मदादिज्ञानोपायो वेद एवैष्टव्य इति किमीश्वरादिप्रत्यक्षोपन्यासेनेति भावः ॥

एवमिन्द्रियाप्रमाणकत्वरूपविशेषणं समर्थ्य लिङ्गाप्रमाणकत्वरूपविशेषणासिद्धिमुद्धरति—**इष्टेति** । इष्टं यागः पूर्तं तटाकादि "अन्येभ्योपिदृश्यते" इति दिर्घविधानादिष्टापूर्तयोरिति साधु—**इत्यस्या[1]पीति** । तज्ज्ञानस्यैवानुष्ठानोपयोगित्वादिति भावः ॥

प्रवृत्तिविशेणविशेषसिद्धिरस्त्वित्यत आह—**फलविशेषेति** । स्वर्गादिरूपेत्यर्थः—**चैत्येति** । [2]यथा वेदबाह्यानामनेकेषामधर्मे च फलाहेतौ धर्मत्वादिभ्रान्त्या प्रवृत्तिस्तथा[3]न्धपरंपरयोपपन्ना । न तु धर्मादिस्वरूपं निर्णाययतीत्यर्थः—**तदुक्तमिति** । अपौरुषेयवाक्यत्वादन्येन

---

[1] स्येति—कुं. [2] तथाच—मु. [3] तत्परं—मु.

"तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः"।
इति ॥

न च पौरुषेयवाक्येन तत्सिद्धिः। पुरुषेष्वज्ञान [1]मिथ्याज्ञान विप्रलम्भप्रमादकरणापाटवा[2]दीनां सम्भावितत्वेनानाश्वासात् ॥

तन्निवृत्त्यर्थमीश्वरस्य नित्यसार्वज्ञ्याद्यङ्गीकारे च तदर्थं धर्मबोधके शब्द एवापौरुषेयत्वमात्रं कल्प्य-

---

प्रत्यक्षेणानुमानेन वा धर्मादिसिद्धिर्नेत्येतत् तत्त्वनिर्णये उक्तमित्यर्थः। तदभावे अपौरुषेयवाक्याभाव इत्यर्थः ॥

एवमिन्द्रियलिङ्गप्रमाणकत्वरूपविशेषणसमर्थनपरग्रन्थेनैवाद्यसाध्ये अपौरुषेयशब्दसिद्धिर्हेतोः पक्षधर्मताबलादित्येतदप्युपपादितं ज्ञेयम् ॥

यदप्याद्यद्वितीयहेत्वोः पौरुषेयशब्दाप्रमाणकत्वे सतीति विशेषणं यच्च तृतीयहेतावपौरुषेयेतरावृत्तित्वे सतीति विशेषणम् तदसिद्धं "न च पौरुषेयवाक्येन तत्सिद्धिः। अज्ञानविप्रलम्भयोः प्राप्ते" रित्यादितत्त्वनिर्णयवाक्यार्थव्यक्तीकरणेनोद्धरति—**नचेत्यादिना**। **पौरुषेयेति**। ईश्वरकृतेत्यर्थः। तत्सिद्धिः धर्मादिनिश्चयः—**अज्ञानं** विवक्षितार्थतत्त्वज्ञानाभावः। ज्ञात्वापि परप्रतारणं विप्रलम्भः। घटोस्तीतिवाच्ये पटोस्तीत्युक्तिः प्रमादः—**तन्निवृत्त्यर्थमिति**। पुरुषेषु सम्भाविताज्ञानादिदोषनिमित्तकानाश्वासाभावसिद्ध्यर्थमित्यर्थः—**नित्येति**। दोष[3]जन्यत्वेन भ्रमत्वनिवृत्त्यर्थं नित्येति सार्वज्ञ्यविशेषणम्। शब्द एवेत्यत्र सप्तम्यन्तं शब्दपदम्। को विशेष इत्यत उक्तं—**मात्रमिति**। तत्र तु सार्वज्ञ्यादिकं बह्वित्यग्रे व्यक्तम् ॥

---

[1] मिथ्याज्ञानेति-कुण्डलितं—**कुं** [2] आदिपदं न—**मु-च.** [3] षाज—**मु.**

ताम् । अर्थापत्तेरुत्सर्गतः साक्षादुपपादकविषयत्वात् । न तु परम्परयोपपादकं वक्तरि सार्वज्ञ्यादिकम् । अन्यथा वेदस्यासर्वज्ञ्यप्रणीतत्वमङ्गीकृत्याश्वासार्थं तस्य सर्वज्ञप्रणीतशब्दान्तरमूलत्वं कल्प्यं स्यात् ॥

तदुक्तं भगवत्पादैः "अपौरुषेयवाक्याङ्गीकारे-

विशेषान्तरं चाह—**अर्थापत्तेरिति** । धर्मादिनिश्चयरूपस्योपपादकप्रमाणेन विनानुपपद्यमानस्यार्थापत्तिशब्दितस्य साक्षादुपपादकं हि धर्मादिप्रमापकशब्दे अपौरुषेयत्वम् । नित्यसार्वज्ञ्यादिकन्तु तत्र धर्मादिनिश्चायकत्वोपपादकोपपादकम् । अज्ञानादिदोषहीनपुरुषकृतत्वं तदुपपादकम् । तदुपपादकं च सार्वज्ञ्यमिति परम्परयोपपादकं बहु च तत्कल्प्यम् । तथाचाल्पत्वात्साक्षादुपपादकत्वात्तदेव कल्प्यमिति भावः ।

ननु लोके क्वापि शब्देऽपौरुषेयत्वादृष्टेः परम्परा युक्तैवेत्यत आह—**अन्यथेति** । एवं साक्षादुपपादके सम्भवति शब्दत्वपौरुषेयत्वयोः सहदर्शनमात्रेण परम्पराश्रयण इत्यर्थः—**अङ्गीकृत्येति** । शब्दमात्रेऽसर्वज्ञप्रणीतत्वस्य लोके दर्शनादिति भावः—**तदुक्तमिति** । अपौरुषेयत्वमात्रकल्पनं लघ्वित्येतत्तत्त्वनिर्णये उक्तमित्यर्थः ॥

यद्वाऽभ्युपेत्योक्तमपौरुषेयत्वमात्रं कल्प्यतामिति तदपि न कल्प्यमेवेत्येतत्संमत्युक्तिव्याजेनाह— **तदुक्तमिति** । **न किञ्चिदिति** । अपौरुषेयत्वमपि वेदकर्तुरप्रसिद्धेरेव सिद्धमिति भावः ॥

वेदकर्तृपुरुषगतदोषहीनत्वोपपादकवक्तृसार्वज्ञ्यप्रतिपादकतया परम्परया धर्मादिबोधकापौरुषेयवाक्याङ्गीकार इति भ्रान्तिनिरासाय प्रकृतोप-

न किञ्चित्कल्प्यम्" इति । साक्षाद्बोधके वाक्येऽपौरुषेयत्वमात्राङ्गीकार इत्यर्थः ॥

किञ्चाप्रामाणिकानां सार्वज्ञ्याविप्रलम्भकत्वाप्रमादकरणपाटवोपदेष्टृत्वादीनां वेदे तत्कृतत्वस्य च कल्पनीयत्वे कल्पनागौरवं स्यात् ॥

न च सार्वज्ञ्ये[1] नैवाविप्रलम्भादिसिद्धिः । सर्वज्ञेश्वरावतारेष्वपि बुद्धादिषु विप्रलम्भादिदर्शनात् ।

योगितयार्थमाह—साक्षादिति । साक्षाद्धर्मादिबोधक इत्यर्थः ॥

एवं स्वपक्षे लाघवोपपादनेन पौरुषेयशब्दाप्रमाणकत्वादिरूपं अपौरुषेयेतरावृत्तित्वरूपं विशेषणं च समर्थ्य परपक्षे वक्ष्यमाणानुव्याख्यानोक्तगौरवोपपादनेन च समर्थयते—किञ्चेति । यद्वा न किञ्चित्कल्प्यमित्ययुक्तं अपौरुषेयत्वस्य कल्प्यत्वादित्यतोस्तु तावदेतावत् तथापि न तवेव बहिति भावेनाह—किञ्चेति ॥

ननु सार्व[2]ज्ञ्यादिकं नाप्रामाणिकं कार्यत्वाद्यनुमानेन सिद्धेः । सार्वज्ञ्येनैव च सर्वदोषहीनता सिध्यति । तथाहि । धर्मादिसाक्षात्कारवतो न रागादिदोषाः सम्भवन्ति । "अविद्याक्षेत्रत्वमुत्तरेषाम्" इति पतञ्जल्युक्त्या तेषामज्ञानमूलत्वात् । सर्वज्ञेऽज्ञानायोगात् । रागादिरहितस्य च तत्कार्यविप्रलम्भायोगात् । एवंभूतमहानुभावस्य करणापाटवादेरनाशङ्क्यत्वात् । ज्ञानी सन्नज्ञलोकाय कुतो नोपदिशेत् । प्रसिद्धवेदे तदुपदेशकल्पनस्य लघुत्वाच्चेत्याशङ्क्य प्रत्याह—न चेत्यादिना निरसिष्यत इत्यन्तेन । आदिपदेन अप्रमादादिकं उपदेष्टृत्वं

---

[1] ज्ञ्यादि–च. [2] 'आदिक' इति नास्ति–अ.

सर्वज्ञस्य शरीरेपि शरीरत्वकृतकरणापाटवादेरवर्जनीयत्वात्। ज्ञानिनामप्युपदेशवैमुख्यदर्शनात्। वेदे तत्कृतत्वप्रसिद्ध्यभावेन तस्यापि कल्प्यत्वात् ॥

कार्यत्वाद्यनुमानेनेश्वर[1]स्य सार्वज्ञ्यसिद्धिस्तु निरसिष्यते ॥

न च वेदादेव तस्य सार्वज्ञ्यादिसिद्धिः। वेदप्रामाण्यस्येश्वरसार्वज्ञ्यादिसिद्ध्यधीनत्वेनान्योन्याश्रयात्। अन्यथा बुद्धाद्यागमात्तस्यापि सार्वज्ञ्यादिकं सिद्ध्येत्। तदुक्तं भगवत्पादैः ॥

"अविप्रलम्भस्त्वज्ज्ञानं तत्कृतत्वादयोपि च।
कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तत् ॥
इति ॥

तस्मान्न विशेषणा[2]सिद्धिः ॥

वेदे तत्कृतत्वं च गृह्यते—**शरीरेपीति**। त्वन्मते सर्वज्ञस्येश्वरस्य नास्ति शरीरं उपदेशौपयिकतया शरीरेऽङ्गीकृतेपीत्यर्थः। **ज्ञानिनामपीति**। सिद्धानामित्यर्थः। [3]व्यक्तमेतत्सर्वं तत्त्वनिर्णयटीकायाम्—**अन्योन्येति**। सिद्धे सार्वज्ञ्ये तत्प्रणीतत्वेन वेदप्रामाण्यसिद्धिः तत्सिद्धौ च तेन सार्वज्ञ्यसिद्धिरित्यर्थः ॥

तदुक्तमिति। जिज्ञासाधिकरणानुव्याख्यान इत्यर्थः[3]। तज्ज्ञानं धर्मादिप्रमितिः। तत्कृतत्वं तेन पुरुषेण कृतत्वम्। आदिपदात्करणपाटवादिग्रहः। ज्ञापकं निश्चायकं धर्मादेरित्यर्थः। चो यत इत्यर्थे। [4]तत् तस्मा-

---

[1] रसा-मु-च. [2] णसि-कुं. [3] अयं ग्रन्थः नास्ति-अ. [4] इदं नास्ति-अ.

यद्वा ईश्वरज्ञानं न प्रमेति मते वेदः काल-भेदेनानियतानुपूर्वीको न दोषामूलकत्वे सति प्रमामूलकत्वरहितत्वात् गगनवत्। प्रमेति मते दोषामूलकत्वे सति प्रमाकरणामूलकत्वं हेतुः ॥

दित्यर्थः। नियतैकप्रकारत्वमपौरुषेयत्वमिति सुधोक्तिमनुरुध्याह—**यद्वेति**। हेतोरसिद्धिनिरासायोक्तम्—**न प्रमेति। मत इति**। गुणजन्यस्यैव प्रमात्वेनेश्वरज्ञानस्य तदजन्यत्वान्न प्रमेति मत इत्यर्थः। सिद्धसाधनता-निरासाय साध्ये कालभेदेनेत्युक्तिः। पूर्वोत्तरकल्पभेदेनेत्यर्थः। नियता-नुपूर्वीक इत्युक्तावेकप्रकारानुपूर्वीकत्वस्य साध्यत्वप्राप्तौ दृष्टान्ते साध्य-वैकल्येन परस्याप्रसिद्धेः परोक्तसाध्यनिरासलाभाय च नञ्द्वयम् ॥

"प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषयत्वं वेदत्वम्" इति तत्त्वनिर्णयटीकायां प्रमाणपदं प्रमित्यर्थकमुपेत्य तदर्थमेव निष्कृष्य हेतुमाह—**दोषेति**। विप्रलम्भा-दिदोषेत्यर्थः। भ्रान्तिमूलकवाक्ये प्रमितिमूलकपुंवाक्ये च व्यभिचार-वारणाय क्रमेण विशेषणविशेष्ययोरुक्तिः—**प्रमेतीति**। गुणाजन्य-त्वेपि दोषाजन्यज्ञानत्वात्तद्वति तत्प्रकारकत्वाच्च। ज्ञानत्वस्य प्रमात्व-भ्रमत्वान्यतरव्याप्यतया भ्रमत्वहीनस्य प्रमात्वाभावे ज्ञानत्वाभावप्रसङ्गाच्च प्रमेति मत इत्यर्थः ॥

इदानीं प्रमाणपदं प्रमितिकरणार्थमुपेत्याह—**प्रमाकरणेति**। परमते वेदस्येश्वरज्ञानमूलकत्वेपि तस्याजन्यतया करणाभावात्स्वयमकण-त्वाच्च नासिद्धिरिति भावः ॥

यद्यप्येतन्मतेपि पूर्वोक्तदिशा भ्रमसाधारणोपादानादिगोचरज्ञान-

यद्यप्यानुपूर्व्यगर्भितस्वरूपे गगने शश्वदेक-प्रकारानुपूर्विकत्व[1]मपौरुषेयत्वं नास्ति । तथाप्य-नियतानुपूर्वीराहित्य[2]रूपं तदस्त्येव ॥

यद्यपीदमनित्याद्घटादेर्न व्यावृत्तम् । तथापि पौरुषेयवाक्याद्व्यावृत्तत्वात् यद्बुद्धिपूर्वकाबु[3]द्धिपूर्व-कवाक्यसाधारणं पौरुषेयत्वं तदभावरूपत्वाच्च न तद्व्यतिरेकसाधनेऽर्थान्तरम् ॥

त्वेनैवेश्वरज्ञानस्य सर्वत्र हेतुतया [4]प्रमात्वेनाहेतुत्वात्प्राचीनहेतूक्तावपि नासिद्धिः । तथाप्यभ्युपेत्यवादेन वा प्रमात्वेन प्रमामूलकत्वविवक्षायाः प्रागनुक्तेर्वा हेत्वन्तरोक्ति ॥

पर्यवसितसाध्ये साध्यवैकल्यमाङ्क्य निराह—**यद्यपीति** । ननू-क्तरूपहेतुद्वयस्य घटादावपि सतस्तत्रानित्यत्वेने[5]व पक्षेप्यनित्यत्वेनैव [6] पर्यवसानसम्भवान्न शश्वदेकप्रकारानुपूर्वीकत्वरूपसाध्यसिद्धिः स्यात् । विशेष्याभावमात्रेण विशिष्टाभावोपपत्तेरिति भावेनाशङ्क्य निराह— **यद्यपीति । पौरुषेयेति** । तथाच पुंवाक्यव्यावृत्तत्वस्यानुपूर्वीगतानैय-त्याभावनिमित्तत्वस्यैव वाच्यत्वात् । प्रकृतेपि पक्षे हेतुसत्त्वस्यानुपूर्वीयुक्ते तदभावेन पर्यवसाने बाधात् । तद्गतानैयत्याभावेनैव पर्यवसानमिति भावः—**परोक्तमिति** । सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरु-षेयत्वमिति मण्युक्तमित्यर्थः—**बुद्धीति** । चैत्रादिवाक्यं बुद्धिपूर्वकं शुकबालादिवाक्यं चाबुद्धिपूर्वकम् । तदुभयसाधारणं यन्नियतानुपूर्वीक-त्वाभावरूपं तत्परोक्तमित्यर्थः ॥

---

[1] रूप-च-छ-क-ग-ख. [2] लक्षणं-मु-च. [3] अबुद्धिपूर्वकेति नास्ति-मु च. [4] तत्र-मु. [5] नै-कुं-अ. [6] पक्षेप्यनित्यत्वेनैव' इति नास्ति-कुं.

यद्वा स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानाश्रय इति साध्यम्। तत्र भ्रमामूलकत्वे सति प्रमाकरणामूलकत्वं हेतुः। अपौरुषेयत्वपक्षेपि वेदस्य पदावली[1]गोचरज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वात्तदभावसाधने बाधः। तन्निवृत्त्यर्थं स्वप्रतिपाद्येत्युक्तम्। स्वप्रतिपाद्यज्ञानजन्य इत्येवोक्ते पदावलीगोचरमेवेश्वरनिष्ठं ज्ञानं वेदप्रतिपाद्यगोचरमपि भवतीति पुनरपि बाधः। तन्निवृत्त्यर्थं ज्ञानत्वावच्छिन्नेत्याद्युक्तम्॥

वाक्यार्थगोचरज्ञानजन्यत्वं पौरुषेयत्वम् इति मते तदभावसाधकमनुमानमाह—**यद्वा स्वेति**। ईश्वरज्ञानं प्रमेति मत इति ज्ञेयम्। वेद इत्यनुकर्षः। स्वेन वेदेन प्रतिपाद्यो योर्थो धर्मादिः तद्गोचरं यज्ज्ञानं तत्त्वावच्छिन्नकारणतानिरूपिता या कार्यता तदनाश्रय इत्यर्थः। गगनमेव दृष्टान्त इति भावः॥

साध्यगतविशेषणयोः कृत्यं व्यनक्ति—**अपौरुषेयत्वेति**। **वेदस्येति**। क्रमविशेषविशिष्टवर्णानां वेदत्वात्क्रमस्य च कृतकत्वात् कार्यताश्रयत्वमस्तीति भावः—**इत्युक्तमिति**। प्रतिपाद्येत्युक्तावपि पदावलीत्यादिशब्दप्रतिपाद्यत्वं पदावल्या अप्यस्तीत्युक्तदोषनिरासायैव स्वेत्यप्युक्तिरिति भावः॥

नन्वत्राप्युक्तसाध्यवतो गगनघटादितोऽव्यावृत्तोयं हेतुस्त[2]त्रैवोक्तरूपज्ञानाजन्यत्वेनैवोपपन्नः सन् शश्वदेकप्रकारानुपूर्वीकत्वरूपविवक्षितापौ-

---

[1] गोचरेति नास्ति-छ. [2] त्रचो-अ.

इदमपि साध्यं परोक्तस्य प्रमाप्रमा[1]मूलकवाक्यसाधारणस्य पौरुषेयत्वस्याभावरूपम् ॥

न च शुकबालादिवाक्ये पररीत्या व्यभिचारः । तस्यापि पक्षतुल्यत्वात् ॥

यद्वा स्वप्रतिपाद्यगोचरयथार्थज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानाश्रय इति साध्यम् । तत्र च प्रमाकरणामूलकत्व[2]मात्रं हेतुः ॥

रुषेयत्वं [3]साधयतीत्यर्थान्तरमित्यत आह—**इदमपीति । परोक्तस्येति ।** चिरन्तनोक्तस्येत्यर्थः—**पौरुषेयत्वस्येति ।** तथाच पौरुषेयवाक्यादुक्तरूपसाध्यहीनाद्यावृत्तोयं हेतुस्तादृशज्ञानाजन्यत्वरूपसाध्यमादाय पर्यवस्यन्नपि पराभिमतपौरुषेयत्वाभावरूपत्वात्तस्य नार्थान्तरम् । शश्वदेकप्रकारानुपूर्वीकत्वमिवेदमपि पारिभाषिकं किञ्चिदपौरुषेयत्वमिति भावः । एवमग्रेपि ॥

पररीत्येति । तन्मते वाक्यमात्रस्येश्वरज्ञानजन्यतयोक्तरूपसाध्याभावेपि तत्र हेतुसत्त्वादिति भावः—**पक्षेति ।** तस्येशज्ञानजन्यत्वेपि घटादिसाधारणोपादानादिगोचरज्ञानत्वेनैव तज्जन्यतया स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नेत्यादिरूपसाध्यस्यापि सत्त्वेन तदभावासंमतेरिति भावः ॥

"वेदाः शब्द[4]जन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमाणशब्दत्वात्" इति मण्युक्तसाध्यस्याभावसाधकमाह—**यद्वास्वेति ।** वेद इत्यनुकर्षोत्रापि ध्येयः । प्रागुक्तमेव साध्यपदकृत्यं ध्येयम् ॥

भ्रान्तवाक्ये उक्तरूपसाध्यस्यापि सत्त्वेन विशेष्यमात्रस्याव्यभिचाराद्दोषमूलकत्वविशेषणस्य व्यर्थत्वमुपेत्याह—**तत्र[5]चेति ।** [6]निरुक्तसाध्य

---

[1] भ्रम—**छ.** [2] मात्रपदं नास्ति—**मु-च.** [3] नसा—**मु.** [4] शब्दाजन्य—**मु.** [5] त्रे—**कुं.** [6] उक्त—**कुं**

इदमपि साध्यं परोक्तस्य प्रमाणवाक्यमात्रासाधारण[1]पौरुषेयत्वस्याभावरूपम्। विपक्षे सर्वसमयाभिमतधर्माद्यसिद्धेरुक्तत्वादनुकूलतर्काणां च वक्ष्यमाणत्वा न्नाप्रयोजकता ॥

एतेन वेदस्यानादित्वरूपमपौरुषेयत्वं बाधितं सिद्धान्तविरुद्धश्च। क्रमविशेषविशिष्टानां [3]वर्णानां वेदत्वान्नित्यानां सर्वगतानां च तेषां स्वतः क्रमस्यायोगेनाभिव्यक्तिगतस्यैव तस्य वक्तव्यत्वादभिव्यक्तेश्च जन्यत्वेन तद्गतस्य [4]क्रमस्यापि जन्यत्वात् टीकायां "क्रमस्य कृतकत्वेपि" इत्युक्तेश्चेति निरस्तम्। क्रमस्य कृतकत्वेप्याधुनिकाध्यापकेन स्वबुद्धिस्थपूर्वपूर्वादिवसीयक्रमानुसारेणैवोत्तरदिवसेष्विवेश्वरेणापि स्वबुद्धिस्थप्रवाहानादिपूर्वपूर्वकल्पीये क्रमानुसारेणैवोत्तरोत्तरकल्पेष्वपि वेदस्योच्चरितत्वे[5]न स्वातन्त्र्याभावेना[6]नियतानुपुर्वी[7]-

---

इत्यर्थः। पूर्ववदर्थान्तरताव्युदासायाह—इदमपीति। उक्तहेतूनामपौरुषेयत्वेन विनाप्युपपत्तिमाशङ्क्याह—विपक्ष इति। एतेनेति। यद्वेश्वरज्ञानमित्यादिनोक्तपक्षत्रयेणेत्यर्थः ॥

प्रतिज्ञातं द्वयमपि क्रमेण व्यनक्ति—क्रमेत्यादिना। टीकायामिति। तत्त्वनिर्णयटीकायामित्यर्थः। एतेनेत्युक्तं व्यनक्ति—क्रमस्येति।

---

[1] णस्य—च-छ-ग-ख. [2] इदं हेतुवाक्यं नास्ति—कुं-ग-क. प्रथमहेतुर्नास्ति—छ-ख. [3] वर्णानामिति नास्ति—कुं-क. [4] क्रमस्येति नास्ति—ग. [5] सम्यन्तः—कुं-ग-ख. [6] न—क-ग-छ. [7] त्वादि—ख-छ.

रहितत्वादिरूपोक्तत्रिविधापौरुषेयत्वे बाधाद्यभावात् ॥

उक्तञ्च सुधायाम् "नियतैकप्रकारत्वमपौरुषेयत्वम्" इति। एतदप्युक्तं "गौरवदोषेण" इति। क्रमाकृतकत्वस्याप्यपौरुषेयत्वप्रवेशे गौरवदोषेणेत्यर्थः ॥

यद्वा वेद आप्तप्रणीतः प्रमाकरणामूलकत्वात्। गगनवत् शुकादिवाक्यवद्वा। अत्र च पक्षतावच्छेदकहेत्वोरैक्यमाशङ्क्य निराह—अत्र चेति। अक-

---

उक्तञ्चेति। जिज्ञासानये "नमानमपि वेदानाम्" इत्यत्र। प्रकृतोपयोगितया अर्थमाह—क्रमाकृतकत्वस्येति ॥

"वेदः आप्तप्रणीतः वेदत्वाद्व्यतिरेकेण लौकिकवाक्यवत्" इति परोक्तस्य प्रत्यनुमानमाह—यद्वावेद इति। वाक्यार्थप्रमावत्त्वे सति विप्रलम्भादिदोषहीनो ह्याप्तः। तदप्रणीत इत्यर्थः। भ्रान्ताप्रणीतत्वेनार्थान्तरतानिरासायाप्तेत्युक्तिः—प्रमाकरणेति। परमते वेदस्येश्वरप्रमामूलकत्वेपि तत्करणामूलकत्वस्य नासिद्धिरिति भावः ॥

अन्तरङ्गदृष्टान्तमाह—शुकादीति। शुकबालादिवाक्यवदित्यर्थः। प्रणीतत्वस्योच्चारणघटितत्वेन वा वाक्यार्थप्रमात्वेन रूपेण [1] आप्तप्रमामूलकत्वेन वा विवक्षितत्वाच्छुकादिवाक्येपीश्वरप्रणीतत्वं नेति न साध्यवैकल्यम्। परमतेपि तत्रेश्वरज्ञानस्य भ्रमसाधारण्येनैव हेतुत्वस्य प्रागुपपादनादिति भावः ॥

पक्षतावच्छेदकहेत्वोरैक्यमाशङ्क्य निराह—अत्र चेति। अक-

---

[1] तत्प्र-कुं.

च्छेदकं वेदत्वं प्रमाकरणामूलकत्वे सति प्रमाण-शब्दत्वं न तु हेतुमात्रम्। प्रत्यक्षाभासादिमूलक-शब्दाभासेऽति व्याप्तेः। येन पक्षतावच्छेदकस्यैव हेतुत्वे तत्समानाधिकरणसाध्यप्रतीतिरूपस्यानु-मानफलस्य व्याप्तिग्रहकाल एव सिद्धत्वादनुमा-नवैयर्थ्यमिति शङ्क्येत॥

यद्वा वेदानुपूर्वीनिष्ठादृष्टादिकारणता केनचिदव-

र्तृकत्वप्रसिद्धिमत्वं वेदत्वम्। अकर्तृकप्रसिद्धिमत्वं नाम प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषय-त्वम्" इति तत्त्वनिर्णयटीकोक्तस्य निष्कृष्टार्थमाह—**प्रमेति**॥

ननु न हेतुमात्रमित्ययुक्तं तथात्वेपि दोषाभावात्किमधिकप्रवेशे-नेत्यत आह—**प्रत्यक्षेति**। तथाच वेदपदेन शब्दाभासस्यापि पक्षता-पत्तावंशे सिद्धसाधनता स्यादिति भावः। दोषान्तरञ्चाह—**येनेति**। तन्मात्रस्य पक्षतावच्छेदकीकरणेनेत्यर्थः—**तदिति**। पक्षतावच्छेदक-समानाधिकरणं यत्साध्यं तत्प्रतीतिरूपस्येत्यर्थः। यत्र प्रमाकरणामूल-कत्वं तत्राप्तप्रणीतत्वमिति गगनादौ व्याप्तिग्रहदशायामेव हेतुसामाना-धिकरण्येन तत्साध्यज्ञानस्य जातत्वात्। हेतोरेव पक्षतावच्छेदकत्वेना-नुमानफलस्य सिद्धत्वादित्यर्थः॥

यद्यपि साध्यविशेष्यकप्रतीतेर्व्याप्तिग्रहणदशायां जातत्वेपि साध्य-विशेषणकप्रतीतेरुद्देश्यायास्तदानीमभावेन नानुमानवैयर्थ्यम्। तथाप्यति-शयाभावेन तादृशप्रतीतेरुद्देश्यत्वस्यैवायोगात् यत्प्रमाकरणामूलकत्ववत् तदाप्तप्रणीतत्ववदित्यपि व्याप्तिग्रहसम्भवाच्चैवमुक्तमिति ज्ञेयम्॥

सामान्यपरिशेषाभ्यामप्यपौरुषेयत्वं साधयति—**यद्वावेदेति**।

च्छिन्ना कारणतात्मकत्वात् दण्ड[1]गतकरणता[2]-वत् ॥

न च क्लृप्तमानुपूर्वीग[3]तनियततत्तद्वर्णपदादिनिरूप्यत्वं विनान्यदवच्छेदकमस्ति । न चेश्वरविरचितत्वमेव तदवच्छेदकम् । तस्य वेदानुपूर्वीमात्रसाधारण्येन सूक्तविशेषजपादिना फलविशेषानुपपत्तेरिति नियतानुपूर्वीकत्वरूपापौरुषेयत्वसिद्धिः ॥

आनुपूर्वीनाम वर्णानां क्रमविशेषः स च नित्यसर्वगतानां वर्णानामुच्चारणघटितो वा बुद्धिघटितो वा वाच्यः । न तु स्वतः । तथाच तादृशानुपूर्वी दृष्टरूपार्थज्ञानार्थापि नियमादृष्टार्था । जपेन चादृष्टार्था सर्ववादिसंमतेत्यदृष्ट[4]जनिका भवतीति तत्र विद्यमानादृष्टकारणतापक्ष इत्यर्थः । आदिपदेनार्थज्ञानकारणताग्रहः ॥

एवं सामान्यतः कारणतावच्छेदकसिद्धौ प्रसक्तमीश्वररचितत्वं निरसिष्यन् स्वाभिमतमवच्छेदकमाह—**न च क्लृप्तमिति** । पक्षान्तरं निराह—**न चेश्वरेति** । **सूक्तविशेषेति** । पवमानसूक्तपुरुषसूक्तादिजपेन पठनादिना च श्रुतफलविशेषो न स्यादित्यर्थः । श्रूयते च फलविशेषः ॥

"यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् ।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि" ॥

इत्यादिना—

आनुपूर्वीगतेत्यादिनोक्तमेवावच्छेदकम् । न त्वीश्वररचितत्वमित्ये-

---

[1] ण्डादि–ग. [2] तादि–ग. [3] तं–मु-च-क. [4] ष्टार्थ–मु.

अन्यथैतत्कल्पेऽनर्थहेतुभूताया अन्यादृश्या आनुपूर्व्याः कल्पान्तरे श्रेयःसाधनत्वम् एतत्कल्पेऽनर्थहेतोर्ज्योतिष्टोमाद्यङ्गव्युत्क्रमस्य ब्रह्महत्यादेश्चकल्पान्तरे श्रेयःसाधनत्वम् एतक्तल्पे दाहकत्वादिस्वभावस्य वह्न्यादेः कल्पान्तरेष्वदाहकत्वादिकं चं कल्प्यं स्यात् ॥

एतदप्युक्तम् "गौरवदोषेणे" ति ॥

यद्वा प्रत्यक्षन्यायामूल[1] मन्वादिस्मृतिः प्रमाणमूला प्रमाणभूतस्मृतित्वात्। न्यायमूलस्मृतिवत्।

तदेवानेकविपक्षबाधकोक्त्या द्रढयति—**अन्यथेति। एतदप्युक्तमिति ॥** अन्यथेत्यादिनोक्तमित्यर्थः ॥

रीत्यन्तरमाश्रित्य सामान्यपरिशेषाभ्यामपौरुषेयवाक्यसिद्धिं वदन् "धर्मादिकं प्रमाणोपेतं वस्तुत्वात्" इति सुधोक्तसामान्यानुमानमुपलक्षणं मत्वा त्रेधा सामान्यानुमानमाह—**यद्वा प्रत्यक्षेति**। प्रत्यक्षादिमूलान्तरेणार्थान्तरवारणाय प्रत्यक्षन्यायामूलेत्युक्तिः । प्रत्यक्षामूला न्यायामूलाचेत्यर्थः । प्रत्यक्षतोऽर्थमुपलभ्य रचितस्मृतिः प्रत्यक्षमूला । यथा आद्यभारतपुराणादिरूपा । तस्याः सर्वज्ञव्यासप्रत्यक्षमूलत्वात् । युक्तिबलादर्थं विज्ञाय रचिता स्मृतिर्न्यायमूला। यथा अथातो धर्मजिज्ञासेत्यादि[1]मीमांसासूत्रादिरूपा स्मृतिः। अतादृशी या स्मृतिरित्यर्थः ॥

न च न्यायमतेवाक्यमात्रस्येश्वरनिष्ठप्रत्यक्षप्रमाजन्यत्वात्प्रत्यक्षामूलस्मृतिरप्रसिद्धेति वाच्यम् । वाक्यार्थप्रमात्वेन तज्जन्यत्वस्यैव तन्मूलत्वेनेहाभिप्रेतत्वात् ॥

---

[1] 'मीमांसासूत्रादि' इति नास्ति—**मु.**

जन्या[1] धर्मादिप्रमा करणजन्या जन्यज्ञानत्वात् संमतवत् धर्मादिकं प्रमाणोपेतं वस्तुत्वात् घटवदित्यादिनाऽपौरुषेयवाक्यासिद्धिः ॥

धर्मादावुक्तरीत्या प्रत्यक्षानुमानप्रामाण्यस्याबाधितत्वादनन्तकल्पेषु भिन्नानन्तपौरुषेयवाक्याङ्गीकारे च गौरवात्कार्यत्वहेतोर्नित्यज्ञान इव कर्त्रैक्य इव चास्यापि सामान्यतो दृष्टस्यापौरुषेयवाक्ये तत्राप्यन्येषां सकर्तृकत्वप्रसिद्धेर्वेदे च तदभावाच्चेदापौरुषेयत्वे पर्यवसानात् ॥

[2]एतदप्युक्तं "गौरवदोषेण" इति ॥

[3]वेदापौरुषेयत्वेऽनुमानानि ॥ २९ ॥

प्रत्यक्षप्रमाकरणं वा प्रत्यक्षपदार्थो ध्येयः । नैयायिकानां न्यायएवातिविश्वासान्नयायमूलस्मृतिवदित्युक्तम् । ईश्वरप्रमांशे बाधवारणाय जन्येति प्रमाविशेषणम्—**संमतवदिति** । चाक्षुषादिज्ञानवदित्यर्थः ॥

नन्वेतावता प्रमाणसामान्यसिद्धावपि कथमपौरुषेयवाक्यरूपप्रमाणविशेषसिद्धिरित्यतः परिशेषप्रमाणमाह—**धर्मादावुक्तरीत्येत्यादिना पर्यवसानादित्यन्तेन** । नचात्र हेतुत्रयेपि विशेषणासिद्धिरित्यादिग्रन्थेनोक्तरीत्येत्यर्थः—**एतदपीति** । अनन्तकल्पेष्वित्यादिनोक्तमपीत्यर्थः ॥

एवं प्रसक्तं प्रत्यक्षानुमानपुंवाक्यरूपपक्षत्रयं प्रतिक्षिप्य विवक्षितसाध्यपर्यवसानमाह — **कार्यत्वेति** । नित्यज्ञानादिसिद्धिप्रकारोग्रे

---

[1] जन्यापदं न—**क-ख-छ.** [2] इयं पङ्क्तिर्नास्ति—**छ**-कार्यत्वहेतोरित्यतः प्रागस्ति—**क.** [3] इति इत्यधिकं—**छ.**

नचोक्तहेतूनामप्रयोजकता। यदि वेदः पौरुषेयः स्यात्तर्हि—

"यतस्ता हरिणा दृष्टाः श्रुता एवा[1]खिलैर्जनैः।
श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः॥

इत्यादि[2]स्मृतिष्वीश्वरेणापि दृष्टत्व[3]स्यैवोक्तिर्न स्यात्। वेदाध्येतॄणां तत्र कर्तृविशेषस्मृतिश्च स्यात्। मुक्तकश्लोकादौ तन्नियमाभावेप्यनेककर्तृकाविच्छिन्नाध्ययनधारणादिम[4]त्युरुतरप्रबन्धात्मकार्यत्वादिहेतुभङ्गे व्यक्तः॥

वेदापौरुषेयत्वेऽनुमानानि॥१९॥

पौरुषेयत्वरूपविपक्षे बाधकानि विवक्षुस्तत्त्वनिर्णयोदाहृतब्रह्माण्डस्मृतौ दृष्टत्वोक्तिविरोधं तावदाह—**यदीत्यादिना**। **पौरुषेय इति**। [5]स्वतन्त्रपुरुषेणेश्वरेण प्रणीतो यदीत्यर्थः। श्रुता एव न तु कृता इत्यर्थः। दृष्टा एवेत्यप्येवकारान्वयमुपेत्याह—**दृष्टत्वस्यैवेति**। "वेदकर्तुरप्रसिद्धेः" इति तत्त्वनिर्णयवाक्यसूचितं बाधकमाह—**वेदेति**। यदीत्याद्यापादकानुवृत्तिः सर्वत्र ज्ञेया॥

मुक्तकश्लोका नाम तत्र तत्र नानाग्रन्थस्थाः ततस्तत उद्धृता इति वा, प्रबन्धेष्वनिबद्धा एव तेनतेन पुरुषेण कृताः सुभाषितश्लोका इत्याहुः॥

अनेकेति। अनेककर्तृकं यदविच्छिन्नमध्ययनं यच्च तादृशं

---

[1] परै-कुं-क-ख. [2] ष्वपीश्व-मु. [3] स्योक्तिः-मु-च. [4] ति गुरु-छ-ख. [5] वृत्तिरित्याधिकं वर्तते-कुं.

के भारतादौ [1]तन्नियमात् ॥

एतेन कर्तृस्मरणस्या[2]विध्यर्थत्वादिति निरस्तम् ॥

वेदे प्रतिकल्प[3]मनियतान्यनेका[4]नुपूर्व्याणि [5]तेषां यथावदध्ययनानि चाभ्युदयकारणानि, अन्यथाध्ययनानि च वाग्वज्रतयानर्थकार-

धारणं अविस्मरणेनानुसन्धानं आदिपदोक्तप्रवचनादिकं तद्वतीत्यर्थः । तथाचाल्पप्रबन्धे तदभावेपि भारतादाविवोक्तविशेषणवत्युरुतरप्रबन्धे वेदे स्यादेव कर्तृस्मृतिरध्यापकानाम् । न च सास्तीति भावः ॥

एतेन गूढकर्तृकवाक्ये सत्यपि पौरुषेयत्वे कर्तृस्मृतिर्नेति व्यभिचार इति प्रत्युक्तम् । उक्तविशेषणवत्युरुतरप्रबन्धे तस्यावश्यकत्वादिति ॥

एतेन "कपिलकणादगौतमैस्तच्छिष्यैश्चाद्यपर्यन्तं वेदे सकर्तृकत्वस्मृतिरस्ति" इति मणिकुसुमाञ्जल्यादावुक्तं निरस्तम् । अध्यापकानां स्मृतेरसिद्धेः ॥

यत्तु सुधायां "किञ्चेश्वरः सर्गादौ यं वेदं निर्मायैकस्मै शिष्यायोपदिशति तमेवान्यस्मा उपदिशति वेदान्तरं वा" इत्यादिनोक्तं तदपि बाधकं स्पष्टं विवृण्वन्नाह—**वेद इत्यादिना** । आनुपूर्व्याणीत्यस्य कारणान्यनर्थकारणानीत्यनयोश्च इति कल्प्यत्वादित्यनेन प्रत्येकमन्वयः—**यथावदिति** । तस्मिंस्तस्मिन्कल्प इत्यर्थः—**वाग्वज्रतयेति** । वाग्रूपवज्रतयेत्यर्थः ॥

"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।

[1] तदिति नास्ति—**छ-ख.** [2] स्यवि—**च-क.** [3] ल्पं नियता—**ख.** [4] न्यानु—**ख-क**—ल्पं तान्यनेका—**छ.** [5] 'तेषां' इति द्विवारं वर्तते—**छ.**

णानि, अभ्युदयादीनि च विजातीयकारणजन्यत्वात्तार्णाद्यग्निवद्विजातीयानीति कल्प्यत्वात्कल्पनागौरवं च स्यात्। अन्यथेश्वर एकस्मिन्नेव कल्प एकस्मा एकयानुपूर्व्या विशिष्टवेदमुपदिश्यान्यस्मा [1]अन्ययानुपूर्व्याविशिष्ट[2]मुपदिशातीति स्यात्। एककल्पीयायाः पूर्वस्या आनुपूर्व्या अपि[3] स्मरणान्न तत्त्याग इति चेत्तत्किमीश्वरः कल्पान्तरीयां पूर्वामानुपूर्वीं व्यस्मार्षीत्॥

धर्मादिसिद्धिश्च न स्यात्। प्रकारान्तरेण

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्" ॥ इत्यादेरिति भावः—**अभ्युदयादीनि चेति**। प्रतिकल्पं जायमानानि स्वर्गादीनीत्यर्थः—**विजातीयेति**। भिन्नभिन्नानुपूर्वीरूपत्वाद्विजातीयकारणेत्यर्थः—**तार्णेति**। तृणजन्याम्नावरणिजन्याग्नितो वैजात्यम् आरणेयाग्नौ च तार्णाद्यग्नितो वैजात्यं यथा त्वन्मते तथेत्यर्थः। एतच्चाग्रे तृणादीनामेकशक्तिसाधनवादे द्वितीयपरिच्छेदे व्यक्तम्॥

ननूक्तकल्पनाचतुष्टयमपि न दोषायेत्यतः प्रागुक्तापाद्यस्यानिष्टत्वद्योतनाय विपक्षे बाधकमाह—**अन्यथेति**। उक्तकल्पनाचतुष्टयस्य गौरवतया दोषत्वानभ्युपगम इत्यर्थः—**इति स्यादिति**। गौरवस्य तवादोषत्वादिति भावः। वैलक्षण्यमाशङ्क्य समं प्रकृतेपीति भावेनाह—**एकेत्यादिना**॥

"न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित्।"

इत्यनुभाष्याद्युक्तबाधकमाह—**धर्मादीति**। यदि वेदः पौरु-

---

[1] अन्यानु–कुं–छ–क–ख. [2] वेदमित्यधिकं वर्तते–छ. [3] वि–छ–क–ख–कुं–ग.

तदासिद्धेरुक्तत्वात्। वेदस्य पौरुषेयत्वे ईश्वरस्य बुद्धजिनादिना वेदस्य च बुद्धाद्यागमादिना तुल्यताया अपरिहार्यत्वे[1]न वेदप्रामाण्यं च न स्यात् ॥

न च बौद्धागमाद्वेदे महाजनपरिग्रहो विशेषः। महत्त्वस्य पूज्यत्वरूपत्वे वेदपरिग्रहीतृणां पूज्यत्वस्याद्याप्यसिद्धेः। सङ्ख्याधिक्यरूपत्वे सन्दिग्धासिद्धेः। तुरुष्कागमादौ व्यभिचाराच्च।

षेयः स्यादित्यनुवृत्तिः—**उक्तत्वादिति**। न च हेतुत्रयेपि विशेषणासिद्धिरित्यादिग्रन्थेनेत्यर्थः। अन्यत्राद्दष्टस्य सर्वज्ञत्वस्य कल्पनमित्यत्र तत्त्वनिर्णयटीकायां तर्हि जिनादावपि तत्स्यादित्यापादितं साम्यमीश्वरवादेपि सममितिभावेनाह—**वेदस्य पौरुषेयत्व इति**। ईश्वरकृतत्वइत्यर्थः—**बुद्ध[2]जिनादिनेति**। ईश्वरसार्वज्ञ्यवद्बुद्धादावपि तद्भावस्यापादनसम्भवादिति भावः ॥

"वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्यते" इति मण्युक्तमाशङ्क्य निराह—**न चेति**। "अपौरुषेयत्वाद्वेदस्य" इत्येतद्व्याख्यावसरे तत्त्वनिर्णयटीकोक्तखण्डनरीतिमनुसृत्य महत्त्वं विकल्प्यनिसह—**महत्त्वस्येति**। **अद्यापीति**। पौरुषेयतया वेदप्रामाण्यविवादवेलायामेव न किन्तु महाजनपरिग्रहात्प्रामाण्यमित्युक्तिदशायामपीत्यर्थः—**सन्दिग्धेति**। बौद्धेषु वा वैदिकेषु वा सङ्ख्याप्रकर्षस्यानिर्णयादिति भावः ॥

---

[1] त्वं। न चेदप्रामाण्यं च न स्यात्। न च—**क**. [2] जिनेति नास्ति-**मु**.

सप्तघटिकाभ्यन्तरभोजनादिरूपजीविकादिहेतुद-र्शनशून्यत्वरूपत्वे वैदिकेष्वपि केषुचिज्जीविकादि-हेतोर्दर्शनात्। बौद्धादिष्वपि केषुचित्तददर्शनाच्च।

नापि सर्वसम्मतवैद्यशास्त्रपरिगृहीतार्थकत्वं महाजनपरिगृहीतत्वम्, वैद्यशास्त्रे रोगशान्त्यर्थं वैदिककर्मविशेषविधानादिति वाच्यम्। बौद्धा-नुसारिवैद्यशास्त्रे तच्छान्त्यर्थं बौद्धागमोक्तकर्म-णोपिविधानात्॥

नापि सर्वसम्मतव्याकरणपरिपालनीयत्वम्। जै-नव्याकरणपरिपालनीयत्वस्य जैनागमेपि सत्त्वात्॥

यत्तु कुसुमाञ्जलौ द्वितीयपरिच्छेदे "हेतुदर्शनशून्यैर्ग्रहणाध्यय धारणार्थानुष्ठानादिरेव महाजनपरिग्रहः" इत्युक्त्वा सप्तघटिकान्तभोज दिरूपजीविकारूपो हेतुर्बौद्धेष्वस्ति न वैदिकेष्वित्युक्तम् तदाशङ्क्यनिरा सप्तेति। सप्तघटिकाभ्यन्तरे सप्तघटिकामध्ये प्रातःकाले भोजना ञ्जनादिरूपजीविकाहेतुर्येषु न दृश्यते ते महान्त इत्यर्थः। जीवि दीत्यादिपदेन रागकुहकवञ्चनादिरूपकुसुमाञ्जल्युक्तहेत्वन्तरग्रहः—द नादिति तथाच भागासिद्धिरिति भावः। व्यभिचारञ्चाह—बौद्धेति

महत्त्वं निरस्य तत्परिगृहीतत्वं विकल्प्य निराह—नापी वैद्यशास्त्रपरिगृहीतार्थकत्वं व्यनक्ति—वैद्यशास्त्र इति। [1]धान्वन्त मन्त्रैरयुतयहोमजपादिरूपवैदिककर्मेत्यर्थः—बौद्धागमोक्तेति। ज्व दिशान्त्यर्थं बुद्धार्चनादिकर्मण इत्यर्थः[1]—जैनेति॥

---

[1] अयं ग्रन्थः नास्ति—कुं-अ.

न च सर्वदर्शनानुमतार्थकत्वम् वेदोक्त सत्यभाषणादीनां धर्मत्वस्य सर्वदर्शनानुमतत्वादिति वाच्यम्। बौद्धोक्ताहिंसाधर्मत्वस्यापि सर्वैः स्वीकारात्। साङ्ख्यैर्वैदिकहिंसाया अधर्मत्वस्वीकाराच्च ॥

न च मन्त्रायुर्वेदादौ संवादित्वम्। एकदेशसंवादित्वस्य बौद्धोक्ताग्निस्तम्भादिकर्मस्वपि दर्शनात्। विसंवादाभावस्य च वेदेप्यभावात् ॥

तस्मादपौरुषेय[1]वेदपरिग्रहादेव वैदिकानां पूज्यत्वम्। न तु तत्परिग्रहाद्वेदस्य प्रामाण्यम् ॥

एतदप्युक्तं "गौरवदोषेणेति।" बुद्धाद्यागमतुल्यत्वेन[2] विपरीतलक्षणया लाघवदोषेणेत्यर्थः। तस्मात्पौरुषेयत्वे वेदस्य बौद्धागम[3]तौल्यमेवेति सुस्थ [4]एवानुकूलतर्कः ॥

"इन्द्रश्चन्द्रः काशकृत्स्नःपिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"

इति कविकल्पद्रुमोक्तेस्तस्यापि व्याकरणकर्तृत्वप्रसिद्धेरिति भावः। व्यभिचारासिद्धौ क्रमेणाह—बौद्धेति। साङ्ख्यैरिति ॥

एतदपीति। बौद्धाद्यागमसाम्यमित्येतदपीत्यर्थः। लाघवदोषेण अप्रयोजकतापत्तिरूपदोषेणेत्यर्थः। तत्र हेतुः बौद्धाद्यागमतुल्यत्वेनेति ॥

---

[1] वेदपदं नास्ति छ. [2] 'गौरवदोषेण' इत्यधिकं—कुं-क-ख-छ. [3] तुल्यत्वं—छ. [4] एवकारो नास्ति—छ-क-ख.

किञ्च "वाचा विरूपनित्यया। श्रुतिर्वाव नित्या। अनित्या वा व स्मृतयो याश्चान्या वाचः" इत्यादिश्रुत्या—

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।"

"नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः"

वेदस्य पौरुषेयत्वे तत्त्वनिर्णयाद्युक्तश्रुत्यादिविरोधं च बाधकमाह—**किञ्चेति** ॥

"तस्मै नूनमभिद्यवे वाचा विरूपनित्यया।

वृष्णे चोदस्व सुष्टुतिं"

इति मन्त्रस्यायमर्थः। अभितो द्यौः प्रकाशो यस्यासावभिद्युः तस्मा अभिद्यवे वृष्णे वर्षित्रे नूनं निश्चितम् हे विरूप नित्यया वाचा वेदलक्षणया सुष्टुतिं शोभानां स्तुतिं चोदस्व चोदयस्व प्रेरय कुर्विति विरूपमृषिं प्रत्युच्यते ॥

वाक्छब्दो वागिन्द्रियेपि प्रसिद्ध इति स्पष्टां वेदविषयां श्रुतिमाह—**श्रुतिरिति**। आदिपदेन ॥

"विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः।

अनादिनित्या सा तच्च"

इत्यादि[1]ग्रहः। उक्तश्रुतिद्वये[2]नानादित्वानुक्तेर्देवताधिकरणभाष्योक्तस्मृतिं चाह—**अनादीति**। आदिनिधनवर्जितत्वेन नित्येत्यर्थः ॥

ननु विधिः प्रेरणा नियोग इत्यनर्थान्तरत्वाद्विध्युद्देशानां लौकिकवत् स्वतन्त्रवक्तृकत्वमेवेत्यादिचोद्यनिरासाय तत्त्वनिर्णयोक्तं ब्रह्माण्डपुराणवाक्यं चाह—**नित्या वेदाः समस्ताश्चेति**। समस्तपदेन विधिभाग-

[1] वक्ष्यमाणपदमाधिकं—कुं. [2] येऽनादि-मु.

इत्यादिस्मृत्या च विरोधः ॥

न चेदं वाक्यं श्रुतीनां बहुकालीनत्वादुपचरितार्थम् । वावेत्यवधारणात् । तादृशीनाम[1]पि स्मृतीनामनित्यत्वोक्तेश्च । स्मृतौ वाक्यशेषे—

"सर्गेसर्गेऽमुनैवैत उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैः तैःस्वरैरेव नान्यथा"

इति क्रमाद्य[2]व्यत्यासोक्तेश्च ॥

"तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु"

इति वेदोत्पत्तिवाक्यगतिकीर्तनाच्च ।

"विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च विना तां न स गम्यते"

इति श्रुत्यन्तरस्थाऽनादिनित्यशब्दयोर्ब्रह्मणि मुख्यवृत्तिः वेदे त्वमुख्येति वृत्तिद्वयापाताच्च ॥

"यावद्ब्रह्मविष्ठितं तावती वाक्"

इति श्रुत्यन्तरे ब्रह्मतुल्यत्वेन सर्वदेशकालव्याप्ततयावस्थित्युक्तेश्च ।

स्यापि गृहीतेरिति भावः—**विरोध इति** । वेदस्य पौरुषेयत्व इत्यापादकानुवृत्तिर्ज्ञेया । तादृशीनां बहुकालीनानामित्यर्थः—**स्मृताविति**। नित्या वेदा इति स्मृतावित्यर्थः—**तदुत्पत्तीति** । स्मृतौ वाक्यशेषे इत्यनुकृष्यते । नोपचरितार्थमिति साध्येन पञ्चम्यन्तानामन्वयः । तच्च ब्रह्म चानादिनित्यमित्यर्थः । न स गम्यत इति तच्छब्दस्य ब्रह्मशब्दोक्तः परमात्मेत्यर्थः—**यावदिति** ॥

[1] अपिपदं न-च. [2] दावव्य-च.

एतदप्युक्तं "गौरवदोषेण" इति । श्रुत्यादि-विरुद्धक्रमवैजात्यरूपगौरवेणेत्यर्थः ॥

अपौरुषेयत्वे अनुकूलतर्कः ॥ २० ॥

न चो[1]क्तानुमानानां सत्प्रतिपक्षत्वं शङ्क्यम् । वेदः पौरुषेयो वाक्यत्वाल्लौकिकवाक्यवदित्यत्र पुरुषाधीनोत्पत्तिकत्वरूपे सकर्तृकत्वे साध्ये उक्त-रीत्या क्रमस्य कृतकत्वेन सिद्धसाधनात् ।

"सहस्रधा महिमानः सहस्रं यावद्ब्रह्म"

इति श्रुतौ यस्य सहस्रं अपरिमिता महिमानः प्रत्येकमपि सहस्रधा अपरिमितविधाः । तद्ब्रह्म यावत् देशकालव्यापितया विष्टितं विशेषेण स्थितं वाक्वेदवागपि ताव[2]द्देशकालव्यापिनीत्युक्तेरित्यर्थः । **एतदपीति** । पौरुषेयत्वे श्रुत्यादिविरोध इत्येतदपीत्यर्थः । तद्व्यनक्ति । **श्रुत्यादीति** ॥

अपौरुषेयत्वे अनुकूलतर्कः ॥ २० ॥

पञ्चमस्तब[3]के कुसुमाञ्जल्याद्युक्तमनुमानमाशङ्क्य प्रतिज्ञादोषेण निराह—**वेद इति** । प्रमाकरणामूलकत्वे सति प्रमाणशब्दरूपो वेद इत्यर्थः—**उक्तरीत्येति** । वेदापौरुषेयत्वानुमानवादे क्रमविशेषविशि-ष्टानां वर्णानामित्यादिनोक्तरीत्येत्यर्थः । "न च लौकिकवाक्यवत्स-कर्तृकत्वम् । तस्याकर्तृकत्वप्रसिध्यभावात्" इत्यादिना तत्त्वनिर्णय[4]त-

[1] क्तहेतूनां—छ-क-ख. [2] तीदे—कुं. [3] कक्ष—अ-कुं [4] तदिति नास्ति—कुं-अ.

अर्थमुपलभ्य रचितत्वरूपे विप्रतिपन्ने पौरुषेयत्वे साध्ये च अबुद्धिपूर्वकत्वेपि रेखाविशेषवत्त्वेनैव पिपीलिकादिलिपेर्लिपित्ववत्, गुणाजन्य[1]योः साक्षिज्ञानेश्वरज्ञानयोर्याथार्थ्यवत्, आकाङ्क्षादिमत्त्वेनैवाकाङ्क्षादिम[2]त्स्वप्नादिवाक्यस्य वाक्यत्ववच्च वेदस्यापि वाक्यत्वस्योपपत्त्या गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ॥

[3]अन्यथा वेदो ज्ञानकरणेनार्थमुपलभ्य रचितो वाक्यत्वादित्यपि स्यात्[3]। अर्थानभिज्ञोच्चारिते आधुनिके वेदे विसंवादिनि शुका[4]दिवाक्ये च व्यभिचाराच्च। उक्तश्रुत्यादिबाधप्रातिकूलतर्कपराहत्यादिसाधारणदोषाच्च ॥

टीकयोरभिमतमप्रयोजकत्वं व्यनक्ति—**अर्थमुपलभ्येत्यादिना**। **विप्रतिपन्न इति**। तथाच न सिद्धसाधनतादोष इति भावः। अबुद्धिपूर्वकत्वेपीत्यस्य वाक्यत्वस्योपपत्त्येत्यनेनान्वयः। तत्र दृष्टान्तत्रयोक्तिः—**रेखेत्यादि**। स्वमतेनोक्तिः—**साक्षीति**। शुकादिवाक्येपीश्वररचितत्वेन साध्यसत्त्वनिरासाय **विसंवादिनीति** विशेषणोक्तिः॥

"तर्कपराहतं च वाक्यत्वानुमानं श्रुतिपुराणविरुद्धं चे"ति तत्त्वनिर्णयटीकोक्तमाह—**उक्तेति**। एतच्च प्रतिकूलतर्कपदेनाप्यन्वेति। वेदापौरुषेयत्वानुमाने येऽनुकूलतर्का उक्तास्ते सर्वे पौरुषेयत्वे प्रतिकूलतर्का इत्यर्थः। आदिपदेनानुकूलतर्कराहित्यग्रहः—**साधारणेति**।

[1] त्वेपि साक्षि—कु-छ-क-ग-ख. [2] दुन्मत्ता—छ-हुःखप्रा—क. [3] इयं पङ्क्तिर्नास्ति—ग. [4] आदिपदं न—मु-च.

अत्रोक्तं मणौ[1] वेदः सजातीयोच्चारणानपेक्षोच्चरितजातीयो वाक्यत्वात्संमतवत्[2]। अत्र साध्ये सजातीयपदं शब्दमूलकशब्दे व्यभिचार[3]परिहारार्थम्। शब्दस्यार्थैक्यमात्रेण मूलत्वोपपत्त्योच्चारण[4]साजात्यस्यानपेक्षितत्वात्। जातीयपदं त्वाधुनिकवेदे बाधनिरासार्थम्। [5]तत्र च न सिद्धसाधनम्। अपौरुषेयत्वपक्षे सर्वस्यापि वेदाध्ययनस्य गुर्वध्ययनपूर्वकत्वेन सजातीयोच्चारणसापेक्षत्वात्। न चाप्रयोजकता। उक्तसाध्ये वेदातिरिक्तवाक्यत्वापेक्षया लघुत्वेन वाक्यत्वस्यैव प्रयोजकत्वादिति [6]मैवं ॥

पौरुषेयत्वानुमानमात्रसाधारणेत्यर्थः—**अत्रेति**। वाक्यत्वहेतुदूषणविषये तत्परिहारार्थमन्यथानुमानमुक्तं शब्दखण्डे वेदपौरुषेयत्ववाद इत्यर्थः। वेदः पौरुषेयो वाक्यत्वादित्यत्र सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वमिति साध्यस्य निरुक्तत्वादेवं प्रयोग उक्तः सजातीयपदं समानजातीयानुपूर्वीकशब्दपरम्। सजातीयोच्चारणानपेक्षया तदपेक्षां विनैवोच्चरितो यस्तज्जातीय इत्यर्थः। सर्गादावीश्वरोच्चरितत्वं पर्यवस्यतीति विवक्षितसिद्धिरिति भावः ॥

अस्फुटत्वात्पदकृत्यं व्यनक्ति—**अत्रेति**। पक्षधराद्युक्तमाह—**बाधेति**। तस्याध्यापकोच्चारणापेक्षयैवोच्चरितत्वाद्बाधः। जातीयपदे दत्ते तु तादृशादिकालीनजातीयत्वान्न बाध इति भावः ॥

---

[1] ननु तर्हि वेदः-छ-क-यच्चोक्तं मणौ ननु-ख. [2] इत्यस्तु इत्यधिकं-छ-क-ख. [3] निरासार्थं-छ-क-ख. [4] जातीयेत्यस्या-छ-क-ख. [5] अ-कुं-छ-क-ख. [6] चेन्नैवं-छ-क-ख.

मीमांसकं प्रति सिद्धसाधनाभावेपि मां प्रति सर्गादावीश्वरेण स्ववुद्धिस्थपूर्वपूर्व[1]कल्पक्रमणोच्चारणेपि तस्योच्चारणा[2]न्तरानपेक्षत्वेन सिद्धसाधनात्। व्याप्य इव व्यापकेप्यवच्छेदकलाघवस्यादरणीयत्वेनोच्चरितत्वस्यैव व्यापकतया हेतोरुक्तसाध्यं प्रति गौरवेणाप्रयोजकत्वाच्च। आकाङ्क्षादिमत्त्वं तु त्वया[3]प्याहर्तव्यम्।

रुचिदत्तस्तु पठ्यमानभारतादौ सम्प्रदायमते हेतुनिश्चये साध्यसंदेहे संदिग्धानैकान्त्यमिति जातीयपदमित्यवोचत्—**मीमांसकं प्रतीति**। तस्य निरीश्वरवादित्वादिति भावः॥

"पौरुषेयत्वानुमानानामप्रयोजकत्वात्" इति सुधोक्तिमनुरुध्याप्रयोजकत्वं व्यनक्ति—**व्याप्य [4]इवेति**। यथा धूमादौ नीलधूमत्वादिकं न व्याप्यतावच्छेदकं किंतु लाघवाद्धूमत्वादिकमित्युच्यते तथा व्यापकेपि पीतवह्नित्वादिकं न व्यापकतावच्छेदकं किंतु वह्नित्वादिकमेव तद्वदिहापि वेदातिरिक्तवाक्यत्वापेक्षया वाक्यत्वं लघ्वितिवत् साध्ये वाक्यत्वानिरूपितव्यापकतावच्छेदकं न सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं किंतु लाघवादुच्चरितत्वमेवेत्युक्तसाध्ये वाक्यत्वहेतुर्गौरवपराहतः सन्नप्रयोजको भवतीत्यर्थः॥

नन्वेवं वेदे आकाङ्क्षायोग्यताऽऽसत्त्यादिमत्त्वमपि न सिध्येत्। लाघवेनोच्चरितत्वमात्रेण वाक्यत्वस्योपपत्त्या गौरवेणाकाङ्क्षादिमत्त्वं प्रत्यप्रयोजकत्वादित्यत आह—**आकाङ्क्षादीति**। **त्वयापि पौरुषेयत्व-**

[1] कल्पपदं नास्ति-**मु-च.** [2] अन्तरपदं न-**मु-च.** [3] प्यनुसर्तव्यं **छ-क-ख**-प्यादर्तव्यं-**ग.** [4] इवेति नास्ति-**मु.**

स्वयंप्रति[1]भातानां वेदवाक्यानां सजातीयोच्चारणानपेक्षत्वेनांशे सिद्धसाधनाच्च ॥

एतेन वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति महाजनपरिग्राह्यतावच्छेदकत्वे सति वाक्य-

वादिनापीत्यर्थः । वाक्यत्वस्याकाङ्क्षादिमच्छब्दत्वरूपतया तदभावे वाक्यत्वस्य स्वरूपोच्छित्तेरुभयसंमततया तत्र गौरवदोषाभावात् । इह च त्वदुक्तगुरुभूतसाध्येन विनाप्यस्तु वाक्यत्वमित्युक्तौ बाधकाभावादप्रयोजकत्वमेव वाक्यत्वस्येति भावः—**स्वयमिति** । गुरुमुखोच्चारणापेक्षां विनैवेत्यर्थः ॥

"जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः ।
मुनिनां प्रतिभास्यन्ति भागेनैव न सर्वशः" ॥

इति स्मृत्या जन्मान्तरेऽधीतानामस्मिञ्जन्मनि गुरुमुखोच्चारणापेक्षां विनैव कदाचित्कालविशेषे प्रतीतानां वेदवाक्यानामित्यर्थः ॥

यदत्रोक्तं रुचिदत्तादिना तद्भिन्नत्वेन पक्षो विशेषणीय इति तन्न । वेदः पौरुषेयो न वेति कृत्स्नवेदविषयपौरुषेयत्वविमत्यनानुगुण्येनार्थान्तरात् ॥

मण्युक्तप्रयोगान्तरं निराह—**एतेनेति** । निरस्तमित्यन्वयः । अत्रापि साध्ये सजातीयपदं पूर्ववच्छब्दमूलकस्मृतित्वे व्यभिचारवारकं ध्येयम् । पठ्यमानवेदे बाधाप्रसक्तेर्न जातीयपदोक्तिः ॥

महाजनेति । यद्यपि मणौ प्रमाणतावच्छेदक वाक्यधर्मत्वा-

[1] तीतानां—छ-क,ख.

वृत्तित्वात् । स्वाधिकरणसमानानुपूर्वीकसकल-वृत्तित्वाद्वा[1] । भारतत्ववत् । अत्र च पक्षस्यै-कत्वेन नांशे सिद्धसाधनम् । आद्ये हेतावेत-द्भेदत्वाद्यौ व्यभिचार[2]परिहाराय महाजनेत्यादि-सत्यन्तं विशेषणम् । एतद्भेदत्वं तु न[3]तदवच्छे-दकम् । लाघवेन धूमत्ववद्भेदत्वस्यैव तदवच्छे-दकत्वात् । यागत्वादौ व्यभिचारवारणाय वाक्य-

---

दित्येव हेतुरुक्तस्तथापि प्रमाणतावच्छेदकत्वस्य प्रमाणमात्रवृत्तित्वरू[4]पत्वेऽद्यतनवेदत्वे व्यभिचारात् । तदवच्छित्तिप्रत्ययजनकत्वे त्वसिद्धिः । मणिकृन्निरुक्तवेदत्वस्य गुरुत्वेनावच्छि[5]त्तिप्रत्ययाजनकत्वेन स्मृतिसाधा-रणस्यान्यस्यैव वाच्यत्वादित्यतः पक्षधराद्युक्तविवक्षानुरोधेन महाजने-त्याद्युक्तम् ॥

नरहर्युक्तविवक्षानुरोधेनाह—**स्वेति** । स्वस्य वेदत्वस्य यदधि-करणम् सर्गादिकालीनो वाऽद्यतनैः पठ्यमनो वा वेदः तत्समानानु-पूर्वीकाः सर्वैः पाठ्यमाना वेदाः तत्सकलवृत्तित्वादित्यर्थः—**भारतत्व-वदिति** । तस्य तादृशाद्यभारतवृत्तित्वात्साध्यवत्त्वंसाधनवत्त्वं च व्यक्त-मिति भावः—**अंश इति** । स्वयंप्रतिभातवेदांश इत्यर्थः—**एतद्भेदत्वेति** । बुद्धिस्थं किञ्चित्चैत्रादिना पठ्यमानवेदत्वमेतद्वेदत्वपदेन गृह्यते । सत्यन्तेनोक्तदोषनिरासं व्यनक्ति—**एतद्भेदत्व[6]न्त्विति** । **धूमत्व-वदिति** । धूमत्वं यथावह्निव्याप्यत्वावच्छेदकं न त्वेतद्धूमत्वं तथेत्यर्थः—

---

[1] 'वा' इति नास्ति—**मु.** [2] वारणाय—**छ-क-ख.** [3] पक्षताव—**मु-च.** [4] पेऽद्यतन—**अ.** [5] न—**कुं.** [6] मिति—**कुं**-चेति-**अ.**

वृत्तित्वादित्युक्तम् । द्वितीये सकलपदेनैवैतद्वेदत्वादौ व्यभिचारनिरासः । एतद्वेदत्वस्य स्वाधिकरणेनैतद्वेदेन समानानुपूर्वी[1]के पूर्ववेदे वृत्त्यभावादिति निरस्तम् । उक्तरीत्या वेदत्वस्य सजातीयोच्चारणानपेक्षेणेश्वरेण स्वयं प्रतिभातवेदैर्वसिष्टादिभिश्चोच्चरिते वृत्त्या सिद्धसाधनात् । वाक्यवृत्तित्वस्यो[2]च्चरितत्वेन महाजनपरिग्राह्यतावच्छेदकत्वस्य च धर्मादिप्रमापकवृत्तित्वेनैवोपपत्त्योक्तं[3] साध्यं प्रति गौरवेणाप्रयोजकत्वाच्च । द्वितीयहेतोरपि स्वाधिकरणे सर्वत्र तुल्यानुपूर्वीप्रयोजक कण्ठताल्वादिरूपतुल्यकारणेनैवोपपत्त्या [4]गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ॥

द्वितीय इति । हेताविति्यर्थः । व्यभिचारनिरासं व्यनक्ति—एतद्वेदत्वस्येति । इतीति । मणावुक्तमेतेन निरस्तमित्यर्थः । एतेनेत्युक्तं व्यनक्ति—उक्तरीत्येति । मां प्रतीत्यादिनोक्तरीत्येत्यर्थः—स्वयंप्रतीभातवेदैरिति बहुव्रीहिः ॥

हेतौ विशेष्यविशेषणरूपांशद्वयस्याप्युक्तसाध्येन विनाऽन्यथोपपत्त्याऽप्रयोजकत्वमाह—वाक्येत्यादिना । उच्चरितवृत्तित्वेनोपपत्त्येत्यन्वयः । गौरवेणेत्युलक्षणम् । विपक्षे बाधकाभावेन चेत्यपि ध्येयम् । श्रुत्यादिबाधादिरूपप्रागुक्तसाधारणदोषोप्यत्रानुसन्धेयः—तुल्यकारणेनेति । येन कारणेन वेदत्वाश्रयव्यक्तिषु सर्वत्र तुल्यानुपूर्वी

---

[1] समस्तं पदं—च-क. [2] 'च्चारि' इति संशोधितं दृश्यते—छ. [3] क्तसा—छ-च-क-ग-ख. [4] गौरवेण इति पदमनन्तरं वर्तते—मु-च-छ-क-ख—'गौरवेण' इति नास्ति—ग.

एतेन बुबोधयिषुपठितो वेदः स्वानपेक्षस्वसमानविषयकज्ञानपूर्वकः। बुबोधयिषुवाक्यत्वात् लौकिकवाक्यवदिति निरस्तम्। स्वसमानविषयकज्ञानपूर्वकत्वमात्रेण बुबोधयिषुवाक्यत्वस्योपपन्न[1]त्वेन [2]गौरवेण स्वानपेक्षज्ञानं प्रत्यप्रयोजकत्वात्। [3]*अन्यथोक्तेनैव हेतुना स्वानपेक्ष[4]स्वसमानविषयकज्ञानकरणसापेक्षत्वमपि सिध्येत्*। मन्मतेईश्वर[5]ज्ञानस्य वेदानपेक्षत्वेन सिद्धसाधनाच्च। नापि वेदो वाक्यार्थगोचरयथार्थज्ञानजन्यः।

भवति तादृशकारणेनैव हेतुरुपपन्नः। न त्वन्येन। तच्च कारणं कण्ठताल्वादिकं न तु तलताडनादिरूपम्। तथा च सजातीयोच्चारणानपेक्षोच्चरितवृत्तित्वप्रयुक्तत्वाभावादप्रयोजकत्वं हेतोरित्यर्थः॥

बुबोधयिष्विति। शिष्यान्बोधयितुमिच्छताऽध्यापकेन पठितो वेद इत्यर्थः। इदानीन्तनाज्ञपठितवेदे बाधवारणाय बुबोधयिषुपठितेत्युक्तिः। स्वेति सन्निहितो बुबोधयिषुपठितो वेद उच्यते। तदनपेक्षं तदजन्यमित्यर्थः। तत्समानविषयकं च यज्ञानं तत्पूर्वक[6] इत्यर्थः। तादृशं च ज्ञानमीश्वरनिष्ठमिति तज्जन्यत्वेन साध्यसिद्धिरिति भावः। अज्ञोच्चरितवाक्ये वाक्यत्वस्य व्यभिचारनिरासाय बुबोधयिष्विति हेतौ विशेषणम्॥

"अनुमानानामप्रयोजकत्वात्" इति सुधोक्तिमनुरुध्याह—**स्वसमानेति**। मण्युक्तं प्रयोगान्तरं प्रत्याचष्टे—**नापि वेद इति**।

[1] त्वेगौ-**मु-च.** [2] गौरवेण इति नास्ति-**छ-क-ख.** [3] एतावन्नास्ति-**ग.** [4] 'स्वसमानाविषयकरण' इत्याधिकं-**क.** [5] ज्ञानपदं नास्ति-**ग.** [6] कमि-**कुं.**

प्रमाणशब्दत्वात् । भारतवदिति वाच्यम् । यथार्थज्ञानमात्रस्य हेतुत्वाविवक्षायामर्थबुबोधयिषया पठिते आधुनिकवेदांशे सिद्धसाधनात् । तन्निरासाय शब्दाजन्यत्वेन ज्ञानस्य विशेषणे च शब्दमूलकशब्दे व्यभिचारात् ॥

सोपि पक्षतुल्य इति चेन्न । प्रामाण्यस्य स्वत-

मणौ वेदा इति पक्षनिर्देशेपि तत्रैव पठ्यमानवेदस्य पक्षसमत्वोक्तेः यत्किञ्चिद्वेदपक्षक[1]त्वेपीष्टसिद्धेर्बहुवचनमविवेकमूलमिति सूचनाय वेद इत्येव पक्षनिर्देशः कृतः । अध्यापकानुपूर्व्यादिज्ञानजन्यत्वेनार्थान्तरवारणाय साध्ये वाक्यार्थगोचरेत्युक्तिः । वाक्यार्थगोचरज्ञानजन्य इत्येवोक्तौ ईश्वरे भ्रमसिद्धावपि नेष्टसिद्धिरिति तादृप्यसिद्धये यथार्थपदम्—**भारतवदिति** । प्रत्यक्षमूलाद्यभारतवदित्यर्थः—**मात्रस्येति** । शब्दा[2]जन्यत्व विशेषणहीनस्येत्यर्थः । **हेतुत्वेति** ॥ जनकत्वेत्यर्थः ॥

नन्वेतद्दोषनिरासायैव शब्दा[3]जन्येति ज्ञानविशेषणमुक्तं मणावित्यत आह—**तन्निरासायेति** । "तादृशस्यापि द्विकर्तृकत्वादिति" मण्युक्ते र्भावमाशङ्क्याह—**सोपीति** । प्राचीनमते पक्षसमेपि सन्दिग्धसाध्यवति हेतुनिश्चयेन व्यभिचारस्य दोषत्वेप्याधुनिकमते दोषत्वाभावस्येश्वरवादे मणावेव व्यक्तत्वादिति—**प्रामाण्यस्येति** । हेतौ विशेष्यस्य विशेषणस्य वोक्तरूपसाध्येन विनाऽनुपपत्त्या विशिष्टहेतुना साध्यसिद्धिर्वाच्या । तत्र विशेष्यं शब्दत्वं तावन्नानुपपन्नम् । शब्दाभासेपि तस्य सत्त्वात् । किन्तु विशेषणस्य प्रमाजनकत्वरूपप्राण्यस्यैवानुपपत्त्या साध्यसिद्धि-

---

[1] क्षीकारे–मु-अ. [2] 'ब्द'–कुं. [3] ब्द–कुं.

स्त्वेन परतस्त्वेपि यादृच्छिकसंवादिवाक्य इवावश्यक योग्यतादि[1]नोपपन्नत्वेन गौरवे[2]णोक्तसाध्यं प्रत्यप्रयोजकत्वात्। अन्यथोक्तेनैव हेतुना वाक्यार्थगोचरप्रमाकरणपूर्वकत्वमपि सिध्येत् ॥

एतेन यथार्थज्ञानत्वस्य कारणतावच्छेदकत्वं विवक्ष्यत इति निरस्तम्। प्रामाण्यस्य स्वतस्त्वेन परतस्त्वेपि नित्यत्वेनेश्वरज्ञानस्य प्रमात्ववच्छेदस्यापि नित्यत्वेन प्रमाणशब्दत्वोपपत्तेः ॥

एतेन वेदस्य यथार्थज्ञानपूर्वकत्वाभावेऽन्धपरम्परा स्यादिति निरस्तम्। प्रत्यक्षवद्गुणाजन्येश्वरज्ञानवच्च तदपूर्वकत्वेप्यन्धपरम्पराभावोपपत्तेः ॥

अत एव च वेदजन्या प्रमा [3]करणगुणपूर्विका जन्यप्रमात्वात् चाक्षुषप्रमावदिति निरस्तम्।

र्वाच्या। तस्याप्यन्यथोपपत्त्याऽप्रयोजकत्वमित्यर्थः। स्वतस्त्वेनेत्यस्य ज्ञानजनकत्वशक्त्यैवेत्यर्थः। उपपन्नत्वेनेत्यन्वयः—**परतस्त्वेपीति**। गुणप्रयुक्तत्वेपीत्यर्थः। योग्यतादीत्यादिपदेन योग्यताज्ञानदोषाभावादिग्रहः—**अप्रयोजकत्वादिति**। त्वदुक्तसाध्यं प्रतीत्यर्थः—**विवक्ष्यत इति**। प्रागुक्तांशतःसिद्धसाधनतानिरासायेति योज्यम् ॥

वेदनित्यत्वेमण्याद्युक्तं बाधकान्तरं निराह—**एतेन वेदस्येति अन्धपरम्परेति**। तथाच वेदेऽनाश्वसः स्यादिति भावः—**अत एवेति**।

---

[1] एवेत्यधिकं—**मु-च**—नाचोक्त—**छ-ख-क**. [2] णाप्रयो—**मु-च-क-ग**. [3] का—**छ-ग-ख-च**.

अप्रयोजकत्वात् ॥

नापि वेदाः सर्वज्ञप्रणीताः वेदत्वात् व्यतिरेकेण लौकिकवाक्यवदिति वाच्यम्। अप्रसिद्धविशेषणत्वात् ॥

ननु तर्ह्यसंसारिप्रणीता इति साध्यते। न चैवमप्रसिद्धविशेषणत्वम्। आत्मत्वमसंसारिनिष्ठम् जातित्वात् घटत्ववदित्यनेनासंसार्यात्मसिद्धौ, विमतः कस्यचिद्वाक्यस्य वक्ता आत्मत्वात् अहमिवेत्यनेन सामान्यतोऽसंसारिप्रणीतत्वसिद्धेरिति चेन्न। उक्तरीत्या गौरवेण वेदस्वरूपतत्प्रामाण्ययोरसंसारिप्रणीतत्वं विनाप्युपपत्त्याऽप्रयोजकत्वात् ॥

नापि वैदिकमहंपदं स्वतन्त्रवक्तृपरं अहंपद-

गुणाभावेपि प्रमात्वस्योपपन्नत्वादेवेत्यर्थः। तदेव व्यनक्ति। **अप्रयोजकत्वादिति** ॥

चिरन्तनानुमानान्तरमाशङ्क्य तत्त्वनिर्णयटीकोक्तदोषेण निराह। **नापि वेदा इति**। टीकोक्तमुपलक्षणमुपेत्य परोक्तमन्यदप्याशङ्क्य निराह—**ननु तर्हीत्यादिना**। **उक्तरीत्येति**। प्रत्यक्षवदनुमाजन्येश्वरज्ञानवच्चेत्यादिनोक्तरीत्योपपत्त्येत्यन्वयः।

उदयनोक्तं[1] प्रयोगान्तरमाशङ्क्य निराह। **नापीति**। "तद्ब्रह्मावेदहं ब्रह्मास्मीति" "अहमेव स्वयमिदं वदामि" इत्यादौ श्रुताहमाद्यस्मदादेशपदमित्यर्थः ॥

[1] 'प्रयोक्तृ' इत्यधिकं–अ.

त्वात् संमतवदित्यनेन पौरुषेयत्वसिद्धिरिति वाच्यम् । तथात्वे त्वन्मतेपि वेदे "शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तम" इत्यादौ स्वतन्त्रवक्तुरीश्वरस्यैव, भारतादौ च

किं नो राज्येन गोविन्द-
शिष्यस्तेहं शाधि मां त्वां प्रपन्नम् ॥

इत्यादौ व्यासस्यैव, लोके च "वाच्यस्त्वया मद्वचनात्स राजा" इत्यादौ कालिदासादेरेवाहं-शब्दार्थत्वापातात् ॥

"तथात्वे सङ्कल्पप्रार्थनादिवाक्यानामनर्थकत्वप्रसङ्गात्" इति तत्त्वनिर्णयटीकां विवृण्वन्नेव हेतुमाह—**तथात्व इति** । तैत्तिरीयोपनिषदि श्रुते प्रार्थनावाक्ये मे मम शरीरं विशिष्टाश्चर्षण्यः[1] प्रजा यस्य तत् विशिष्टप्रजायुक्तमस्तु मे मम जिह्वा मधुमत्तमा अतिशयेन स्वादुमती भवत्विति प्रार्थनाकर्तृयजमानवाचित्वेन श्रुतास्मदादेशरूपम[2]इतिशब्दार्थत्वमीश्वरस्य स्यात् । तथा

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ।

इति विषादपर गीतावाक्ये तथा—

"पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं"

इति शिक्षाप्रार्थनापरे अर्जुनकर्तृकवाक्ये व्यासस्यैव न इत्यहमिति च श्रुतास्मच्छब्दार्थत्वप्रसङ्गात् । तथा रघुवंशे च मद्वचनादिति सीताप्रयुक्तास्मच्छब्दार्थत्वं कालिदासस्य स्यादित्यर्थः ॥

[1] णयः–मु. [2] मदिति–मु.

ननु "शरीरं मे" इत्यादावीश्वरादेरेव स्वतन्त्रवक्तृत्वेपि मन्त्रलिङ्गप्रकरणादिना यजमानाद्यभिप्राया[1]नुप्रवेशाङ्गीकाराद्यजमानार्जुनसीता[2]दिरेवाहंशब्दार्थ[3] इति चेत्तर्हि वेदापौरुषेयत्वेपि "शरीरं मे" इत्यादिप्रार्थनादिमन्त्रेषु मन्त्रलिङ्गादिना यजमानेश्वराद्यभिप्राया[4]नुप्रवेशस्य मयापि स्वीकृतत्वात्तत्र यजमान एवाहंशब्दार्थः "मामुपास्व" इत्यादौ त्वीश्वर इत्यस्तु ॥

किञ्च मन्मते ईश्वरस्यान्योच्चारणानपेक्षमेवोच्चारयितृत्वेन स्वतन्त्रवक्तृत्वमप्यास्ति ॥

एतेन वैदिकेन स्या[5]माभूमेत्याद्युत्तमपुरुषेण पौरुषेयत्वासिद्धिः। तदभिधेयायाः सङ्ख्यायाः स्वत-

"न हि वयं वेदे पुरुषाभिप्रायप्रवेश एव नास्तीति वदामः" इति टीकोक्तसमार्धिं परमुखेनैव वाचयन्नाह—**ननु शरीरमित्यादिना। मन्त्रलिङ्गेति**। मन्त्राणामर्थप्रतिपादनसामर्थ्यं हि मन्त्रलिङ्गमिति मीमांसकादिपरिभाषा। व्यक्तमेतल्लिङ्गप्रकरणादिस्वरूपमग्रे द्वितीयपरिच्छेदे। यस्मिन्मन्त्रे यदर्थप्रतिपादनसामर्थ्यं प्रकरणस्थानादिकं वा विद्यते तदभिप्रायानुप्रवेशस्य तत्राङ्गीकारादित्यर्थः ॥

तर्हि "मामुपास्व" इत्यादाव[6]नन्यपरे स्वतन्त्रवक्तृपरता स्यादित्यतः सिद्धसाधनत्वं चाह—**किञ्चेति**। [7]**स्यामेति**। "वयं स्याम-

[1] 'अनु' इति नास्ति-**मु च.** [2] दे-**च.** [3] ता-**च.** [4] 'अनु' इति नास्ति-**मु-च.** [5] म भूवमि-**मु-छ-च.** [6] वन्य-**कुं.** [7] **स्यामिति**-'स्यामहन्ते सदमिद्गातौ तव स्यां' इति वर्तते-**मु.**

न्त्रवक्तृन्वयादिति निरस्तम्। तस्याः "गृभ्णामि ते सौभगत्वाय हस्तं" इत्यादौ परतन्त्रवक्तृन्वयस्यापि दर्शनात्। प्रत्युत त्वत्पक्ष एव "वयं स्याम पतयो रयीणां" "भूयिष्टां ते नम उक्तिं विधेम" इत्यादौ बहुवचनादिकमयुक्तम्। स्वतन्त्रवक्तुरीश्वरस्यैकत्वात् ॥

एतेन वैदिकेन युष्मच्छब्देन पौरुषेयत्वसिद्धिः। तस्य स्वतन्त्रवक्तृसंबोध्यवाचकत्वादिति निरस्तम्। "त्वां प्रपन्नं" "वाच्यस्त्वया" इत्यादौ परतन्त्रवक्तृसंवेद्येपि तत्प्रयोगात् ॥

पतयो रयीणां, अपाम सोममृता अभूम, अभूमागसो वयं" इत्यादौ श्रुतोत्तमपुरुषस्य "द्वेकयोर्द्विवचनैकवचने" "बहुषु बहुवचनं" इत्युक्तवचनरूपतया सङ्ख्यावाचित्वात्तदभिधेयायाः सङ्ख्याया इत्युक्तम्—तस्या इति। सङ्ख्याया इत्यर्थः। "गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः" इति बह्वृचवाक्ये उद्वोढुपुरुषेण ते तव हस्तं सौभाग्याय गृभ्णामि "हृग्रहोर्भश्छन्दसि" इति भादेशः गृह्णामीति कन्यां प्रत्युच्चार्यमाणे श्रुतोत्तमपुरुषोक्तसङ्ख्यायास्तद्वाक्यं प्रत्यस्वतन्त्रवक्तृन्वयदर्शनादित्यर्थः। एकत्वादित्युपलक्षणम्। सर्वनम्यत्वात्मणामोक्तिश्च न युक्तेत्यपि ध्येयम्—इत्यादाविति। पूर्वोक्तगीतारघुवंशवाक्यादौ व्यासकालिदासादेरेव स्वतन्त्रवक्तृतयाऽर्जुनसीतादेरेतादृशवक्तृत्वात्तत्संबोध्येपि कृष्णादौ युष्मत्पदादेशप्रयोगदर्शनाद्व्यभिचार इत्यर्थः ॥

एतेनैव वैदिकाभ्यां यत्तच्छब्दाभ्यां पौरुषेयत्वसिद्धिः। तयोर्यथाक्रमं स्वतन्त्रवक्तृनिष्ठबुद्धि[1]विषये तादृशपरामर्शोपहिते च शक्तत्वादिति निरस्तम्। 'योस्मान्द्वेष्टि'[2] 'स राजा' इत्यादौ चास्वतन्त्रवक्तृबुद्धिविषयादावपि प्रयोगदर्शनात्। अन्यथा वैदिकानां किमहोबतधिगादिशब्दानामपि स्वतन्त्रवक्तृनिष्ठसंशयसुखदुःखोपहि[3]तार्थ-

---

वैदिकाभ्यामिति। "यश्छन्दसामृषभो विश्वरूपः छन्दोभ्योध्यमृतात्सम्बभूव समेन्द्रो मेधया स्पृणोतु" इत्यादौश्रुताभ्यामित्यर्थः—**यथाक्रममिति**। स्वतन्त्रवक्तृनिष्ठबुद्धिविषये यच्छब्दः तादृशपरामर्शोपहिते[4] विषये च तच्छब्द इत्यर्थः। पूर्ववदेव वेदे लोके च व्यभिचारमाह—**य इति**। "अप्रतिष्ठः स भूयाद्योस्मान्द्वेष्टि यं च वयं द्विष्म" इत्यत्र यो द्वेष्टि सः अप्रतिष्ठो भूयादिति "वाच्यस्त्वया मद्वचनात्स राजा" इति रघुवंशे च प्रयोगदर्शनादित्यर्थः॥

स्वोक्तगत्यन्तरपक्षे अनुकूलतर्कं परपक्षे बाधकं चाह—**अन्यथेति**। स्वतन्त्रवक्तृत्वादिकमेवाहमादिपदानामिति पक्षे इत्यर्थः। "किं स्विद्भिषस्य भेषजं को न आत्मा किं ब्रह्मेत्यादौ च किं शब्दः[5] इत्यादावहोशब्दः "[6]अहो बतासि यमेनैव ते मनोहृदयं विदाम" इत्यादौ बत शब्दः छन्दोगोपनिषदि सप्तमे "आचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वाऽस्त्वित्येनमाहुरित्यादौ च धिक्छब्दः

---

[1] 'विशेष' इत्यधिकं—मु. [2] 'इत्यादौ' इत्यधिकं—क. [3] अर्थपदं नास्ति—छ. [4] परामर्शेत्यधिकं—मु—अ. [5] अत्र ग्रन्थपातः प्रदर्शितः—मु. [6] बतोबतासि इति वर्तते—मु-अ.

त्वाद्वेदस्य नित्यसंशयाद्याधारकृतत्वमपि स्यात्। [1]तत्र संशयादिकमाहार्यं चेदि[2]हापि स्वातन्त्र्यमाहार्यमस्तु[1] ॥

एतदप्युक्तं "गौरवदोषण" इति।

एतेनैव काठकं कालापकं इत्यादि समाख्यमेश्वरसिद्धिः। ईश्वरस्यैव कठादिकायपरिग्रहेण तत्तच्छाखानिर्मातृत्वात्। अध्ययनमात्रस्य साधरण्यादिति

श्रुतः। तत्र किंशब्देन संशयः अहो[3] इति सुखं बत धिगिति दुखं प्रतीयत इतीश्वरो वेदकर्ता नित्यज्ञानादिमानिव नित्यसंशयादिमानपि तादृशवाक्यकर्तृत्वेन स्यादित्यर्थः ॥

आहार्यं चेदिति। एतेन "न च जिज्ञासा[4]दयः सर्वज्ञे विप्रतिषिद्धा इति युक्तं शिष्यबोधनायाहार्यत्वोपपत्तेः" इति कुसुमाञ्जल्युक्तं निरस्तम्। सुखदुःखादेरवर्जनीयत्वात्तस्याप्याहार्यारोपत्वे तद्बोधकवेदभागस्याप्रामाण्यापत्तेरिति भावः ॥

गौरवेति। नित्यसंशयादिमत्त्वरूपगौरवदोषेण पुंवाक्यं ज्ञापकं न तदित्यर्थः—**एतेनैवेति**। अन्यथोपपन्नत्वकथनेनैवेत्यर्थः—**समाख्ययेति**। 'यौगिकी संज्ञा समाख्या' इति मीमांसकपरिभाषया कठेन कृतं काठकमित्यादियौगिकसंज्ञारूपसमाख्ययेत्यर्थः। तावता कथमीशकृतत्वमित्यत आह—**ईश्वरस्यैवेति**। कठादिमुनिनाधीतत्वात्काठकमित्यस्त्वित्यत आह—**अध्ययनमात्रस्येति**। अध्येत्रन्तर-

---

[1] अयं ग्रन्थः नास्ति-**ग.** [2] दत्र-**छ-क.** [3] बत इत्यपि वर्तते-**मु-अ.** [4] संशयेत्याधिकमस्ति-**अ.**

निरस्तम्। कठादिऋषिधृ[1]तत्वमात्रेण काठकादि-संज्ञोपपत्तेः ॥

नापि वेदस्तात्पर्य[2] पूर्वकः प्रमाणशब्दत्वात् भारतवत्। न चाप्रयोजकता। तात्पर्यज्ञानस्य शाब्दज्ञानानियामकत्वे हि नानार्थे श्लिष्टे च विनिगमकाभावेनार्थविशेषधीर्न स्यात्। यष्टीः प्रवेशयेत्यादावन्वयानुपपत्त्यभावेन लक्षणा च न

साधारण्यादित्यर्थः—**कठादिऋषिधृतत्वेति**। तज्जन्मन्यश्रुतानां सुप्तप्रतिबुद्धैरिव कठादिभिर्दृष्टत्वस्य तन्निबन्धनत्वोपपत्ते" रिति तत्त्व-निर्णयटीकोक्तादिशा कठादिमुनिभिर्जन्मान्तरेधीतशाखाविशेषस्य प्रति-भाबलनेदानीं स्फुरितत्वेन तद्दृष्टत्वरूपतद्बुद्धिधृतत्वेनोपपत्तेरित्यर्थः ॥

यत्तु मणौ "तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्य" मिति तात्पर्यस्वरूपं निरूप्यान्ते[3] "लोके क्लृप्तत्वाद्वेदेपीदन्तात्पर्यमिति पौरुषेयत्वम्" इत्यादिनोक्तं तदाशङ्क्य निराह—**नापीति**। **तात्पर्य-पूर्वक इति**। अर्थप्रतीतीच्छया केनचिदुच्चरित इत्यर्थः। [4]यद्वा अर्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानपूर्वक एवार्थप्रत्यायक इति सा-ध्यार्थः। प्रमादादिदोषपूर्वकशब्दाभासे व्यभिचारनिरासाय प्रमाणेति हेतुविशेषणम्। अर्थप्रमितिजनकशब्दत्वादित्यर्थः ॥

मण्याद्युक्तमेवानुकूलतर्कं निष्कृष्याह— **तात्पर्यज्ञानस्येति**। **नानार्थ इति**। [5]अक्षमानयेत्यादौ—**श्लिष्ट इति**। राजा कुव-लयोल्लासीत्यादौ पार्थिवचन्द्ररूपार्थद्वयश्लेषयुक्त इत्यर्थः—**अन्वयेति**।

---

[1] दृष्टत्व—छ. [2] मूलकः—ख. [3] 'अन्ते' इति नास्ति—कुं. [4] यद्वा इति नास्ति—कुं. [5] अज—मु-अश्व—अ.

स्यादि[1]त्युक्तानुकूलतर्कस[2]द्भावात्। तात्पर्यस्य[3] चार्थप्रत्यायनेच्छयो[4]च्चरितत्वरूपत्वात्पौरुषेयत्व-सिद्धिः। तस्माच्छ्रुतिकुमार्यास्तात्पर्यरूपो[5] गर्भ एव पुंयोगे लिङ्गमिति वाच्यम्। तत्प्रमिति शेषत्वरूपस्य तात्पर्यस्येच्छाघटितत्वाभावात्। तद्घटितत्वेपि मन्मते सजातीयोच्चारणानपेक्षस्येश्वरस्यार्थप्रत्यायनेच्छयोच्चारणेपि सर्वदाप्येकप्रकारानुपूर्विकत्वरूपापौरुषेयत्वाहानेश्च। अन्यथा

गङ्गायां घोष इत्यादौ प्रवाहग्रामयोराधाराधेयभावरूपान्वयानुपपत्त्या गङ्गापदस्य तीरे लक्षणाश्रीयते। यष्टीः प्रवेशयेत्यादौ तु यष्टीनां गृहप्रवेशान्वयसम्भवेन लक्षणाबीजान्वयानुपपत्त्यभावात् यष्टिपदस्य यष्टिमत्सु लक्षणा न स्यात्। तात्पर्यज्ञानस्य हेतुत्वे तु यष्टिमत्प्रवेश-तात्पर्यानुपपत्तिरूपलक्षणाबीजसम्भवाल्लक्षणा स्यादेवेति भावः॥

तावता कथं पौरुषेयत्वमित्यत आह—**तात्पर्यस्य चेति श्रुतीति**। श्रुतिरूपकुमार्यास्तात्पर्यरूपो गर्भ इत्यर्थः। यथा कुमार्यां ग[6]र्भेण चिह्नेन पुंयोगोस्ति तस्या इति ज्ञायते तथा श्रुतेरपि तात्पर्यरूपलिङ्गेन पुरुषकृतत्वरूपपुंयोगो ज्ञायत इत्यर्थः॥

अस्त्वेवं वेदस्य तात्पर्यपूर्वकत्वं तावता न पौरुषेयत्वसिद्धिरिति भावेनाह—**तत्प्रमितिशेषत्वेति**। [7]"शेषः परार्थत्वात्" इति जैमिन्युक्तादिशा तत्प्रमित्येकोद्देश्यकत्वं तच्छेषत्वं तदेव तत्तात्पर्यमित्यर्थः—**अन्यथेति**। तत्प्रत्यायनेच्छयोच्चरितत्वमात्रेण तत्कृतत्व

---

[1] उक्तेतिनास्ति-कुं-ग. [2] सनाथत्वात्-मु-च. [3] च इति नास्ति-मु-च-ग. [4] च्चा-क-ख-ग. [5] पग-मु-छ-ख. [6] र्भीय-मु. [7] शेषपदं नास्ति-मु.

त्व[1]न्मतेप्याधुनिकेनार्थज्ञानवताध्यापकेन तदिच्छयोच्च[2]रितस्य वेदस्याधुनिक[3]कृतत्वं स्यात्। यादृच्छिकसंवादिशुकादिवाक्ये इच्छारूपतात्पर्याभावेपि शाब्दप्रमादर्शनेन हेतोरप्रयोजकत्वाच्च॥

न च तत्रापीश्वरेच्छा कल्प्या। अबाधितार्थत्वेन तत्कल्पनस्य शाब्दबोधानन्तरभावित्वेन तत्राहेतुत्वात्। ईश्वराभावं निश्चितवतोपि मीमांसकस्य शुकादिवाक्येन शाब्दप्रमादर्शनाच्च। नानार्थादावपि मन्मते नेच्छारूपं तात्पर्यं नियामकम्। किन्तु तत्प्रमितिविशेषत्व[4]रूपम्। त्वन्मतेप्यावश्यकं प्रकरणादिकमेवार्थविशेषज्ञापक-

---

इत्यर्थः। पराभिमतेच्छाघटिततात्पर्यरूपसाध्ये प्रमाणशब्दत्वहेतोरप्रयोजकत्वं चाह—**यादृच्छिकेति**। **अबाधितेति**। शुकादिवाक्यं तदर्थप्रत्यायनेच्छयेश्वरेणोच्चरितं अबाधितार्थत्वादित्यबाधितार्थत्वेन हेतुना तदिच्छयेश्वरोच्चरितत्वकल्पनस्येत्यर्थः। तत्र शाब्दबोधे। ईश्वरोच्चरितत्वरूपतात्पर्यज्ञानस्याहेतुत्वादित्यर्थः॥

अप्रयोजकत्वं प्रकारान्तरेण व्यनक्ति—**ईश्वरा[5]भावमिति**। यत्तु तात्पर्यज्ञानस्य शाब्दज्ञाननियामकत्वमुक्तं तत्तथैव। परन्तु न त्वदभिमततात्पर्यज्ञानं नियामकं किंत्वन्यदेवेति भावेनाह—**नानार्थेति। तत्प्रमितीति**। तात्पर्यं ज्ञातं सदिति शेषः। एतेन यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यादिति दोषोपि नेति भावः—**आवश्यकमिति**।

---

[1] तत्पक्षे—**क-ख.** [2] 'च्चा' इति संशोधितं—**च-क-ख-ग.** [3] कृत पदं नास्ति—**च-छ.** [4] रूपपदं नास्ति—**मु-छ-ख.** [5] न्यत्वमिति—**अ.**

मस्तु । ज्ञापके च धूमालोकादाविवाननुगमो न दोषाय ॥

यद्वा त्वन्मते काशीमरणश्रवणादिजन्यतत्त्वज्ञानेष्विव प्रकरणादिजन्यशाब्दबोधेष्वपि वैजात्यं कल्प्यताम् ॥

एतेन वैदिकानि निन्दावाक्यानि [1]हानाभिप्रायपूर्वकाणि निन्दावाक्यत्वात् लौकिकनिन्दावाक्यवत् । एवं स्तुतिवाक्यमपि पक्षी-

---

तत्प्रत्यायनेच्छयोच्चरितत्वस्यापि प्रकरणादिनैव ज्ञातव्यत्वेन तात्पर्यज्ञानहेतुतयाप्यावश्यकमित्यर्थः ॥

नन्वेवं क्वचिल्लिङ्गं क्वचित्प्रकरणम् क्वचित्समाख्येत्यननुगमोऽतोऽनुगतं प्रकरणादिजन्यं तात्पर्यज्ञानमेव हेतुरित्यत आह—**ज्ञापके चेति** ॥

ननूक्तस्थले वह्निव्याप्यज्ञानत्वेन धूमालोकादिज्ञानानामनुगमो वा धूमादिज्ञापकजन्यानुमितौ वैजात्ये [2]न वास्तु । अन्यथा व्यतिरेकव्यभिचारेणानुमितिहेतुतैव न स्यादित्यत आह—**यद्वेति** । काशीमरणेन श्रवणादिना च जन्येषु तत्त्वज्ञानेष्वित्यर्थः ॥

उदयनाद्युक्तमन्यदपि निराह—**एतेनेति** । "यदश्रुवशीय तत् रजतं हिरण्यमभवत्तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुजं हि यो बर्हि [3]र्ददाति पुरास्य संवत्सराद्गृहे रुदन्तीति" "यदभिधारयेद्दुद्रायास्ये पशूनिदध्यात्" इत्यादीनि निन्दावाक्यानीत्यर्थः—**स्तुतीति** "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागेनोपधावति" इत्यादि

---

[1] हान्यभि–ख. [2] त्वंवा–कुं. [3] षिद–अ. षुद–मु.

कृत्य प्रयोक्तव्यमिति निरस्तम् । अपौरुषेयत्वेपि मन्मते ईश्वराभिप्रायपूर्वकत्वस्य मीमांसकमतेप्य[1]नादौ संसारेऽर्थाभिज्ञाध्यापकाभिप्रायपूर्वकत्वस्य सत्त्वेन सिद्धसाधनात् । स्वतश्चेति विशेषणे च गौरवात् । शुकादिवाक्यवदभिप्रायपूर्वकत्वाभावेपि गुणदोष बोधकत्वेनैव निन्दादिवाक्यतोपपत्तेश्च ॥

एतदप्युक्तं "गौरवदोषेण" इति । तस्मात्पौरुषेयत्वे नानुमानं मानम् ॥

नापि "छन्दांसि जज्ञिरे" इत्यादिश्रुत्यादिकं तस्य—

"तदुत्पत्तिवचश्चैव भवेद्व्यक्तिमपेक्ष्य तु ।

वाक्यमुपादेयाभिप्रायपूर्वकं स्तुतिवाक्यत्वाल्लौकिकस्तुतिवाक्यवदिति प्रयोक्तव्यमित्यर्थः ॥

तत्त्वनिर्णयटीकोक्तमेव समाधिमाह—**अपौरुषेयत्वेपीति** । अप्रयोजकत्वं हेतोराह—**शुकादीति** । तत्रापीश्वराभिप्रायकल्पनायां पूर्वोक्तदोषो ज्ञेय इति भावः । श्रुत्यादिकमित्यादिपदेन "प्रतिमन्वन्तरम्" इति प्रागुक्तस्मृतिग्रहः—**तस्येति** । श्रुत्यादेरित्यर्थः । स्मृत्यैव व्याख्यातत्वादित्यन्वयः—**तदुत्पत्तीति** । श्रुत्युत्पत्तिवचश्चेत्यर्थः । तुर्विशेषार्थः । आदिकालीनां व्यक्ति[2]त्विति । तेन प्रत्यहमुपाध्यायैर्व्यज्यमानत्वादुत्पत्तिव्यवहारप्रसङ्ग इति निरस्तम् । अत एवावान्तराभिमानाच्चेत्यस्मात्पूर्वार्ध एव—

---

[1] अनादौ संसारे इति नास्ति—छ-ख. [2] मिति—मु.

अवान्तराभिमानानां देवानां वा व्यपेक्षया ॥
नानित्यात्वात्कुतस्तेषामनित्यत्वं स्थिरात्मनां"।
इत्या[1]दिस्मृत्यैवाभिव्यक्तिपरत्वेन सम्प्रदायप्रवर्तक[2]परत्वेन च व्याख्यातत्वात्। तेनेश्वराधीनोत्पत्तिकत्वस्यैवोक्तया मानान्तरेणार्थमुपलभ्य रचितत्वरूपस्य प्रणीतत्वस्यासिद्धेश्च। न ह्युक्तरीत्या क्रमविशेषघटितो वेद इदानीम[3] प्यस्मदा[4]द्यधीनोत्पत्तिक इति वयमपि वेदप्रणेतारः ॥

"वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्तयपेक्षया"।

इति गत्युक्तिसद्भावेपि तदनुदाहृत्य स्थलान्तरस्थमेव तदुत्पत्तीत्यर्धमुदाहृतम्—[5] देवानां वेति। देहजन्मापेक्षयेत्यर्थः। मुख्याभिमानिश्रियस्तन्नेत्यतोऽवान्तराभिमानानामिति। अमुख्याभिमानवतामित्यर्थः—तेषामिति। वेदानामित्यर्थः—स्मृत्यैवेति। तत्त्वनिर्णयोक्तब्रह्माण्डपुराणवचनेनैवेत्यर्थः ॥

"अग्नेरृग्वेदो वायोर्यजुर्वेदः" इत्यादिवाक्यगत्युक्तिपरतयापि तदुत्पत्तिवचश्चेत्यर्धस्यार्थमुपेत्याह—सम्प्रदायेति। चिरकालविरचितस्य वेदस्य शिष्यप्रशिष्येषु प्रख्यापनं हि सम्प्रदायः। तत्कारित्वेन चेत्यर्थः। श्रुत्यादेरन्यथासिद्धिं चाह—तेनेति। श्रुत्यादिनेत्यर्थः। अस्तु तावतैव प्रणीतत्वमित्यत आह—न ह्युक्तरीत्येति। क्रमविशेषविशिष्टानां वर्णानामित्यादिनोक्तरीत्येत्यर्थः ॥

[1] आदिपदं नास्ति-छ-अभिव्यक्तिपरत्वेनेति नास्ति—छ-क-ख. [2] नप-मु-च-परेति नास्ति—छ-क-ख. [3] अपि इति नास्ति—ख. [4] आदि पदं न—छ. [5] वेदानां—मु.

ननु यथा वेदानादित्वश्रुतिर्न वेदस्वरूपानादित्वपरा। बाधात्। किंत्वानुपूर्व्यनन्यथात्वपरा। तन्मात्रेणैव शब्देऽनुत्पत्तिव्यवहारात्। तथा तदुत्पत्तिश्रुतिरपि तदन्यथात्वपरेति चेन्मैवम्। "तत्क्रमेणैव" इत्यादिस्मृत्याऽनुत्पत्तिश्रुतेः क्रमानन्यथात्वपरत्वे स्थिते उत्पत्तिश्रुतेस्तदविरोधाय क्रमोत्पत्तिपरत्वस्यैवोचितत्वात्। अन्यथा "ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्" इति श्रुत्याऽसर्वज्ञस्याग्न्यादेरपि वेदप्रणेतृत्वं स्यात्। न चैकस्मिन्वाक्येऽनेकेषां स्वतन्त्रप्रणेतृत्वं युक्तम्। युक्तं तु सम्प्रदायप्रवर्तकत्वम्॥

एतदप्युक्तं "गौरवदोषेण" इति॥

छन्दांसीत्यादिश्रुत्यादेः क्रमोत्पत्तिपरत्वेनान्यथासिद्धिरयुक्तेति भावेन शङ्कते—**नन्विति**। **श्रुतिरिति**। "अनादि नित्या सा तच्च" इत्यादिपूर्वोक्तश्रुतिरित्यर्थः—**बाधादिति**। क्रमस्य कृतकत्वादिति भावः—**अन्यथात्वेति**—

"वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः।
आम्नायोऽनन्यथापाठादीशबुद्धिस्थिताः सदा"॥

इति महावाराहस्मृतेरिति भावः—**स्मृत्येति**। प्रागुक्तयेत्यर्थः—**अन्यथेति**। क्रमोत्पत्तिपरत्वमनुपेत्य तदन्यथात्वपरत्वोक्ताविति्यर्थः। अस्त्वित्यत आह—**नचेति**। **एतदपीति**। एकस्मिन्वाक्ये अनेकेषां स्वतन्त्रप्रणेतृत्वं न युक्तमित्येतदित्यर्थः—**गौरवेति**। अनेकस्वतन्त्रप्रणेतृकत्वकल्पनास्थ्यगौरवदोषेणेत्यर्थः॥

यद्यप्यृष्यादयोपि केषुचित्पुरुषेष्वाचिरावितस्य वेदैकदेशस्य सम्प्रदायप्रवर्तकाः। तथापि नेश्वरवत्सर्वपुरुषेष्वपि प्रलये चिर[1]तरविरतस्य कृत्स्नस्य वेदस्य प्रवर्तका इति न तेषु वेदहेतुत्वव्यवहारः। ईश्वरोपि ह्यस्मन्मते—

"यो ब्रह्माणं विदधाति पूर्वं यो वेदां श्च प्रहिणोति तस्मै" ॥

इत्यादिश्रुत्या वेदसम्प्रदायप्रवर्तकत्वान्महोपाध्याय एव। तस्माद्वेदानां पौरुषेयत्वरूपं सादित्वमयुक्तम् ॥

अनित्यत्वं त्वत्यन्तायुक्तम्। तथाहि। क्रम-[2]विशेषविशिष्टा वर्णा एव वे[3]दाः। क्रमश्च

सम्प्रदायप्रवर्तकत्वस्य वेदहेतुत्वव्यवहारे व्यभिचारमाशङ्क्य निराह—**यद्यपीत्यादिना**। छन्दांसि जज्ञिरे तस्मादित्यादेः सम्प्रदायप्रवर्तकत्वेन गत्युक्तिरयुक्ता हेतोरसिद्धेरित्यत आह—**ईश्वरोपि हीति**। **पौरुषेयत्वेति**। स्वतन्त्रपुरुषप्रणीतत्वरूपमित्यर्थः ॥

यत्तु—

"प्रमायाः परतन्त्रत्वात्सर्गप्रलयसम्भवात्" ॥

इत्यादिना कुसुमाञ्जलौ प्रलये वेदानामुत्सन्नत्वमुक्तम्। तदप्ययुक्तमित्याह—**अनित्यत्वं त्विति**। वेदानामित्यनुषङ्गः। क्रमस्योक्तदिशा कथं चित्पुरुषाधीनजन्मवत्त्वेन कृतकत्वसम्भवे

---

[1] तरेति नास्ति-छ-ख-ग. [2] विशेषपदं नास्ति-छ-क-ख-ग. [3] दः-छ.

बुद्धिनिमित्तक एव। न तु स्वत इत्युक्तम्। ततश्च सर्वेषां सर्वथा वर्णविषयविवक्षितक्रमोपाधिभूतबुध्युपरम एव वेदे[1] विनाशो वक्तव्यः। न तु घटादीनामिवापरः। न चेश्वरस्य तथाविधबुध्युपरमो युज्यते। तस्य सर्वदा[2] सर्वज्ञत्वात्। पुराणादीनामप्यन्यथारचनमेवानित्य-

---

प्यानुपूर्व्युच्छेदस्तु न युक्त एवेति तु शब्दार्थः—**इत्युक्तमिति**। अपौरुषेयत्वानुमानवादे उक्तमित्यर्थः—**अपर इति**। स्वरूपध्वंसलक्षण इत्यर्थः॥

तर्हि पुराणा[3]नामपि नित्यत्वं स्यात्। ईश्वरबुद्धिनिमित्तकत्वस्य कदाप्यनाशादित्यतोऽस्त्येवैवं रूपं नित्यत्वम् किन्तु क्रमव्यत्यासोपि तत्रेत्यनित्यत्वमिति भावेन तत्त्वनिर्णयोक्तमेवाह—**पुराणादीनामिति**॥

"पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत्" ॥

इति ब्रह्माण्डपुराणोक्तेरिति भावः॥

नन्वेवं वेदपुराणयोरीश्वरबुद्धिनिमित्तकत्वेन नित्यत्वे पुराणानामप्यन्यथारचनं निष्फलमिति चेन्न "भगवत्प्रवृत्तेः सर्वत्र [4]स्वप्रयोजनहीनत्वस्य 'न प्रयोजनवत्वात्' इति सूत्रकृतैवोक्तेः परप्रयोजनानामतिसूक्ष्माणामुत्प्रेक्षितुमशक्यत्वात्" इति तत्त्वनिर्णयटीकासुधयोरेव व्यक्तत्वात्॥

---

[1] दवि-च-छ. [2] सर्वदा इति नास्ति-छ. सदा-ख-ग. [3] दीना-कु. [4] 'स्व' इति न-कुं.

त्वमि[1]ति विधिप्रत्ययस्य लोकवद्वेदेप्याप्ताभिप्रायवाचकत्वात् । वैदिकविधिप्रत्ययेनैव[2] वेदस्य पौरुषेयत्वमिति तु विधिवादे नि[3]रसिष्यते ॥

[4]पौरुषेयत्वानुमानादिभङ्गः ॥ २१ ॥

नन्वेवमपि "विधिर्नियोगः प्रेरणेत्यनर्थान्तरम् । स च प्रेरकपुरुषधर्मः । [5]अतो वैदिकानां विध्युद्देशानां लौकिकवत्स्वतन्त्रवक्तृकत्वमेवोचितम् । यस्तु पौरुषेयत्वं नोपैति तं प्रति विधिरेव । गर्भ इव श्रुतिकुमार्याः पुंयोग [6]प्रमाणम्" इति विधिवादे मणिकृदुक्तेः । "आप्ताभिप्रायो विध्यर्थः" इत्युदयनोक्तेश्च ।

"नित्या वेदाःसमस्ताश्च"

इति स्मृत्युक्तया निरस्तत्वेपि विशिष्य न निरस्तमित्याशङ्कामनूद्य निरासस्थलमाह—विधीति । [7]विधिवेदस्येति । विधिभागरूप-[8]वेदस्येत्यर्थः—विधिवाद इति । द्वितीयपरिच्छेदे ॥

[9]पौरुषेयत्वानुमाना[10]दिभङ्गः ॥ २१ ॥

---

1 'इति' इति नास्ति–कुं. 2 'विधि' इत्यधिकं वर्तते–ग,कुं. 3 राकरिष्यते–ग. 4 'वेद' इत्यधिकमस्ति–कुं ग. इतिपौ–च–छ. 5 आप्ताविदिकानां विध्युद्देशालौकिकवत्-स्वतं इत्यास्ति–अ. 6 गे–अ. 7 विधिपदं नास्ति–मु. 8 वेदपदं नास्ति–अ. 9 वेदपदमधिकं–कुं. 10 आदिपदं नास्ति–अ.

ननु यदुक्तमीश्वरस्य सार्वज्ञ्यादिकमप्रामाणिकमेव बहु कल्प्यामिति तन्न। तस्य धर्मिग्राहक[1]मानसिद्धत्वात् ॥

तथाहि। अदृष्टद्वारकस्वोपादानगोचरजन्य-

शास्त्रयोनित्वादिति ब्रह्मसूत्राभिमतमीश्वरस्यानानुमानिकत्वं साधयितुमाह—**यदुक्तमिति**। वेदापौरुषेयत्वानुमानोक्तिप्रस्ताव इत्यर्थः—**तस्येति**। सार्वज्ञ्यादेरीश्वररूपधर्मिग्राहकमानेन सिद्धेरित्यर्थः। तेन सार्वज्ञ्यमात्रसिद्धावपि तेनैव विप्रलम्भाद्यभावसिद्धेरग्रे व्यक्तत्वादेवमुक्तिरिति ज्ञेयम्। तत्र कुसुमाञ्जलौ पञ्चमे परिच्छेदे—

"कार्यायोजनधृत्यादेः पदात्प्रत्ययतःश्रुतेः।
वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः" ॥

इतीश्वरे धर्मिण्यनेकमानान्युक्तानि। तत्र कार्यत्वरूपं मानमेकं मणौ प्रपञ्चितम्। तत्तावदनुवदति—**अदृष्टेति**। अत्र जन्यानीत्यन्तं पक्षः। स्वजन्येत्यादीनि त्रीणि साध्यानीति विवेकः। पक्षे स्वपदं जन्येति निर्दिष्टवस्तुपरम्। अदृष्टाद्वारिका या स्वोपादानगोचरा साक्षादेव स्वोपादानगोचरा या जन्या कृतिः तज्जन्यानि घटादीनि तद्भिन्नानि समवेतानि समवायवृत्त्या स्थितानि पृथिव्यादीनीत्यर्थः ॥

अत्र मणौ "अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानी"त्युक्तावपि यथाश्रुत उपादानपदस्य यत्किञ्चिदुपादानपरत्वे रूपाद्युपादानमृदङ्गगोचरास्मदादिकृतिजन्यानां शब्दादीनां पक्षतानापत्तेः क्षित्याद्युपादानपरत्वे तद्गोचरजन्यकृत्यप्रसिध्या तदजन्यत्वाप्रसिद्धेस्त-

---

[1] प्रमा—मु-च.

कृतिजन्यभिन्नानि समवेतानि जन्यानि, समवेतपदस्थाने भावपदं वा प्रयोज्यम्। स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि[1] वा।

दीयव्याख्यासूक्तपरिष्कारपूर्वकोयं स्वेत्यनुवादः। तथा जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमिति मणावेवोत्तरत्रोक्तेर्जन्यकृतिजन्य[2]भिन्नेत्यप्यनुवाद इत्यदोषः॥

भावेति। समवेतानि जन्यानीत्यत्र भावकार्याणीति वा प्रयोज्यामित्यर्थः। अदृष्टप्रागभाव[3]व्याप्य प्रागभावप्रतियोगीति साध्यांशस्य परिष्कारपूर्वकमनुवादः—**स्वजन्येत्यादि**। स्वपदेनोपादानगोचरज्ञानादिकमुच्यते। स्वजन्यं यददृष्टं तत्प्रागभावव्याप्यो यः प्रागभावः अदृष्टकारणीभूतज्ञानादिप्रागभावः तत्प्रतियोगि च यत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादि तद्भिन्नाः स्वजन्यादृष्टजनकभिन्ना इति फलितार्थः। या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतयः तद्वता जन्यानीत्यर्थः। अत्रापरोक्षज्ञानपदं परोक्षान्यज्ञानार्थकं न त्वपरोक्षत्वजात्याक्रान्तज्ञानपरमित्यग्रे व्यक्तम्॥

स्वजनकेति। स्वस्य कार्यस्य जनकं यददृष्टं तत उत्तरापक्षधरोक्तदिशाऽदृष्टाधिकरणक्षणोत्तरक्षणवर्तिन्यः न तु तदुत्तरक्षणोत्पत्तिमत्यः। तेन न बाधः शङ्क्यः। तादृश्य उपादानगोचरापरोक्षान्यज्ञानाचिकीर्षाकृतयस्तद्वता जन्यानीत्यर्थः। ईश्वरज्ञानादेर्नित्यतया

---

[1] वा इति नास्ति—**ग.** [2] त्वं नेत्य-**अ.** [3] प्रारम्भोवा व्याप्यप्रमिति योगीति साध्यांश—**अ.**

अपरोक्षज्ञानाचिकीर्षाप्रयत्नविषयीभवदुपादानानि वा । समवेतत्वे सति प्रागभावप्रतियोगित्वात् भावकार्यत्वाद्वा । घटवत् ॥

अत्र पक्षे जन्यानीत्येवोक्ते ध्वंसस्यापि पक्षत्वेनांशे बाधः स्यात् । तस्योपादानाभावात् । तन्निवृत्यर्थं समवेतानीति । तावत्युक्ते घटादेरपि पक्षत्वेनांशे सिद्धसाधनं स्यात् । तन्निवृत्यर्थं जन्यभिन्नानीति—तावत्युक्तेऽङ्कुरादेरपि जन्यत्वादाश्रयासिद्धिः । तन्निव्यत्यर्थं जन्यकृतीति ॥

क्षित्यादिकार्यजनकादृष्टोत्तरत्वात् कुलालज्ञानादेरपि घटादिजनकादृष्टोत्तरत्वादिति न दृष्टान्तासिद्धिः । अपरोक्षेति बहुव्रीहिः । परोक्षान्यज्ञानाचिकीर्षाप्रयत्नविषयोपादानसमवेतानीत्यर्थः । च्व्यर्थलडर्थौ तु न विवक्षितौ ज्ञेयौ । **घटवदिति** । स्वपदस्य समभिव्याहृतपरत्वात्तत्र साध्यहेतुसत्त्वं व्यक्तमिति भावः ॥

हेत्वोर्ध्वंसे गगनपरिमाणादौ च व्यभिचारवारकं विशेषणद्वयं विशेष्यद्वयं चेति व्यक्तमित्युपेत्य पक्षसाध्यगतपदकृत्यानि दूषणोक्ति सौकर्याय तदीयव्याख्यानाद्युक्तानि व्यनक्ति—**अत्रेति**। प्रयोग इत्यर्थः । अंशे बाध इत्युक्तं साध्याभावोपपादनेन व्यनक्ति—**तस्योपादानाभावादिति** । येन तद्गोचरज्ञानादिजन्यत्वं स्यादिति भावः—**अंशे सिद्धसाधनमिति** । अदृष्टजनकभिन्नोपादानगोचरकुलालादिनिष्ठज्ञानादिजन्यत्वात् स्वजनकादृष्टोत्तरत्वात् कुलालज्ञानचिकीर्षादेरिति भावः ॥

न चानीश्वरवादिनं प्रति व्यावर्त्याभावेन जन्यपदं व्यर्थम् । तन्मते प्रमेयो घट इति वत्तदुपरक्तबुद्धेरुद्देश्यत्वात् । उभयसिद्धप्रयोजनवत्त्वं तत्रम्। न [1]त्वेकस्यैवप्रयोजनस्योभयसिद्धिः। तावत्युक्ते शब्दफूत्कारादेः पक्षता न स्यात् । तस्य शब्दादि*निमित्तभूतमृदङ्गताल्वादिगोचरास्मदादि [2]निष्ठजन्यकृतिजन्यत्वात् । तदर्थं स्वोपादानगोचरेति । तज्जनकास्मदादि*निष्ठकृतेर्निमित्त [3] भूतमृदङ्गादिगोचरत्वेप्युपादानीभूताकाशादिगोचरत्वाभावात् । तावत्युक्ते कालीरूपादेः पक्षता न स्यात् । तस्य स्वोपा-

---

मण्युक्तमेवाह—**तन्मत इति** । **तदुपरक्तेति** । तद्विषयकेत्यर्थः । पक्षधराद्युक्तमाह—**उभयसिद्धेति** । न्यायमते जन्यमात्रस्येश्वरकृतिजन्यतयाऽऽश्रयासिद्धिवारणरूपप्रयोजनवत्त्वं अनीश्वरमते च उद्देश्यसिद्ध्यादिरूपप्रयोजनवत्त्वमित्युभयसिद्धप्रयोजनवत्त्वमित्यर्थः ॥

एवं च शब्दफूत्कारादीनां पक्षतैवेति मण्युक्तं हृदि कृत्वाह—**तावत्युक्त इति** । जन्यकृतीत्यादावेवोक्त इत्यर्थः । फूत्कारो मुखवायुविशेषः । न स्यादित्युक्तं व्यनक्ति—**तस्येति** । **तदर्थमिति** । शब्दादेः पक्षतासिद्ध्यर्थमित्यर्थः । तां व्यनक्ति—**तज्जनकेति** । मृदङ्गः शब्दस्य निमित्तं ताल्वादि च फूत्कारादेः ॥

पक्षधराद्युक्तमाह—**कालीति** । काली नाम काचित्तपस्विनी तपसा स्वशरीरे गौरं रूपमुत्पादितवतीति तद्रूपादेरित्यर्थः—**तस्येति** ।

---

[1] चै–छ. *एतावन्नास्ति–छ. [2] कृतेर्निमित्तीभूतेत्यादिवर्तते–ख. [3] त्ती–छ-क-ग.

दानभूतशरीरगोचरतयोक्तरूपकृतिजन्यत्वेन तद्भिन्नत्वाभावात्। भाव्यं च तस्य पक्षतया। अन्यथा पक्षातिरिक्ते तत्र साध्यसन्देहेन सन्दिग्धानैकान्तिकतापत्तेः। तदर्थमदृष्टाद्वारकेति। कालीकृतिस्त्वदृष्टद्वारैव रूपजानिकेति न दोषः॥

साध्ये यद्यपि ज्ञानाचिकीर्षाकृतीनां मध्ये एकैकोक्तावपीश्वरसिद्धिः। तथापि यावदभिमतविशेषगुण[1]वत्त्वसिद्ध्यर्थं त्रितयोक्तिः। साध्यविशेषणानामुद्देश्यसिद्धिप्रयोजनकत्वात्॥

अपरोक्षपदन्तूपादानज्ञानस्यापरोक्षत्वेनैव हेतुत्वाद्व्यापकतासिद्ध्यर्थम्। साक्षात्कारपदं तु नोपात्तम्। प्राभाकरं प्रति साक्षा[2]त्त्वजातेरसिद्धेः। अपरोक्षपदेन तु परोक्षान्यज्ञानस्य विवक्षितत्वाद-

---

कालीशरीरोत्पन्नगौरूपस्येत्यर्थः—**सन्दिग्धेति**। प्राचीनमतेनेदं दूषणं [3]बोध्यम्। मणिकृन्मते उक्तरूपसन्दिग्धानैकान्त्यं न दोषायेत्यग्रे व्यक्तत्वात्—**यावदिति**। यावन्तोऽभिमता विशेषगुणास्तद्वत्त्वसिद्ध्यर्थमित्यर्थः—**व्यापकतेति**। गगनपरमाण्वादिज्ञानस्य शब्दादिकं प्रत्युपादानत्वेपि चिकीर्षाकृतिद्वारा शब्दाद्यहेतुत्वाद्भावकार्यत्वादिरूपहेतुव्यापकत्वसिद्ध्यर्थमपरोक्षपदोपादानमित्यर्थः॥

पक्षधरोक्तमाह—**सक्षात्कारेति**। **असिद्धेरिति**। गुणगतजातेरनङ्गीकारात्। इन्द्रियजन्यज्ञानपरत्वं तु न शङ्कार्हम्। बाधापाता-

---

[1] णसि-**क-ख.** [2] त्कारत्वजा-**छ.** [3] ध्येयं-**अ.**

दोषः । उपादानगोचरपदं तु भाष्यकाराद्युक्त-ध्वंसव्यावृत्तसक[1]र्तृकत्वसिद्ध्यर्थम् । तावत्युक्ते सिद्धसाधनम् । अङ्कुरादेरपि स्वजनकादृष्टजनक-यत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादिमद – स्मदादिजन्यत्वात् । तदर्थमदृष्टेत्यादिभिन्नान्तं ज्ञानादिविशेषणम् । एवं च न सिद्धसाधनम् । कारणप्रागभावस्य कार्यप्रागभावं प्रति व्याप्यत्वे-नास्मदादिनिष्ठादृष्टजनकज्ञानादिप्रागभावस्य स्व-जन्यादृष्टप्रागभावं प्रति व्याप्यत्वेन तद्भिन्नत्वा-भावात् ॥

न चैवं कपाला[2]दिरूपोपादानगोचरमदृष्टप्राग-भावव्याप्यप्रागभावप्रतियोगिभिन्नं च यज्ज्ञानादि तद्वतास्मदादिनार्थान्तरम् । ज्ञानेच्छाकृतीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वेन कपालादि गोचरज्ञानादेः क्षित्यांद्यजनकत्वेन बाधात् ॥

दिति भावः—**भाष्येति** । गौतमसूत्रभाष्यकारतट्टीकाकारोक्तेरित्यर्थः—**अङ्कुरादेरिति** । सर्वस्यापि जीवोपभोग्यतया तत्तददृष्टार्जितत्वेन यद-ङ्कुरादिकं यज्जीवादृष्टजन्यं तददृष्टं तावद्यज्ञादि[3] सत्कर्मजन्यम् । तादृशादृष्टजनकं स्वगतरूपाद्युपादानभूतहविरादिगोचरं यज्ज्ञानादि तद्व-दस्मदादिजीवजन्यत्वादित्यर्थः—**तदर्थमिति** । सिद्धसाधनतानिवृत्त्य-र्थमित्यर्थः—**व्याप्यत्वेनेति**। यदा ज्ञानादिप्रागभावस्तदा तज्जन्यादृष्ट-

---

[1] सकार्यकत्व–**क.** [2] आदिपदं नास्ति–**च.** [3] सकल–**कुं.**

अत्र यद्यप्यदृष्टजनकभिन्नेत्युक्तेप्यस्मदादिभिर्न सिद्धसाधनम् । तथापीश्वरज्ञानादेरप्यदृष्टजनकत्वाद्बाधः । स माभूदिति वक्रोक्तिः । एवं च न बाधः । ईश्वरज्ञानादेरनादित्वेन प्रागभावप्रतियोगित्वस्यै[1]वाभावेन तत्प्रतियोगिभिन्नत्वात् । तावत्युक्ते दृष्टान्तस्य साध्यवैकल्यम् । कुलालनिष्ठस्य घटजनकज्ञानादिप्रागभावस्य तन्निष्ठविहितादिक्रियान्तरो[2]त्पत्स्यमानादृष्टप्रागभावं प्रति व्याप्यत्वात् । तदर्थं स्वजन्यत्वेनादृष्टं विशेषितम् । एवं च न साध्यवैकल्यम् । उत्पत्स्यमानादृष्टस्य घटोपादानादिविषयकज्ञानादिज-

---

प्रागभाव इति संभवादिति भावः—**वक्रोक्तिरिति** । अदृष्टजनकभिन्नेत्यर्थ एवादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नेत्युक्तिरित्यर्थः—**ज्ञानादीति** । घटाद्युपादानकपालादिगोचरज्ञानादीत्यर्थः—**तन्निष्ठेति** । कुलालनिष्ठेत्यर्थः । **विहितादीति** । निषिद्धा[3]करणमादिपदार्थः—**क्रियान्तरेति** । कपालादिक्रियातोऽन्यक्रियेत्यर्थः ॥

स्वजन्यत्वेनादृष्टं विशेषितमिति । यद्यपि पक्षधरादावदृष्टपदं स्वजनकादृष्टपरं स्वपदं च समभिव्याहृतपक्षदृष्टान्तरूपकार्यपरमित्युक्तं तथापि तास्मिन्पक्षे स्वपदार्थः क्वचित्पक्षः क्वचिद्दृष्टान्त इत्यननुगमः ॥

न चात्र ग्रन्थकृदभिमतसामान्यव्याप्तावननुगमो न दोषायेति रुचिदत्तोक्तं युक्तम् । यत्तद्ग्रन्थां सामान्यव्याप्तिर्नानुमानाङ्गमित्यर्थापत्तौ

[1] एवकारो नास्ति—**मु-च.** [2] रादिनो—**च-छ-ग.** [3] द्धक—**अ.**

न्यत्वाभावात् । द्वितीयसाध्येऽस्मदादिभिः सिद्ध-साधनवारणाय स्वजनकादृष्टोत्तरेति । तृतीये च विषयीभवदिति विशेषणम् ॥

अत्र च भाष्यादौ सकर्तृकत्वनिरुक्तावुपादान-पदप्रक्षेपाद्ध्वंसव्यावृत्तसकर्तृकत्वसिद्ध्यर्थं पक्षसाध्यहेतुषु समवेतोपादानभावपदानि [1]प्रयुक्तानि ॥

यदा तु ध्वंससाधारणसकर्तृकत्वमात्रेणेश्वर-

ग्रन्थकृतैव निरासात् । तथा कुलालकृतेर्घटजनकादृष्टसमानजातीयागाम्यदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेनोक्तदोषतादवस्थ्यात् । तदर्थं ठक्कुरोक्तदिशा जनकत्वं फलोपधानरूपं विवक्षिणीयमिति क्लेश इत्युत्तरसाध्यासाङ्कर्याय च स्वजन्येत्येव विवक्षणीयमिति भावः—**सिद्धसाधनेति** । तत्र स्वपदस्य समभिव्याहृतपक्षदृष्टान्तपरत्वात् अस्मदादिजीवकृतेः क्षित्यादिजनकत्वेप्यदृष्टद्वारैव न साक्षादिति क्षित्यादिजनकादृष्टपूर्वभावितया तदुत्तरभावित्वाभावान्न सिद्धसाधनमिति भावः । ठक्कुरादौ तु कालीरूपादावंशतःसिद्धसाधनवारणाय—**स्वजनकादृष्टोत्तरेति** विशेषणमित्युक्तम्—**तृतीये चेति** । सिद्धसाधनवारणायेत्यनुषङ्गः । **इति विशेषणमिति** । तस्य ज्ञानादिविषयोपादानसमवेतानीत्यर्थत्वेन क्षित्यादेरस्मदादिज्ञानादिविषयसमवेतत्वाभावादिति भावः ॥

प्रागुक्तप्रयोगे ध्वंसस्य सकर्तृकत्वानापत्त्या सकलजगन्निर्मातृकर्तृसिद्धिर्न स्यादित्यतो यद्वेत्यादिना मणावुक्तं पक्षान्तरं तत्पूर्वोक्तपक्षतात्पर्यविवरणपूर्वमनुवदति-**अत्र चेत्यादिना** । **मात्रेणेति** । उपा-

---

[1] प्रयुक्तपदं नास्ति—**ग.**

[1]सिद्धेस्तन्मात्रं सिषाधयिषितं तदा पक्षादौ समवेतादिपदान्यनपेक्षितान्येव । [2]अस्मिंश्च पक्षे अस्मदादिनिष्ठघटादिजनककृतिध्वंसस्य [3]निरुक्तरूपकृतिजन्यत्वेन तद्भिन्नत्वाभावात्तस्य पक्षता न स्यात्। तदर्थं [3]कृतिपदस्थाने सविषय[4]त्रितयेति वाच्यम् ॥

एवं च कृतिध्वंसस्य प्रतियोगिभूतया कृत्या विरोधिगुणभूतेनोत्तरज्ञानेन च जन्यत्वेपि चिकीर्षाजन्यत्वाभावात् । चिकीर्षाध्वंसस्य चोक्तरीत्या चिकीर्षाकृतिजन्यत्वेपि ज्ञानजन्यत्वाभावा-

---

दानादिघटितत्वेन विनेति मात्रपदार्थः—**पक्षादाविति** । पक्षसाध्यहेतुषु समवेतोपादानभावपदान्यनपेक्षितानीत्यर्थः । "नन्वदृष्टाद्वारकजन्यकृतिजन्यभिन्नानि जन्यानीत्येव पक्षनिर्देशे सति घटजनककृतिध्वंसस्य पक्षता न स्यादित्यतो जन्येच्छाकृति[5]जन्यत्वं च पक्षे विवक्षितम्" इत्युक्तं मणौ पक्षधरे चात्र ज्ञानेच्छाकृत्यजन्यत्वं विवक्षणीयमित्युक्त्वा कृतिध्वंसादेः पक्षत्वमुपपादितम् । तदाह—**अस्मिंश्चेति** । **सविषयकेति** । अदृष्टाद्वारकसविषयकत्रितयजन्याभिन्नानि जन्यानीति वाच्यमित्यर्थः—**विरोधीति** । उत्तरात्मविशेषगुणानां पूर्वपूर्वनिवर्तकत्वादिति भावः । चिकीर्षाध्वंसस्य पक्षता न स्यात् प्रतियोगितया चिकीर्षाजन्यत्वात् । विरोधिगुणभूतयोत्तरकृत्या जन्यत्वादित्यत आह—**चिकीर्षेति** । **ज्ञानेति** । तस्य चिकीर्षातः पूर्वभावितया तज्जनकत्वेन तद्ध्वंसाजनकत्वादिति

---

[1] र:सिद्धः—छ. [2] अन्यथेत्यधिकं वर्तते—छ. [3] अयंग्रन्थः नास्ति—छ.
[4] कत्रि—च-मु. [5] त्यजन्य—कुं.

त्तयोरपि पक्षतासिद्धः ॥

यद्वा क्षितिरेव पक्षः ॥

नन्वेवं पक्षादन्यत्राङ्कुरे संदिग्धानैकान्त्यम् । न च निश्चितसाध्याभाववति साधनसंदेह एव दोषो न तु सन्दिग्धसाध्येसाधननिश्चयोपीति वाच्यम् । हेतौ साध्याभाववद्वामित्वसंदेहस्य[1] दूषकताबीजस्योभयत्रापि सत्त्वात् । नचैवं विधस्य संदेहस्य पक्षेपि सत्त्वादनुमानमात्रोच्छेदः । तदर्थ मेव पक्षादन्यत्रेति विशेषितत्वादिति चेन्न[2] ॥

पक्षादित्यत्र पक्ष[3]शब्देन प्रयोगविषयविव-

भावः—**तयोरपीति** । [4]कृतिचिकीर्षाध्वंसयोरपीत्यर्थः ॥

नन्वेवमपि न सर्वध्वंसस्य पक्षता । चरमघटसुखादिध्वंसस्य पक्षबहिर्भावावश्यंभावात् । अन्यथा तस्य भोगतत्साधनेतरतया अदृष्टाजन्यत्वेन स्वजनकादृष्टाप्रसिद्ध्योक्तरूपसाध्यासंभवेन तदंशे बाधापत्तेः । उक्तदिशा अन्योन्याभावस्य पक्षतावच्छेदकतया तस्य तन्मतेऽप्रसिद्ध्या आश्रयासिद्धेश्चेति पक्षधरोक्तारुच्या मणौ "क्षितिरेव वा पक्ष" इत्यादिना पक्षान्तरमुक्त्वोपपादितं तदाह—**यद्वेति** । **पक्ष इति** । प्रतिज्ञाविषय इत्यर्थः । संदेहादिरूपपक्षताया अन्यत्रापि भावात् ॥

क्षितेरेव पक्षत्वे मण्युक्तबाधकशंकां तदुत्तरं च निष्कृष्याह—**नन्वित्यादिनेष्टसिद्धेरित्यन्तेन** । अनुमानमात्रोच्छेदभयात्पक्षादन्य-

---

[1] समस्तं पदं–छ. [2] नेतिनास्ति–च. [3] पदेन–छ [4] कृतिपदं नास्ति–अ.

क्षायां स्वार्थानुमानोच्छेदात्। पक्षलक्षणवद्विवक्षायां[1] चांकुरस्यापि पक्षत्वात्। अत एव तत्र पक्षसमव्यवहारः। अङ्कुरस्यानुपादानं तु क्षितिमात्रोपादानेपीष्टसिद्धेः॥

नन्वेवं संदिग्धोपाध्याहितः पक्ष एव व्यभिचारसं[2]देहोपि न दोषः स्यात्। न च तत्रानुकूलतर्काभावा[3]द्व्याप्त्यनिश्चयः। अत्र तु कार्यत्वरूपहेतूच्छित्तेरेव बाधकत्वात्त[4]न्निश्चय इति वैषम्यमिति वाच्यम्। पक्षे व्यभिचारसं[5]देह[6]स्य दूषकत्वे तर्क

त्रेत्युक्तम्। पक्षस्वरूपमग्रे विकल्पयिष्यते—**पक्षलक्षणवादिति**। सिषाधयिषाविरहसहकृतसाधकबाधकमानाभावादिरूपपक्षलक्षणवदित्यर्थः—**अत एव**। पक्षलक्षणसत्त्वादेव। प्रतिज्ञाविषयत्वाभावात्समपदप्रयोग इति भावः—**इष्टसिद्धेरिति**। तावतैवेश्वरसिद्धेरिति वा घटादौ निश्चितव्याप्तिकस्य लिंगस्य पक्षपक्षसमयोर्दर्शनेनोभयत्राप्यनुमित्युत्पत्तेरिति[7] वार्थः। संदिग्धसाध्यवति हेतुनिश्चयो न दोष इत्यत्र बाधकं वक्ष्यमाणदूषणदार्ढ्याय स्वयमाशङ्क्य हेत्वाभासादिग्रन्थे मण्याद्युक्तसमाधिमाह—**नन्वित्यादिना अदोषत्वादित्यन्तेन**। **संदिग्धेति**। स श्यामो मित्रातनयत्वादित्यष्टमगर्भस्थविषयप्रयोगे शाकपाकजत्वोपाधेः पक्षाद्व्यावृत्तिसंदेहेनाहितसाध्यसंदेहमूलो व्यभिचारसंशयोपीत्यर्थः। तत्र तस्यादोषत्वे व्याप्तिनिश्चयः स्यादिति भावः। तत्र व्याप्त्यनिश्चयोऽन्यनिमित्तक इत्याशङ्क्याह—**न चेति**। **तर्कस्यापीति**। साध्याभावे हेतुर्न स्यादि-

[1] त्वंकु–कुं [2] शयो–छ-ख. [3] न्निश्चयः–छ. [4] न्निश्च–छ.
[5] शयस्य–क-छ-ख. [6] स्यादोषत्वात्। तस्य दू–कुं. [7] भावः–कुं.

स्यापि पक्षे व्याभिचारसंदेहेन प्राशिथिलमूलत्वापातादिति चेन्न ॥

विप्रतिपत्त्यादिजन्यस्य पक्षताप्रयोजकस्य संशयस्यानुमित्यनुकूलत्वे [1] नादोषत्वेप्युपाध्याहितस्य तस्या [2] तथात्वेन दोषत्वात् ॥

नन्विदमप्रयोजकं नित्यायाःसर्वविषयायाश्चेश्वरकृतेरिदानीं संदिग्धत्वेन कृतिसामान्यस्य देशतः कालतो [3] वा व्यतिरेकानिश्चयेन कार्यसामान्यं प्रति कारणत्वाग्रहात् । वह्निधूमसामान्ययोस्तु हृदादौ व्यतिरेकनिश्चयोस्तीति चेन्न ॥

घटकुलालकृतिरूपविशेषयोरेव व्यतिरेकस्य कारणत्वस्य वा ग्रहणेनाबाधे सामान्ययोरपि हेतुत्व-

---

त्येवं रूपतर्कस्यापि आपाद्यापादकयोर्व्याप्तिसंदेहेनेत्यर्थः—**विप्रतिपत्त्यादीति** । साधारणधर्मादिरादिपदार्थः—**अतथात्वेनेति** । अनुमित्यननुकूलत्वेनेत्यर्थः । "अथ कृतिकार्ययोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः" इत्यादिना मण्युक्तमेव दूष्यांशं शङ्कापूर्वमनुवदति—**नन्विदमित्यादिना** । भावकार्यत्वादिरूपानुमानमित्यर्थः—**इदानीमिति** । अनुमानात्प्रागित्यर्थः । ईश्वरकृतिव्यतिरेकस्य न्यायमतेऽप्यभावेन प्राधान्याद्व्यतिरेकमात्र एवाक्षेपसमाध्युक्तिरिति ज्ञेयम् । अन्वयाक्षेपस्याप्युपलक्षणं वा । एवं ह्यनुमानमात्रोच्छेद इत्यत आह—**वह्नीति** । **घटेति** । घटरूपकुलालकृतिरूपविशेषयोरित्यर्थः—**कारणत्वस्येति** । कार्यकारणभावस्ये

---

[1] न तस्या-कुं. [2] तस्येति नास्ति-कुं. [3] वा इति नास्ति-छ-ख.

सिद्धेः । कथमन्यथाकाशादेः समवायिकारणस्य नित्यत्वाद्विभुत्वाच्च समवायिकारणसामान्यव्यतिरेकानिश्चयाच्छब्दादिसमवायिकारणत्वेनाकाशादिसिद्धिः ॥

नन्वेवमपि दृष्टान्तः साध्यविकलः कुलालादिकृतेरेवान्वयव्यतिरेकाभ्यां कारणत्वग्रहेण[1] मानाभावेन कुलालस्याहेतुत्वादिति चेन्न ॥

प्रयत्नवदात्मसंयोगस्य[2] चेष्टाद्वारा घटहेतुतया तद्विशेषणतया प्रयत्नस्येवात्मनोऽपि हेतुत्वात् ॥

त्यर्थः । प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्वादिकल्पनेऽपि वाक्यसामान्यवक्तृज्ञानसामान्ययोस्तद[3]बाधादबाधन इत्युक्तम्—**आकाशादिसिद्धिरिति** । तत्र घटकपालादिरूपविशेषयोरेव व्यतिरेकादिग्रहणेनेत्युक्तरीतेरेवानुसर्तव्यत्वादिति भावः—**अहेतुत्वादिति** । तथाच कृतिमज्जन्यत्वरूपसाध्यं तत्र नेत्यर्थः ॥

मानाभावेनेत्यसिद्धम् । कुलालो घटहेतुः तद्धेतुसंयोगावच्छेदकत्वात् कपालवत् घटहेत्वात्मसंयोगवदेकप्रयत्नवद्धेति मानाभावादिति भावेनाह ॥ **प्रयत्नेति** । प्रयत्नस्यैवेत्युपलक्षणम् । असमवायिकारणसंयोगाश्रयकपालादेरिवेत्यपि ध्येयम् ॥

नन्वात्मसंयोगे सति प्रयत्नं विना न चेष्टेति प्रयत्न एव हेतुर्न तु

[1] हणे—छ. [2] चादृष्ट—ख. [3] भावा—कुं.

संयोगस्य हेतुत्वे मानं तु, चेष्टा प्रयत्नवदात्मसंयोगासमवायिकारणिका स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वात् । यत्स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगि तत्तदीयसंयोगासमवायिकारणकम्[1] ।

प्रयत्नवदात्मसंयोग इत्यत आह—**संयोगस्येति**। प्रयत्नवदात्मसंयोगस्य घटहेत्वङ्गचेष्टाहेतुत्वे मानं त्वनुमानमित्यग्रेतनेनान्वयः—**चेष्टेति** । शरीरस्पन्द इत्यर्थ.—**प्रयत्नेति**। प्रयत्नवत आत्मनः शरीरस्य च यः संयोगः तदसमवायिकारणिकेत्यर्थः । अभिघातकसंयोगेनार्थान्तरनिरासाय प्रयत्नवदित्यादिविशेषणम् । हेतौ स्वेति परिस्पन्दः । स्वव्यधिकरणः स्वाधिकरणभिन्नाधिकरणकः तदीयः आत्मीयो गुणः प्रयत्नः तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादित्यर्थः। कपालरूपजन्यघटरूपे व्यभिचारनिरासाय तदीयेत्युक्तिः । आत्मीयेत्यर्थः ॥

यद्वोक्तप्रतियोगिक्रियात्वादिति हेतुर्द्रष्टव्यः । अतो न व्यभिचारः । हेतोरेवाभावात् । एवं च तदीयेति तच्छब्दस्य समभिव्याहृतपरत्वेपि न दोषः । स्वव्यधिकरणपदकृत्यमग्रे व्यक्तम् ॥

यद्यपि मणौ "या क्रिया व्यधिकरणयदीयगुणजन्या" इत्यादिव्याप्त्युक्त्या गुणजन्यत्वादिति हेतुर्वाच्या व्याप्तिश्च तथैव प्रदर्शनीया । तथापि क्रियाया ईश्वर[2]गुणजन्यत्वेपि नेश्वरसंयोगासमवायिकारणकत्वमिति व्यभिचारनिरासाय तट्टीकार्थानुवादो गुणव्यतिरेकप्रयुक्तेत्यादिः ॥

यदिति । यत् परिस्पन्दाख्यं कर्मेत्यर्थः । मणावपि या क्रिये-

[1] 'केत्यनुमानं गुरुत्व' इत्यादि वर्तते—**क.** [2] गुणपदं नास्ति—**अ.**

यथा स्पर्शवद्वेगवत्पवनाभिघातकारणिका पर्णादि-क्रिया पवनसंयोगासमवायिकारणिकेत्यनुमानम् ॥

गुरुत्वव्यतिरेकप्रयुक्त व्यतिरेकप्रतियोगिनि गुरुत्वसमानाधिकरणे पतने गुरुत्ववद्द्रव्यसंयोगासमवायिकारणकत्वरहिते व्यभिचारनिरासाय हेतौ स्वव्यधिकरणेत्युक्तम्। अन्यथा चेष्टैव नोत्पद्येत। असमवायिकारणाभावात्। [1]कारणप्रत्यासत्त्यभावेन प्रयत्नस्य हेतुत्वानुपपत्तेश्च ॥

न चैवमप्यात्मा हेतुभूतसंयोगावच्छेदक एव

त्येवोक्तेः। अन्यथा कपालरूपजन्यघटरूपे व्यभिचारापत्तेः—**यथेति**। यथा पर्णादिक्रियेत्यन्वयः। तत्र हेतुसत्त्वव्यक्त्यर्थं स्पर्शवदिति। पर्णादिक्रिया स्वव्यधिकरणवायवीयवेगरूपगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनीत्यर्थः—**पतन इति**। आम्रफलादिपतन इत्यर्थः। स्वव्यधिकरणयदीयव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगीत्येतावत्युक्ते आम्रादिवृक्षपतनक्रियायां व्यभिचारः। तस्यां स्वव्यधिकरणो य आम्रादिवृक्षः स्वारम्भकावयवसम्बन्धित्वादवयवी यश्च तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेपि आम्रावयवसंयोगासमवायिकारणकत्वाभावात् अतो यदीयगुणेत्युक्तम् ॥

विपक्षे बाधकरूपं हेतोरनुकूलतर्कमाह—**अन्यथेति**। उक्तसाध्याभाव इत्यर्थः—**कारणेति**। अन्यथेत्यनुषङ्गः। कारणीभूतप्रत्यासत्तीत्यर्थः। अप्रत्यासन्नस्य हेतुत्वेऽतिप्रसङ्ग इति भावः। "असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च" इति मण्युक्तमेवोदा-

---

[1] 'समवायि' इत्यधिकं वर्तते—**ख.**

न हेतुरिति वाच्यम्। घटकारणीभूतसंयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनात्॥

ननु घटादौ ज्ञानस्य कृतिद्वारैव हेतुत्वात्कृतिं च प्रतीष्टसाधनत्वानुमितेरेव हेतुत्वात्साक्षात्कारस्याहेतु[1]त्वेन साध्यवैकल्यमिति चेन्न[2]। कृतिर्हि सिद्ध[3]वृत्तिरसिद्धविषयिणी। तत्र साध्यांशे घटादाविष्टसाधनत्वानुमितिसत्त्वेपि सिद्धांशस्य कपालादेः साक्षात्कारव्यतिरेकेण कृतिव्यतिरेकदर्शनेनोपादानसाक्षात्कारस्यापि हेतुत्वात्॥

न च मनःक्रियाहेतुमनोविषयककृतौ व्यभिचारः समानाधिकरणस्य सिद्धमनोविषयक साक्षात्कारादेरभावादिति वाच्यम्। त्वगिन्द्रियगृहीतमनोवहननाडीगोचरकृत्या नाड्यां क्रियोत्पत्तौ-

---

हरणनिष्ठतया व्यनक्ति—**घटकारणेति**॥

"अथ घटकृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः। तच्च न प्रत्यक्षम्" इत्यादिना मण्युक्तावेव प्रकारान्तरेण साध्यवैकल्यतत्समाधी निष्कृष्यानुवदति—**नन्वित्यादिना**। **साध्येति**। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वादिरूपसाध्येत्यर्थः—**व्यभिचार इति**। यन्निष्ठा या कृतिः सा तद्गोचरापरोक्षपूर्वकेत्यस्य व्यभिचार इत्यर्थः। तमेव व्यनक्ति—**समानाधिकरणस्येति**। साक्षात्कारादेरित्यादिपदेन चिकीर्षाग्रहः। मनसोऽतीन्द्रियत्वादिति भावः—**मनोवहनेति**।

---

[1] त्वात्—**मु·च**. [2] 'न' इति नास्ति—**छ-ख**. [3] कृत्यसिद्ध—**छ-ख**.

वेगवद्भ्यां[1] संयोगविशेषरूपनोदनेन मनसि क्रियोत्पत्तेः ॥

यद्यप्युपादानमात्रं सिद्धम् । तथा प्युपादेयवत्त्वेन साध्यत्वात्तत्र चिकीर्षा युक्ता ॥

न च घटे सिद्धविषयकसाक्षात्कारजन्यत्ववदसिद्धविषयकपरोक्षज्ञानजन्यत्वस्यापि दर्शनादीश्वरस्य नित्यप्रत्यक्षवन्नित्यानुमितिः स्यादिति वाच्यम् । सिद्धपरमाण्वादिविषयकपरोक्षज्ञाने सत्यप्यपरोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्येव

मनस आधारभूतेत्यर्थः—**मनसि क्रियोत्पत्तेरिति** । तथा च यत्र कृतिर्नाऽस्यां तत्रास्त्यपरोक्षादिपूर्वकत्वम् । यत्र मनसि नास्त्यपरोक्षज्ञानं तत्र न कृतिरिति न व्यभिचार इति भावः ॥

नन्वेवमपि सिद्धे करणेच्छाभावेनोपादाने चिकीर्षायोगात्पुनः साध्यवैकल्यमित्याशङ्कामनूद्य निराह—**यद्यपीति** । एवमप्रयोजकत्वसाध्यवैकल्ये निरस्य "नन्वेवं घटादावनुमितिजन्यत्वदर्शनादीश्वरे अनुमितिरपि स्यात्" इत्यादिना मण्युक्ततर्कपराहतिशङ्कोत्तरे अनुवदति—**नचेत्यादिना** । ईश्वरे जन्यज्ञानाभावाल्लिङ्गजन्यज्ञानं कथं स्यादित्यत आह—**नित्येति** । प्रत्यक्षस्येन्द्रियजन्यत्वेपि नित्यप्रत्यक्षवदनुमितेर्लिङ्गजन्यत्वेपि नित्यानुमितिः स्यादित्यर्थः । अनुमिते[2]रीनित्यत्वे आदिकालीनद्व्यणुकाद्यजननात्तदविनाभूतशरीरेन्द्रिया[3]भावापाताच्चेति भावः **अपरोक्षत्वेति** । तस्मिन् ज्ञान इत्यर्थः—**कृतीति** । परमाणुगोचर-

---

[1] ज्यास–**मु-च-ख.** [2] तेर्नित्य–**कुं.** [3] अभावपदं नास्ति–**मु.**

साध्यांशज्ञाने सत्यपि परोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्यादर्शनात् ॥

ननु [1]द्वेषयोनिकृतिसाध्ये चिकीर्षाभावाद्व्यभिचारः । न च तत्रापि भगवतश्चिकीर्षा हेतुत्वेन कल्प्या । एवं हि द्वेषयोनिकृतिसाध्यदृष्टान्तेन क्षित्यादेरपि द्वेषवज्जन्यत्वापातेन नित्यद्वेषापत्तेरिति चेन्न । तत्रापि द्वे[2]ष्याभावस्यैवेष्टत्वेन

कृतीत्यर्थः—**साध्यांशेति** । घटपटादिरूपसाध्यांशस्येष्टसाधनत्वेनानुमितिरूपपरोक्षज्ञाने सति तद्विषयककपालादिनिष्ठकृतेर्दर्शनवत् साध्यांशस्येष्टसाधनत्वेनापरोक्षज्ञाने सति साध्यविषयिण्यास्तद्धेतुनिष्ठायाः कृतेर्व्यतिरेकस्य क्वाप्यदर्शनेन साध्यांश[3]स्येष्टसाधनत्वे ज्ञानत्वमेव तद्धेतुनिष्ठकृतौ प्रयोजकम् लाघवात् न तु तत्र साध्यांशस्येष्टसाधनत्व[4]ज्ञाने परोक्षत्वमपि । गौरवात् । एवं चेश्वरस्यापि क्षित्यादिरूपसाध्यांशस्य[5]स्वेष्टसाधनताज्ञानमपरोक्षरूपमस्तीति तद्धेतूपादानपरमाण्वादिकृतिर्युक्तेति न नित्यानुमित्यापत्तिदोष इति भावः ॥

एवं कृतेरपरोक्षज्ञानपूर्वकत्वे व्यभिचारमुद्धृत्य तत्प्रसङ्गागतमतिप्रसङ्गं च निरस्येदानीं कृतेश्चिकीर्षापूर्वकत्वे व्यभिचारचोद्योत्त[6]रे मण्युक्ते[7] एवाह—**ननु द्वेषेति** । द्वेषकारणकदुःखनिवृत्त्यनु[8]कूल कृतिसाध्ये[9] दुःखाभावादावित्यर्थः । तत्रेश्वरीयाचिकीर्षाकल्पनेन व्यभिचाराभावेप्यनिष्टप्रसङ्गस्तु स्यादित्याह—**एवंहीति** । तत्र द्वेषयोनित्वमेव कृतेर्नास्ति

[1] द्वेषयोनि-इतिनास्ति—**ख**. [2] षाभा—**क**. [3] स्य स्वेष्ट—**मु**. [4] त्वं ज्ञाने—**मु**. [5] शज्ञा—"स्वेष्टासाधनता" इतिनास्ति—**मु**. स्येष्ट-**अ**. [6] रे—**कुं**. [7] क्तमे—**कुं**. [8] रूप—**कुं**. [9] चिकीर्षाजन्येत्यधिकं—**कुं**.

त[1]त्साधनत्वेन ज्ञाने चिकीर्षाया एव [2]संभवेन भिन्नविषयकद्वेषस्याहेतुत्वात् ॥

न चैवं प्रवृत्तियत्नातिरिक्तस्य क्रियाव्यतिरेकानुगुणस्य द्वेषप्रयोज्यस्य निवृत्तियत्नस्याभावाद्वेषे मानाभावः । द्वेष्मीत्यबाधितानुभावात् ॥

येन तदृष्टान्तेन क्षित्यादावपि द्वेषवज्जन्यत्वं स्यादित्याह—**तत्रापीति** । दुःखाभावसाधनेपि तत्साधनत्वेन द्वेष्याभावसाधनत्वेन ज्ञाने सति साधनगोचरचिकीर्षाया एव संभवेनेत्यर्थः—**भिन्नेति** । शत्रुविषयकद्वेषस्य तद्वधसाधनगोचरकृतेश्च भिन्नविषयत्वेन द्वेष्याभावसाधनकृतौ शत्रुविषयकद्वेषस्याहेतुत्वादित्यर्थः ॥

यदि द्वेषो न कृतिहेतुस्तर्हि द्वेषोऽलीक एव भवेदित्याशङ्क्य प्रत्यक्षेणासिद्धिमाह—**न चैवमिति** । एवं द्वेषस्य प्रवृत्तिरूपसाधनगोचरकृता[3]वहेतुत्वे द्वेषविषये मानाभाव इत्यन्वयः । दुःखसाधनादौ निवृत्तिरूपप्रयत्नं प्रति भिन्नविषयस्यापि द्वेषस्यैव हेतुत्वात् द्वेषे निवृत्तिरूपकार्यमेव मानमित्यत उक्तम्—**प्रवृत्तीति** । प्रवृत्तिरूपप्रयत्नेत्यर्थः—**क्रियेति** । अङ्गचेष्टादिरूपकार्येत्यर्थः—**अभावादिति** । दुःखादिकार्याभावानुकूलस्य दुःखगोचरद्वेषजन्यस्य निवृत्तिरूपप्रयत्नस्याभावादित्यर्थः । प्रवृत्तिरूपो निवृत्तिरूपश्चेति यत्नद्वैविध्यं यदि स्यात्तदा प्रवृत्तिप्रयत्नश्चिकीर्षाद्वारेष्टसाधनताज्ञानसाध्यः । निवृत्तियत्नस्तु द्वेषसाध्य इति द्वेषः प्रामाणिकः स्यात् । न चैवम् । प्रवृत्तिरूपप्रयत्नाभावस्यैव निवृत्तित्वात् ॥

न च निवृत्तिरूपयत्नाभाव एव प्रवृत्तिरिति वैपरीत्यं शङ्क्यम् ।

---

[1] त्रसा–**क.** तत्रेत्यपि वर्तते–**ग.** [2] वांस–**क.** [3] त्यहे–**अ.**

ननु तथापि घटादौ चेष्टाव्यापारककृतेरेव हेतुत्वावधारणात् क्षित्यादौ च चेष्टाया योग्या[1]-नुपलब्धिबाधितत्वा[2]त्कृतेरहेतुत्वम्। न चैकस्मिन्

सुषुप्तिदशायां निवृत्तिविरहसत्त्वेन प्रवृत्तिसाध्यचेष्टादिकार्याद्यापत्तेः ॥

न च तदा निवृत्तिविरह एव नेति युक्तम्। तदा दुःखसाधनत्वज्ञानविरहेण तन्निमित्तद्वेषस्य निवृत्तिहेतोरभावेन निवृत्तेरभावात् ॥

न चैवं प्रवृत्तियत्नो रागान्निवृत्तिस्तु द्वेषादिति कुसुमाञ्जल्युक्तिविरोधः। तन्मते तथात्वेपि मणिकृन्मते तदभावात्। अन्यथा "कुतस्तर्हि द्वेष। शत्रून् द्वेष्मीत्यबाधितप्रत्यक्षा"दिति मण्युक्तिविरोधात् ॥

एतेन यत्तु कुसुमाञ्जलिवाक्यानुरोधेन कुत इत्यादिमणिवाक्यस्य पक्षधरीयं क्लेशेनार्थवर्णनं तत्तु मणिकृदभिप्रायाज्ञानमूलमिति विभावितं ध्येयम् ॥

एवं कृतेरपरोक्षज्ञानचिकीर्षापूर्वकत्वं व्यभिचारनिरासेन समर्थ्य "स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्यापारद्वारैव न तु साक्षात् इत्यादिना मण्युक्तबाधशङ्कातत्समाधी आह—**ननु तथापीत्यादिना**। अप्रयोजकत्वसाध्यवैकल्यव्यभिचारनित्यानुमितिनित्यद्वेषापत्तिरूपतर्कपरा-हत्याख्यदोषाणामभावेपीत्यर्थः—**चेष्टेति**। अङ्गचेष्टेत्यर्थः—**अहेतुत्वमिति**। तथाच कृतिमज्जन्यत्वं बाधितमिति भावः ॥

न चेष्टाकृत्योर्द्वारद्वारिभावापन्नतया घटादौ हेतुता। किन्तु प्रत्येकमेव। न चैवं कृतिचेष्टयोः पौर्वापर्यानुपपत्तिः। पितापुत्रयोः पौर्वापर्ये[3] प्येकत्र घटे द्वयोः स्वातन्त्र्येण हेतुत्ववदुपपत्तेः। तथा च यथोक्तसाध्ये न बाध इति भावेनाशङ्क्य निराह—**न चेति** ॥

[1] ग्योप—च. [2] त्वेन कृ—मु-च. [3] णैक-मु.

घटे पितापुत्रयोरिव चेष्टाकृत्योः स्वातन्त्र्येण हेतुता । घटानुकूलचेष्टाश्रयसन्निहितस्य तदनुकूलकृतिमतो निगडनिश्चलदेहत्वेन चेष्टारहितस्यापि पुंसस्तद्धेतुत्वापत्तेरिति[1] चेन्मैवं ॥

चेष्टाव्यापारककृतित्वेन कारणता न तावत्कार्यमात्रे क्षित्यादौ, व्यभिचारेण त्वयापि तथा नभ्युपगमात् ॥

नापि कृतिजन्यत्वावच्छिन्ने । आत्माश्रयेण कृतिजन्यत्वस्य स्वानवच्छेदकत्वात् । घटादौ कार्यविशेषे तथा कारणत्वे च सामान्यविशेषन्यायेन कार्यसामान्ये कृतित्वेनैव हेतुत्वात् ॥

अत एव चेष्टाजन्यत्वशरीरजन्यत्वादि[2] रूपो-

व्यभिचारान्न प्रत्येकं हेतुरित्याह—**घटेति** । किं कार्यमात्रे कृतिजन्यकार्यमात्रे वा घटादिकार्यविशेषे वेति हृदि विकल्प्याद्यद्वयं निरस्यान्ते त्विष्टसिद्ध्या न बाध इत्याह—**चेष्टेत्यादिना** । **त्वयापीति** । निरीश्वरवादिनापि । न केवलमशरीरेश्वरवादिना मयेत्यर्थः—**अवच्छिन्न इति** । कार्यमात्र इत्यनुकर्षः—**सामान्येति** । यद्विशेषयोः कार्यकारणभावः बाधकाभावे तत्सामान्ययोरपीति न्यायेन घटादिरूपकार्यविशेषत्वेन चेष्टाद्वारककृतित्वेन कार्यकारणभावे व्यभिचाररूपबाधकाभावेन कार्यत्वेन कृतित्वेन कार्यकारणभावकल्पनपक्षेपि केवलकृतेरेव हेतुत्वादित्यर्थः—**अत एवेति** । कृतित्वेन कृतिजन्यत्वस्य न्यायप्राप्तत्वा-

---

[1] चेन्न—मु-च. [2] रूपपदं न—छ-ग-ख.

पाधिरपि न। गौरवेण चेष्टात्वादिना रूपेणा कारणत्वेनोपाधेरप्रयोजकत्वात् ॥

न[1] न्वथापि ज्ञानमनित्यमेव कर्तृ शरीर्येवेत्यादिव्याप्तिबाध इति चेन्न। ज्ञानत्वादेरनित्यत्वादिना कार्यकारणभावादेरभावेन व्याप्तेरेवाभावात्। कार्यकृत्योश्च कार्यकारणभावात्। अन्यथाऽवयवो-महाने[2] वेत्यादिव्याप्त्या परमाणुरपि न सिध्येत् ॥

अत एवादृष्टाद्वारकानित्यज्ञानाजन्यत्वादिना

देवेत्यर्थः। अनित्यज्ञानादिमज्जन्यत्वादिरादिपदार्थः—**नेति**। न भवतीत्यर्थः—**चेष्टात्वादिनेति**। शरीरत्वादिरादिपदार्थः ॥

स्यादेतत् कर्तृ शरीर्येव ज्ञानमनित्यमेवेत्यादिप्राथमिकव्याप्ति-ग्रहप्रत्यक्षविरोधात् इत्यादिनोक्तशङ्कोत्तरे निष्कृष्यानुवदति—**नन्वित्यादिना**। **अन्यथेति**। व्याप्तिप्रयोजककार्यकारणभावस्य साध्येन विना हेतोरनवस्थितत्वादेरनुकूलतर्कस्याभावेपि व्याप्तय्यभ्युपगम इत्यर्थः। द्व्यणुकं स्वन्यूनपरिमाणद्रव्यारब्धं कार्यत्वाद्घटवदित्याद्यनुमानेन परमाणुसिद्धिर्न स्यात्। योऽवयवः स महान् यथा[3] व्यणुकादिः। अवयवश्चायं परमाणुरित्यनेन बाधादिति स्यादित्यर्थः ॥

नन्वथापि क्षित्यादिकं नोक्तसाध्यवत् अदृष्टाद्वारकानित्यज्ञाना-जन्यत्वात्[4] घटवदिति सत्प्रतिपक्षत्वम्। असिद्धिनिरासाय हेत्वोरदृष्टाद्वारकेत्याद्युक्तिरित्यत आह—**अत एवेति**। तदेव न्यनक्ति।

---

[1] नुतथा—**मु-च.** नन्वपि—**क-ख.** [2] एवकारो नास्ति—**छ-ख.** [3] द्वय—**कुं.** [4] शरीरजन्यत्वात्—**अ.**

सत्प्रतिपक्षत्वमपि निरस्तम्। अप्रयोजकत्वात्। अजन्यत्वस्यै[1] व हेतुत्वसम्भवेन व्याप्तिग्रहानौपयिकविशेषणान्तरवैयर्थ्याच्च ॥

अत एव शशशृङ्गप्रतिबन्ध्यपि निरस्ता। तत्रानुकूलतर्काभावात्। कर्त्रैक्यं तु लाघवात् ॥

नन्वनुमितंर्व्यापकांशे व्यापकतावच्छेदकमात्रप्रकारकत्वादिहापि व्यापकः कर्ता व्यापकतावच्छेदककर्तृत्वेन न सि[2]ध्येत्। एकत्वेन कथं सेत्स्यतीति चेन्मैवं। अनुमितिसामग्रीमहिम्ना तथात्वेपि लाघवतर्कसहकारि[3]रूपप्रमाणसामग्रीमहिम्नैक्यस्य[4] प्रकारत्वोपपत्तेः। तच्चक्षित्याद्युपादानगोचरं ज्ञानादिकं लाघवादेकं नित्यं चेति विषयसंकोचकाभावात्कपालघटादिगतरूप-

---

अप्रयोजकत्वादिति ॥

नन्वेवमयोग्यस्य साधने शशो विषाणवान् पशुत्वाद्गोवदिति शशशृङ्गसिद्धिरपि स्यादित्यत आह—**अत एवेति**। अप्रयोजकत्वादेवेत्यर्थः। तदेव व्यनक्ति—**अनुकूलेति** ॥

नन्वेवं कर्तृमात्रसिद्धावपि तदेकत्वं कुतः सिद्धमित्यत आह—**कर्त्रैक्यं त्विति**। तदेव शङ्कोत्तराभ्यां व्यनक्ति—**नन्वित्यादिना**। अस्तु कर्त्रैकः तद्वत्तज्ञानादेरेकत्वादिसिद्धिः कथमित्यत आह—**तच्चेति**। ज्ञानादिकमित्यन्वयः ॥

---

[1] 'एव' इति नास्ति—**कुं-ग.** [2] ध्यतु—**मु-च-क.** [3] र-ग-ख-कुं. [4] स्वेत्यधिकं—**ख.**

गुरुत्वादावीश्वरस्यै[1]व कर्तृत्वेन रूपाद्युपादान-भूतकपालादिगोचरत्वावश्यंभावाच्च सर्वविषयक-मेवेति ॥

अत्रोच्यते। अनुपलब्ध प्राक्कोटिषु भूभूधरा-दिषु कार्यत्वमेव कुतः। सावयवत्वादिति चेत्। सावयवत्वं सांशत्वं चेद्गगनादौ व्यभिचारि[2]

एवमनूदितमनुमानं दूषयितुं प्रतिजानीते—**अत्रोच्यत इति।** "हेतुविरोधो द्विविधः असिद्धिरव्याप्तिश्चे"ति भगवत्पादोक्तया हेतु-दोषयोरसि[3] द्धिव्याप्तयभावयोर्मध्येऽसिद्धेरेव प्राथम्यात् परैरप्यसिद्ध-विरुद्धेत्यादिप्राचां निर्देशेनासिद्धेः प्राथम्योपगमाच्च। समवेतत्वे[4] सती-त्यादिनाभिमतकार्यत्वहेतोरसिद्धिं तावत् "किञ्चानुपलब्धप्राक्कोटिषु कार्यत्वं कुतःसिद्धम्" इत्यादिना तत्त्वनिर्णयटीकोक्तां प्रपञ्चयति—**अनुपलब्धेति।** प्राक्कोटिः प्रागभावः ॥

ननु क्षित्यादिकं कार्यं सावयवत्वाद्धटवदित्यनुमानात्तत्सिद्धिः। न च सावयवत्वेनैवोक्तरूपकृतिमज्जन्यत्वं साध्यतां किं मध्ये कार्यत्व-साधनेनेति वाच्यम्। पूर्वोक्तरीत्या कृति[5] जन्यत्वे कार्यत्वस्येव सावयवत्वस्यानुकूलतर्काभावात् कार्यत्वरूपसाध्येन हेतूच्छित्यादिरूपानु-कूलतर्काभावादिति भावेनाशङ्कते—**सावयवत्वादिति चेदिति ॥**

"तर्ह्येवमाकाशादीनामपि कार्यत्वप्रसङ्गात्" इत्यादिशास्त्र-योनिसूत्रसुधोक्तिं हृदि कृत्वाह—**गगनादौ व्यभिचारीति।** तदेव

---

[1] एवकारो नास्ति-**मु.च.छ.** [2] रात्-**क.** [3] द्धयव्याप्तयो-**कुं.** [4] त्वादि त्यादिना-**मु.** [5] मजन्य-**कुं.**

गग[1]नादेः परमाणोश्च संयोगित्वेन सांशत्व[2] सिद्धेः। विस्तृतं चैतदन्यत्र । द्रव्यारब्धद्रव्यत्वं चेदकार्यत्ववादिनं प्रत्यसिद्धम् । द्रव्यसमवेत

व्यनक्ति—**गगनेति** । गगनादिः सांशः संयोगित्वात् घटवत् । न चाप्रयोजको हेतुः । तस्येह पक्षी नेह पक्षीत्यबाधितप्रतीत्या गगनादौ व्याप्यवृत्तित्वायोगेन स्वात्यन्ताभावसामानाधिकरण्यरूपाव्याप्य-वृत्तित्वस्य चैकत्र विरोधेनैकदेशरूपांशवृत्तित्वस्यैव वाच्यत्वात् । न चांशस्यौपाधिकत्वेनोपपत्तिः । उपाधिसंयोगस्यापि गगनादौ सर्वत्र व्याप्यवृत्तित्वायोगेनैकदेशरूपांशवृत्तित्वस्यैव वाच्यत्वात् । तस्याप्यौपा-धिकत्वेऽनवस्थाद्यापातेन स्वाभाविकांशव्यतिरेकेण संयोगित्वस्यैवा-नुपपत्तेरिति भावः ॥

नन्वेवं गगनकालपरमाण्वादेरपि संयोगित्वेन सांशत्वे तुल्यन्या यतयां[3] शस्यापि संयोगित्वेन सांशत्वं तदंशस्याप्येवमिति परमाण्वंशस्या-प्यानन्त्यं स्यात् । तथा च गगनपरमाण्वोस्तुल्यपरिमाणतापत्तिः । किंच परमाणोरपि न्यूनपरिमाणकांशस्य सत्त्वे यतः परमणुर्नास्ति स परमाणुरिति परमणुत्वव्याघातः । अपि चोपादानादिरूपावयवातिरिक्तांशसत्त्वे माना-भावात् तद्रूपांशवत्त्वस्य गगनादावप्यभ्युपगमेऽनित्यत्वापत्तेश्चेत्यत आह। **विस्तृतं चैतदन्यत्रेति** ॥

"अतः सर्वपदार्थानां भागाःसन्त्येव सर्वदा ।
सर्वदिक्त्वाभिसंबन्धादविभागः पराणुता ॥

इत्याद्यनुव्याख्यासुधयोर्वैशेषिकाधिकरणे विस्तृतमित्यर्थः । सर्षपो

[1] नकालादेः–क-च-छ-ग-ख. [2] त्वेन–छ-ख. [3] सांश–कुं.

[1]द्रव्यत्वं चेत्[2]जात्यादेरिवाकार्यत्वेनाप्युपपत्त्या अप्रयोजकता। मध्यमपरिमाणत्वं चेत्तदाप्यप्रयोजकतैव—गगनप्रदेशस्येव सांशत्वेनै[3]व तदुपपत्तेः। अवयवनैरपेक्ष्येणैव मध्यमी[4]भूतपरिमाणाश्रयत्वमात्रेण द्रव्यस्य मध्यमपरिमाणत्वोपपत्तेश्च ॥

यावंतं देशमवष्टभ्य वर्तमानो दृश्यते तावत्येवानधिकतदवयवपरंपरा गगनेप्येवमित्यङ्गीकारे तुल्यपरिमाणतानापत्तेः। यतः स्वावयवं विना स्वतन्त्रमनवयवरूपमपकृष्टपरिमाणं नास्ति स परमाणुरित्युक्तेर्व्याघाताभावादित्या[5]द्युक्तेरिति भावः। तथोपादानातिरिक्तांशसत्त्वादिकं चोपाधिखण्डनटीकाभावप्रकाशिकायां विस्तृतमित्यर्थः ॥

जात्यादेरिवेति। अद्रव्यस्य जातेरेकत्वसङ्ख्यापरिमाणादेर्द्रव्यसमवेतत्वेप्यकार्यत्वं यथा तथा द्रव्यसमेतद्रव्यस्याप्यकार्यत्वमस्तु। विपक्षे बाधकाभावादिति भावः—**गगनप्रदेशस्येवेति**। यथा इह पक्षीत्यादिप्रतीत्या पक्ष्याद्याधारप्रदेशस्य मध्यमपरिमाणत्वेपि तस्य प्रदेशस्याप्युक्तदिशानेकांशयुतत्वं तथा क्षित्यादेरवयवारब्धत्वरूपकार्यत्वाभावेपि गगन[6]पूर्वोत्तरावधिशून्यानन्तांशयुतत्वाभावेनानेकांशयुतपरमाणुतोऽनेकांशयुतत्वेन च तदुभयपरिमाणान्यपरिमाणरूपमध्यमपरिमाणत्वस्योपपत्तेरित्यर्थः॥

परिमाणस्यावयवोपचयहेतुकत्वमुपेत्योक्तम्। वस्तुतस्तदेव मास्त्वित्याह—**अवयवेति**। यथा परमाण्वादाववयवनैरपेक्ष्येणैवाणुपरिमाणं

[1] द्रव्यत्वं चेत् इतिनास्ति—**कुं.** [2] 'रूप्यसमवेत' इत्यपि वर्तते—**क.** द्रव्यसमवेत—**ख-ग.** [3] 'एव' इति नास्ति—**छ-कुं.** [4] मभू—**क-छ-ख.** [5] आदिपदं नास्ति—**मु.** [6] पूर्वोत्तरपदं न—**मु.**

भूम्यादेरुपलभ्यमाना भागास्तु नारम्भकरूपा अवयवाः किन्तु गगनस्य प्रदेशभेदा इव कालस्य क्षणादय इव चांशा एव सन्तु ॥

अत एव भूमेः खननादिना पूर्वावयवविनाशेनावयव्यन्तरोत्पत्तेः कार्यत्वं सिद्धमिति निरस्तम्। क्षणादिनाशेन कालस्यापि तत्प्रसङ्गात्। खनका-

---

महत्परिभाणं च तथा मध्यमपरिमाणमस्तु। प्रदीपगुणे प्रभायां दर्शनात्। न च प्रभा न गुणोपितु द्रव्यमिति युक्तम्। गुणाद्वाऽऽलोकवदितिसूत्रभाष्यटीकाचन्द्रिकासु तदनुविधानादिना गुणत्वसमर्थनादिति भावः ॥

अवयवनैरपेक्ष्येणेत्या[1]द्युक्तप्रमेये प्रत्यक्षबाधमाशङ्क्य निराह—**भूम्यादेरिति**। नन्वाकाशप्रदेशानां विनाशादृष्टेर्भूम्यवयवानां तद्दृष्टेर्भूम्यवयवानां तद्दृष्टेर्वैषम्यमित्यत आह—**कालस्येति**। प्रदेशभेदक्षणलवादीनामौपाधिकत्वे भूम्यवयवा[2]नामपि तथात्वमस्तिति भावः—**पूर्वावयवीति**। नोदनाभिघातादिनाऽवयवक्रियाद्वारा परमाणुपर्यन्तमसमवायिकारणसंयोगनाशेन पूर्वद्रव्यनाशे सति पुनरदृष्टाधीनपरमाणुसंयोगद्वारा खण्डक्षित्यादिकार्योत्पत्तेः पीलुपाकप्रक्रियासिद्धत्वात्कार्यत्वं सिद्धमित्यर्थः ॥

न चैवं खण्डक्षित्यादौ कार्यत्वसिद्धावप्यखण्डक्षित्यादौ न सिद्धमिति भागासिद्धिरिति वाच्यम्। नाशेन तत्रापि तदनुमानादिति भावः ॥

---

[1] आदिपदं नास्ति—कुं [2] अदीत्यधिकं—कुं.

देरेव भूम्यादिकर्तृत्वापत्तेश्च । प्रत्यभिज्ञाविरोधाच्च । क्षणभङ्गापाताच्च ॥

तदुक्तं भगवत्पादैः "विपर्ययेणाप्यनुमातुं

अत एवेत्युक्तं व्यनक्ति—**क्षणादीति**। न च क्षणादीनामौपाधिकत्वात्तत्रोपाधिनाश एवेति युक्तम्। विशेषणनाशे विशिष्टस्य नाशात्। अंशानामौपाधिकत्वस्योपाधिखण्डनादौ निरासेन स्वाभाविकत्वाच्चेति भावः।

खननादिना क्षितिनाशोत्पत्त्यङ्गीकारोऽयुक्त[1] एवेति भावेनाह—**खनकादेरिति**। तथाचांशतःसिद्धसाधनता स्यादिति भावः ॥

यदत्रोक्तं मणौ "तत्र क्षितिनाश एव कर्तृत्वं न तु खण्डक्षितौ" अवस्थितिसंयोगेभ्य एव तदुत्पत्तेः इति। तन्न। तथात्वे खण्डक्षितिनाशेप्यकर्तृत्वापातात्। अनुभवविरोधस्योभयत्र तुल्यत्वात् ॥

एकदेशनाशकर्तृत्वे त्वखण्डक्षित्युत्पत्तिरेव नेति कुतः कार्यत्वं क्षित्यादेरिति भावेनाह—**प्रत्यभिज्ञेति। क्षणेति**। प्रतिक्षणं क्षित्यादौ वाय्वाद्यभिघातादिनैकैकावयवापगमेन प्रतिक्षणं तदपगमानिमित्तनाशोत्पत्त्योरुपेयत्वादिति भावः ॥

एवं सावयवत्वं सांशत्वादिरूपेण विकल्प्य व्यभिचारासिद्धयन्यथासिद्धय उक्ताः। अस्तु सावयवत्वं यत्किंचित्। अथापि तर्कपराहतिः। सावयवत्वात् क्षित्यादिकं कार्यं चेत् अनुपलब्धप्राक्कोटित्वादकार्यमपि स्याद्गगनवदिति भावेन तत्संवादोक्तया व्यनक्ति—**तदिति**। क्षित्यादौ कार्यत्वानुमानं तर्कपराहतामित्येतत् "न चानुमानात्तत्सिद्धिः विपर्ययेणाप्यनुमातुं शक्यत्वात्" इति तत्त्वनिर्णये उक्तमित्यर्थः ॥

---

[1] एवेति नास्ति-कुं.

शक्यत्वात्" इति। अस्मदाद्यनुपलभ्यमानप्राक्कोटित्वेन हेतुना गगनादिदृष्टान्तेनाकार्यत्वस्याप्यनुमातुं शक्यत्वादित्यर्थः ॥

किंच घटादौ दर्शनमात्रेण भूभूधरादेः सावयवत्वेन कार्यत्वानुमाने रूपादौ दर्शनमात्रेण परमाण्वादेः सावयवत्वविपर्ययेण निरवयवत्वेन कार्यत्वानुमानं[1] किं न स्यात् ॥

प्रकृतोपयोगितया तद्वाक्यार्थमाह—**अस्मादिति**। पूर्ववाक्यस्य तु सावयवत्वानुमानात् क्षित्यादौ कार्यत्वसिद्धिरिति न च वाच्यमित्यर्थ इति भावः। एतेन कार्यत्वास्यासिद्ध्युक्तिपरटीका[2] मूलारूढेति दर्शितम् ॥

ननु सावयवत्वकार्यत्वयोर्घटादिषु भूयः सहचारदर्शनात्प्राक्कोटिरप्यस्ति क्षित्यादेरित्यनुमीयत इत्यासिद्धो हेतुरिति चेत् तत्किमन्यथानुपपत्तिरूपानुकूलतर्कसहितं सहचारदर्शनं केवलं वा। नाद्यः। अन्यथोपपत्तेरुक्तत्वात्। नान्त्यः। अतिप्रसङ्गादित्याह—**किं चेति**। मूलवाक्यं विवृण्वन्नेवाह—**सावयवत्वविपर्ययेणेति**। फलितमाह—**निरवयवत्वेनेति ॥**

न च गगनादौ व्यभिचारः शङ्क्यः। कार्यातिरिक्तस्य सर्वस्यापि विप्रतिपत्त्या पक्षत्वात्। अत एव परमाण्वादेरित्युक्तिः। न च परमाणुकालाकाशादेः कार्यत्वे कारणान्तरमपि तस्योपेयम् तस्याप्येवमित्यनवस्थापत्त्यादिदोष इति वाच्यम्। बीजाङ्कुरवदुपपत्तेः। प्रलयस्य च निरीश्वरवादिनो संमतेः। निरवयवमध्ये कस्य चिदकार्यस्य

---

1 'कर्तरि' इत्यधिकं—**क**. 2 अपि इत्यधिकं वर्तते—**मु**.

एतदप्युक्तम् "विपर्ययेति" ॥

किं च कर्त्रभावेपि कार्यत्वस्य सकारणकत्व-मात्रेणोपपन्नत्वेनाप्रयोजकता[1]। अन्यथा कर्मादि-कारकविशेषाभावेनासनशयनादिकार्यं न स्यात् ॥

कर्मादिकं न सार्वत्रिकम्। कर्ता तु सार्वत्रिक इति चेन्न। तस्यैवाद्याप्यसिद्धेः। घटादौ दर्श-

---

कस्यचित्कार्यस्योपगमवत् कस्यचित्सावयवस्यैवाकार्यस्याभ्युपेयत्वाच्च। निरवयवं द्रव्यमकार्यमेवेति चेत् निरवयवं वस्तु कार्यमेव रूपादिवदित्युपपत्तेः ॥

नन्ववयवाभावे तत्समवेतत्वरूपकार्यत्वं बाधितमिति चेत्। रूपादिवदेवोपपत्तेः। द्रव्यस्यायं नियम इति चेत्तस्यैव निरस्यत्वात्। समवायस्याग्रे निरसिष्यमाणत्वेन परि[2]माणत्वेनैव कार्यत्वोपपत्तेश्चेत्यादि-ज्ञेयमिति भावः—**एतदपीति**। निरवयवत्वेन परमाण्वादेः कार्यत्वानुमानमित्यर्थः ॥

एवं कार्यत्वस्यासिद्धिमुक्त्वा व्याप्त्यभावोपपादनाय "कारणाभावप्रयुक्तत्वात्कार्याभावस्य" इत्यादिना टीकोक्तमनुकूलतर्काभावं प्रपञ्चयंस्तदपि मूलारूढं दर्शयति—**किंचेत्यादिना एतदप्युक्तमित्यन्तेन। अन्यथेति**। कर्तृरूपकारकविशेषाभावेन कार्याभाव इत्यर्थः—**आसनेति**। आस उपवेशने आस्ते शीङ् स्वप्ने शेते भा दीप्तौ भातीत्यादेरकर्मकत्वादासनादिकार्यं कर्मसंप्रदानापादानकारकहीनमिति कार्यं न स्यादित्यर्थः ॥

---

[1] एव इत्यधिकं—छ. [2] णामत्वे—अ.

नं तु[1] सकर्तृकत्वस्यैव शरीरधर्माधर्मसुखदुःखस्वप्रयोजनापेक्षादिमज्जन्यत्वादेरप्यस्ति ॥

एतदप्युक्तं विपर्ययेणेति" । परानङ्गीकृतशरी[2]रजन्यत्वादिनेत्यर्थः ॥

विपर्ययेणेत्यस्य पराङ्गीकृतवैपरीत्येनेत्यर्थमुपेत्याह—**परानङ्गीकृतेति** । तथा च कार्यत्वस्य शरीरसुखदुःखादिमज्जन्यत्वादिना सह भावदर्शनेपि यथा तत्र कार्यत्वमप्रयोजकं तथा स कर्तृकत्वेपीति भावः । अस्मिन्पक्षे "न चानुमानात्तत्सिद्धिः" इति पूर्ववाक्यस्य कार्यत्वानुमानात्सकर्तृकत्वसिद्धिरिति न चेत्यर्थो ध्येयः ॥

ननु लोके सकर्मकाकर्मकादिकार्यं दृष्टमित्यस्तु कर्मादिहीनमपि कार्यम् । कर्तृहीनन्तु न दृष्टम् । किन्तु कर्तृमदेव । क्षित्यादि तु [3]विप्रतिपन्नम् । न च शरीरादिमत्कर्तृकमपि दृष्टमित्युक्तमिति वाच्यम् । कृतिं विना कार्यत्वानुपपत्तिवत् शरीरादिकं विना तदनुपपत्तेरभावात् । कार्यत्वं हि कृतिकर्मत्वम् । ऋहलोर्ण्यदिति ण्यत्प्रत्ययान्तस्य करोतेस्तदर्थत्वात् । न च कार्यशब्दो रूढः ।

"भवेतां यदि वृक्षस्य वाजिकर्णौ कथं च न ।
अदृ[4]ष्टां समुदायस्य कः शक्तिं जातु कल्पयेत्" ॥

इति प्रोक्षण्यधिकरणवार्तिकोक्तरीत्याऽवयवार्थसम्भवे समुदायशक्तिकल्पनानुपपत्तेः । अन्यथा प्रोक्षण्यादिशब्दोप्युदकविशेषे रूढ इति स्यादित्यतोऽस्तु नाम कार्यत्वं कर्तृजन्यत्वे प्रयोजकं तथापि त्वदुक्तविशिष्टसाध्ये-

---

[1] तु. इति नास्ति-**क.ख** 'कर्तुरिव' इतिवर्तते-**ग.** [2] रिज-**क-कुं.** [3] तो-**मु.** [4] क्लृप्तां-**अ.**

किंचास्तुकृतेः कार्यसामान्यं प्रति हेतुत्वम्। तथापि [1] त्वदुक्तस्वजन्येत्यादिबहुविशेषणविशिष्टकृतित्वेन न। किन्तु तद्विपरीतेन लघुना कृतित्वेनैव ॥

न चैवं कपालगोचरकृत्यभावेपि [2]पटगोचरकृत्या घटोत्पत्तिः शङ्क्या। घटरूपकार्यविशेषं प्रति कपालगोचरकृतिरूपविशेषस्य हेतुतया तद्रहितायाः सामान्यसामग्र्याः कार्याजनकत्वात् ॥

न चैवं प्रकृतेपि क्षित्युपादानगोचरकृतिरूपकारणविशेषः कल्प्यत इति वाच्यम्। त्वया कल्प्यमानकृतिविपरीतायाः कल्पनायाः क्षितिजनकादृष्ट-

---

त्वप्रयोजकमेवेत्याह — **किञ्चेत्यादिना**। ज्ञानचिकीर्षाकृतिनां प्रत्येकमेव हेतुतया साध्यत्रयोपगमेन मिलितानामहेतुत्वात्कृतेरित्येवोक्तं न तु ज्ञानादेरिति। एवमग्रेपि। **तदिति**। हेतुत्वमित्यर्थः ॥

एतदपि दूषणं मूलारूढमिति भावेन कार्यत्वानुमानात् स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वादिसिद्धिर्न चेति पूर्ववाक्यार्थमुपेत्य विपर्ययेणेत्युत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवाह—**तद्विपरीतेनेति। कार्यविशेषं प्रतीति।** यत्सामान्यन्यायादिति भावः ॥

न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यस्थतत्सिद्धिशब्दार्थं विवृण्वन्नेव शङ्कामनूद्य निराह—**नचैवमिति। प्रकृतेपीति।** क्षित्यादावपीत्यर्थः ॥

उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेव हेतुमाह — **त्वयेत्यादिना। क्षितिजनकादृष्टेति।** हविरादिगोचरजीवकृतेरेवेत्यर्थः। **अदृष्टस्य यज्ञा-**

---

[1] न इति अत्रास्ति—**मु.** तत् इत्यधिकं—**छ.** [2] यत्किंचिद्गो—**ग-कुं.**

जनककृतेरेवेह विशेषकारणत्वात् ॥

न च कपालगोचरकृतिव्यतिरेकेण घटव्यतिरेक इव क्षित्युपादानगोचरकृतिव्यतिरेकेण क्षितिव्यतिरेको दृष्टः । येन सापि हेतुः स्यात् ।

दिसत्कर्मजन्यत्वात् ॥

नन्वेवं घटादावपि तज्जनकादृष्टजनककृतेरेव हेतुत्वमस्तु । न तु कपालगोचरकृतेरविशेषादित्यत आह—**न चेति । येन सापीति ।** क्षितिजनकादृष्टजनकहविरादिगोचरजीवकृतिव्यतिरेकेण क्षित्यादिव्यतिरेकस्तु " कार्यमात्रेऽदृष्टं हेतुः " इति वदतस्तवापि संमत इति तादृशकृतिस्तु स्यादेव हेतुरिति भावः । उक्तं च सुधायाम् " अदृष्टवतां जीवात्मनामेव कर्तृत्वोपपत्तेः " इति शास्त्रयोनिसूत्रे ॥

नन्वेवं नेदं सकर्तृकत्वं तथात्वे भोजकादृष्टद्वारा भोक्तृकृतिजन्ये घटादौ भोक्तृकर्तृकत्व व्यवहारापत्तेः । उक्तं च मणौ " अत एव घटभोक्ता न तत्कर्ता व्यवह्रियत इति " इति चेन्न । अदृष्टद्वारकघटाद्युपादानगोचरापरोक्षज्ञानाचिकीर्षाकृतिमतोपि तदनुकूलाङ्गचेष्टाहीनस्य कर्तृत्वाव्यवहारात् तदनुकूलचेष्टावत्येव तद्व्यवहारात् त्वदुक्तचेष्टानिरपेक्षकृतिमज्जन्यत्वेपि सकर्तृकत्वव्यवहारानापत्त्या सकर्तृकत्वविवादापरिहारेणार्थान्तरतापत्तेः । शरीरचेष्टादिहीनेपि क्षित्यादिकर्तरि कर्तृत्वं पारिभाषिकं चेत् अदृष्टद्वारा क्षित्यादिजनककृतिमत्यपि कर्तृत्वं पारिभाषिकमेवास्त्विति भावः ॥

ननु घटादावुपादान[1]व्यतिरेकेण घटादिव्यतिरेकदृष्ट्या तादृश-

---

[1] कृतिपदं नास्ति-कुं.

घटादौ दर्शनमात्रेण तत्कल्पने च त्वदुक्तचेष्टा-निरपेक्षकृतिविपरीता चेष्टाद्वारककृतिरेव कल्प्या स्यात् ॥

एवं च कृतेः कारणतावच्छेदककृतित्वेनैव जनकता साध्यते[1] चेदस्मदादिकृत्या सिद्धसाधनम् । तन्निवृत्यर्थं स्वजन्येत्यादिविशेषणोपादानेऽप्रयोजकता । तेन रूपेण कृतेरकारणत्वात् ॥

कृतिमति कुलाले मुख्यकर्तृत्वोपपत्तेरिहापि क्षित्याद्युपादानकृतिमान् मुख्य एव कर्ता स्यादित्यत आह—**घटादाविति** । न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यार्थानुवादो—**घटादौ दर्शनमात्रेण तत्कल्पने चेति** । स्वोपादानगोचरकृतिकल्पने चेत्यर्थः । क्षित्यादाविति योज्यम् । उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवापाद्यमाह—**त्वदुक्तेति** । **चेष्टाद्वारककृतिरेवेति** ॥

ननूक्तमत्र घटादौ कार्यविशेषे चेष्टाद्वारककृतिदृष्टावपि यत्सामान्यविशेषन्यायेन कार्यसामान्ये कृतित्वेन हेतुत्वादिति चेन्न । क्लृप्तया क्षितिजनकादृष्टजनककृत्यैवोपपत्तावक्लृप्तकृतिकल्पनस्यैव बाधकत्वेन बाधकाभाव इत्यस्यासिद्धेरिति भावः ॥

छलोत्तरत्वनिरासायानुमानदोषं निष्कृष्याह—**एवं चेति** । दर्शनमात्रस्यातिप्रसङ्गकत्वे सतीत्यर्थः—**अकारणत्वादिति** । घटादौ-दर्शनमात्रस्य शरीरचेष्टाद्यतिप्रसङ्गकत्वात् यत्सामान्यविशेषन्यायस्या[2] क्लृप्तानेकादृष्टकल्पनाप्रसङ्गबाधितत्वेनाग्रे दूष्यत्वेन चानवतारादि भावः ॥

---

[1] ध्याचेत्–कुं. [2] स्यक्ल–कुं.

किंचोपादानशब्दो यदि यत्किंचिदुपादानपरस्तदा शब्दफूत्कारादौ सिद्धसाधनम्। तस्यापि यत्किंचित्प्रत्युपादानभूतमृदङ्गादिगोचरास्मदादिनिष्ठज्ञानादिजन्यत्वात्। यदि तु सर्वलोकसिद्धव्युत्पत्त्यनुसारेण समभिव्याहृतपरस्तदोपादानशब्दार्थीभूतसमवायिकारणे लाघवात्समवायिका[1]रणभा-

---

नन्वस्तु तर्हि उपादानागोचरेत्याद्येव साध्यमित्यतः "कार्य सामान्यं हि कारणसामन्यायत्तम्" इति टीकां हृदि कृत्वा पराभिमतसाध्यं निराह—**किंचोपादानेत्यादिना। सिद्धेति।** अंशतःसिद्धसाधनमित्यर्थः॥

न च तत्र ज्ञानेच्छयोर्न कारणत्वम्। किं तु कृतिमात्रस्यैव मिलितानां तेषां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यम्। ज्ञानादिघटितं साध्यत्रयमेवेदमिति मणिकृदभिमतत्वेनोक्तदोषापरिहारात्॥

यदत्रोक्तं ठक्कुरादावुपादानगोचरत्वेन यस्य ज्ञानादेर्जनकत्वं तादृशज्ञानादिजन्यत्वं साध्यम्। तेन च रूपेण स्वविषयसमवेतकार्यप्रत्येव जनकत्वान्न दोषः। स्वजन्या[2] दृष्टेत्यादिविशेषणं तु का[3]लीरूपेऽशतःसिद्धसाधनवारणायेति। तन्न। वक्ष्यमाणदिशा लाघवेन कारणगोचरज्ञानादित्वेन जनकतयोक्तरूपेण जनकत्वस्य क्वाप्यकल्पनात्॥

यत्किञ्चिदिति। स्वगतरूपादिकं प्रतीत्यर्थः। मृदङ्गादीत्यादिपदेन ताल्वादिग्रहः—**उपादानशब्दार्थीभूतेत्यादि।** वेदान्तिमत इव परिणामिकारणानङ्गीकारात्समवायिकारणेत्युक्तम्। स्वोक्तदोषं

---

[1] कारणपदं नास्ति—**च. क. ख. ग.** [2] न्येत्यादि—**कुं.** [3] र्यरू—**मु.**

गत्यागेन क्षित्यादिकं प्रति त्वदुक्तविपरीतक्षित्यादिकारणगोचरकृतित्वेनैव कारणत्वग्रहात्तथाभूतकरणसाधनेपि सिद्धसाधनमेव । क्षितिजनकादृष्टजनकज्ञानादेरदृष्टद्वारा क्षितिजनकहविरादिविषयत्वात् । न च हविरादि क्षितिं प्रति प्रयोजकमेव न तु कारणमिति वाच्यम् । तत्रा[1]पि कारणशरीरप्रविष्टानन्यथासिद्धभागत्यागेन त्वदुक्तविपरीतनियतपूर्ववर्त्ति[2]रूपप्रयोजकगोचरकृतित्वेनैव हे-

---

मूलारूढं दर्शयितु न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यस्य क्षित्याद्युपादानगोचरज्ञानादित्वेन तज्जन्यत्वसिद्धिर्न चेत्यर्थमुपेत्योत्तरवाक्यस्थ विपर्यशब्दार्थमाह— **त्वदुक्तेति । कारणत्वग्रहादिति ।** घटादौ लाघवेन घटादिकारणगोचरकृतित्वेनैव कारणताग्रहात् क्षित्यादावपि तथैव कारणत्वकल्पनादित्यर्थः ॥

अस्तु तथैवोपादानपदं कारणमात्रपरम् । तावतापीश्वरसिद्धे[3]रित्यत आह—**तथाभूतेति ।** क्षित्यादिकारणगोचरकृतित्वेन रूपेण कृतिरूपकारणसाधने[4] चेत्यर्थः । उक्तरूपज्ञानवज्जन्यं चिकीर्षावज्जन्यमित्यत्राप्येवं दोषो ध्येय इति भावेन कृतिमात्रस्य प्राग्व्यवहारेपि ज्ञानादेरित्युक्तम् । न चैतदर्थमेव स्वजन्यादृष्टेत्यादि विशेषणमुक्तमिति वाच्यम् । तत्पक्षेऽप्रयोजकत्वदोषस्य हेतावुक्तत्वादिति भावः— **प्रयोजकमेवेति ।** घटे कुलालपितृवदिति भावः । मूलारूढतामप्रदर्शनाय त्वदुक्तविपरीतेत्युक्तिः । एवमग्रेपि—**प्रयोजकगोचरेति ।** त्वदुक्तेत्यर्थः ॥

---

[1] था—**ग-कुं.** [2] वृत्ति—**छ-ख-कुं.** [3] द्धि—**अ.** [4] नेपी—**मु**—'च' इति नास्ति—**अ.**

तुत्वेऽतिलाघवात् । यच्चोक्तं विशेषयोरन्वयव्यतिरेकेण वा कारणत्वेन वा सामान्ययोरपि कारणत्वमिति । तत्र न तावदाद्यः । अन्वयव्यतिरेकयोस्त्वदुक्तविपरीते स्वसमानप्रकारककार्यकारणभावग्रह एव सामर्थ्यस्य क्लृप्तत्वात् । अधिक[1] सामर्थ्यकल्पनायां च बीजाभावात् । नापि द्वितीयः

ननु यदुक्तं क्षित्याद्युपादानगोचरकृतिव्यतिरेकेण क्षितिव्यतिरेको न दृष्टः । येन सा पि हेतुरिति । तन्न । विशेषयोरन्वयादिदृष्ट्या सामान्ययोरपि तत्कल्पनादित्यत आह—**यच्चोक्तमिति** । नन्विदमित्यप्रयोजकमित्यादिशङ्कोत्तररूपपूर्वग्रन्थ इत्यर्थः—**त्वदुक्तविपरीत इति** । घटकुलालकृत्योरन्वयादिना कार्यसामान्यकृतिसामान्ययोः कार्यकारणभाव इति यत्त्वदुक्तं तद्विपरीते घटत्वकुलालकृतित्वरूपान्वयव्यतिरेकप्रकारसमानप्रकारककार्यकारणभाव एव सामर्थ्यमित्यस्य दण्डघटादौ निर्णीतत्वादित्यर्थः ॥

बीजेति । ननु बाधकाभाव एव बीजमिति चेन्न । तादृशसामर्थ्यकल्पनायामनेकादृष्टकल्पनस्यैव बाधकत्वात् । घटादावदृष्टस्य हस्तचेष्टानिरपेक्षकृतिजन्यत्वनित्यसर्वविषयज्ञानादिजन्यत्वादेरनेकस्य कल्प्यत्वात् । क्लृप्तसामर्थ्यमात्रस्वीकारे तु लाघवात् । अन्यथा तन्तुरूपपटरूपयोरन्वयव्यतिरेकाभ्यां कार्यगतरूपसामान्यं प्रति कारणगतरूपसामान्यं कार्यगतगुणमात्रं प्रति कारणगतगुणमात्रं कारणमिति वा कल्यं स्यात् । [2] तत्र यद्यद्बाधकमुपनिपतति तत्सर्वमपि तदनुगुणप्रक्रियाकल्पनया परिहार्यं स्यादिति भावः ॥

---

[1] केसा-**छ-कुं.** [2] 'तत्र' इति एकमेव वर्तते-**मु-अ.**

विमते सामान्ये कार्यकारणभावापन्ने बाधकं विना कार्यकारणभावापन्नविशेषसंबन्धित्वात्। धूमवह्नि-सामान्यवदित्यत्र व्यतिरेकावच्छेदकरूपवत्त्वस्यै[1]वोपाधित्वात्। न च साधनव्यापकता। त्वत्पक्षे कृतित्वस्य देशतः कालतश्च व्यतिरेकरहितेश्वरकृति-

---

सामान्ये इति द्विवचनान्तम्। कार्यसामान्यकृतिसामान्ये इत्यर्थः—**बाधकं विनेति**। सामान्ये व्यभिचाररूपबाधकं विनेत्यर्थः। यद्धर्मवत्त्वेनोपस्थितयोः[2] विशेषयोः कार्यकारणभावस्तद्धर्मावच्छिन्नत्वं तत्संबन्धित्वं ध्येयम्। घटकुलालयोः कार्यकारणभावे कार्यसामान्यपुरुषसामान्ययोः प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्वादिकल्पनेऽपि वाक्यसामान्यवक्तृज्ञानसामान्ययोश्च तदभावाद्व्यभिचारवारणाय बाधकं विनेति—**व्यतिरेकेति**। अत्र रूपशब्दो धर्मपरः। धूमसामान्यवह्निसामान्ययोः कार्यकारणभावो हि न तादृशधूमविशेषवह्निविशेषसंबन्धित्वनिबन्धनोऽपितु यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकं प्रत्यवच्छेदक[3]भूतवह्नित्वधूमत्वान्यधर्मवत्त्वनिमित्त एव। कार्यकारणभावापन्नघटदण्डादिस्थले सर्वत्र तथा दर्शनेन[4] साध्यव्यापकत्वं व्यक्तमिति साधनाव्यापकत्वं व्यनक्ति[4]—**न चेत्यादिना**॥

व्यतिरेकावच्छेदकरूपवत्त्वस्यैव कारणतायां तन्त्रत्वे शब्दसमवायिकारणतयाऽऽकाशसिद्धिर्न स्यात्। [5]तथा ज्ञानादिसमवायिकारणत्वेन आत्मसिद्धिश्च न स्यात्[5]। परत्वापरत्वकारणतया देशकालसिद्धश्च न

---

[1] एवकारो नास्ति-**च-छ-क-ख** [2] विशेषयोरिति नास्ति-**कुं.** [3] भूतपदं नास्ति-**अ.** [4] 'नात्। साध्यव्यापकत्वं व्यनक्ति' इत्यस्ति-**कुं.** [5] इयं पङ्क्तिर्नास्ति-**अ.**

वृत्तित्वेन व्यतिरेकानवच्छेदकत्वात्। न चैवमाकाशाद्यसिद्धिः। साक्षिणैव तत्सिद्धेः। शब्दादिकारणत्वेन तदसिद्धावपि गुणस्य समवेतत्वव्याप्त्या शब्दसमवायित्वेनैव तत्सिद्धेश्च। निमित्त-

स्यात्। तेषां नित्यविभुत्वेन व्यतिरेकावच्छेदकरूपवत्त्वाभावादित्याशङ्क्य निराह—**न चैवमिति। साक्षिणैवेति।** आत्मस्वरूपज्ञानरूपेण साक्षिणैवेत्यर्थः। शब्दज्ञानविधुरजातिबधिरादेरप्याकाशप्रतीत्या शब्दकारणतयैवाकाशधीरिति नियमाभावात्साक्षिणैवेत्युक्तम्॥

विवृतं चैतत्।

"सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम्।"

इत्याद्यानुमानिकपादीयानुव्याख्यानसुधयोर्वादावल्याञ्चेति भावः॥

किंच "द्र[1]व्यकारणत्ववत् समवायिकारणत्वं विशिष्टं न ग्राह्यं किंतु समवायित्वसमानाधिकरणं कारणत्वमेव समवायिकारणत्वम्। तथा च "उभयग्राहकसमाजादुभयग्रहे [2]अर्थसमाज" इति पक्षधराद्युक्तेः केवलसमवायित्वग्राहकोपनिपातेन तन्मात्रस्यापि ग्रहणसम्भवादिति भावेन साक्षिणि विप्रतिपन्नं प्रत्यन्यथाप्याकाशसिद्धिमाह—**शब्देति। समवायित्वेनेति।** समवायवृत्त्या शब्दाश्रयत्वेनेत्यर्थः। शब्दः क्वचिदाश्रितः गुणत्वादिति सामान्यतस्तदाश्रयसिद्धौ [3]शब्दोष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यवृत्तित्वे बाधकोपपत्तत्वे सत्याश्रितत्वादिति सामान्यपरिशेषाभ्यां शब्दादिसमवायित्वेनैव सिद्धिसम्भवादिति[4] भावः॥

समवायिकारणत्वं विशिष्टमेव ग्राह्यमिति मतेपि तेन [5]रूपेणाकाशसिद्धिप्रकारं मण्युक्तमेव दर्शयति—**निमित्तेति।** आदिपदेन

[1] 'व्ये सम' इत्येव वर्तते-कुं. [2] वार्थः समा-मु. नार्थः समा-अ. [3] शब्दपदं न-कं. [4] त्यर्थः-अ. [5] 'स्व' इत्यधिकं-कं.

कारणत्वादिग्रहे यत्र यदा न दंडस्तत्र तदा न घट इति संसर्गाभावरूपस्य व्यतिरेकस्य तन्त्रत्वेपि समवायिकारणत्वग्रहे यन्न समवायिकारणं तत्र न कार्यमित्यन्योन्याभावरूपव्यतिरेकस्यैव तन्त्रत्वेन शब्दसमवायिकारणत्वेनापि तत्सिद्धिसम्भवाच्च। न च समवायिभिन्न इव त्वन्मते कृतिविषयाभिन्नः प्रसिद्धः। येन कृतेरप्यन्योन्याभावरूपव्यतिरेकेण कारणता गृह्येत। सर्वस्यापीश्वरकृतिविषयत्वात्। पारिमांडल्यस्यापि स्वनिष्ठघटाभावसाक्षात्कारं प्रति संयुक्तसमवेतविशेषणतारूपप्रत्यास[1]त्त्यन्तर्भूततया हेतुत्वेनेश्वरकृतिविषयत्वात्। न

व्याप्यसमवायिकारणत्वग्रहः—**संसर्गाभावरूपस्येति**। निमित्तकारणकार्ययोगश्रयाश्रयिभावाभावात् संसर्गाभावस्य तन्त्रत्वमिति भावः॥

नन्वेवं चेदीश्वरकृतिसिद्धिरप्येवमस्तु। यन्न कृतिविषयः न तत्र कार्यमित्यन्योन्याभावरूपव्यतिरेकेणैव कृतिकार्ययोः कार्यकारणत्वग्रहसम्भवेन क्षितिरूपकार्यानुकूलकृतिसिद्धिरित्यत आह—**न चेति**। **सर्वस्यापीति**। ईश्वरकृतेः कारणमात्रविषयकत्वात् सर्वस्यापि यत्किंचित्प्रतिकारणत्वादिति भावः॥

नन्वस्त्वात्मकालाकाशादेरपि स्वगतगुणोपादानतयेश्वरकृतिविषयत्वम्। परमाणुपरिमाणस्य पारिमाण्डल्यशब्दितस्य किंचित्प्रत्यक्ष्यकारणत्वात्। तत्र यन्न कृतिविषयो न तत्र कार्यमिति व्यतिरेकग्रहः सुशक इत्यत आह—**पारिमाण्डल्यस्यापीति**। द्व्यणुकगतह्रस्वपरि-

---

[1] त्ति भू–छ-क-ख.

च तत्र घटाभावो न प्रत्यक्षः । अभावप्रत्यक्षत्व-प्रयोजकत्वेन त्वदुक्तस्य योग्यप्रतियोगिकत्वादेस्त-त्रा[1]पि सत्त्वात् । एवं च त्वदुक्तदेशकालापरिच्छिन्न-कृतिजन्यत्वविपरीतपरिच्छिन्नकृतिजन्यत्वेनाप्यनु-मितिः स्यात् ॥

यच्चोक्तमुपादानज्ञानं साक्षात्कारत्वेनैव [2]हेतु-

माणस्याप्युपलक्षणं ध्येयम्—**योग्यप्रतियोगिकत्वादेरिति** । अन्यो-न्याभावप्रत्यक्षे ह्यधिकरणप्रत्यक्षं तन्त्रम् । न त्वभावप्रत्यक्षमात्रे । अभावप्रत्यक्षे हि प्रतियोगियोग्यत्वं वा यत्र यत्सत्त्वमनुपलब्धविरोधी-त्युक्तदिशा प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपमनुपलब्धे-र्योग्यत्वं वा तन्त्रम् । तच्च पारिमांडल्यादावभावग्रहेप्यस्तीति स्यादेवा-भावः प्रत्यक्ष इत्यर्थः ॥

न द्वितीय इत्यादिनोक्तं दोषं "विपर्ययेणाप्यनुमातुं शक्य-त्वात्" इति मूलारूढं कुर्वन्नेव निष्कृष्य दर्शयति—**एवं चेति** । बाधकाभावेन व्यतिरेकावच्छेदकरूपवत्त्वस्य कारणत्वे तन्त्रत्वे सती-त्यर्थ—**परिच्छिन्नेति** । असर्वविषयानित्येत्यर्थः । तथाच कार्यत्वहेतुर-प्रयोजक इति भावः ॥

एवं पराभिमतकृतिजन्यत्वांशे कार्यत्वहेतोरप्रयोजकत्वमुक्त्वा अप-रोक्षज्ञानजन्यत्वांशेप्यप्रयोजकत्वमिति भावेन कृतेरपरोक्षज्ञानपूर्वकत्वं प्रागुक्तं निराह—**यच्चोक्तमित्यादि । हेतुरिति** । कपालादिकृता-वित्यर्थः । तथाच क्षित्यादिनिष्ठकार्यत्वहेतोर्व्यापकतया क्षित्यादिजनक-

---

[1] अपिपदं नास्ति—**ग-कुं.** [2] 'कृति' इत्यधिकं—**छ-क-ख-ग.**

रिति [1]तदपि न । त्वन्मते चेष्टोपादानस्य वायवीयशरीरस्याप्रत्यक्षत्वेपि तदधिष्टातुरात्मनश्चेष्टाहेतुकृतेरावश्यकत्वेन त्वदुक्तापरोक्षज्ञानत्वविपरीतेन ज्ञानत्वेनैव कृतिहेतुत्वात् । परमाण्वादिपरोक्षज्ञानेन कृत्यभावस्तु न साक्षात्त्वविरहात् । किं तु कृतियोग्यताप्रयोजकदेशकालविशेषसत्त्वविषयकत्वविरहात् । अत एवान्धस्याप्तवाक्यादिना देशकालविशेषहेयोपादेयज्ञाने सति हानोपादाने युक्ते । यच्च कपालदृष्टान्तेन कारणीभूतसंयोगाश्रयत्वेनात्मनः

मपीश्वरज्ञानमपरोक्षमेव सिद्ध्यतीति यदुक्तमित्यर्थः—**त्वन्मते चेष्टेत्यादि** । वायवीयशरीरादावुपादानापरोक्षज्ञानाभावेपि चेष्टाहेतुतया कृतिसत्त्वेनापरोक्षत्वस्य कृतौ व्यभिचारादिति भावः ॥

तर्हि परमाण्वाकाशादिगोचरलिङ्गादिजन्यज्ञानेनापि तद्गोचरकृतिः स्यादित्यत आह—**परमाण्वादीति । देशेति** । कपालादेरिव देशविशेषे कालविशेषे सत्त्वाभावादित्यर्थः । परमाणोर्नित्यत्वेन कालविशेषसत्त्वं नास्ति गगनादौ तु देशविशेषसत्त्वं नेति न तत्र कृतिरिति भावः—**अत एवेति** । ज्ञानत्वेनैव कृतिहेतुत्वादेवेत्यर्थः—**हेयेति** । तत्र सर्पोस्ति अत्र रजतमस्तीति ज्ञाने सतीत्यर्थः ॥

नन्वस्त्वपरोक्षज्ञानवत्त्वसिद्ध्यभावस्तथापि कुलालवत्कार्यहेतुतया स्यादेवेश्वरसिद्धिः । कुलाले घटहेतुत्वस्य प्रागेव साधनादित्यतः प्रागुक्तं दृष्टान्ते साध्यवैकल्योद्धारमनूद्य निराह—**यच्चेति** । घटकारणीभूत-

---

[1] तन्न-**ग.**

कारणत्वसाधनं[1] तन्न । कपालादेः कारणत्वे त्वदुक्त विपरीतस्य लघुनः कार्याश्रयत्वस्यैव तन्त्रत्वात् ।

संयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनादितिग्रन्थेनोक्तमित्यर्थः—**लघुन इति** । कार्यासमवायिकारणसंयोगाश्रयत्वापेक्षया कार्याश्रयत्वस्य लघुत्वात् । तथा चात्मनस्तदभावापन्न घटहेतुत्वमिति दृष्टान्तः साध्यविकल एवेति भावः । न च भूतलादेरपि घटकारणत्वप्रसङ्गः । समवायवृत्त्या तदाश्रयत्वस्याभिमतत्वात् ॥

एतच्चाभ्युपेत्योक्तम् । वस्तुतस्तु समवायस्याग्रे निरसिष्यमाणतया ॥

" तन्तुभ्योन्यः पटः साक्षात्कस्य दृष्टिपथं गतः "

इति स्मृत्या संयोगविशेषविशिष्टकपालद्वयातिरिक्तघटस्यैवाभावाद्दृष्टान्तासिद्धिः ॥

किं च संयोगस्य हेतुत्वोपगमेपि तदवच्छेदकत्वेनान्यथासिद्धत्वादात्मनो न हेतुत्वम् । न चैवं चेष्टाद्वारा घटहेतुप्रयत्नवदात्मसंयोगावच्छेदकत्वेनात्मनोन्यथासिद्धौ तत एव प्रयत्नस्याहेतुत्वमिति युक्तम् । प्रयत्नस्य स्वतन्त्रान्वयव्यतिरेकाभ्यामेव हेतुत्वेन तस्य तादृशसंयोगविशेषणत्वनिबन्धनत्वाभावात्। प्रयत्नवदात्मसंयोगस्य हेतुत्वे मानाभावाच्च । येन तदाश्रयतयाप्यात्मा हेतुः स्यात् । स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं तु मन्त्रपाठजन्यविषच[2]लने मन्त्ररूपशब्दगुणकाकाशसंयोगासमवायिकारणत्वहीने स्वव्यधिकरणमन्त्ररूपाकाशीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपहेतुमति व्यभिचारि । तथा तुलायामेकदिगवस्थिताधिकगुरुत्वजन्यापरदिगवधितोन्नमनक्रियायां च व्यभि-

[1] तत्र—छ-क-ख. [2] हाने—अ.

यच्चोक्तं ज्ञानमनित्यमेवेत्यादि व्याप्तिरमूलेति तन्न।

चारि। न च तत्रापि साध्यमस्तीति वाच्यम्। विप्रतिपत्तेः। न च क्रमेण स्थळद्वये व्यभिचारवारणायादृष्टाद्वारकेति प्रत्यक्षेति च गुणविशेषणम्। मन्त्रस्त्वाशुतरविनाशित्वाददृष्टद्वारैव विषचलनहेतुः गुरुत्वगुणश्च न प्रत्यक्ष इति वाच्यम्। तथात्वे स्वव्यधिकरणपदवैय्यर्थ्यापत्तेः। प्रत्यक्षपदेनैव प्रागुक्ततत्कृत्यलाभादृष्टवदात्मसंयोगस्य कारणताभङ्गप्रसङ्गाच्च। चेष्टायामात्मकारणत्वप्राप्तावपि घटं प्रत्यात्मनः कारणत्वासिद्धेश्च ॥

एतेन मूर्तवृत्तियत्कार्यं यदीयगुणनिमित्तकारणकं तत्तत्संयोगजन्यमिति व्याप्त्या संयोगकारणत्वसिद्धिः। अत्र शब्दजन्ये गगनसंयोगाजन्ये शब्दगोचरप्रत्यक्षे व्यभिचारनिरासाय मूर्तेति। तन्तुरूपजन्ये तन्तुसंयोगाजन्ये पटरूपे तन्निरासाय निमित्तेति। दण्डावयवीयदण्डनिमित्तके दण्डावयवसंयोगाजन्ये घटे तद्वारणाय गुणेति पदमिति रुचिदत्तोक्तं निरस्तम्। पूर्वोक्तोन्नमनक्रियायां व्यभिचारादित्यलम् ॥

नन्वस्तूपादानगोचरज्ञानं ज्ञानत्वेनैव कृतिहेतुर्न त्वपरोक्षत्वेन। अस्तु च घटादौ कुलालकृत्यादेरेव हेतुतया कुलालस्याहेतुत्वेन तद्दृष्टान्तेश्वरस्य क्षित्यादिहेतुतया सिद्ध्यभावः। तथापि तादृशज्ञानं कार्यत्वहेतोः पक्षधर्मताबलान्नित्यमेव सिध्यतीति तदाश्रयतयेश्वरसिद्धिर्भवतु को दोषः। न च ज्ञानमनित्यमेव साक्षात्कारस्त्विन्द्रियजन्य एव इच्छा ज्ञानजन्यैव कृतिरिच्छाजन्यैवेत्यादिव्याप्तिबाधः। ज्ञानत्वानित्यत्वयोः कार्यकारणभावादेरभावेन व्याप्तेरमूलत्वात्। कार्यकृत्योश्च कार्यकारणभावादित्युक्तत्वादित्यतस्तन्निराह—**यच्चेति**। यथाहि कृतिजन्यत्वमेव प्रयोजकं लाघवात् न तु शरीरजन्यत्वादिकमित्युच्यते तथा आत्मवि-

लाघवेन कृतिजन्यत्वे जन्यत्वस्यै[1]व मनोजन्यत्वे आत्मविशेषगुणत्वस्यैव इन्द्रियजन्यत्वे साक्षात्कारत्वस्यैव ज्ञानजन्यत्वे इच्छात्वस्यैव इच्छाजन्यत्वे-कृतित्वस्यैव तन्त्रत्वेन व्याप्तेः समूलत्वे त्वदुक्तविपरीतस्येश्वरज्ञानाद्यनित्यत्वस्या[2]नुमातुं शक्यत्वात् ॥

न चास्या व्याप्तेरस्मदादिज्ञानादिमात्रविषयकत्वात्कार्यत्वानुमानेन च पक्षधर्मतावलादस्मदादि भिन्नकर्तृसिद्ध्या भिन्नविषयकत्वादप्रतिबन्धकतेति

शेषगुणत्वादिरेव मनःप्रभृतिकारणजन्यत्वे प्रयोजक इति आत्मविशेषगुणत्वस्येश्वरीयज्ञानेच्छाकृतिषु तिसृष्वपि सत्त्वात् । साक्षात्कारत्वेच्छात्वकृतित्वरूपधर्मत्रयस्यापीश्वरीयज्ञानादौ प्रत्येकं सत्त्वेन च मनःप्रभृतिकारणजन्यत्वापत्त्या अनित्यत्वस्य दुर्वारत्वादिति भावः ॥

सङ्ख्यापरिमाणाद्यात्मसामान्यगुणे मनोजन्यत्वाभावाद्विशेषगुणत्व-[3]स्येत्युक्तम् । मनोजन्यत्वं च मनस्त्वेन रूपेण तज्जन्यत्वं ध्येयम् । तेन मनःक्रियायामात्ममनःसंयोगादौ च मनोजन्ये नाव्याप्तिदोषः । एवं ज्ञानजन्यत्व इत्यादावपि ज्ञानत्वादिना तज्जन्यत्वं ध्येयम् ॥

"वयं तु ब्रूमः पक्षधर्मतावलान्नित्यत्वं सिध्यति" इत्यादिना मण्युक्तमेवाशङ्क्य निराह—**न चास्या व्याप्तेरिति** । ज्ञानमनित्यमेव साक्षात्कार इन्द्रियजन्य एव इच्छाज्ञानजन्यैवेत्यादिव्याप्तेरित्यर्थः—**मात्रेति**। पक्षधर्मताबललभ्याप्रसिद्धज्ञानाद्यविषयकत्वादित्यर्थः—[4]**कर्त्रिति**।

---

[1] स्थळचतुष्टयेपि 'एव' इति नास्ति-**ख.** [2] अपि इत्यधिकं-**ख-ग.**
[3] णस्ये-**अ.** [4] कृतीति-**अ.**

वाच्यम् । सामान्यप्रत्यासत्त्यभ्युपगमे समानविषयकत्वात् । तदनभ्युपगमे स्थापनानुमानव्याप्तेरप्रसिद्धकर्तृसाधकत्व इवास्या अपि व्याप्तेस्तद्बा[1]धकत्वे समानप्रकारकत्वस्यैव तन्त्रत्वात् । अन्यथा बाधसत्प्रतिपक्षाव[2]प्यप्रतिबन्धकौ स्याताम् । प्रत्यक्षादिसिद्धाभावप्रतियोगि यच्छैत्यम् तदन्यस्यैव शैत्यादेः पक्षध[3]र्मतावलात्सिद्धिरिति तत्रापि सुवचत्वात् । अदृष्टाद्वारकशरीरजन्यत्वमुपाधिश्च ।

अपरोक्षज्ञानचिकीर्षाकृतिमत्पुरुषसिद्ध्येत्यर्थः ॥

किमेतद्भिन्नविषयत्वं यत्र धूमस्तत्राग्निरिति महानसादौ धूमवह्न्योर्व्याप्तिग्रहः सामान्यप्रत्यासत्त्या पर्वतादिपक्षनिष्ठधूमवह्नी अपि विषयीकरोतीति त्वन्मतरीत्योच्यते, अथ सामान्यप्रत्यासत्तेरभावात् अन्यत्र जायमानव्याप्तिग्रहः पक्षीयहेतुसाध्येनावगाहते तथापि समानप्रकारकत्वमात्रेण पक्षीयहेतुसाध्ययोर्लिङ्गलिङ्गिभावे नियामक इति मीमांसकरीत्योच्यत, इति विकल्पौ हृदि कृत्वा क्रमेण निराह—**सामान्येति। समानेति ।** कार्यत्वकृतिजन्यत्वरूपसमानप्रकारकत्व[4]स्यच ज्ञानत्वानित्यत्वरूपसमानप्रकारकत्व[5]स्यचे[4]त्यर्थः—**अन्यथेति ।** उक्तव्याप्तेरबाधकत्व इत्यर्थः ॥

बाधादेरप्रतिबन्धकत्वं व्यनक्ति—**प्रत्यक्षेति ।** वह्निः शीतो वस्तुत्वादित्यादौ यत्पक्षधर्मताबललभ्यं शैत्य तदन्यस्यैव शैत्यस्याभावः पक्षीभूतवह्नि[6]यति रिक्ते गृहीत इति पक्षीभूतवह्नावेव वा यदि शैत्याभावो

---

[1] द्वन्ध—**ख.** [2] 'अपि' इति नास्ति—**ख.** [3] धर्मपदं न—**ख.** [4] एतावन्नास्ति—**अ.** स्यैव—**कुं.** [5] स्येव ज्ञानत्वानित्यत्वरूपसमानप्रकारकत्वस्यैवेत्यर्थः—**कुं.** [6] रेके—**अ.**

न चायं पक्षमात्रव्यावर्तकविशेषणवत्त्वात्साधन-घटितत्वाद्व्याप्तिग्राहकतौल्येन हेतुसमानयोगक्षेम-त्वाच्चानुपाधिरिति वाच्यम्। शरीरजन्यत्वे त्वदभि-

---

गृहीतः तदापि त्वगिन्द्रियगृहीताभावप्रतियोगिशैत्यादन्यदेवे[1] दं साध्यमानं शैत्यमिति वक्तुं शक्यत्वादित्यर्थः ॥

एवं कार्यत्वानुमानेऽसिद्ध्यप्रयोजकत्वबाधानुक्तोपाधि[2] श्चाह—**अदृष्टेति**। क्षित्यादेरदृष्टद्वाराऽस्मदादिशरीरजन्यत्वात्साधनाव्यापकत्वाया-दृष्टाद्वारकेति शरीरेति च विशेषणम्। घटादौ साध्यव्यापकत्वं व्यक्तम् ॥

उपाध्याभासोयमित्याशङ्क्य निराह—**न चायं पक्षमात्रेति**। तादृशस्याप्युपाधित्वे पर्वतेतरत्वादेरप्युपाधितापत्त्याऽनुमानमात्रोच्छेद इति भावः—**साधनेति**। कार्यत्वापरपर्याय जन्यत्वघटितत्वादित्यर्थः। तादृशस्याप्युपाधित्वेऽतिप्रसङ्गादिति भावः ॥

यद्यपि समवेतत्वे सति जन्यत्वं साधनं न तु जन्यत्वमात्रम्। तथापि साधनविशेषितवत्साधनैकदेशविशेषितोपि नोपाधिरिनि भावेनेदं योज्यम्। यद्वा ध्वंससाधारणपक्षत्वे जन्यत्वमेव हेतुरिति तदभिप्रायमेतत् ॥

व्याप्तिग्राहकेति। यत्र सकर्तृकत्वं तत्र शरीरजन्यत्वमिति व्याप्तिग्राहकं भूयःसहचारदर्शनादिकं यत्र जन्यत्वं तत्र सकतृकत्वमिति व्याप्तिग्रहेपि तुल्यमिति[3] व्याप्तिग्राहकतौल्येनेत्यर्थः। तथाच साध्यव्यापकत्वानिश्चयान्नोपाधिरिति भावः ॥

[4] शङ्काग्रन्थमण्युक्तमेव समाधिमाह—**शरीरजन्यत्व इत्यादिना दर्शनादित्यन्तेन**। अननुगतत्वेनेत्यनन्तरं अनवच्छेदकत्वादिति शेषः।

---

[1] 'इदं' इति नास्ति-**अ.** [2] च इति नास्ति-**अ.** [3] त्यर्थ.-व्याप्ति-**अ.**
[4] ३३३ पृष्ठे, "**हेतुसमानयोगक्षेमस्येती**" त्यारभ्य 'सिद्धयतीति भावः' इत्यन्तं अत्रास्ति-**मु.**

मतघटत्वादेरननुगतत्वेन तद्विपरीतस्य[1] कर्तृजन्यत्व-स्यैवावच्छेदकत्वेन साध्यव्यापकत्वात्। सति च साध्यव्यापकत्वे बाधोन्नीतस्य पक्षेतरत्वस्य वह्निनाधूमसाधन आद्रेन्धनप्रभववह्निमत्त्वरूपस्य साधनघटितस्य जलस्य रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वरूपस्य हेतुसमानयोगक्षेमस्य चोपाधितादर्शनात्। न च कर्तृजन्यत्वे लाघवेन जन्यत्वस्यैवावच्छेदकत्वाद्धेतो-

---

मूलारूढतामिव्यक्त्यर्थं तद्विपरीतेत्युक्तम्। **साध्येति**। सकर्तृकत्व-रूपसाध्येत्यर्थः। **पक्षेतरत्वस्येति**। तेजोऽनुष्णं पदार्थत्वादित्यत्रातेजस्त्वस्येत्यर्थः। तत्र बाधस्थले इवेहापि पक्षभूतक्षित्यादितः शरीरजन्यत्व[2]रूपोपाधेर्व्यावृत्त्या तद्व्याप्यसाध्या[3]भावस्यापि निर्णयादिति भावः॥

वह्निनेत्यादि। ननु तत्र धूमवत्त्वे वह्निमत्त्वमात्रमप्रयोजकम्। अनुकूलतर्काभावात्। साधनघटितोपि स्यादुपाधिरिति चेत्तुल्यं प्रकृतेपि त्वदभि[4]प्रेतसकर्तृकत्वे कार्यत्वहेतोरप्रयोजकत्वस्य प्रागुपपादनादितिभावः॥

हेतुसमानयोगक्षेमस्येति। रसवत्त्वस्य गन्धवत्त्वेन व्याप्तिः पृथिवीत्वोपहिते ग्राह्या। नत्वन्यत्र। सा च तत्र येन मानेन ग्राह्या तेनैव च गन्धवत्त्वपृथिवीत्वयोरपि सिद्ध्यतीति भावः। "लाघवेन बाधकं विना कर्तृजन्यत्वे हि जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात्। तथाच न शरीरजन्यत्वं सकर्तृक[5]त्वव्यापकम्। घटादौ त्वार्थःसमाजः। घटत्वेन शरीरजन्यत्वनियमात्" इत्यादिना मण्युक्तमाशङ्क्य निराह। **न च कर्त्रिति**। **हेतोरिति**। जन्यत्व हेतोरित्यर्थः। ध्वंससाधारणपक्षत्वपक्षे

---

[1] समस्तं पदं-कुं-ग-छ. [2] रूपपदं नास्ति-अ. [3] ध्यस्याप्यभावनिर्ण-अ. ध्यव्याप्यभावनि-मु. [4] मते-अ-मु. [5] त्वे-अ.

व्याप्ति निश्चये साध्यव्याप्यहेत्वव्यापकत्वादुपाधेः साध्याव्यापकतेति वाच्यम् । त्वदुक्तरीत्या कर्तृजन्यत्वे जन्यत्वमदच्छेदकं शरीरजन्यत्वे तु घटत्वादिकं वा अथवा तद्विपर्ययेण शरीरजन्यत्वे [1]जन्यत्वं कर्तृजन्यत्वे तु घटत्वादिकं [2]वेति सन्देहेन सन्दिग्धोपाधेर्दुष्परिहरत्वात् ॥

न च कर्तृजन्यत्वं प्रथमं ज्ञातं सच्छरीरजन्यतावच्छेदकत्वेन कल्प्यम् । तच्च कार्यत्वावच्छिन्नमेव ज्ञातमित्युपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमिति वाच्यम् । त्वदुक्त[3]रीत्या शरीरजन्यत्ववत्तद्विपरीतकर्तृजन्यत्वस्यापि प्र-

---

जन्यत्वस्यैव हेतुत्वादिति भावः ॥

प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वे न सकर्तृकत्वमवच्छेदकं अत एव न सन्दिग्धोपाधित्वमित्यादिमण्युक्तमाशङ्क्य निराह—**न च कर्तृजन्यत्वमिति । तच्चेति ।** कर्तृजन्यत्वमित्यर्थः । कर्तृजन्यत्वे लाघवेन जन्यत्वस्यैवावच्छेदकत्वात् । कार्यत्वावच्छिन्नं कार्यत्वव्यापकम् । कर्तृजन्यत्वं शरीरजन्यतावच्छेदकं न सम्भवति । तस्य कार्यत्वरूपहे[4]त्वव्यापकत्वात् । शरीरजन्यत्वं [5] सकर्तृकत्वव्याप्यकार्यत्वाव्यापकं [6] सकर्तृकत्वव्यापकं [7] चेत्यस्यायोगात् । अत उपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमित्यर्थः—**शरीरजन्यत्ववदिति ।** शरीरजन्यत्वं घटत्वादि-

---

[1] कर्तृपदमाधिकं–कुं-छ. [2] चेति–च. [3] रीत्या–इतिनास्ति-मु-च-क-ख-रा. [4] तुव्या–अ. [5] त्वस–अ. [6] कस–अ. [7] कत्वेचे–अ.

थमं घटत्वाद्यवच्छेदेनैव ज्ञानसम्भवात् ॥

किंच कृतिकार्ययोः कार्यकारणभावग्रहेपि न

नाऽवच्छिद्यते यत्र घटत्वादिकं तत्र शरीरजन्यत्वमिति कर्तृजन्यत्वं तु कार्यत्वेन यत्र कार्यं तत्र कर्तृजन्यत्वमिति एतच्च प्रथमं ज्ञायत इति यथा त्वयोच्यते, तथैव कर्तृजन्यत्वं घटत्वादिनैवावच्छिद्यते यत्र घटत्वादि[1] तत्र कर्तृजन्यत्वमिति प्रथमं चास्य ज्ञानं सम्भवत्येव । ग्राहकसत्त्वात् । तथा च कर्तृजन्यत्वं घटत्वादिनावच्छिन्नतया प्रथमं ज्ञातमिति तद्विरोधान्न कार्यत्वावच्छिन्नत्वेन पश्चाज्ज्ञातुं शक्यमिति कार्यत्वस्येव कर्तृजन्यत्वाव्याप्यत्वात्तेन कथं त्वदभिमतसकर्तृकत्वानुमानम् । प्रत्युत शरीरजन्यत्वावच्छेदकत्वेनैव कार्यत्वस्यावगमात्तेन तदनुमानमेव स्यादित्यर्थः ॥

ननु यत्सामान्यविशेषन्यायेन कृतित्वकार्यत्वयोरवच्छेद्यावच्छेदकभावग्रहे सति कृतिजन्यत्वव्याप्यकार्यत्वा[2]व्यापकत्वात्साध्याव्यापकत्वं शरीरजन्यत्वस्येति चेन्न । प्रागेव यत्सामान्येति न्यायलभ्यपक्षस्य खण्डनात् ॥

अभ्युपेत्यापि कार्यत्वेन कृतिजन्यत्वानुमानम् । ज्ञानचिकीर्षावत्त्वांशे शरीरजन्यत्वमुपाधिर्भवत्येव । न हि कृतित्वकार्यत्वयोरिव ज्ञानत्वकार्यत्वयोरिच्छात्वकार्यत्वयोर्वा व्याप्यव्यापकभावे बीजमस्ति । येन ज्ञानेच्छाजन्यत्वव्याप्यकार्यत्वाव्यापकत्वाच्छरीरजन्यत्वं साध्याव्यापकं स्यादित्यत आह—**किंचेति** । ग्रहेपीत्यस्य ग्रहात्कार्यत्वेन कृति-

---

[1] सकर्तृ-अ. [2] त्वस्या-कुं.

ज्ञानेच्छयोः सिद्धिः। आत्मनः शरीरसम्बन्धे ज्ञानगतकार्यत्वस्येव ज्ञानादिसम्बन्धेपि त्वदुक्तकृतित्वमात्रविपरीतकृतिगतकार्यत्वस्यै[1]व तन्त्रत्वात्। न च [2]कृतिवज्ज्ञानेच्छयोरपि स्वातन्त्र्येण कार्यहेतुत्वात्तत्सिद्धिः। आत्मसंयोगे सत्यपि कृति-

---

सिद्धावपीत्यर्थो ध्येयः—**न ज्ञानेच्छयोः सिद्धिरिति**। तयोःशरीरसंबन्धनिमित्तत्वादीश्वरे च त्वया तदनङ्गीकारादिति भावः॥

ननु कार्यत्वेन कृतिसिद्धावुपेतायां कृतेर्ज्ञानेच्छापूर्वकत्वस्य घटकृत्यादौ दर्शनात्कृत्यानुषङ्गिकतया तयोरपि सिद्धिः स्यादेव। न च शरीरसम्बन्धे तन्त्रयोर्ज्ञानेच्छयोर्भावात्तत्प्रयुक्तशरीरसम्बन्धसिद्धिः। तस्य जन्यज्ञानादिप्रयुक्तत्वादित्यतः तर्हि जन्यकृतावेव ज्ञानेच्छापूर्वकत्वं नत्वजन्यकृताविति कार्यत्वस्य पक्षधर्मताबलान्नित्यकृतिसिद्धया न ज्ञानेच्छयोः सिद्धिरिति भावेनाह—**आत्मन इति**॥

नन्वस्तु कार्यत्वेन कृतेरि[3]व स्वातन्त्र्येण ज्ञानादिसिद्धिः। शरीरजन्यत्वोपाधेः साध्यव्याप्यहेत्वव्यापकत्वेन निराससम्भवादिति भावेनाशङ्क्य निराह—**न चेति**। यद्वा ज्ञानेच्छयोः सिद्धिः किं कृत्यानुषङ्गिकत्वेनोतस्वातन्त्र्येणा[4]थ ज्ञात[5]स्यैव कृतिविषय[6]त्वात्कृतेःस्वतोर्थासम्बद्ध[7]त्वाद्विषयेण सह कृतेः प्रत्यासत्तित्वेन। आद्यस्योत्तरं—**आत्मन इत्यादि**। द्वितीयमाशङ्क्य निराह—**न चेत्यादि**। **आत्मसंयोग इति**। आत्मनो विभुत्वेन त्वन्मते सदा संयोगा[8]दाते भावः। तृतीय-

---

[1] एवकारो नास्ति–छ-कुं-ग. [2] कृतिवदिति नास्ति–ग. [3] रेव-कुं. [4] अथ इति न–अ. [5] न–कुं. [6] वेद्य इत्यधिकं–अ. [7] न्धात्–मु–अ [8] गभावा–अ. संभवा–मु.

व्यतिरेकेणेव कृतौ सत्यां ज्ञानादिव्यतिरेकेण कार्यव्यतिरेकादर्शनात् ॥

न च कृतेर्विषयप्रत्यासत्त्यर्थं ज्ञानापेक्षा कृतिविषययोर्ज्ञानस्यैव[1] प्रत्यासत्तित्वादिति वाच्यम्। कृत्यजनकज्ञानस्य प्रत्यासत्तित्वेऽतिप्रसङ्गात्तज्जनकज्ञानस्य च कृतिकाले नष्टत्वेनाप्रत्यासत्तितया ज्ञाने ज्ञानस्वरूपस्येव कृतावपि कृतिस्वरूपस्यैव प्रत्यासत्तित्वात्। अन्यथा कृतिकाले ज्ञानाभावेन घटं करोमीति घटकृत्योः सम्बन्धधीर्न स्यात्। तस्मात्त्वदुक्तकृत्यादि[2]त्रयाविपरीतकृतिमात्रवत्त्वेनाप्यनुमितिः स्यात् ॥

[3]किंचास्तु कृतिप्रत्यासत्तित्वेन ज्ञानसिद्धिः।

माशङ्क्य निराह—न च कृतेरिति। अतिप्रसङ्गादिति। चैत्रकृतौ मैत्रज्ञानस्यापि तथात्वापत्तेरिति भावः ॥

नन्वस्त्वतिप्रसङ्गभिया जन्यकृतावन्यत्र जनकज्ञानस्य प्रत्यासत्तित्वम्। एवं च ज्ञानस्य कृतिप्रत्यासत्तित्वे क्वचित्सिद्धे सतीहागत्यानीदृशस्याप्यस्तु प्रत्यासत्तित्वमित्यतोन्यत्रापि तन्नास्तीत्याह—तज्जनकेति। अनन्यगत्यास्तु नष्टस्यापि तथात्वमित्यत आह—ज्ञान इति। उक्तं च "न प्रयोजनवत्त्वात्" इत्यधिकरणसुधायाम् ॥

"महातात्पर्ययुक्तेश्च"

इत्येतद्व्याख्यावसरे "प्रयत्नस्य विषयनियमार्थं बुद्धिरेष्टव्येति चेन्न

---

[1] एवकारो नास्ति—रा. [2] त्रितय—कुं-छ-ग. [3] एतावन्नास्ति—क.

इच्छा तु कथं सिद्ध्येत्। तथा च त्वदुक्त[1]त्रितयविपरीतद्वितयवत्त्वेनाप्यनुमितिः स्यात्* ॥

किञ्चोपाधेर्व्यभिचारोन्नायकत्वपक्षे त्वदुक्तसकर्तृकत्वविपरीताकर्तृकत्वस्य शरीराजन्यत्वेनाप्यनुमातुं शक्यत्वात्सत्प्रतिपक्षता। न च कर्त्रजन्यत्वेऽजन्यत्वस्यैव तन्त्रत्वादप्रयोजको हेतुः। [2]शरीरजन्यत्वे कर्तृजन्यत्वं वावच्छेदकं कर्तृज-

---

बुद्धिवत्स्वतोविषयप्रवणतोपपत्तेः इति" [3]इति भावः—**कथं सिध्येदिति**। किं कृत्यानुषङ्गिकत्वेनाथ स्वातन्त्र्येणोत कृतिप्रत्यासत्तित्वेन। न पक्षत्रयमपि सम्भवति। पूर्वोक्तदोषादिति भावः ॥

एवं कार्यत्वहेतोः सोपाधिकत्वमुक्त्वा सत्प्रतिपक्षतां चाह—**किञ्चेत्यादिना**। ननु प्रमाणलक्षणे "स एवोपाधिदोषोपि" इत्युक्तोपाधेः प्रतिपक्षत्वेनैव दोषत्वोपगमात्, प्राचीनन्यायमते तथैवाभ्युपगमाच्चोपाध्युक्तयैव तद्व्यतिरेकरूपप्रतिपक्षस्योक्तत्वात् किंचेति दोषान्तरतयोक्तिरयुक्तेत्यत आह—**व्यभिचारेति**। मणिकृन्मते व्यभिचारोन्नायकत्वोपगमेनोपाध्युक्तया हेतोर्व्यभिचारबुद्धेरेवोदयेन प्रतिपक्षबुद्धेरनुदयादिति भावः—**विपरीतेति**। विमतं क्षित्यादि अकर्तृकं शरीराजन्यत्वाद्गगनवदित्यनुमातुं शक्यत्वादित्यर्थः। अत्र शरीराजन्यत्वमदृष्टाद्वारकशरीरजन्यत्वाभावो ध्येयः। तेनादृष्टद्वाराऽस्मदादिशरीरजन्यत्वादसिद्धिरिति शङ्कानवकाशः—**अप्रयोजक इति**। अकर्तृत्वे अजन्यमात्रस्य प्रयोजकत्वादिति भावः। "सन्देहस्येति प्रतिपक्षतानिर्वाहा-

---

[1] कृत्यादि इत्यधिकं—**कुं-छ-क.** [2] शरीरजन्यत्वं कर्तृजन्यत्वं वा—**क.**
[3] पुनः 'इति' इति—नास्ति-**कुं-अ.**

न्यत्वे कार्यत्वं वेति संदेहस्योपपादितत्वेन स्थापनाहेतुतौल्यात् ॥

अथ मतं आकाशादावजन्यत्वस्यैवाकर्तृकत्वेन व्याप्तिग्रहाच्छरीरविशिष्टे तस्मिंस्तदभावाभ्याप्यत्वासिद्धिः । तथा[1] च विशेषणविशेष्ययोरेकैव व्याप्तिर्व्यासज्यवृत्तिरिति वा, विशिष्टव्याप्तिशब्दार्थः विशेष्यनिष्ठैव व्याप्तिर्विशेषणेनावच्छिद्यत इति वा । तत्र व्यासज्यवृत्तित्वे केवलविशेष्यावृत्तित्वासंभवो हेतुः । विशेषणेनावच्छेद्यत्वे तु विशेष्यतावच्छेदकस्य व्या[2]प्यतावच्छेदकत्वासम्भवः । प्रकृते तु नोभयम् ।

योक्तम् । वस्तुतस्तु कर्तृजन्यत्वे कार्यत्वं नावच्छेदकम् । तेन विनापि तस्योपपत्तेः । अन्यथा कर्मजन्यतावच्छेदकमपि कार्यत्वं स्यादित्यादिना कार्यत्वहेतोरप्रयोजकत्वस्योक्तत्वादिति—**तौल्यादिति** । तथा च नाप्रयोजकत्वमिति भावः ॥

अपि च " शरीर[3]जन्यत्वे व्यर्थविशेषणत्वम् । लाघवेनाजन्यत्वस्यैव व्याप्यत्वा " दित्यादिना मण्याद्युक्तं निष्कृष्यानुवदति—**अथ मत** मित्यादिना **अत्रोच्यते** इत्य[4]न्तेन -- **विशिष्टव्याप्तीति** । विशिष्टहेतुनिष्ठा व्याप्तिरिति शब्दार्थ इत्यर्थः—**तत्रेति** । कल्पद्वय इत्यर्थः—**हेतुरिति** । यथा शब्दो नित्यः भावकार्यत्वादित्यादौ—**विशेषणेनेत्यादि** । यथा कृष्णागरुवह्निमान् सुरभिधूमवत्त्वादित्यादाविति भावः—

---

[1] हि-कुं-छ-ग-रा. [2] प्य-कुं-छ-ग. [3] रा-मु. [4] तिपर्यं-अ.

व्याप्तौ केवलविशेष्यरूपाजन्यत्वनिष्ठतायाः विशेष्यत्वावच्छेदकावच्छिन्नतायाश्च सम्भवात्। न च व्याप्तिवत्पक्षधर्मताया अप्यनुमित्यङ्गत्वात्तात्सिद्ध्यर्थं विशेषणमिति वाच्यम्। व्याप्तिसमानाधिकरणाया एव तस्या अङ्गत्वेनात्रविशेष्यनिष्ठव्याप्तिव्यधिकरणाया विशिष्टवृत्तिपक्षधर्मताया अनङ्गत्वात्॥

न च चक्षुस्तैजसं रूपादिषु पञ्चसु[1] रूपस्यैव ग्राहकद्रव्यत्वात् इत्यादौ विशिष्टवृत्तिपक्षधर्मता विशेष्यवृत्तिव्याप्तेरङ्गं दृष्टमिति वाच्यम्। तत्राप्यवधारणमहिम्ना रूपेतरविशेषगुणाव्यञ्जकत्वे सति रूपग्राहकत्वस्य हेतुत्वेन विशेष्यमात्रस्य मनसि व्यभिचारितया व्याप्तेरपि विशिष्टनिष्ठत्वात्। न चात्राजन्यत्वरूपस्य विशेष्यस्य व्यभिचारोस्ति॥

विशेष्यत्वावच्छेदकेति। अजन्यत्वरूपावच्छेदकेत्यर्थः॥

रूपादिषु पञ्चास्विति स्वरूपकथनं मत्वाह—तत्रापीति॥

ननु रूपस्यैवेत्यादेरेव रूपेतरविशेषगुणेत्याद्यर्थकत्वे रूपादिषु पञ्चास्विति व्यर्थम्[2]। अतो रूपेताव्यञ्जकत्वमेव तदर्थो वाच्यः। तथा च चक्षुषो रूपत्वस्यापि व्यञ्जकतया हेतोरसिद्ध्यापत्त्या तन्निरासकविशेषणविशिष्ट एव पक्षधर्मता व्याप्तिस्तु विशेष्य इत्यरुचेरप्रसिद्धिवार-

---

[1] मध्ये इत्यधिकं—कुं-छ. [2] अत्र "एकविशेषणं विशिष्टावरकधर्मताव्याप्तिस्तु विशेषादित्यरुचेः' इति पाठोस्ति—अ.

यद्वा मनसि व्यभिचारवारकस्यावधारणस्य रूपादिष्विति विशेषणं विनाऽ[1]लब्धात्मकस्य व्यभिचारवारणाशक्त्या विशेषणस्यापि तल्लाभ-संपादनद्वारा व्यभिचारवारणप्रयोज[2]कत्वमेव। अजन्यत्वं तु शरीरविशेषणं विनापि गगनादौ लब्धात्मकम्॥

अथ मत नीलधूमादावपि विशिष्टनिष्ठैव[3] व्याप्तिः। तत्र व्यभिचारोपाध्योरभावात्। अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्यात्। किं तु नीलधूमत्वं न तदवच्छेदकम्। गौरवात्। अपि तु धूमत्वमेव। न च व्यभिचारवारकनै-ल्यविशेषणवत्त्वेनाज्ञात एव व्याप्तिग्रहात्तद्वत्त्वेन ज्ञाते व्याप्तिग्र[4]माविरह इति दाच्यम्। सहचारद-र्शने [5]व्यभिचारादर्शने च सति द्रव्यत्वादिमत्तयाऽ-

---

कत्वेन सार्थक्यं मन्वान आह—**यद्वेति**। **अलब्धात्मकस्येति**। काप्यप्रसिद्धेर्मनःप्रभृते रूपत्वस्यापि ग्राहकत्वादिति भावः॥

"नीलधूमादौ व्याप्तिरस्त्येव। अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्या"दित्यादिना मण्युक्तविशिष्टनिष्ठव्याप्तिपक्षा[6]श-ङ्कामनुवदति—**अथ मतमित्यादिना मैवमित्यन्तेन**। **नील-धूमादावपीति**। तथा च शरीराजन्यत्वेपि विशिष्टहेतौ व्याप्तिरस्त्यें-वेति [7]तत्र व्याप्त्यसिद्धिव्युत्पादनमयुक्तमिति भावः॥

---

[1] नुपल—क. [2] नक—कुं-ग-छ. [3] एवकारो नास्ति—कुं-छ-क. [4] मिति—कुं-च-ग. [5] उपाध्यभावदर्शने—ग [6] क्षश-कुं-क्षाननु-अ. [7] तत्रेतिद्विवारमस्ति—अ.

ज्ञातेपि धूमेऽव्यभिचारादिरूपव्याप्तिग्रहादिति चे न्नैवम् ।

अनुमितिप्रयोजकव्याप्तिविरहो हि व्याप्यत्वासिद्धिः । तत्प्रयोजिका च व्याप्तिः साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्व[1]लक्षणा न त्वव्यभिचाररूपाऽनौपाधिकत्वरूपा वा । गौरवात् । अपदार्थत्वे न अवाक्यार्थत्वेन चोदाहरणवाक्येन तदप्रतीतेश्च । तद्विरहश्च सामानाधिकरण्याभावेन वा यथा निरधिकरणे वस्तुनि, सत्यपि तस्मिंस्तस्य साध्यनिरूपितत्वाविरहाद्वा यथा विरुद्धे, सतोरपितयोर्धर्मस्यावेच्छेदकत्वविरहाद्वा यथेयं पृथिवी द्रव्य-

---

विशिष्टहेतोर्व्याप्तिविरहवादी अवान्तरविशिष्टनिष्ठव्याप्तिपक्षचोद्यं व्याप्तिवादे[2]मणिकृदभिमतव्याप्तिलक्षणमुपेत्य निराह–**मैवमित्यादिना** । **गौरवादिति** । नञ्घटितत्वादिति भावः—**उदाहरणेति** । यो यो धूमवानसावसावग्निमानित्यादिरूपवाक्येन धूमे वह्निरूपसाध्येनैकाधिकरण्यस्य तदवच्छेदकधूम[3]त्ववत्त्वस्य च प्रतीतेरिवाव्यभिचारादेरप्रतीतेरित्यर्थः—**वस्तुनीति** । पर्वतोऽग्निमान् गगनवत्त्वादित्यत्र गगनाख्यवस्तुनीत्यर्थ –**तस्मिन्निति** । सामानाधिकरण्य इत्यर्थः—**विरुद्ध इति** । पर्वतोऽग्निमान् ह्रदत्वादित्यादावित्यर्थः—**द्रव्यत्व इति** । तत्र सामानाधिकरण्यस्य तस्मिन्पृथिवीत्वरूपसाध्यनिरूपितत्वस्य चोभयस्य भावेपि द्रव्यत्वत्वं[4] न पृथिवीत्वसामानाधिकरण्यावच्छेदकम्। द्रव्यत्वस्य पृथिवीत्व-

---

[1] रूपा–ख. [2] द–कुं. [3] मव–कुं. [4] व्यवत्त्वं–कुं.

त्वादित्यत्र द्रव्यत्वे। व्यर्थविशेषणे च नीलधूमादौ सामानाधिकरण्ये तस्य साध्यनिरूपितत्वे च सत्यपि नीलधूमत्वस्य वह्निनिरूपितसामानाधिकरण्यावच्छेदकत्वविरहाद्व्याप्तिविरहः।

नन्विहावच्छेदकत्वं न तावदवच्छित्तिप्रत्ययहेतुत्वादिकम्। आत्माश्रयात्। नाप्यवच्छेद्यान्यूनानातिरिक्तवृत्तित्वम्। वह्निसामानाधिकरण्यवत्यालोकादावविद्यमाने धूम[1]त्वादावपि तदभावात्। किंत्वनतिरिक्तदेशकत्वम्। तच्चनीलधूमवत्त्वेप्यस्ति। न च तत्रातिव्याप्तिवारणायावच्छेद्यानतिरिक्तदेशकधर्मान्तराघटितत्वे सतीति विशेष्यते।

मात्रसामानाधिकरण्याभावादिति भावः। अस्तु प्रकृते किमित्यत आह—**व्यर्थेति**। आदिपदेन शरीरा[2]जन्यत्वादिग्रहः—**अवच्छेदकत्वविरहादिति**। गौरवादिति भावः। तथा च विशिष्टो [3]हेतुर्व्याप्तिशून्य एवेति भावः॥

विशिष्टनिष्ठव्याप्तिवादी व्याप्तिवादे पक्षधराद्युक्तमवच्छेदकत्वनिरुक्तिनिष्कर्षमनुवदन्नीलधूमत्वादावपि साध्यसामानाधिकरण्यावच्छेदकत्वमस्तीति शङ्कते—**नन्वित्यादिना मैवमित्यन्तेन**। [4]आदिपदेनावच्छेद्यव्याप्यत्वावच्छेद्यसमनियतत्वादिग्रहः—**आत्माश्रयादिति**। हेतु[5]त्वस्य नियतपूर्ववृत्तित्वरूपत्वान्नियमस्य व्याप्तितया व्याप्तिज्ञाने व्याप्तिज्ञानस्यावश्यकत्वादिति भावः—**अतिव्याप्तीति**। प्रमेयधूमत्वद्रव्य-

---

[1] वत्त्वा—**च**. [2] रज—**अ**. [3] हेतौ—**कुं**. [4] इयं पङ्क्तिः "अतिव्याप्तीति" इत्यतः प्रागस्ति—**अ**. [5] कत्व—**अ**.

नीलधूमत्वस्य च धूमत्वरूपतादृशधर्मान्तरघटित-त्वान्न तदवच्छेदकतेति वाच्यम् । एवं सति व्याप्तिशरीरस्याभाव [1]द्वयघटितत्वेनातिगौरवात् । उदाहरणवाक्ये तदभावाच्चेति चेन्मैवम् ॥

अवच्छेदकत्वं हि विशेषणताविशेषरूपः स्वरूप-सम्बन्धः । न चास्याप्युदाहरणवाक्यादप्रतीतिः । उदाहरणस्थधूमपदोपस्थापितस्य धूमत्वस्योदा-हरणवाक्योपस्थापितेन धूमगतवह्निसामानाधिकर-

---

धूमत्वनीलधूमत्वैतद्धूमत्वादावपि वह्निसामानाधिकरण्यरूपावच्छेद्यानतिरिक्तदेशकत्वसत्त्वादतिव्याप्तीत्यर्थः—**अभावद्वयेति** । साध्यसामानाधिकरण्यानतिरिक्तदेशकधर्मान्तराघटितत्वे सति साध्यसामानाधिकरण्यानतिरिक्तदेशकत्वमित्यत्र यद्यपि नञ्त्रयप्रवेशादभावत्रयं तथापि अनतिरिक्तेत्यस्यैव द्विरुपादानादभावद्वयेत्युक्तम् । यद्वा सत्यन्तप्रविष्टनञ्द्वयापेक्षया अभावद्वयेत्युक्तम् ॥

केचित्तु तादृशधर्मान्तराघटितत्वे सति साध्यसामानाधिकरण्य देशत्वं तदर्थः । एवं चाभावद्वयमेवेत्याहुः । तच्चिन्त्यम् । प्रमेयत्वद्रव्यत्वादावतिव्याप्तेः ॥

को विशेषणताविशेषः । विशिष्टज्ञानजनकज्ञानविषयत्वादिरूपत्वे चात्माश्रयादित्यत आह—**स्वरूपसम्बन्ध इति** ॥

ननु कुत एवमिति चेत् । अवच्छेदकत्वानिरुक्तेरिति वदन्ति । तथाहि । यदुक्तमवच्छेद्यानतिरिक्तदेशकत्वमवच्छेदकत्वमिति । तन्न ।

---

[1] त्रय-क-ख-रा.

ण्येन सहावच्छेदकत्वरूपसम्बन्धस्य संसर्गविधया भानात्। स च स्वरूपसम्बन्धो लघुनि धूमत्व एव कल्प्यते। न तु गुरुणि नीलधूमत्व इति नीलधूमे न व्याप्तिः ॥

न च लघुधूमत्वमपि नीलधू[1]मेऽस्तीति वाच्यम्। हेतुतावच्छेदकस्यैव हि सामानाधिकरण्यावच्छेदकता वाच्या। उपस्थितत्वाद्धर्मान्तरकल्पने गौरवाच्च। इह [2]तु हेतुतावच्छेदकत्वेनोपात्तस्य

इदं सुखि आत्मत्वादित्यादावीश्वरात्मनि सुखाभावसमानाधिकरणे व्यभिचारिणि गतत्वात्। आत्मत्वस्य जीवात्मनि सुखसामानाधिकरण्येनात्मत्वत्वस्य सुखसामानाधिकरण्यानतिरिक्तवृत्तित्वात् ॥

न च साध्याभावसमानाधिकरणावृत्तित्वमवच्छेदकत्वम्। आत्मत्वं त्वीश्वरात्मनि सुखाभावसमानाधिकरणमेवेति वाच्यम्। केवलान्वयसाध्यकहेतावभावात्। तत्र साध्याभावाप्रसिद्धेः ॥

नापि साध्यसामानाधिकरण्याभावाधिकरणावृत्तित्वमवच्छेदकत्वम्। आत्मत्वं त्वीश्वरात्मवृत्तित्वावच्छेदेन सुखसामानाधिकरण्याभावाधिकरणमेवेति वाच्यम्। वृक्षः एतत्कपिसंयोगवान् एतद्वृक्षत्वादित्यादावव्याप्तेः। एतद्वृक्षत्वस्यापि मूलावच्छेदेनैतत्कपिसंयोगसामानाधिकरण्याभावाधिकरणत्वात्। यदि चैतद्वृक्षत्व एतत्कपिसंयोगसामानाधिकरण्यस्य सत्त्वात्कथं तदभाव इति। तर्ह्यात्मत्वेपि तुल्यमेतत्। विरुद्धयोरप्यवच्छेदकभेदेनाविरोध इत्येतस्यापि साम्यात्।

---

[1] मत्वे-ग-ख. [2] च-क-रा-ख.

नीलधूमत्वस्य शरीराजन्यत्वस्य च सामानाधिकरण्यानवच्छेदकत्वेन व्याप्यत्वासिद्धेः ॥

न चैवं विमतो निर्धूमः आर्द्रेन्धनप्रभववह्निरहितत्वात्, सुरभि[1] धूमरहितः चन्दनप्रभववह्निरहितत्वादित्यादावपि व्याप्यत्वासिद्धिः स्यादिति वाच्यम्। तत्र कार्यकारणभावमूलकानुतर्केण वह्निरहितत्व [2] आर्द्रेन्धनप्रभववह्निरहितत्वा[3] दावपि व्याप्तिनिश्चयादिति ॥

नापि अधिकरणैकदेशानवच्छेदेन साध्यसामानाधिकरण्याभाववदवृत्तित्वं तत्। एतद्वृक्षत्वे चाधिकरणैकदेशमूलावच्छेदेनैव साध्यसामानाधिकरण्यमिति विशिष्टव्यतिरेकस्य तत्रापि सत्त्वान्नाव्याप्तिः। अत्मत्वे तु ईश्वररूपाधिकरणवृत्तित्वावच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वम। न तु तदैकदेशावच्छेदेनेति न तत्रातिव्याप्तिः। केवलान्वयिनिं च तादृशसाध्यसामानाधिकरण्याभाववत्त्वं गगनादौ प्रसिद्धमिति न कोपि दोष इति युक्तम्। सुखादेरव्याप्यवृत्तितया जीवात्मन्यप्यात्मत्वस्य सुखसामानाधिकरण्याभावाधिकरणतया तत्र तदेकदेशवृत्तित्वस्यैवावच्छेदकत्वादिति दिक् ॥

तस्मादवच्छेदकत्वानिरुक्तेः स्वरूपसम्बन्ध एवावच्छेदक[4]त्वमिति नीलधूमेऽस्तीति। तथा च तादृशावच्छेदकधर्मवत्त्वान्नीलधूमोपि व्याप्य एवेति शङ्कितुर्भावः ॥

न चैवमिति। गुरुधर्मस्य व्याप्यतानवच्छेदकत्वे कारण-

---

[1] धूमपदं न–**क**. [2] इव इत्यधिकं–**कुं-छ-क-ख-ग**. [3] दित्या–**कुं-छ**.
[4] कमि–**कुं**.

अत्रोच्यते ॥

व्यभिचारज्ञानस्य ह्यनुमितिप्रतिबन्धकत्वमनुभवसिद्धम् । त्वदनुमतं च । तच्च न बाधादिवत्साक्षा[1]त्साध्यविरु[2]द्धविषयकत्वात् । किं तु करणीभूतव्याप्तिज्ञानविघटनद्वारा । तच्च व्याप्तेस्त्वदुक्तसाध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वविपरीते -

---

विशेषाभावेन कार्यविशेषाभावानुमानं न स्यादित्यर्थः ॥

एवं नीलधूमदृष्टान्तेन शरीराजन्यत्वस्य व्याप्यत्वासिद्धत्वे पूर्वपक्षिते[3]सति न मण्युक्तं व्याप्तिस्वरूपमनुमित्यङ्गम् किंत्वन्यदेव तच्चास्ति नीलधूमे शरीराजन्यत्वे च अतो न व्याप्तिशून्यत्वमिति भावेन सिद्धान्तयति---**अत्रोच्यत इत्यादिना । त्वदनुमतं चेति ।** अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति व्यभिचारादिहेत्वाभासलक्षणोक्तेरिति भावः ॥

अनुमितिप्रतिबन्धकत्वं हि द्वेधा । अनुमितिविषयविरोधिविषय[4]त्वेन साक्षादेव वा, तत्करणीभूतज्ञानविषयाभावावगाहित्वेन तत्करणविघटकत्वेन वा । तत्राद्यं बाधप्रतिपक्षयोरेव । न त्वन्यस्य । द्वितीयं तु स्यादिति भावेनाह—**तच्चेत्यादिना । व्याप्तिज्ञानेति ॥**

यद्यपि परामर्श एवानुमितिकरणम् तार्किकमते । यथाह "लिङ्गपरामर्शोऽनुमान" मिति । तथापि करणस्य व्यापारवत्त्वनियमात्परामर्शस्य करणत्वे व्यापाराभावाद्व्याप्तिज्ञानं करणं परामर्शोऽवान्तरव्यापार इति लिङ्गकरणतावादे मणिकृदुक्तरीत्या करणीभूतव्याप्तिज्ञानेत्युक्तम्—

---

[1] त् । सा–च-क. [2] द्धा–च-क-ग-रा. [3] 'सति' इति नास्ति–कुं. [4] कत्वे–कुं-अ.

व्यभिचाराभावविशिष्टसहचाररूपत्व वए युक्तम् । विरुद्धवत्सहचाररूपविशेष्यांशेनाविरोधेपि व्यभिचाराभावरूपविशेषणांशेन सह वैषयिकविरोधात् । न तु साध्यसामानाधिकरण्यावच्छेदक[1] रूपवत्त्वात्मकत्वे[2] तद्युक्तम्। परस्परविरहानात्मकत्वेन साक्षादविरोधात् ॥

न च व्यभिचारेण हेतुतावच्छेदकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वानुमानात्परम्परया विरोधः। व्यभिचारज्ञानानन्तरमेव व्याप्तिविरहज्ञानानुभवेन परम्पराकल्पनेऽनुभवविरोधात् । बा-

---

तच्चेति । व्याप्तिज्ञानविघटकत्वमित्यर्थः । मूलारूढतां दर्शयितुं विपरीत इत्युक्तिः ॥

युक्तमित्येतद्व्यनक्ति—**विरुद्धवदिति** । साध्याभावमात्रसम्बद्धविरुद्धहेत्वाभासवदित्यर्थः—**वैषयिकेति** । भावाभावरूपविरुद्धविषयकृतेत्यर्थः—**तद्युक्तमिति** । व्याप्तिज्ञानविघटकत्वं युक्तमित्यर्थः—**व्यभिचारेणेति** । साध्याभावसम्बन्धरूपव्यभिचारेणेत्यर्थः—**परम्परयेति** । पर्वतो धूमवान् वह्निमत्त्वादित्यत्र वह्नित्वादिरूपहेतुतावच्छेदकं न साध्यसामानाधिकरण्यावच्छेदकम् साध्याभावसमानाधिकरणवृत्तित्वादिति साध्यसामानाधिकरण्या[3]नवच्छेदकत्वानुमितिः । तया च तादृशावच्छेदकधर्मवत्त्व[3]रूपव्याप्तिज्ञानं नेति व्यभिचारज्ञानस्यानवच्छेदकत्वज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकत्वमित्यर्थः ॥

---

[1] कत्वात्मकत्वे—**छ**·रूपपदं न—**ग**. [2] कत्वेन—**कुं**. [3] अयं ग्रन्थः नास्ति—**अ**.

धा [1]दिवत्साक्षादनुमितिप्रतिबन्धकत्वस्यासिद्ध्या-
दिवत्परामर्शविषयाभावत्वस्य [2] चाभावेनोपाधि-
वद्धेत्वाभास[3]त्वोपाधित्वाभावापत्तेश्च ॥

न चोदाहरणवाक्येन तदप्रतीतिः । तत्र
वीप्सास्तीति मते "नित्यवीप्सयोः" इति सूत्रेण
व्याप्तिप्रतिपादनेच्छायां सत्यामादिष्टस्यैकार्थ-

अनुभवे विवदमानं प्रत्याह—**बाधा[4]दिवदिति** । **हेत्वाभा-सत्वोपाधित्वेति** । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वस्य हेत्वा-भासतायामुपाधि[5]त्वरूपत्वात्तस्य च व्यभिचारोन्नायकोपाधाविव साध्य-सामानाधिकरण्यानवच्छेदकत्वानुमापके व्यभिचारेप्यभावेनोपाधिवद्व्य-भिचारोपि हेत्वाभासो न स्यादित्यर्थः । **तदप्रतीतिरिति** । व्यभि-चाराभावविशिष्टसहचाराप्रतीतिरित्यर्थः । **तत्रेति** । उदाहरणवाक्य इत्यर्थः । अवयवग्रन्थे पक्षद्वयस्याप्युक्तेः । वीप्सास्तीति मते नास्तीति मत इति मतद्वयोक्तिः । **सूत्रेण** व्याकरणसूत्रेणेत्यर्थः ॥

सूत्रस्थवीप्साशब्दार्थमाह—**व्याप्तीति** । आदिष्टस्य आदेशतया विहितस्य । व्याकरणेऽष्टमाध्यायाद्यपादे "नित्यवीप्सयोः" इत्यत्र "सर्वस्य द्वे" इत्यधिकारसूत्रस्थपदद्वयानुवर्तनेन क्रियापौनःपुन्यरूप-[6]नित्येऽर्थे वीप्सायां च वर्तमानस्य सर्वस्य वर्णसमुदायरूपपूर्वतन-शब्दस्य द्वे भवत इत्यर्थः ॥

अत्र च पक्षद्वयं सम्भवति । पूर्वस्थितशब्दस्य स्थाने शब्द-**तोऽर्थतश्च** समानशब्दरूपे द्वे आदेशौ भवत इति वा, पूर्वतनशब्दस्य

---

[1] आदिपदं न-**ग.** [2] वा-**छ.** 'च' इति नास्ति-**ग.** [3] सोपाधि-**क-ख-रा.** [4] आदिपदं न-**मु.** [5] धिरू-**कुं.** [6] मित्यर्थे-**अ.**

वाचकत्वेनैकपदरूपस्य योय इत्यस्य शब्दस्यानुमित्यङ्गत्वेन निर्णीताव्याभि[1]चारावीशिष्टसहचार[2]रूपव्याप्तिवाचकत्वोपपत्तेः ॥

वीप्सा नास्तीति मते उदाहरणोत्पादितसहचारदर्शनसहकृतेन मनसैवोक्तव्याप्तिज्ञानसम्भवात् । तथाच व्यभिचाराभावविशिष्टसहचाररूपा व्याप्तिर्नीलधूमे शरीराजन्यत्वे चास्तीति कथं तयोर्व्याप्यत्वासिद्धिः ॥

द्विरुच्चारणं भवतीति वा । तत्राद्यपक्षस्यैव भाष्ये मञ्जर्यां च स्थिरत्वोक्तेरादिष्टस्येत्युक्तम् । तत्र स्थानिवद्भावेनार्थवत्त्वात्प्रातिपदिकत्वम् । अर्थैक्यात्समुदायस्यैकपदत्वं चेति भावेनैकार्थ्येत्याद्युक्तिः ॥

शब्दस्येति । वाचकत्वेत्यन्वयः । वीप्सित[3]शब्देन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्त्वविधानात् यावत्स्वाश्रयाश्रितसाध्यसम्बन्धरूपव्याप्तिप्रतीतेः तस्या एवानुमित्यङ्गत्वनिर्णयादिति भावः ॥

यत्तु मणावुदाहरण[4]निरूणप्रस्तावे "वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वय" मित्युक्तम् । तदयुक्तम् । व्याप्तिप्रतिपादनेच्छायामादिष्टस्य यो य इत्यस्य यावत्साधनाधिकरणे साध्यसम्बन्धबोधनशक्तेर्व्युत्पन्नत्वेन व्यभिचारशङ्कानवकाशात् ॥

एवं नीलधूमादिसाधारण्येन व्याप्तिमुपपाद्येदानीं, नीलधूमादौ व्याप्यभावेपि शरीराजन्यत्वेऽस्ति न च शरीरपदस्यासिद्धिवारकतया व्यभिचारावारकत्वेन व्यर्थत्वात्कथं व्यर्थविशेषणवति व्याप्तिरित्यतो

---

[1] चरितसह–कुं-रा. [2] 'ग्रहसम्भवात् । तथाच' इत्यादि वर्तते–क. [3] प्साश–कुं. [4] 'निरूपण' इति नास्ति–अ.

किञ्च हेतुशरीरघटकं द्विविधम्। किंचित्संकोचकम्। यथा नीलधूमादित्यत्र नीलत्वम्। किंचिद्विकासकम्। यथा प्रमात्वाश्रयविषयत्वादित्यर्थके प्रमेयत्वादित्यत्राश्रयविषयत्वम्। [1]प्रमेयत्वादित्युक्त[2] व्यभिचाराभावात्। तत्र संकोचकविपरीतस्यान्त्यस्य स्वेन विकासितदेशे [3]व्याप्तिग्रहौपयिकत्वान्न व्यर्थता। अन्यथा लक्षणरूपे व्यतिरेकिणि भा-

---

व्याप्त्याश्रयविकासकतया व्याप्तिग्रहौपयिकत्वेन न व्यर्थविशेषणत्वमिति भावेन तां तत्रोपपादयति—**किञ्चेत्यादिना**। **संकोचकमिति**। हेतुलक्षणस्य व्याप्त्यधिकरणस्याल्पत्वसम्पादकम्। धूमादित्य[4]नेन नीलानीलसाधारणधूमत्वाधिकरणमात्रस्य। व्याप्त्याश्रयत्वं लभ्यते। नीलत्वविशेषणे तु नीलधूममात्रस्येति नीलत्वं व्याप्त्यधिकरणसंकोचकम्। घटोऽभिधेयः प्रमात्वाश्रयविषयत्वादित्यत्र प्रमात्वादित्युक्ते तन्मात्रस्यैव व्याप्त्याश्रयत्वलाभो नान्यस्य। विशेष्यभागस्याप्युक्तौ तु प्रमेयत्वमात्रस्यापि तथात्वलाभाद्व्याप्त्यधिकरणविकासकमित्यर्थः॥

ततः किमित्यत आह—**तत्रेति**। द्वयोर्हेतुशरीरघटकयोर्मध्य इत्यर्थः। **अन्त्यस्येति**। व्याप्त्याश्रयविकासकस्येत्यर्थः। असिद्धिवारकस्यार्पीति शेषः। **अन्यथेति**। असिद्धिवारकत्वेनैव व्यर्थत्वे गुणाश्रयो द्रव्यमित्यत्र गुणात्यन्ताभावानधिकरणत्वरूपद्रव्यलक्षणे गुणानधिकरणत्वस्याद्यक्षणस्थितघटादौ सत्त्वेपि द्वितीयादिक्षणस्थे तस्मिन्नभावेना-

---

[1] प्रमात्वा—छ-ग. [2] क्तेपि—छ ग-क-रा. [3] व्याप्तिग्रहानौपयिकत्वेनार्थना—ख-छ. [4] न्तने—अ.

गासिद्धिरूपाव्याप्तिहरणाय विशेषणं न प्रयुज्येत । शरीरपदं [1]चाजन्यत्वस्यांकुरादावसंभावितस्य विकासकमिति न व्यर्थम् ॥

अपि च शरीराजन्यत्वादित्यत्र शरीरविशिष्टोऽभावो[2] न हेतुः । किन्तु शरीरविशिष्टस्य जन्यत्वस्या-

---

व्याप्तिवारणायात्यन्ताभावेति विशेषणं नोपादीयेत । तस्य द्रव्यमितरेभ्यो भिद्यते गुणात्यन्ताभावानधिकरणत्वात् व्यतिरेकेण गुणादिवदित्यत्र द्वितीयादिक्षणस्थघटादौ भागा[3]सिद्धिवारकत्वात् । लक्षणमपि केवलव्यतिरेकी[4]त्युक्तत्वेन व्यावृत्तिव्यवहारयोः साधने लक्षणस्य केवलव्यातिरेकित्वादिति भावः ॥

यद्वा गुणाभावानधिकरणत्वादित्युक्तावाद्यक्षणस्थघटे भागासिद्धिवारणायात्यन्तेति विशेषणं नोपादीयेतेत्यर्थः ॥

अस्त्वेवं प्रकृते किमित्यत आह—**शरीरेति** । अजन्यत्वादित्येवोक्तावङ्कुरादावसम्भावनया हेत्वसिद्धिशङ्कायां तत्रापि हेतुसत्त्वोपपादकत्वेन हेत्वधिकरणबाहुल्यसम्पादकत्वेन हेतुविकासकम् । तत्रादृष्टा[5]द्वारकशरीरजन्यत्वाभावस्य प्रत्यक्षत एवावगमसम्भवात् । अतो न व्यर्थं शरीरविशेषणमित्यर्थः ॥

न केवलं हेतुविकासकत्वेन शरीरपदमर्थवत् किन्तु "विशिष्टस्योपाधेः साध्यव्यापकत्वमस्त्येव । उपाध्यभावश्चात्र प्रतिपक्षत्वेनोक्त" इति तत्त्वनिर्णयटीकोक्तदिशा विशिष्टाभावरूपहेतुसरूपोपस्थापकतयापि व्याप्तिग्रहोपयिकत्वेनेत्याह—**अपिचेति** । **अभाव इति** । जन्यत्वाभाव इत्यर्थः—**न हेतुरिति** । तथात्वे हि जन्यत्वाभावमात्रस्य गगनादाव-

---

[1]चज-कुं. [2] अत्रग्रन्थपातः दर्शितः-मु [3] भागेऽसि-मु. [4]कीयुक्त-कुं. [5] ष्टद्वा-कुं.

भावः। स च विशेषणविशेष्ययोरभावाभ्यां भिन्न-
एव। विशेषणविशेष्यसम्बन्धो विशिष्टमिति मते
पदार्थान्तरमिति मते च प्रतियोगिभेदात्। विशेष-
णावच्छिन्नं विशेष्यमेव विशिष्टमिति मते प्रति-
योगितावच्छेदकभेदात्। तादृशविशिष्टाभाव[1]धीश्च
न विशेषणज्ञानं विना युक्ता। प्रतियोगितावच्छेद-
कप्रकारकप्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्य ॥
एवं च शरीराविशेषणं विशेष्याभावविपरीतव्याप्त्या
श्रयीभूतविशिष्टाभावोपस्थाप[2]नौपयिकं व्याप्ति-

कर्तृकत्वेन व्याप्तस्य हेतुस्वरूपस्याजन्यत्वपदेनैवोपस्थितिसम्भवेन शरीर-पदं व्यर्थं स्यात्। न चैवमित्यर्थः। स च भिन्न एवेत्यन्वयः। यदि न भिन्नस्तदा लाघवेन विशेष्याभावादेरेव व्याप्यतया विशिष्टाभावो न व्याप्यः स्यात्। न चैवमित्यर्थः ॥

कुत इत्यतस्तद्वयनक्ति। **विशेषणेति**। प्रतिवादिमतानुरोधेनाह—**पदार्थान्तरमितीति**। अस्त्वतिरिक्तोऽभावस्ततः किमित्यत आह—**तादृशेति**। प्रतियोगिनिर्विकल्पकादभावबुद्धेरभावाद्वास्तवमुपेत्याह—**प्रतियोगितावच्छेदकप्रकारकेति**। तथा च शरीरजन्य[3]त्वत्वेन शरीरजन्यज्ञानं न शरीरज्ञानं विना युक्तमित्यर्थः। ततः किमित्यत आह—**एवं चेति**॥

यदत्रोक्तं मणौ "शरीरजन्यत्वाभावो नाखण्डो हेतुः। यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात्तदा तदभावप्रयुक्तः सकर्तृकत्वा-

---

[1] स्य धी कुं-ग विशिष्टस्याभावस्य-ग. [2] नेनव्याप्ति-कुं नौपाधिकं-क. [3] त्वेन-कुं.

ग्रहौपयिकमेव । आश्रयज्ञानं विना व्याप्तेरग्रहात् ॥

न च गगनादौ व्याप्तिग्रहार्थं विशिष्टाभाव-ग्रहकाले विशेष्याभावस्यापि ग्रहनियमाल्लाघवेन तत्रैव व्याप्तिग्रहान्न विशिष्टाभावे तद्ग्रह इति वाच्यम् । विशेष्याभावाग्रहेणेपि शब्दादिना विशिष्टाभावग्रहणे[1]न नियमाभावात् । क्वचिदुपस्थितिमात्रेण लाघवा[2]दरे अयं घटो जन्यः कृतकत्वादित्यत्र लघुनि शीघ्रोपस्थितिके च घटत्वे सत्यपि कृतकत्वनिष्ठव्याप्तिग्रहं प्रतीव प्रकृतेपि लघौ विशेष्याभावे सत्यपि * विशिष्टाभाव-

---

भाव इति तस्य साध्यव्या[3]प्यता स्यात् । न चैवम् । किन्तु जन्यत्वम् । लाघवादि" त्यादि तत्तु "अदृष्टाद्वारकशरीरजन्यत्वमुपाधिश्च" इत्यादिनोपाधेः सकर्तृकत्वप्रयोजकत्वप्रतिपादनपरपूर्वग्रन्थेनैव निरस्तमित्यभिप्रेत्य लाघवेन विशेष्याभावस्यैव व्याप्यत्वं न विशिष्टाभावस्येति विशिष्टाभावस्य व्याप्यत्वासिद्धिचोद्यं निराह—**न चेत्यादिना** । सामग्रीवशेनाजन्यत्वस्यापि क्वचिदुपस्थितिसम्भवादस्तु विशिष्टाभावस्याव्याप्यत्वमित्यत आह—**क्वचिदिति** । **भिन्नविषयत्वेनेति** । विशिष्टाभावमध्ये विशेष्याभावस्याप्रवेशात् । अत एव पूर्वं "विशेषण-विशेष्ययोरभावाभ्यां भिन्न एव" इत्युक्तमिति भावः ॥

---

[1] हणे–कुं. हेण–छ-रा. णनि–क. [2] देरिव–छ. * अयं ग्रन्थः नास्ति–क-'गौरवस्या' इत्यनन्तरं 'व्याप्तिर्विशेष्या' इत्यादेः सत्त्वेन लोपः सूचितः-ख. [3] पकता–अ.

निष्ठव्याप्तिग्रहं प्रति भिन्नविषयत्वेन गौरवस्याप्रतिबन्धकत्वात्। नहि नीलधूमनिष्ठा व्याप्तिर्धूमत्वेनेव* विशिष्टाभावनिष्ठा व्याप्तिर्विशेष्याभाव [1]त्वेनावच्छेत्तुं शक्या। तत्र तदभावात्। येनावच्छेदकांशे लाघवं सहकारि [2] स्यात्॥

नन्वेवं वह्न्यनुमापके धूमप्रागभावादौ, पृथिव्या इतरभेदानुमापके पृथिवीत्वसमवाये च, त्वदभिमता व्यर्थविशेष्यता न स्यात्। धूम[3]पृथिवीत्वा[4]दिनिष्ठव्याप्तितो धूमप्रागभावपृथिवीत्वसमवायनिष्ठव्याप्तेर्भिन्न[5]त्वेन तस्याः धूमपृथिवीत्ववृत्तिधर्माभ्यामवच्छेत्तुमशक्यत्वादिति चेन्न। इष्टापत्तेः॥

नन्वखण्डस्य व्याप्यत्वेप्यखण्डनिष्ठा व्याप्तिर्जन्यत्वाभाव [6]त्वेनैवावच्छिद्यते। नीलधूमनि [7]ष्ठा व्याप्तिर्धूमत्वे [8]नैव। तथा च हेतुस्वरूपोपस्थितौ विशेष्याभावविशिष्टाभावयोर्भिन्नत्वेन लाघवासहकारेप्यवच्छेदकग्रहे लाघवं सहकारि स्यादेवेत्यत आह—**न हीति। तत्रेति।** विशिष्टाभावे जन्यत्वाभाव [9]त्वाभावादित्यर्थः॥

उक्तार्थे बाधकमाशङ्क्येष्टापत्त्या निराह—**नन्वित्यादिना। वह्नीति।** गिरिर्वह्निमान् धूमप्रागभाव[10]वत्त्वात् पृथिवी इतरभिन्ना पृथिवीत्वसमवायवत्त्वादित्यादावित्यर्थः। तर्हि विशेष्यत्वं क्वापि दोषो न

---

[1] वत्त्वेन-कुं. [2] री-ग-क. [3] मे-ग. [4] आदि पदं न-कुं. [5] विषय-क. [6] वेनै-कुं [7] ष्ठव्या-अ. [8] नेव-कुं [9] वाभा-कुं. [10] वात्-अ.

व्यर्थविशेष्योदाहरणन्तु अयमभिधेयत्व[1]वान् [2]प्रमेयत्वे सति धूमत्वादित्यादिकम्। नीलधूमादित्यादौ विशेषणाश्रयनिष्ठव्याप्तेर्विशेष्यतावच्छेदकेन धूमत्वेना[3]वच्छेदसम्भवरूपव्यर्थविशेषणता दु[4]ष्टिबीजस्येव प्रकृतेपि विशेष्यतावच्छेदकावच्छिन्ननिष्ठव्याप्तेर्विशेषणतावच्छेदकेन प्रमेय[5]त्वेनावच्छेदसंभवरूपस्य व्यर्थवि[6]शेष्यतादु ष्टि[7]बीजस्य सम्भवात्॥

तस्माद्व्यर्थविशेषणस्य न क्वापि व्याप्यत्वा-

स्यादित्यत आह—**व्यर्थेति**। आदिपदेन तादृशालोकवत्त्वादिग्रहः॥

नन्वत्राप्यखण्डं विशेष्यमात्रादन्यदेव व्याप्त[8]मिति सुवचनमित्यतो व्यर्थविशेषणस्थल इवात्रापि दूषकताबीजप्रदर्शनेन व्यर्थविशेष्यतां व्यनक्ति—**नीलेति**। **विशेषणाश्र[9]यनिष्ठेति**। नैल्यरूपविशेषणयुक्तधूमनिष्ठेत्यर्थः। विशिष्टस्य पदार्थान्तरत्वाभावमतेनैव मुक्तिः। विशेष्यतावच्छेदकेन धूमत्वेनेत्यर्थः। **सम्भवेति**। व्यभिचाराभावादिति भावः। **दुष्टीति**। विशेषणस्य दुष्टताबीजस्येत्यर्थः। प्रकृतेपि प्रमेयवत्त्वे सति धूमवत्त्वादित्यादावित्यर्थः। **सम्भवरूपस्येति**। प्रमेयवत्त्वादित्युक्तेपि व्यभिचाराभावादिति भावः॥

व्यर्थविशेषणस्य दूषणताबीजं निर्धारयन्नेव शरीराजन्यत्वे तन्नास्तीत्युपपादयति। **तस्मादिति**। नीलधूमादेरपि व्याप्यताया उपपाद-

---

[1] यवान्—**ग-कुं.** [2] प्रमेयवत्त्वे सति धूमवत्त्वादित्यस्ति—**कुं.** [3] धूमत्वेनेति नास्ति—**ग-कुं.** [4] ष्ट—**छ-ख-क-रा.** [5] त्वत्वेन—**मु.** [6] षणता—**च.-ख.-क.** [7] ष्ट—**छ.-क.-ख.-रा.** [8] प्य—**अ.** [9] आश्रयपदं न—**अ.**

सिद्धित्वेन दूषणता। किन्तु विशिष्टस्य हेतुत्वाभिप्रायेण प्रयोगेऽधिकत्वेन। हेतुद्वयोक्तौ द्वितीये प्रथमेन कृत[1]कार्यत्वस्येव विशिष्टेपि विशेष्येण कृतकार्यत्वस्य दु[2]ष्टिबीजस्य [3]सत्त्वात्। विशेष्यस्यैव हेतुत्वाभिप्राये त्वर्थान्तरत्वेन। प्रकृते तु विशिष्टाभावरूपहेतुकार्यस्यान्येनाकरणान्नाधिकत्वम्॥

न च विशिष्टाभाव[4]कार्यं विशे[5]ष्याभावेन कर्तुं शक्यम्। विशिष्टोपस्थितौ विशेष्य[6]स्योपस्थितिनियमवत्, विशिष्टस्य हेतुत्वे विशेष[7]णस्य हेतुत्वनियमवच्च, विशिष्टाभावोपस्थितौ विशेष्याभावोपस्थितिनियमस्य, तस्य हेतुत्वान्वये[8]विशेष्याभावस्य हेतुत्वान्वयनियमस्य चाभावात्॥

नाप्यर्थान्तरम्। असिद्धिवारकत्वेन प्रकृतोप-

नादित्यर्थः। अधिकत्वे[9]नेति। [10]दूषणतेत्यनुषङ्गः। आधिक्यरूपनिग्रहस्थानत्वेन हेतुनेत्यर्थः॥

अन्वितोपयुक्तापुनरुक्तकृतकार्यप्रयोगस्याधिकत्वात्कथमत्रान्येन कृतकार्यत्वमित्यत आह। हेतुद्वयेति। धूमवत्त्वादालोकवत्त्वाच्चेत्येवं रूपेणेति भावः। अर्थान्तरत्वेनेति। प्रकृतानुपयुक्ता[11]न्वितोक्तिरर्थान्तरमित्युक्तार्थान्तररूपनिग्रहस्थानत्वेनेत्यर्थः। अत्रापि दूषणता व्यर्थ-

---

1 करणत्वस्य–क-रा. 2 ष्ट छ-ख-क-रा. 3 सम्भवात्–छ-कुं. 4 रूप–छ. 5 षणा–ख. ष्येण–क. 6 ष्येाप–च-छ-ख-ग-क-रा. 7 ष्यस्य–कुं. 8 यनियमस्य चा–छ-कुं. 9 अधिकत्वं नेति–अ. प्रयोग इत्यस्याधिकत्वेनेति–मु. 10 'व्यर्थविशेषणस्य' इत्याधिकं–कुं. 11 क्तोक्ति–अ.

योगात् । एतदेवाभिप्रेत्योक्तं टीकाकारैः "पक्ष-धर्मतासिद्ध्यर्थत्वात्" इति । तस्मात्सत्प्रतिपक्षत्वं दुष्परिहरम् ॥

तदेवं कार्यत्वहेतोर्दुष्टतया प्रमित्यनुन्मुखत्वा-ल्लाघवतर्कानुगृहितेन तेन कर्त्रैक्यसिद्धिरिति निर-स्तम् । कार्यसामान्यस्य कर्तृमात्रसापेक्षत्वेपि तद्विशेषस्य घटस्य कुलालरूपकर्तृसापेक्षत्ववत्, वेदस्य शरीरसहकृतेश्वरसापेक्षत्ववच्च गुरुतरकार्यस्य सजातीयकारकस[1] हितकर्तृसापेक्षत्वदर्शनेन त्वदु-

---

विशेषणस्येत्यनुषङ्गः । **एतदेवाभिप्रेत्योक्तमिति** । विमतं विकर्तृकं अस्मत्सम्मतकर्तृरहितत्वादिति तत्त्वनिर्णय[2]टीकायामुक्तमित्यर्थः । शरी-रेति विशेषणस्येति शेषः ॥

यदपि मणौ "ननु क्षित्यादावेव[3] कर्तृसिद्धिः कुतः" इत्यादिना "उच्यते" इत्यन्तेनैककर्तृसिद्धिमाक्षिप्य "यत्र प्रमाणे लाघवगुरुविषयते" त्यादिना समाधानमुक्तं तदपि निराह—**तदेवमिति**। **तद्विशेषस्येति** । कार्यविशेषस्येत्यर्थः । **शरीरेति** । "सर्गा-दावदृष्टभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वर-संयोगाद्वा सकलवेदार्थगोचरज्ञानविवक्षासहकृतान्मीनकण्ठताल्वादिक्रि-यातज्जन्यसंयोगाद्वेदोत्पत्तिः" इति मण्युक्तेरिति भावः—**गुरुतरेति**। प्रासादादिरूपेत्यर्थः । **सजातीयकारकेति** । कर्त्रन्तरादि[4] रूपेत्यर्थः। मूलारूढत्वायाह—**त्वदुक्तेत्यादि** । विमतमनेककर्तृकं गुरुतरकार्य-

---

[1] हकृत-मु. [2] 'वाक्य' इत्याधिकं-अ. [3] क-अ. [4] कारकेत्याधिकं-कुं.

त्कैककर्तृकत्वविपरीतानेककर्तृकत्वेनाप्यनुमातुं शक्यत्वाच्च ॥

वैदिकेश्वरस्य तु वेदेनैव सर्वं सिद्धम्। तस्मान्न कार्यत्वहेतुनेश्वरसिद्धिः ॥

एतेन अस्तु तर्हि परमाण्वोर्द्रव्यारम्भकसंयो-

त्वात्प्रासादादिकार्यवदित्यनुमातुं शक्यत्वादित्यर्थः ॥

नन्वेवं त्वन्मतेपीश्वरसिद्धिः कर्त्रैक्यसिद्धिः नित्यज्ञानादिसिद्धिश्च न स्यात्। अनुमानस्य त्वया दूषितत्वादित्यतः "वैदिकेश्वरस्य तु वेदेनैव सर्व[1]शक्तित्वोक्तेः सर्वमुपपद्यते" इति भाष्यवाक्यं हृदि कृत्वाह—**वैदिकेति**। वेदैकसमधिगम्येत्यर्थः—**वेदेनेति**। "द्यावा भूमी जनयन्देव एकः, [2]परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, यदात्मको भगवांस्तदात्मिका व्यक्तिः" इत्यादिभाष्याद्युक्तवेदेनेत्यर्थः ॥

एवं—

कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्सङ्ख्याविशेषाच्च"।

इति कुसुमाञ्जलिसङ्गृहीतेश्वरसाधकहेतूनां मध्ये मण्युक्तकार्यत्वहेतुप्रपञ्चनं निरस्येदानीं "अनयैव दिशा सर्वाणि जगत्कारणमात्रसाधनानि स्वतन्त्रानुमानानि निरसनीयानि" इति शास्त्रयोनिसूत्रसुधोक्तिं विवृण्वानः कुसुमाञ्जल्युक्तहेत्वन्तराण्यपि क्रमेण निराह। **एतेनेत्यादिना।**

---

[1] कर्तृत्वो-कुं. [2] अपरा-कुं

गहेतुक्रियारूप[1]कार्यायोजनेनेश्वरसिद्धिः । विमतं परमाण्वादि चेतनाधिष्ठितं स्पन्दते जडत्वात् शरीरवदित्यनुमानात् । अन्यथा जडत्वहानेरिति निरस्तम् । उक्तरीत्या त्वदुक्तविपरीतस्यास्मदादीनामेवादृष्टद्वारा[2]प्यधिष्ठातृत्वस्य सम्भवेन सिद्धसाधनात् । अदृष्टाद्वारकेति विशेषणेऽप्रयोजकत्वात् ।

कार्यायोजनेति । यद्यपि कुसुमाञ्जलौ "आयोजना खल्वपि" इत्यादिना आयोजनमेव हेतु[3]रुपात्तः । कार्येति कार्यत्वं हेतुः । तथापि "युज्यते संयुज्यते अन्योन्यं द्रव्यमनेनेत्यायोजनं द्व्यणुकारम्भकसंयोगजनकं सर्गाद्यकालीनपरमाणुकर्म" इति वर्धमानोक्त्या कार्यपदेन द्व्यणुकादिकार्या[4] योजनमित्यप्यन्वयमुपेत्य कार्यायोजनेनेत्युक्तमिति ज्ञेयम् । क्वचित्तु "आयोजनेनेत्येव" पाठः ॥

सिद्धिरित्युक्तं प्रयोगोक्त्या व्यनक्ति । **विमतमिति ।** तत्किमित्यतः । **परमाण्वादीति ।** आदिपदेन द्व्यणुकादिग्रहः । चेतनाधिष्ठितं सदेव स्पन्दत इति साध्यार्थः । अप्रयोजकत्वं हेतोर्निराह । **अन्यथेति ।** चेतनवत्स्वत एव स्पन्दवत्त्व इत्यर्थः । एतेनेत्युक्तं व्यनक्ति । **उक्तरीत्येति ॥**

उक्तदोषनिरासायादृष्टाद्वारकचेतनेति विशेणमाशङ्क्य निराह— **अदृष्टेति ।** जडत्वहेतोरदृष्टद्वारकचेतनाधिष्ठितत्वेनाप्युपपत्तेरप्रयोजको हेतुरिति भावेनाह—**अप्रयोजकत्वादिति ॥**

---

[1] 'पायोजनेन' इत्यपि पाठः—**च.** अयमेवपाठः—**ख-क रा.** [2] अपि पदं न—**कुं.** [3] रुक्तः—**मु.** [4] 'अर्था' इत्यधिकं—**कुं.**

अनेनेश्वर[1]सार्वज्ञ्यासिद्धेश्च । इदमुत्तरानुमानेष्वपि-द्रष्टव्यम् ॥

एतेनैव विमतं ब्रह्माण्डादि धारकप्रयत्नवता धृतम् गुरुत्वे सत्यपातित्वात् वियति विह[2]ङ्गम

ननु अदृष्टस्यापि केनचिदधिष्ठातृचेतनेन भाव्यमिति स एवेश्वर इति चेन्न । तत्राधिष्ठातुः कृत्याभावात् । न तावन्नोदनादिकम् । अद्रव्यत्वात् । न चातिशयाधानम् । स किं गुणोऽतीन्द्रयः कश्चिच्छक्तिविशेषः । न द्वयमपि । त्वया गुणे गुणान्तरानङ्गीकारात् । शक्त्यनभ्युपगमाच्च । नापि सहकारिसमवधानम् । अदृष्टादेव तदुपपत्तेः । नापि कार्यकारित्वम् । तस्यादृष्टस्वभावत्वात् । एककार्योत्पत्त्यनन्तरं कार्यान्तरा[3]नुत्पादनं[4] च प्रबलादृष्टान्तरप्रतिबन्धेनोपपत्तेरिति सुधायामेव व्यक्तत्वादिति भावेन दोषान्तरमाह—**अनेनेति** । उक्तानुमानेन कस्यचिच्चेतनस्यैव सिद्ध्या तत्सार्वज्ञ्यासिद्धेः । सार्वज्ञ्यस्य धर्मिग्राहकमानसिद्धत्वादि[5]तीश्वरवादोपक्रमात्पूर्वं त्वदुक्तमयुक्तमिति भावः—**इदमिति** । सार्वज्ञ्यासिद्धिदूषणमित्यर्थः ॥

धृतिरूपं हेत्वन्तरमपि कुसुमाञ्जल्युक्तदिशानूद्य निराह—**एतेनेति** । ब्रह्माण्डादीत्यादिपदेन पृथिव्यादिग्रहः । साध्ये व्यापकतासम्पत्तये धारकेति प्रयत्ने विशेषणम् । अन्यादृशप्रयत्नस्यापतनाहेतुत्वात् । लघुवस्तुन्यपतनवति व्यभिचारवारणाय गुरुत्वे सतीति[6]हेतुविशेषणम् । पतमाने गुरुत्ववति तन्निरासाय विशेष्यम्—**वियतीति** । गगने विहरत्पक्षिशरीरं यथा प्रयत्नवता चेतनेन विहगजीवेन धृतं

---

[1] स्यसा-कुं. [2] हग-कुं. [3] अन्तर इति नास्ति-कुं. [4] नस्य न-कुं [5] इति इति नास्ति-अ. [6] हेतौ-कुं-अ.

शरीरवत् । विमतं ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवादिति निरस्तम् । उक्तसिद्धसाधनाप्रयोजकत्वान्यतरानिस्तारात् ॥

न च घटादिनिर्माणं स्वतन्त्रपुरुषविश्रान्तं निर्माणत्वात् इदानींतनापूर्ववस्तुनिर्माणवत्, घटादिशब्दव्यवहारः स्वतन्त्रपुरुषविश्रान्तः व्यवहारत्वात् डित्थादिशब्दव्यवहारवत्, लिपिव्यवहारः स्वतन्त्र[1] पुरुषविश्रान्तः व्यवहारत्वात् इदानींतननूतन-

---

[2]तथा ब्रह्माण्डादिधारकः कश्चन चेतनःसिद्ध्यति। स एवेश्वर इति भावः॥

[3] धृत्यादेरित्यत्रापिपदोपात्तानुमानं व्यनक्ति । **विमतमिति** । **उक्तेति** । एतच्चोपलक्षणम् । प्रबलादृष्टप्रतिबन्धेन गुरुत्ववतोप्यपतनोपपत्त्याप्यप्रयोजकत्वमपातित्वहेतोः । सन्दिग्धासिद्धत्वं च "पततोपि तस्य महत्त्वेन पतनानुपलम्भसम्भवात्" इति सुधोक्तमपि ध्येयम् ॥

पद्यते गम्यते व्यहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एव पदशब्देनोच्यते । ततोपीश्वरसिद्धिः । तथाहि । यदेतत्पटादिनिर्माणनैपुण्यम् कुविन्दादीनां वाग्व्यवहारश्चेत्यादिकुसुमाञ्जल्युक्ति[4] हृदि कृत्वा पदादीश्वरसिद्धिरित्येतदपि निराह—**नचेत्यादिना** । **स्वतन्त्रेति** । तज्जातीयनिर्माणानुपजीवित्वं पुरुषस्य स्वातन्त्र्यम् । द्वितीये तु तज्जातीयव्यवहारानुपजीवित्वम् । तत्र पर्यवसितत्वं तत्र विश्रान्तत्वम् । अस्मदादिपुरुषविश्रान्तत्वेन बाध[5]वारणाय । **स्वतन्त्रेति** । लाघवेनेत्यस्य

---

[1] पुरुषपदं न—ख.-रा. [2] यथा—अ. [3] धृत्यादेरित्यादिपदोपक्रान्तानुमानं—अ. [4] क्तं—मु.-अ. [5] निरासाय—कुं.-मु.-म.

लिपिव्यवहारवदित्याद्यनुमानैस्तत्सिद्धिरिति वाच्यम्। लाघवेन सर्गादिभवानां सुप्तप्रबुद्धन्याये न त्वदभिमतविपरीतस्य कल्पान्तरीयसंस्कारोद्बोधमात्रस्य कल्पनादेव घटादिनिर्माणादेरुपपत्त्या हेतूनामप्रयोजकत्वात्। अन्यथा ईश्वरस्य, द्व्यणुकादिक्रमेणारब्धतदीयानन्तशरीरादेश्च कल्पने गौरवात्॥

कल्पनादित्यन्वयः—**सुप्तेति**। पूर्वकालैकेति समासः। सुप्तः सन् यः पश्चात्प्रबुद्धः स यथा सुप्तेः पूर्वमनुभूतं स्मृत्वा घटनिर्माणादि करोति तथैव सृष्ट्या[1]दावदृष्टादिवशेन लब्धदेहः सर्गाद्यकालीनकुलालादिरेव प्रळयात्पूर्वकालीनानुभवजन्यसंस्कारोद्बोधेन प्रागनुभूतं स्मृत्वा सर्गादौ घटादिनिर्माणं तद्व्यवहारं च करोतीत्युपपत्त्या त्वदभिमतस्वतन्त्रपुरुषकृतत्वा[2]सिद्धेरप्रयोजकत्वादित्यर्थः॥

तर्कपराहतिं चाह—**अन्यथेति**। स्वतन्त्रपुरुषेणैव घटादिनानाचित्रनिर्माणानां सृष्ट्यादौ कृतत्वे कुलालकुविन्दादिनानाशरीराणां धारणेनेश्वर एव तानितानि विचित्रनिर्माणानि करोतीत्यनन्तदेहकल्पनमीश्वरस्य स्यात्। तानि च द्व्यणुकादिक्रमेण जन्यानीति कल्पनीयमित्यप्रामाणिकानेककल्पनाद्गौरवमित्यर्थः॥

"प्रत्ययपदेनात्राश्वासविषयः प्रामाण्यमुच्यते" इत्यादिना "न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति" इत्यन्तेन कुसुमाञ्जलिग्रन्थेनोक्तं प्रत्ययादीश्वरसिद्धिरित्येतत्प्रमेयमपि निष्कृष्यानूद्य निराह।

---

[1] आदिपदं न—कुं [2] प्रसि—मु.

न च वाच्यं सर्गादौ ब्राह्मणत्वादेरधिकारस्या[1] ज्ञाने कर्मानुष्ठानासंभवात् स्वतस्तदभिज्ञः कश्चित्स्वीकार्य इति । स्तनपानप्रवृत्तिहेत्विष्टसाधनतानुमितिहेतुव्याप्तिस्मृतिव[2]त्सर्गादि[3]भवानां प्राचीनकल्पानुष्ठितस्य ब्राह्मण्या[4]दिहेतोः कर्मणः, तस्य ब्राह्मणत्वा[5]विनाभावस्य च, स्मृतिसंभवात् ॥

नचवाच्यमित्यादिना । स्वतस्तदभिज्ञ इति । अन्यथाऽनाश्वासेनानुष्ठानलोपापत्तेरिति भावः । **स्तनेति ।** स्तनपानप्रवृत्तिहेतुर्या इष्टसाधनतानुमितिः तद्धेतुव्याप्तिस्मृतिवदित्यर्थः । **सर्गेति ।** सर्गादावुत्पन्नानां ब्राह्मणादीनामित्यर्थः । **तस्येति ।** कर्मण इत्यर्थः ॥

श्रुतेरिति हेतोर्ह्ययमर्थः । वेदाः सर्वज्ञप्रणीताः वेदत्वाव्यतिरेकेण पामरवाक्यवदिति श्रुतिरूपकार्येण व्यतिरेकिहेतुनेश्वरसिद्धिरिति । वाक्यादित्यस्य तु वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवदित्यन्वयिना वाक्यत्वहेतुनेश्वरसिद्धिरिति । तदुभयमपि वेदापौरुषेयत्ववादे निरस्तमित्युपेत्य " सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः " इत्यस्य प्रपञ्चनपरेण " सङ्ख्याविशेषात् खल्वपि " इत्यादिना कुसुमाञ्जलिग्रन्थेनोक्तं निष्कृष्यानुवदन् शङ्कते—**नन्वित्यादिना** । द्रव्यत्वेन हेतुना द्व्यणुकस्य परिमाणवत्त्वे सिद्धे तस्य परिमाणस्य कार्यगुणत्वेन जन्यत्वे च सति भावकार्यस्य च कारणत्रयजन्यतया द्व्यणुकस्य समवायिकारणस्यादृष्टा[6] निर्मितस्य भावेप्यसमवायिकारणं द्व्यणुकगत-

---

[1] राज्ञा—**ख.** [2] त्स्वर्गा—**ख.** सर्वत्राप्येवमस्ति—**क.** [3] भुवां—**छ.**, भावानां—**ख-क.**, भाविनां—**रा.** [4] णत्वादि—**व-छ-क-ख-रा.** [5] आदि इत्यधिकं—**ग-कुं.** [6] कपालमात्रेणारब्धघटान्तरगतातिशयितपरिमाणवत्—**ख.**

ननु त्र्यणुकपरिमाणं सङ्ख्याऽसमवायि[1] कारणकं परिमाणप्रचयाजन्यजन्यपरिमाणत्वात्। एतद्घटारम्भककपालद्वयसमानपरिमाण[2]ककपालत्रयारब्धघटान्तरगतातिशयितपरिमाणवत्। न च विशेषणासिद्धिः। त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाण-

---

त्रित्वसङ्ख्या वाच्या त्रिभिर्द्व्यणुकैस्त्र्यणुकारम्भादिति भावेन सङ्ख्याजन्यत्वं तावद्वर्धमानोक्तप्रयोगोक्त्या साधयति—**त्र्यणुकपरिमाणमिति**। तदुक्तरीत्या द्व्यणुकपरिमाणस्य पक्षतोपगमेनोक्तरूपसाध्यसाधनेपि वक्ष्यमाणदिशा परमाणुगतद्वित्वरूपसङ्ख्यानिमित्तकारणापेक्षाबुध्याश्रयत्वेनेश्वरसिद्धिरस्ति। तथापि परमाणुद्व्यणुकपरिमाणयोर्द्वयोरप्यणुपरिमाणत्वात् द्व्यणुकपरिमाणपक्षतापक्षे हेतोर्विशेषणासिद्धेर्वक्ष्यमाणदिशा परिहर्तुमशक्यत्वात् त्र्यणुकपरिमाणस्य पक्षत्वोक्तिः। हेतौ परिमाणाजन्येत्युक्त्या घटादिपरिमाणे प्रचयाजन्येत्युक्त्या तूलपिण्डपरिमाणे जन्येत्युक्त्या परमाण्वादिपरिमाणे गुणत्वादित्यनुक्त्वा परिमाणेत्युक्त्या घटगतरूपादौ व्यभिचारशङ्का निरस्ता। न च हेतोरप्रयोजकत्वं शङ्क्यम्। जन्यपरिमाणस्य सङ्ख्यापरिमाणप्रचयरूपत्रितयजन्यत्वात्। द्वाभ्यामजन्यत्वे सति जन्यत्वस्य सङ्ख्याजन्यत्वेन विनानुपपत्तेरिति भावः॥

वर्धमानाद्यनुक्तमपि दृष्टान्तं स्वयं दर्शयति—**एतद्घटेति**। कश्चिद्बुद्धिस्थो घट एतद्घटपदेनोच्यते। घटान्तरगतातिशयितपरिमाणे कपालस्थत्रित्वसङ्ख्याजन्यत्वरूपसाध्यस्योक्तरूपहेतोश्च सत्त्वं व्यक्तमिति

---

[1] यी—क-ख-ग. [2] ष्टादेर्निमित्त-कुं.

जन्यत्वे[1] तद्वदेवाणुत्वापत्तेः। निरवयवावयवारब्धे[2]-
द्व्यणुके द्व्यणुकान्तरनिष्ठभूयोवयवासंयोगित्वे[3] सति
तत्संयोगित्वरूपस्य प्रचयस्याप्यसम्भवात्। तस्मा-
त्त्र्यणुकपरिमाणं प्रति द्व्यणुकवृत्तित्रित्वसङ्ख्यैवासम-
वायिकारणम्। एवं परमाणुपरिमाणं न परिमाणा[4]-
रम्भकं अणुपरिमाणत्वात् द्व्यणुकपरिमाणवत्।
न चाप्रयोजकता। द्व्यणुकपरिमाणस्य परमाणु-
परिमाणा[5]दणुतमत्वापत्तेः। तस्मात्परिशेषाद्व्यणु-
कपरिमाणस्य परमाणुनिष्ठद्वित्वसङ्ख्यैवासमवायि[6]-

भावः—अणुत्वापत्तेरिति। तथा च त्र्यणुकस्याप्रत्यक्षतापत्तेरिति भावः॥

प्रचयस्वरूपं वदन्नेव तदजन्यत्वं व्यनक्ति—निरवयवेति। निरवयवाभ्यां परमाणुरूपावयाभ्यामारब्ध इत्यर्थः। वर्धमानोक्तप्रयोगा-न्तरमाह—एवमिति। सङ्ख्याया एव जनकत्वेन द्व्यणुकपरिमाण-स्याजनकत्वे सतीत्यर्थः। परमाणुगतद्वित्वसङ्ख्ययैव द्व्यणुकपरिमाणजन्म न तु तत्परिमाणेनेति न बाधो द्व्यणुकपरिमाणानुत्पादो वा शङ्क्य इति भावः। अयं च प्रयोगो द्व्यणुकपरिमाणे। तत्रोक्तप्रयोगोऽत्रापि ध्येयः॥

द्व्यणुकपरिमाणेऽणुत्वस्योपगमेनेष्टापत्तिनिरासायाह—अणुतम-त्वेति। तस्मादिति। परिमाणस्याजनकत्वात् प्रचयस्य च प्रागुक्त-रूपस्यासम्भवादित्यर्थः। ततश्च किमीश्वरसिद्धावागतमित्यतः कुसुमा-

---

[1] त्ववत्–क. [2] ब्ध· कुं. [3] गरू–क. [4] न्तरा–छ-क-ख-रा.
[5] णवद–कुं. [6] प्रायः 'यी' इत्येवास्ति–क-रा.

कारणम् । ते च त्रित्वद्वित्वे अपेक्षाबुद्धिजन्ये अनेकवृत्तिसङ्ख्यात्वात् घटवृत्तिद्वित्वादिवत् । अपेक्षाबुद्धिश्चास्मदादिष्वसं[1]भविनी तदाधारमीश्वरं कल्पयतीति चेन्नैवम् ॥

सङ्ख्यायो[2] नित्वेपि द्व्यणुकपरिमाणं प्रति त्वदुक्तपरमाणुगतद्वित्वविपरीतयोः परमाणुगतैकत्वयोः त्र्यणुकपरिमाणं च प्रति द्व्यणुकनिष्ठैकत्वा-

---

ञ्जल्युक्तप्रयोगमाह—ते चेति । [3]द्व्यणुकपरिमाणगते इत्यर्थः । एकत्वे व्यभिचारवारणाय हेतावनेकवृत्तीत्युक्तिः । संयोगादौ तद्वारणाय सङ्ख्यात्वादित्युक्तिः । **तदाधारमीश्वरमिति** । द्वित्वस्य निमित्तकारणभूतापेक्षाबुद्धिनाश[4] नाश्यत्वनियमेपीश्वरबुद्धेर्नित्यतया कारणान्तरनाशप्रयुक्त एव परमाण्वादिगततद्वित्वादिनाश इति न तस्य नित्यत्वशङ्केति भावः ॥

आद्यहेतोरन्यथोपपत्त्या त्वदभिमतापेक्षाबुद्ध्याश्रयत्वेन नेश्वरसाधकतेत्यप्रयोजकत्वामिति भावेन सिद्धान्तयति । **नैवमित्यादिना** । **संख्यायोनित्वेपीति** । द्व्यणुकत्र्यणुकपरिमाणयोः परमाणुद्व्यणुकगतसङ्ख्याजन्यत्वेपीत्यर्थः । अपीत्यभ्युपगमवादः—**द्व्यणुकेति** । द्व्यणुकत्रयनिष्ठेत्यर्थः ॥

ननु नैवं सम्भवति । एकत्वानामनेकत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकैकत्वेन लाघवात् द्व्यणुकत्र्यणुकगतपरिमाणयोर्द्वयोरपि स्वावयवगतैकत्वसङ्ख्याजन्यत्वाविशेषेण त्र्यणुकपरिमाणस्याप्यणु[5] त्वापत्तेश्चेत्यत

---

[1] म्भावि—कुं-छ-ख. [2] गित्वे—छ-ख-ग-रा. [3] त्र्यणुकद्व्यणुकगते—कुं.
[4] शेना—मु. [5] त्वोपपत्तेः—कुं.

नामसमवायिकारणत्वसंभवात् । एकत्वानामनेकत्वेपि कल्पत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकत्वेपि कल्प्यत्वात् ॥

न च त्र्यणु[1]कपरिमाणस्य द्व्यणुकगतानेकैकत्वासमवायिकारणकत्वे द्व्यणुकपरिमाणवदणुत्वं स्यादिति वाच्यम् । अणुत्वरूपं[2] विशेषं प्रति [3]नित्यसङ्ख्यात्वेन महत्वरूपं विशेषं प्रति जन्यसङ्ख्यात्वेन हेतुत्वोपपत्तेः ॥

आद्यं निराह—**एकत्वानामिति** । अन्त्यमाशङ्क्य निराह—**न चेति** । **नित्येति** । परमाणुगतैकत्वयोः नित्यत्वात्तज्जन्यं द्व्यणुकपरिमाणमणु । द्व्यणुकगतानां त्रयाणामेकत्वानां जन्यत्वात्तज्जन्यं त्र्यणुकपरिमाणं महदित्युपपत्तेरित्यर्थः ॥

यद्यपि त्रिभिरेकत्वैर्जन्यत्वादेव त्र्यणुकपरिमाणं महत् एकत्वद्वयजन्यत्वाद्द्व्यणुकपरिमाणमण्विति सुवचम् । तथापि चतुरणकादिपरिमाणस्यापि सङ्ख्यात एव जननोपपत्तेरिति वैशेषिकाधिकरणसुधोक्तदिशा सर्वकार्यपरिमाणानामप्येकरूपत्वलाभेन कल्पततत्तत्समवायिकारणगतानेकैकत्वसङ्ख्याजन्यत्वमेव स्यात् । त्र्यणुकादिकार्यगतपरिमाणस्य सर्वस्यापि त्वन्मते महत्त्वेन जन्यसङ्ख्योत्पन्नत्वेनाणुपरिमाणवैलक्षण्योपपत्तेरिति भावेनैव जन्यसङ्ख्यात्वेनेत्येवमुक्तम् ॥

ननु कारणगतैकत्वसङ्ख्यायाः कार्यगतपरिमाणं प्रति नियतपूर्ववृत्तित्वेपि द्वित्वत्रित्वादिसङ्ख्यां प्रत्यसमवायिकारणतया कल्पत्वेन तन्तु-

---

[1] अत्र सर्वत्र ककारो नास्ति—**ख.** [2] पवि—**क-रा-कुं.** [3] प्रतिजन्यसंख्यात्वेन—**ख.**

किंच द्रव्यारम्भकत्वेन क्लृप्तस्य त्वदुक्तसङ्ख्या-विपरीतस्यैकस्य संयोगस्यैव परिमाणहेतुता कल्प्या। नियतपूर्ववृत्तित्वेन क्लृप्ते तस्मिन्ननन्य-थासि[1]द्धिमात्रकल्पने लाघवात्। न तु द्वित्वस्य। तत्स्वरूपस्यानन्यथासि[2]द्धत्वमात्रकल्पने लाघवात्। न तुद्वित्वस्य। तत्स्वरूपस्यानन्यथासिद्धनियम-पूर्ववृत्तित्वानां च कल्पने गौरवात् ॥

रूपादेरिवान्यथासिद्धत्वान्न परिमाणकारणत्वम्, कुतस्तद्विशेषासमवायि-कारणत्वमिति चेन्न। अन्यत्र तथात्वेपि परमाणु[3]गतैकत्वसङ्ख्याया-असम्भावितापेक्षाबुद्धिजन्यपरमाण्वादिगतद्वित्वबहुत्वसंख्ये[4] प्रत्यसमवा-यित्वकल्पनापेक्षया परिमाणासमवायिकारणत्वकल्पनस्यैवोचितत्वात्। तद्धेतोरेवास्तु हेतुत्वं किं तेनेति न्यायात्। अनेकत्वं तु क्लृप्तत्वात्कल्प्य द्वित्वाद्यपेक्षया लघ्वित्युक्तम् ॥

यद्येकत्वानामेनकत्वेनापरितोषं मन्यसे तर्हि क्लृप्तत्वाद्द्व्यारम्भ-कमेव परिमाणारम्भकमस्तु। किं सङ्ख्ययापीत्याह—**किञ्चेति। एकस्येति।** त्र्यणुकारम्भकद्व्यणुकत्रयसंयोगस्यानेकत्वेपि द्व्यणुका-रम्भकपरमाणुद्वयसंयोगस्यैकत्वादेकस्येत्युक्तम्। अत एवाग्रे "न तु द्वित्वस्ये" त्येवोक्तिः ॥

ननु द्रव्योत्पत्तावन्यथासिद्धस्य कथं परिमाणहेतुतेत्यत आह—**नियतेति। अनन्यथेति।** अनन्यथासिद्धिश्च नियमश्च पूर्ववृत्तित्वं च तेषामिति विग्रहः। द्वित्वजन्यत्वेपि परिमाणस्य नेश्वरसिद्धिरित्याह—

---

[1] द्धत्व-ख-क. [2] द्धिमात्र-कुं-ग, द्धनियतपूर्ववर्तित्वानां-च-ख-रा, नियमपूर्व-ग. [3] ण्वादि-अ. [4] 'संख्ये' इति नास्ति-कुं.

किञ्चेदानींतनब्राह्मणस्य ब्राह्मणपूर्वकत्वेपि सर्गादिकालीनस्य तस्यादृष्टविशेषोपहितभूतपूर्वकत्ववत् इदानींतनद्वित्वादेरपेक्षाबुद्धिजन्यत्वेप्यादिकालीनस्यादृष्टविशेषोपहितपरमाणुमात्रपूर्वकत्वमस्तु । अन्यथा नित्यापेक्षाबुद्धिवन्नित्यब्राह्मणोपि कल्प्यः स्यात् ॥

युक्तं चैतत् । अन्यथा समवाय्यपेक्षाबुद्धिनाश[1]रूपयोः परमाणुवृत्तिद्वित्व[2]नाशहेत्वोरभावेन तन्नाशाभावापातात् । अदृष्टविशेषोपहिताया ईश्वरनिष्ठापेक्षाबुद्धेर्हेतुत्वेन तन्नाशाद्वित्व[3]नाशे आवश्यकत्वाददृष्टविशेष एव हेतुरस्तु । न चैवमननु-

---

किञ्चेदानींतनेति ।

"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः परिकीर्तितः" ।

इति स्मृतेराह—ब्राह्मणस्येति । भूतेति । पृथिव्यादिपञ्चमहाभूतेत्यर्थः । सर्गादावदृष्टोपगृहीतभूतभेदान्मीनादिशरीरोत्पत्तावित्यादिमणिकृदाद्युक्तेरिति भावः ॥

वैजात्ये समानेऽपि कोत्र पक्षे विशेष इत्यत आह—युक्तं चैतदिति । अन्यथेति । नित्येश्वरापेक्षाबुद्धिजन्यत्व इत्यर्थः—तन्नाशेति । द्वित्वनाशेत्यर्थः । ईश्वरापेक्षाबुद्धेर्नित्यत्वादविनाशेऽपि तदुत्पादित द्वित्वादेर्निमित्तान्तरनाशेन नाश इति वर्धमानोक्तमाशङ्क्य निराह—अदृष्टेति । तन्नाशेति । अदृष्टनाशेत्यर्थः—न चैवमिति । काचि[4]दृष्टोप

---

[1] रूपपदं न—छ-च-क-ख-रा. [2] विनाश—मु-च-छ-क-रा. [3] त्वादि—रा. [4] दृष्टो—कुं.

गमः । ब्राह्मणवद्वैजात्यसंभवात् ॥

किंच द्वित्वादेरपेक्षाबुद्धिजन्यतैव न। अन्वय-व्यतिरेकानुविधानस्य व्यञ्जकत्वेनाप्युपपत्तेः । न चाविनिगमः । सेनादिबुद्ध्यालम्बनस्येयत्तयाऽनिश्चितानेकैकत्वबुद्धिजन्यस्य बहुत्वस्य सत्त्वेपि इयत्तया विनिश्चितैकत्वबुद्धिरूपव्यञ्जकाभावेन शतत्वाद्यप्रतीत्या व्यञ्जकत्वस्य त्वयापि स्वीकारात्॥

वस्तुतस्तु द्व्यणुकादिपरिमाणं त्वदुक्तसङ्ख्या

हितपरमाणुपूर्वकत्वे क्वचिदपेक्षा [1]बुद्धिपूर्वकत्वे च सतीत्यर्थः—**ब्राह्मणवदिति** । आदिकालीनब्राह्मणस्य कारणवैजात्यवदिहापि संभवादित्यर्थः । यद्वा तृणारणिमणिन्यायेनादिकालीनेदानींतनयोर्ब्राह्मणयोर्भिन्नकारणजन्ययोर्वैजात्यवदिहाप्युपपत्तेरित्यर्थः ।

[2] द्वित्वादेरपेक्षाबुद्धिजन्यत्वमभ्युपेत्योक्तम्। वस्तुतस्तदेव नास्ति। येन तदाश्रयतयेश्वरसिद्धिः स्यादित्याह—**किञ्चेति** । तदन्वयाद्यनुविधाना[3]त्कथमित्यत आह—**अन्वयेति** । एवमुत्प्रेक्ष्य स्वयं पक्षचतुष्टयमुक्त्वा इदानीं—

"महत्त्वं चैव दीर्घत्वं द्व्यणुकाद्येषु कल्पितम्।
तस्माच्च सदृशं कार्यं तत्कार्येषूपजायते॥
यथा तथैव ह्रस्वत्वात्पारिमाण्डल्यतोपि हि।
जायेत सदृशं कार्ये परिमाणं समत्वतः" ॥

इत्यादिवैशेषिकाधिकरणानुव्याख्यानोक्तसमाधिमाह—**वस्तुतस्त्विति** ।

---

[1] बुद्धिपदं न-**मु.** [2] द्वित्वाश्रय कार्यबुद्धि-**अ.** [3] नरूपमित्यत आह-**अ.**

विपरीतपरिमाणजन्यमेव । परमाणुद्व्यणुकपरिमाणं परिमाणा[1]रम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् त्रयणुकपरिमाणवदित्याद्यनुमानात् ॥

न च परमाणुपरिमाणं [2]परिमाणानारम्भकं नित्यपरिमाणत्वात् गगनपरिमाणवत्, अणुपरिमाणत्वात् मनःपरिमाणवदित्य[3]नेन सत्प्रतिपक्षता । द्रव्यसमवायिकारणपरिमाणत्वाभावस्योपाधित्वात् ॥

विपर्ययेणापीत्यादिवाक्यारूढत्वाय त्वदुक्तसङ्ख्याविपरीतेत्युक्तिः ॥

सुधोक्तप्रयोगमाह—**परमाणुद्व्यणुकपरिमाणमिति** । समुदायाभिप्राय[4]मेकवचनम् । परिमाणे इत्यर्थः । स्वस्वकार्यद्व्यणुकत्र्यणुकगतपरिमाणारम्भके इति[5] साध्यार्थः । द्रव्यसमवायिकारणगतपरिमाणत्वादिति हेत्वर्थः । अत्र द्रव्येत्युक्त्या शब्दसमवायिकारणगतगगनपरिमाणे, समवायीत्युक्त्या घटकारणदण्डादिपरिमाणे, गुणत्वादित्यनुक्त्वा परिमाणत्वादित्युक्त्या परमाण्वादिगतरूपादौ व्यभिचारशङ्का निरासः । आदिपदेन "द्व्यणुकत्र्यणुकपरिमाणे स्वाश्रयसमवायिकारणगतपरिमाणारब्धे कार्यगतपरिमाणत्वात् चतुरणुकादिपरिमाणव" दित्यादिसुधोक्तग्रहः । इत्याद्यनुमानात्परिमाणजन्यमेवानुमीयत इति पूर्वेणान्वयः ॥

सुधोक्ते एव प्रतिपक्ष[6]शङ्कातत्समाधाने चाह । **न चेत्यादिना** । मृत्पिण्डादिपरिमाणे व्यभिचारवारणाय हेतौ नित्येत्युक्तिः—**द्रव्येति** ॥

---

[1] अन्तरा इत्यधिकं-कुं. 'परिमाण' इत्यारभ्य, न चेत्यादौ 'पारिमाणं' इत्यन्तं नास्ति-क. [2] न परिमाणारम्भकं-मु-छ-ख. [3] दित्यनुमानेन-कुं-क. [4] येणै-इ. [5] त्यर्थः-इ. [6] क्षाशं-मु.

न चाप्रयोजको हेतुः। कारणगतगुणानां कार्य[1]-गुणं प्रति सजातीयत्वेनारम्भकत्वस्यौत्सर्गिकत्वात्। परिमाणसामान्यं प्रति कारणत्वग्रहदशायां परिमाणत्वस्य नियमेनोपस्थितेश्च ॥

गगनकालादिपरिमाणे साध्यव्यापकत्वात् साधनवति पक्षेऽभावेन साधनाव्यापकत्वादिति भावः। न च पूर्वसाधनव्यतिरेकत्वान्नायमुपाधिः, प्रतिपक्षमात्रोच्छेदापत्तेरिति वाच्यम्। प्राची[2]नहेतोरनुकूलतर्कवत्त्वेन साध्यव्याप्यत्वनिश्चये सति तद्व्यतिरेकस्य प्रतिपक्षानुमाने साध्यव्यापकत्व निश्चयात्। यत्र तु स्थापनाया आभासत्वं तत्रैव विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वम्। यथा शब्दोऽनित्यः गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यनेन सत्प्रतिपक्षे गुणत्वाभावेनोपाधिः। जलपरमाणुरूपे साध्याव्यापकत्वात्। अत्र पूर्वसाधनव्यतिरेकस्याप्युपाधित्वे न कोपि [3]दोष इति भावेन स्थापनायां निरुपाधिसहचारकार्यकारणभावग्रहरूपानुकूलतर्कौ व्यनक्ति। **न चाप्रयोजको हेतुरित्यादिना। औत्सर्गिकत्वादिति।** जातित एव प्राप्तत्वात् अपवादाभावे तस्यापि प्रमाणत्वात्। बाधकस्य चेहाग्रे निरसिष्यमाणत्वात् अस्याप्युत्सर्गविषयत्वमेवेति भावः॥

नचैवमपि तूलपिण्डादिपरिमाणस्य [4]शिथिलभूयोऽवयवसंयोगरूपप्रचयमात्रजन्यत्वात् तूलपिण्डसमवायिकारणगतपरिमाणे व्यभिचारी [5]स्थापनाहेतुरिति वाच्यम्। तस्यापि पक्षतुल्यत्वात्॥

---

1 'गत' इत्यधिकं-छ. 2 गुक्त-मु. 3 विशेष इति-इ. 4 प्रशि-अ. 5 र्स्थो-अ-इ.

ननु तूलपिण्डादिपरिमाणे प्रचयाख्य संयोग-विशेषस्य समानपरिमाणाल्पसङ्ख्याकावयवारब्धा-पेक्षया तादृशाधिकसंख्याकावयवारब्धद्रव्यगता तिशयितपरिमाणे बहुत्वसङ्ख्यायाश्च कारणत्व-दर्शनात् सामान्यविशेषन्यायेन परिमाणसामान्यं प्रति संयोगसामान्यस्य संख्या[1]सामान्यस्य वा

न चैवं सत्यंशे बाधः । प्रचयकारणताया अप्यनिवारणात् । न चोभय[2]कारणत्वकल्पने गौरवदोषः । "द्वयोरपि क्लृप्तशक्तित्वा" दिति सुधायामेवोक्तत्वात् । न च क्लृप्तशक्तित्वं परिमाणे [3]ऽसिद्धम् । कारणगतेत्यादिनोक्ततर्कद्वयसिद्धत्वात् । वक्ष्यमाणदिशा प्रचयसङ्ख्ययोः परिमाणहेतुत्वादिति भावः

कारणपरिमाणस्य कार्यपरिमाणं प्रतीव प्रचयसङ्ख्ययोरपि कारणत्वं क्लृप्तमिति इह परमाण्वादिगतसङ्ख्यापि कारणं स्यादिति शङ्कते—**नन्विति** । **संयोगविशेषस्येति** । कारणत्वदर्शनादित्य-न्वयः । [4]प्रचयः प्रसङ्गादुपात्तः । बहुत्वस्य कारणत्वग्रहे स्थलमाह । **समानेति** । तुल्यपरिमाणकपालद्वयारब्धघटापेक्षया [5]तत्तुल्यपरिमा-णकपालत्रयजन्यघटगतपरिमाण इत्यर्थः । **तादृशेति** । पूर्वद्रव्या-वयवसमानपरिमाणेत्यर्थः । **सामान्येति** । यद्विशेषयोः कार्यकारणभावो बाधकाभावे तत्सामान्ययोरपि कार्यकारणभाव इति न्यायेनेत्यर्थः ॥

कार्यगतपरिमाणं प्रति कारणगतपरिमाणमेव सर्वत्र हेतुर्न तु

---

[1] या वा–छ-संख्यासामान्येति नास्ति-ख. [2] यत्र का–कुं. [3] णसि–मु
[4] प्रचयेत्यादि नास्ति–कुं-इ. [5] तत् इति नास्ति–मु.

कारणत्वमस्त्विति चेन्मैवम्। औत्सर्गिकस्य नियतोपस्थितिकस्य च [1]बाधे सत्येव तद्विपरीते प्रमाणप्रवृत्तेः। न चैवं द्व्यणुकत्र्यणुकपरिमाणयोः परमाणुपरिमाणसाजात्यं स्यादिति वाच्यम्। गुणत्वसाक्षाद्व्याप्यजात्या साजात्यापादन इष्टापत्तेः। तद्व्याप्यव्याप्यजात्या तदापादने तन्तुपरिमाणगतस्य महत्वव्याप्यस्या [2]पकर्षरूपजातिविशेषस्य [3]पटपरिमाणेऽभावेन व्यभिचारात्। अन्यथा संख्यासंयोगजन्यत्वेऽपि महत्समवेतयोस्तयोर्महत्त्वजनकत्ववदणुसमवेतयोस्तयोरणुत्वजनकत्वं स्यात्॥

किञ्च द्व्यणुकादिपरिमाणस्य केवलसङ्ख्यायो[4]नित्व एव द्वित्वादिवत्सङ्ख्यात्वेन कारणसा-

---

प्रचयादिरपीति सिद्धान्तयति—**मैवमित्यादिना**। [5]यद्वा अन्यत्र सङ्ख्याया[6]मपि [7]क्लृप्तशक्तित्व[8]मस्तु। प्रकृते तु उत्सर्गतः प्राप्तपरिमाणहेतुत्वमेवास्तु बाधकाभावादित्याह—**मैवमित्यादिना**। अस्ति[9] परमाण्वादिपरिमाणारम्भवादेऽपि तुल्यपरिमाणापत्तिरेव बाधिकेत्याशङ्क्य निराह—**न चैवमिति**। परमाण्वादिपरिमाणस्य स्वकार्यगतपरिमाणारम्भकत्व इत्येवंशब्दार्थः—**साजात्यमिति**। तथा चाप्रत्यक्षतापत्तिरिति भावः। **साक्षाद्व्याप्येति**। परिमाणत्वजात्येत्यर्थः॥

तद्व्याप्यव्याप्येति। परिमाणं चतुर्विधम्। अणुत्वं, महत्त्वं,

---

[1]च इति नास्ति–कुं.• [2]स्योत्क–कुं–ग. [3]पटपदं न–ख. [4]गिते–क–छ–रा. [5]यद्वेत्यादि नास्ति–इ. [6]या अपि–मु. [7]"क्लृप्त . . . . प्रकृतेतु" इत्यन्तं नास्ति–मु. [8]त्वेपीहोत्सर्ग–अ. [9]स्तु–मु.

जात्यं स्यात् ॥

किञ्च परासिद्धं[1] परिमाणत्वावान्तरमणुत्वादि-जातिभेदमङ्गीकृत्ये[2]दमुक्तम् ॥

वस्तुतस्तु यथा त्र्यणुकादिषु महत्त्वमे[3]कजातीयमेवोत्कर्षापकर्षवत्, यथा[4]चाणुत्वं परमाणुद्व्यणुकयोः एवं परिमाणमवान्तरजातिरहितमेव सर्वद्रव्येषूत्कर्षापकर्षवद्वर्तते । एकस्यैवोत्कर्षापकर्षौ च प्रतियोगिभेदेन सन्निकर्षविप्रकर्षाविवाविरुद्धौ । विस्तरस्तु सुधायां द्रष्टव्यः ॥

तस्मादीश्वरस्य[5] सार्वज्ञादेर्वेदनिरपेक्षानुमानेना-

दीर्घत्वं, ह्रस्वत्वं चेति । नीलत्वपीतत्वाद्यवान्तरजातिवत्परिमाणत्वावान्तरजातिचतुष्टयमुपेत्य परमाणावेवाणुपरिमाणं द्व्यणुके ह्रस्वपरिमाणं त्र्यणुकादौ महत्त्वादीत्यभ्युपगमेन द्व्यणुकेप्यणुत्वरूपपरिमाणत्वावान्तरजातिमत्परिमाणं त्र्यणुके च ह्रस्वत्वरूपपरिमाणत्वव्याप्यजातिमत्परिमाणं स्यादित्यापादने चेत्यर्थः । यद्वा उत्कर्षापकर्षादिरूपया गुणत्वव्याप्य परिमाणत्वव्याप्यजात्येत्यर्थः ॥

स्वोत्प्रेक्षितपक्षैः सहोक्तानि पञ्चधा समाधानान्यपि[6] परिमाण[7]प्रवादाननु[8]कूलानीति मन्वानः "परमतमाश्रित्य परस्येदं दूषणाभिधानम्" इति सुधोक्तं हृदिकृत्वाह—**किञ्च परासिद्धेत्यादि । सुधायामिति ।**

---

[1] द्वप-ग-कुं. [2] त्यचे-मु. [3] एकपदं न-छुं-ख-क-रा. [4] वा-च-छ-क-रा. अवयवाणुत्वं पर-ख. [5] रसा-कुं-ग. [6] न पारि-मु-अ. [7] णवादा-मु-अ. [8] दानुकू-मु-अ.

सिद्धेः कल्पनागौरवं सुस्थम् ॥

[1]ईश्वरस्यानुमानिकत्वभङ्गः ॥ २२ ॥

[2]ईश्वरवादः समाप्तः ॥

ननु तथापि वर्णसमुदायरूपस्य [3] वेदस्य न नित्यत्वम्। शान्तः कोलाहलः श्रुतपूर्वो गकारो नास्तीत्यादिप्रत्यक्षेण, वर्णोऽनित्यः भावत्वे सति कृतकत्वादित्यनुमानेन च वर्णानामेवानित्यत्वा

वैशेषिकाधिकरणे समयपाद इत्यर्थः ॥

ईश्वरस्यानुमानिकत्वभङ्गः ॥ २२ ॥

ईश्वरवादः समाप्तः ॥

तथापीति। पैरुषेयवाक्येन धर्माद्यसिद्धावपि [4] पौरुषेयत्वे कल्पनागौरवदोषभावेपि वेद[5] पौरुषेयत्वे मानाभावेपीत्यर्थः। **न नित्यत्वमिति**। नानादिनित्यत्वमित्यर्थः॥

द्वितीयस्तबके कुसुमाञ्जलावुदयनोक्तमाह। **शान्त इति। श्रुतेति**। पूर्वं श्रुतः श्रुतपूर्व इत्यर्थः। शब्दोऽनित्य उत्पत्तिधर्मत्वादित्युदयनानुमानस्य परिष्कारपूर्वं मणावुक्तस्यायमनुवादो **वर्ण इत्यादि**।

---

[1] इति इत्यधिकं-छ. [2] ईश्वरवादः समाप्तः इति-ख पुस्तकभिन्नेषु नास्ति. [3] वेदपदं न-रा. [4] प्यपौ-इ. [5] दापौ-इ-अ.

दिति चेदुच्यते। शान्तः कोलाहल इति धीर्ध्वनि[1]विषयैव। ध्वनिविशेषस्यैव कोलाहलत्वात्। श्रुतपूर्वो गकारो नास्तीति धीस्तु नास्त्येव। श्रुत[2] एव गकारः पुनःश्रूयते एक एव गकारोऽसकृदुच्चारित इत्यादिप्रत्यभिज्ञाविरोधात्। किन्तूच्चारणेनोपलब्ध[3]वर्णस्यानुपलब्धिमात्रेण श्रुतपूर्वो गकारो न श्रूयत इत्येव[4]धीः। उक्तं हि टीकाकारैः "प्रागुच्चारणा[5]दनुपलब्धा वर्णा उच्चारणे सत्युपल[6]भ्यन्ते इत्येवानुभवसिद्धम्। न तु तेषामुत्पत्तिर्विनाशो वा" इति॥

मणौ वर्णात्मकशब्द इत्युक्तावपि मणिकृन्मतेऽशतस्सिद्धसाधनस्या दोषत्वाद्वर्णपदानर्थक्यम्। वर्ण इत्येव वा पूर्तौ शब्दपदानर्थक्यम्। रूपादिनार्थान्तरवारकं तदिति तु छलत्वात्तथाशङ्कैव न युक्तेति वर्णोऽनित्य[7] इत्येवानुवादःकृतः।

वर्णानामनित्यत्वेपि न वेदनित्यत्वक्षतिः। तथाप्यभ्युपेत्य तत्समाधत्ते। **उच्यत इत्यादिना**। व्यक्तं चैतद्वादान्ते ग्रन्थ एव॥

ध्वनिविशेषस्यैवेति। यत्तु वर्धमाने[8] अनभिव्यक्तवर्णत्वव्याप्यजातिविशेषो वर्णसमूह एव कोलाहल इत्युक्तम्। तन्न। वर्णशून्यध्वनिविशेषेपि कोलाहलपदप्रयोगात्। **प्रत्यभिज्ञेति**। तद्भ्रान्तित्वं त्वग्रे निरसिष्यत इति भावः। **उक्तं हीति**। "न चोच्चारणकाल एव वर्णा[9]

---

[1] विशेष इत्यधिकं-मु. [2] पूर्व इत्यधिकं-ख. [3] स्य व-च-ग-ख-कुं. [4] 'एव' इति नास्ति-क-ख-कुं. [5] णानु-कुं. [6] ब्धा-ख. [7] नित्य इति नास्ति-कुं. [8] नाभि-मु. [9] नामु-अ-इ.

अस्तु वा सा। [1]तथापि घटो नास्तीतिवन्न विशेष्यमात्रनिषेधिका। श्रुतपूर्वत्वविशिष्टनिषेधस्त्वलं कृतपूर्वश्चैत्रो नास्तीतिवत्पूर्वकालावच्छिन्नश्रवणध्वं [2]सरूपविशेषण[3]निषेधेनाप्युपपन्न[4]ः ॥

अस्तु वा सा विशेष्यमात्रनिषेधिका। तथापि-व्यञ्जक उच्चारणेऽव्यञ्जकत्वभ्रान्त्याऽलिङ्गेऽनुपलब्धिमात्रे योग्यानुपलब्धिरूपलिङ्गाभिमानाद्भ्रा-

---

नुत्पत्तिरिति वाच्य"मिति तत्त्वनिर्णयवाक्यसम्बन्धिटीकायां वर्णजन्मवर्णाभाववद्व्योरुच्चारणक्रियाविषयत्वमित्येतदुक्तमित्यर्थः ॥

अनुभवे विप्रतिपन्नं प्रत्याह—**अस्तु वा सेति**। श्रुतपूर्वो गकारो नास्तीति धीरित्यर्थः। **न विशेष्यमात्रेति**। घटस्य केवलत्वादस्य च सविशेषणत्वादिति भावः। **अलमिति**। पूर्वमलंकृतोऽलंकृतपूर्व इत्यर्थः। **विशेषणनिषेधेनेति**। "सविशेषणे हि विधिनिषेधौ विशेष्ये बाधे विशेषणमुपसंक्रामत" इति न्यायादिह च विशेष्यबाधस्य प्रागुक्तप्रत्यभिज्ञाविरोधेन व्यक्तत्वादिति भावः ॥

विशेष्यबाधे विवादिनं प्रत्याह। **अस्तु वा सेति**। धीरित्यर्थः। **तथापीति**। भ्रान्तिरूपेत्यादिनान्वयः। भ्रान्तिरूपत्वे बीजमाह। **व्यञ्जक इति**। वर्णो नास्ति अनुपलब्धेः स्तम्भादिवदिति लिङ्गाभासजन्यानुमितिरेव। न प्रत्यक्षरूपा। नापि प्रमितिरूपा। परमाण्वादावनुपलम्भे सत्यपि नास्तित्वाभावेन व्यभिचारितयानुपलब्धिमात्रस्यालिङ्गत्वेन तल्लिङ्गत्वस्याभिमानिकत्वात्। अलिङ्गे च लिङ्गत्वाभिमा-

---

[1] 'तथापि' इति नास्ति—**छ.** [2] ध्वंसपदं नास्ति—**मु-च**, ध्वंसेनाप्यु—**रा.**
[3] ध्वंसेनाप्युप—**छ-ख.** [4] ना—**कुं.**

न्तिरूपानुमितिरेव सा । न तु प्रत्यक्षा । प्रत्यासत्त्यभावात् ॥

न चेन्द्रियविशेषणता प्रत्यासत्तिः । चक्षुषा

नो योग्यानुपलब्धित्वभ्रममूलः । सोपि भ्रमः उच्चारणस्य न वर्णाभिव्यञ्जकत्वम् । किन्तूत्पादकत्वमेवेति भ्रान्तिमूल एवेत्यर्थः ॥

एतेन श्रुतपूर्वो गकारो नास्तीति प्रतीतिर्निरनुमानादित्यसत् । शब्दस्यैव पक्षीकरणे हेतोरनाश्रयत्वम् । आकाशस्य पक्षत्वे तद्वत्तयानुपलभ्यमानत्वहेतोर[1]नैकान्तिकत्वम् । शब्दसद्भावकालेपि तस्य सत्त्वात् । एवं कालपक्षेपि दोषात् । अहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलब्धिरहितत्वात् बधिरवदिति चेन्न । दृष्टान्तस्य साध्यविकलत्वात् व्याहतत्वाच्चेत्यादिखण्डनं निरस्तं ध्येयम् ॥

अतीतघटादौ ज्ञानविषयत्वाभावप्रतियोगित्वादिधर्मवदनुपलभ्यमानधर्मस्यापि सम्भवेनासिद्ध्यादेरनापत्तेरिति । **न तु प्रत्यक्षेति** । तादृशबुद्धेः प्रत्यक्षत्वेपि शुक्तिरूप्यादिप्रत्यक्षवत्प्रत्यभिज्ञारूपप्रबलप्रत्यक्षबाधाद्भ्रान्तिरेवेति ध्रुवचम् । तथाप्युदयनोक्तप्रत्यक्षत्वोपपादनखण्डनायैवमुक्तिः ॥

अस्ति हि श्रोत्रशब्दाभावयोर्विशेषणविशेष्यभाव इत्यादिनोदयनोक्तमाशङ्क्य निराह—**न चेन्द्रियेति** । श्रोत्ररूपेन्द्रिये शब्दाभावस्य सत्त्वेन तयोः सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वरूपविशेषणताप्रत्यासत्तिरित्यर्थः । विशेषण[2]भावेनैव समवायाभावयोर्ग्रहणादिति भावः—**चक्षुषेति** । स्वसम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणम् । न तु

---

[1] नैका—अ-इ. [2] विशेष्य इत्यधिकं—मु.

स्वविशेषणीभूतस्य घटनिष्ठरूपप्रतियोगिकाभावस्य ग्रहप्रसङ्गात् । [1]त्वदभिमतस्य योग्येऽधिकरणेऽनुपलब्धिरूपस्येन्द्रियसहकारि[2]णोऽसत्त्वाच्च । त्वन्मते [3]चाधिकरणस्य गगनस्यायोग्यत्वात् ॥

न चाधिकरणस्यायोग्यत्वेपि प्रतियोगिनो योग्यत्वात्तत्सहकारिणी योग्यस्यानुपलब्धिरस्तीति वाच्यम् । पार्थिवपरमाणौ जलत्वाभावस्य प्रत्यक्षत्वप्रसङ्गात् ॥

स्वविशेषणत्वेनैव । तथात्वे घटनिष्ठं यद्रूपं तत्प्रतियोगिकाभावस्य चक्षुष्यपि सत्त्वेन चक्षुषा विशेषणतारूपप्रत्यासत्त्या मम चक्षुषि घटरूपं नेति रूपाभावग्रहणप्रसङ्ग इत्यर्थः ॥

ननु प्रत्यासत्तेः फलबलकल्प्यत्वाद्रूपाभावादिना विशेषणतारूपप्रत्यासत्तिकल्पकं नेत्यतो दोषान्तरमाह—**योग्य इति** । यद्वा स्वसम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणम् । चक्षुषा च घटादिरूपाभावो रूपत्वादौ रूपं नेति गृह्यत एव । प्रकृते च श्रोत्रसंबन्ध्याकाशविशेषणतास्त्येव शब्दाभावस्येत्यतः किं योग्ये स्वसंबन्धिनि विशेषणतयाभाव ग्रहः उतायोग्ये ? आद्य आह—**योग्य इति । अनुपलब्धीति** । प्रत्यक्षयोग्यप्रतियोगिनोऽनुपलब्धीत्यर्थः । सिद्धान्ते साक्षिप्रत्यक्षत्वादाह—**त्वन्मत इति** । अन्त्योऽतिप्रसङ्गदुष्ट इति भावः । ननु नातिप्रसङ्गः । प्रतियोगिनो योग्यत्वस्यातिप्रसङ्गभञ्जकत्वादिति भावेनाशङ्क्य निराह । **न चेति** ॥

---

[1] त्वदभिमतस्येति नास्ति-ग. [2] रूपि इत्यधिकं-ग. [3] च इति नास्ति-क-रा.

न च प्रतियोगितद्व्याप्येतरप्रतियोग्यु[1]पलम्भकसामग्रीरूपयोग्यताविशिष्टानुपलब्धिस्तत्सहकारिणी। एवं च जातिग्रहे व्यक्तियोग्यताया अपि कारणत्वात्परमाणोश्चा[2] योग्यत्वान्नोक्तदोषः ।

यद्वा अनुपलब्धिर्हिप्रत्यक्षस्याभावग्रहे सहकारिणी। सा च नानुपलब्धिमात्रम्। अति प्रसङ्गात्। किन्तु योग्यानुपलब्धिः। सा च योग्येऽधिकरणेऽनुपलब्धिरूपा वा, योग्यस्य प्रतियोगिनोऽनुपलब्धिरूपा वा, योग्य[3]रूपानुपलब्धि[4]भूतानुपलब्धिरूपा वा? तत्रानुपलब्धेर्योग्यत्वं च किं प्रतियोगितद्व्याप्येतरेत्यादिरूपं वा, प्रतियोगिसत्त्वविरोधित्वरूपं वा, प्रतियोगिसत्त्वा[5]पादनेत्यादिरूपं वा? पक्षपञ्चकेऽपि न वर्णाभावस्य प्रत्यक्षतासिद्धिरिति भावेनाद्यं निराह। **योग्य इति**। द्वितीयमाशङ्क्य निराह। **न चेति** ॥

उक्तदोषनिरासाय तृतीयं पक्षं [6] कुसुमाञ्जल्युक्तमाशङ्क्य[7]निराह। **न चेति**। प्रतियोगि[8]घटादि,[9]यच्च घटादिव्याप्यं सन्निकर्षादि, ताभ्यामितरा [10]घटादिलक्षणप्रतियोग्युपलम्भकसामग्री सैवानुपलब्धेर्योग्यता। तद्विशिष्टानुपलब्धिरभावप्रत्यक्षे सहकारिणीत्यर्थः। घटाभावप्रत्यक्षे तथादर्शनादिति भावः। प्रतियोगिसत्त्वेनुपलब्धेरेवाभावः। तद्व्याप्ये सत्यपि प्रतियोगिनः सत्त्वनियमेनानुपलब्धिर्नेति ताभ्यामितरत्वेनोपलम्भकसामग्री विशेषिता। **नोक्तदोष इति**। उपलम्भकसामग्रीरूपयोग्यताऽभावेन पार्थिवपरमाणौ जलत्वाद्यभावप्रत्यक्षतापत्तिदोषो नेत्यर्थः। [11]नन्वेवं

---

[1]ग्यनुप-**रा.** [2] च इति नास्ति-**छ.** [3] भूत-**मु-अ.** [4] रूप-**मु-अ.** [5] संजन-**मु.** [6] 'यद्वा' इत्यादि एतत्पर्यन्तो ग्रन्थः नास्ति-**इ.** [7] 'आशङ्क्य' इति नास्ति-**कुं.** [8] मी-**मु.** [9] विः-**मु-अ.** [10] रापाद्यघटादि-**कुं.** [11] नन्वित्यादि नास्ति-**अ-इ-मु.**

विशेषगुणग्रहे त्वाश्रययोग्यता न हेतुः। अन्यथा-गन्धादिग्रहो न स्यादिति। शब्दाभावग्रह [1]उक्तरूपानुपलब्धिरस्तीत्युदयनोक्तं युक्तम्। एकस्य संयोगिनोऽपगमे सति संयोग[2]ध्वंसस्याप्रत्यक्षतापातात्। तत्र प्रतियोगिभूतात्संयोगात्तद्व्याप्यात्सन्निकर्षाच्चातिरिक्तस्य संयोगोपलम्भकस्यैकस्य संयोगिनोऽभावात्। वर्णोपलम्भकस्योच्चारणस्याभावेनोपलम्भकसामग्र्या असत्त्वाच्च॥

एतेन प्रतियोगिसत्त्वविरोध्यनुपलब्धिरूपा[3]

शब्दाभावोपि न प्रत्यक्षः स्यात् जातिग्रह इव विशेषगुणग्रहेप्याश्रययोग्यत्वस्य तन्त्रत्वा . . . . योग्यानुपलब्ध्यभावादित्यत आह। **विशेषगुणेति**। शब्दरूप[4]रसगन्धादिविशेषगुणेत्यर्थः। तथा च गगनलक्षणाधिकरणस्यायोग्यत्वेप्युक्तरूपयोग्यताविशिष्टशब्दानुपलब्धेर्भावेन श्रोत्रेण गगने शब्दाभावग्रहो युक्त इति भावः। कुतोप्रत्यक्षत्वापात इत्यतः यावदुपलम्भकमेलनरूपसामग्र्यभावादिति भावेनाह। **तत्रेति**। एकसंयोगिनोपगमस्थल इत्यर्थः॥

ननु संयोगाभावान्याभावप्रत्यक्षे सहकारिणीयमनुपलब्धेर्योग्यतेत्यत आह। **वर्णेति**॥

सन्निकर्षग्रन्थान्ते मण्युक्तदिशा शब्दाद्यभावप्रत्यक्षत्वानुकूलं चतुर्थपक्षभूतं योग्यत्वमनूद्य निराह। **एतेनेति**। प्रतियोगिसत्त्वविरोधीति बहुव्रीहिः। यस्या अनुपलब्धेः प्रतियोगिसत्त्वं विरोधि सानुपलब्धिर्योग्यानुपलब्धिः। भूतले घटाद्यनुपलब्धिस्तादृशी। परमाण्वाद्यनु-

---

[1] तु इत्यधिकं–क-ख-कुं-रा. [2] प्रध्वं–ख. [3] पयो–च. [4] रूपपदं न–कुं-ध.

योग्यानुपलब्धिस्तत्सहकारिणी, सा च शब्दाभावे संयोगध्वंसे चास्ति, शब्दादेः[1] सत्त्वेनुपलब्ध्ययोगात्, पार्थिवपरमाणुगते जलत्वाभावे तु नास्ति, व्यक्तेरयोग्यत्वेन जलत्वानुपलब्धिसम्भवादिति मण्युक्तं निरस्तम्। उक्तप्रत्यभिज्ञया शब्दस्य सत्त्वेपि व्यञ्जकाभावेनानुपलम्भसम्भवात् ॥

एतेनैव प्रतियोगिस[2]त्त्वासञ्जनप्रयु[3]क्तासञ्जनविषयभूतोपलब्धेरभावरूपा योग्यानुपलब्धिस्तत्सहकारिणी। अत एव [4]पक्षिलभाष्ये यदिस्यात्तर्ह्युपलभ्येतेति तर्कपुरस्कारमेवाभावज्ञानं व्युत्पादितम्। न चैवं घटे मनस्त्वात्यन्ताभावो वायौ

पलब्धिस्तु नैवम्। तत्सत्त्वेप्यनुपलब्धिसम्भवादिति भावः। **तत्सहकारिणीति**। अभावप्रत्यक्षसहकारिणीत्यर्थः। अस्मिन्पक्षे उदयनपक्षोक्तं [5]दोषद्वयं नेति व्यनक्ति। **सा चेति**। शब्दादेरित्यादिपदेन संयोगग्रहः। पूर्वोक्तदोषश्च नेत्याह। **पार्थिवेति। उक्तेति**। एक एव गकारोसकृदुच्चरित इति प्रागुक्तप्रत्यभिज्ञयेत्यर्थः ॥

प्रथमं पक्षमनूद्य निराह—**एतेनेति। प्रतियोगिसत्त्वासञ्जनेति**। आसञ्जनं देश विशेषे वर्तमानता। तत्प्रयुक्तासञ्जनविषयत्वं यस्या उपलब्धेः तादृशोपलब्ध्यभावो योग्यानुपलब्धिः। प्रतियोगिसत्त्वासञ्जनप्रसञ्जितप्रतियोगिकत्वमनुपलब्धेर्योग्यत्वमित्यर्थः—**तत्सहकारिणी**

---

[1] दौ–छ. [2] त्वप्र इति शोधितमस्ति–छ-त्वाप्र–ख. [3] योज्या–छ.
[4] प्रक्षि–ख. [5] क्तदो–मु.

रूपवदन्योन्याभावश्च प्रत्यक्षः स्यात्; यदि घटे-मनस्त्वं स्यात्तर्हि योग्यव्यक्तिवृत्तित्वात् घटत्वमि[1]-वोपलभ्येत; यदि महति वायौ रूपवत्तादात्म्यं स्यात् तर्हि पृथिव्यामिवोपलभ्येतेत्या[2]सञ्जनसम्भ-वादिति वाच्यम्। उक्तयोग्यानुपलब्धेःसत्त्वेनेष्टा-पत्तेरिति निरस्तम्। उक्तरीत्या शब्दस्य सत्त्वेप्य-नुपलम्भसम्भवेन शब्दसत्त्वासञ्जनेनोपलब्ध्यासञ्ज-नासम्भवात्। कथं च विपर्यये पर्यवसानसहिते-तर्के नियमेन सापेक्षस्याभावज्ञानस्याननुमिति-त्वम्। तस्मात्परस्यात्यापि न वर्णध्वस ऐन्द्रियकः। पराभिमतस्य [3]सत्तयेन्द्रियसहकारिणोऽनुपलम्भ-स्याभावात्॥

अभावप्रत्यक्षसहकारिणी—**उक्तेति**। व्यञ्जकाभावेनत्युक्तरीत्येत्यर्थः। अस्मिन्पक्षेऽनुमितित्वं स्फुटमित्याह—**कथमिति**। यदीह शब्दः स्यादुपलभ्येत नोपलभ्यते अतो नास्ति शब्द इति विपर्यये पर्यवसानसहिते। तर्क इति विषयसप्तमी। तादृशतर्कविषये नियमेनापेक्षासहितस्येत्यर्थः। त्वन्मते तर्कस्या[4]नुमानानुग्राहकमात्रत्वे-नानुमितेरेव तर्कसापेक्षत्वादिति भावः—**पराभिमतस्येति**। प्रति-योगिसत्त्वप्रसञ्जितप्रतियोगिकत्वादिरूपयोग्यत्वस्येत्यर्थः। अनुपलम्भस्ये-त्यन्वयः—**सत्तयेति**। स्वरूपसत्तया न तु ज्ञात[5]येत्यर्थः। तथात्वे-ह्यनुमानरूपतया पृथङ्ज्ञानत्वेनेन्द्रियसहकारित्वाभावादिति भावः॥

---

[1] लेवो–**ख**. [2] सर्वत्र 'प्र' इत्यधिकमास्ति–**ख**. [3] सत्तयेति नास्ति–**छ-रा**. [4] 'नियमेन' इत्यधिकं–**मु**. अ. [5] ततया–**मु**.

मन्मते तु नेन्द्रियस्यानुपलब्धिः सहकारिणी। तथा हि। सहकारिण्या अनुपलब्धेः प्रत्यक्षाप्रत्यक्षसाधारणोपलब्धिसामान्याभावरूपत्वे शङ्ख शङ्कत्वेन लिङ्गेन श्वेत्येऽनुमिते श्वेतो नेत्यभावभ्रमानुदयप्रसङ्गः ॥

न चोक्तरूपानुपलब्धिरभावप्रमाहेतुरिति वाच्यम्। गुञ्जापुञ्जे चक्षुषारोपितेन वह्नित्वेनोष्णस्पर्शानुमितौ सत्यां त्वचोष्णस्पर्शाभावप्रमानुदयप्रसङ्गात् ॥

ननु भवन्मते घटाभावादिग्रहे चक्षुरादेर्यादृशोऽनुपलम्भः सहकारी तादृश एव ममापि शब्दाभावग्रहेऽस्त्वित्यत आह—**मन्मते त्विति**। चक्षुरादिना घटादेरिव तदभावस्यापि साक्षात्संयोगसम्बन्धेनैव ग्रहणोचितौ किमनुपलब्धिसहकारेणेति भावेन सहकारिताखण्डनमारभते—**तथा हीति ॥**

अनुपलब्धिरिन्द्रियसहकारिणीति वदन्[1] प्रष्टव्यः अनुपलब्धिपदेन प्रत्यक्षादिसाधारणप्रतियोगिज्ञानसामान्याभावो वा प्रत्यक्षादिसाधारणप्रतियोगिप्रमाभावो वा प्रतियोगिप्रत्यक्षाभावो वा अभावग्राहकेन्द्रियकरणकप्रतियोगिप्रत्यक्षाभावो (वा) विवक्षितः। आद्येपि[2] फलीभूताभावग्रहपदेनाभावज्ञानमात्रमुताभावप्रमेति। आद्य आह—**सहकारिण्या इति**। आद्यस्य द्वितीयमाशङ्क्य निराह—**न चेति**। वह्नित्वेनेत्यनन्तरं लिङ्गेनेति शेषः ॥

---

[1] 'वादी' इत्यधिकम्—इ. [2] अपिपदं न—मु.

न च प्रमात्वविशेषितोक्तरूपोपलब्धिसामान्याभावोऽभावप्रमाहेतुरिति वाच्यम् । शुक्तौ रूप्यभ्रमे सत्यपि रूप्यप्रमाऽभावस्य सत्त्वेन रूप्याभावप्रमाप्रसङ्गात् ॥

न चोक्तरूपानुपलब्धिः प्रत्यक्षरूपोपलब्धिविशेषाभावरूपा, ततो नोक्तदोष इति वाच्यम् । तथापि मण्डूकवसाञ्जनदोषेण वंशमुरगत्वेन [1]चक्षुषा पश्यतस्त्वचोरग[2]त्वाभावाप्रमितिप्रसङ्गात् ॥

प्रत्यक्षशब्देनाभावग्राहकत्वेना[3] भिप्रेतेन्द्रिय[4]कारणकज्ञानविवक्षायामपि कपाले घटो[5]स्तीति चाक्षुषसाक्षात्कारस्य विनश्यदवस्थाऽऽपन्ने घटे उत्पन्नत्वाद्घटध्वंसानन्तरं चक्षुषा घटध्वंससाक्षात्कारो न स्यात् । ध्वंससाक्षात्कारोत्पत्त्यपेक्षया पूर्वक्षणरूपे ध्वंसोत्पत्तिक्षण उक्तरूपस्य घटसाक्षात्कारस्य स्थित्या तदभावरूपहेत्वभावात् ॥

तस्माद्भावसाक्षात्कारेऽभावानुपलब्धिरिवाभावसाक्षात्कारेऽपि[6] न भावानुपलब्धिः सहकारिणी ।

द्वितीयमाशङ्क्य निराह—**न च प्रमात्वेति** । तृतीयमनूद्य निराह—**न चोक्तरूपेति** । अभावग्राहकेन्द्रियसहकारिरूपेत्यर्थः । अन्त्यपक्षमनूद्य निराह—**प्रत्यक्षेति** । **चाक्षुषसाक्षात्कारस्येति** । विनश्यदवस्थापन्नघटविषये[7]जातस्येति भावः ॥

[1] चक्षुषा इति नास्ति—**ख.** [2]गाभाव—**च-छ.** [3] भिमतें—**च-ख-क.** [4] करणक—**ख-क-रा.** [5]नास्तीति—**छ-क.** [6]'न' इत्यनन्तरमस्ति—**च-मु.** [7] द्वारस्येति—**अ.**

किं त्ववर्जनीयसान्निधिः । तदुक्तं पद्धतौ अनुपलब्धिस्त्ववर्जनीयसान्निधिरेवेति । अभावप्रत्यक्षतायां त्व[1]धिकरणयोग्यता तन्त्रम् । अन्यथा परमाणौ जलत्वाभावग्रहप्रसङ्गस्यापरिहार्य[2]त्वात् । इतरनिरूप्येषु ज्ञानेच्छादीर्घत्वपरत्वपृथक्त्वादिषु क्लृप्तत्वाच्च । अन्योन्याभावग्रहे त्वयाऽपि स्वीकृतत्वाच्च । न तु त्वदुक्तानेकविशेषणविशिष्टानुपलब्धिस्तन्त्रम् । अक्लृप्तत्वात् । विशेषणप्रयोजनस्यातिप्रसङ्गनिरासस्य दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतयैव सिद्धेश्च ॥

नन्वभावप्रत्यक्षत्वप्रयोजकाधिकरणयोग्यता किमिन्द्रियग्राह्यत्वमात्रं किं वा प्रतियोगिग्राहकेन्द्रियग्राह्यत्वं यद्वाऽभावग्राहकेन्द्रियग्राह्यत्वम् ।

तर्ह्यभावप्रत्यक्षे किं तन्त्रमित्यत "तत्प्रत्यक्षतायां धर्मिण एव प्रत्यक्षतोपयुज्यते" इति पृथगधिकरणीयसुधावाक्यं हृदिकृत्वाऽऽह ॥ **अभावेति । इतरेति ।** ससम्बन्धिकपदार्थेष्वित्यर्थः—**अनेकेति ।** प्रतियोगिसत्त्वासञ्जनप्रसञ्जितप्रतियोगि[3]कत्वादिरूपानेकविशेषणविशिष्टेत्यर्थः॥

नन्वनुपलब्धिमात्रस्य ग्राहकत्वे पार्थिवपरमाण्वादौ जलत्वाद्यभावः प्रत्यक्षः स्यादित्यतिप्रसङ्ग इत्यत आह—**विशेषणेति ।** दीर्घत्वेति परिमाणविशेषः । आदिपदेन पृथक्त्वादिप्रागुक्तधर्मग्रहः ॥

अस्तूक्तरीत्याऽभावप्रत्यक्षत्वेऽधिकरणयोग्यत्वमेव तत्रं तावताऽपि शब्दाद्यभावप्रत्यक्षता सेत्स्यतीति भावेन शङ्कते—**नन्विति ।**

---

[1] यामधि–क-ख-कुं. [2] रात्–क-ख-ग-कुं. [3] गित्वा–कुं.

आद्येऽधिकरणं प्रतियोगिसमवायि चेदाश्रयनाश-जन्यो भूतलनिष्ठो घटध्वंसः प्रत्यक्षो न स्यात् । आश्रयमात्रं चेच्छब्दाधिकरणमपि योग्यमेव । वने सिंहनाद इत्यादिप्रतीत्या विशेषणतारूपप्रत्यासत्त्याधिकरणस्य वनस्यापि प्रत्यक्षत्वात् । न द्वितीयः । स्तंभजीवनिष्ठयोः पिशाचेश्वरान्योन्याभावयोरप्रत्यक्षत्वापातात् । न तृतीयः । वायुगुडपाषाणेषु रूपतिक्तरससौरभाभावानामप्रत्यक्षत्वापातादिति चेन्न ॥

प्रत्यक्षो न स्यादिति। तत्राश्रय[1]भूतसमवायिनोनाशेनै[2]न्द्रियकत्वारोपाधिकरण[3]योग्यताऽभावात् । भूतलस्य चासमवायित्वादिति भावः **वनस्यापि प्रत्यक्षत्वादिति** । तथा च तदभावस्यापि प्रत्यक्षत्वमेवेति भावः ॥

अप्रत्यक्षत्वेति। मणौ हि सन्निकर्षग्रन्थान्ते स्तम्भे पिशाचतादात्म्या[4]भाव प्रत्यक्ष इति प्रतियोगिसत्त्वविरोध्यनुपलब्धिरूपयोग्यानुपलब्धिरभावप्रत्यक्षनियामिकेति प्रत्यक्षेस्तम्भादौ पिशाचा[5]न्योन्याभावप्रत्यक्षत्वमुपपादितम् [6]तन्न स्यात् । तत्र भवदभिमत[7]प्रतियोगिग्राहकेन्द्रियग्र[illegible]न्द्रियस्यैव योग्यतया अभावात् । प्रतियोगिनस्तत्रातीन्द्रियत्वादिति भावः ॥

वायुगुडेत्यादि। तत्र यथाक्रमं रूपतिक्तरसगन्धाभावानां चक्षूरसनघ्राणेन्द्रियग्राह्यत्वात् वाय्वादीनां च क्रमेण चक्षूरसनघ्राण[8]विषयत्वेन तत्राभावग्राहकेन्द्रियग्राह्यत्वाभावादिति भावः ॥

---

[1] र्यो–अ. [2] वेन्द्रि–अ. [3] णेयो–कुं. [4] त्म्यभा–कुं [5] द्यन्यो–अ· [6] त्तत्रापि संमतमित्यधिकम्–अ. [7] तस्यप्र–इ-अ. [8] द्यवि–मु.

यन्निष्ठत्वेनाभावो ज्ञायते तस्य प्रतियोगिसमवा[1]यिरूपस्य वान्य[2]रूपस्य वाऽधिकरणस्याभावग्राहकत्वेनाभिमतेन्द्रियग्राह्यत्वमधिकरणयोग्यतेति स्वीकारात् ॥

एवं च कपालनाशजन्यस्य भूतलनिष्ठस्य घटध्वंसस्य स्तम्भजीवनिष्ठयोः पिशाचेश्वरान्योन्याभावयोश्च प्रत्यक्षता। सिद्धा भूतलस्तम्भयोर्घटध्वंसपिशाचान्योन्याभावग्राहकचक्षुरादिग्राह्यत्वात्। जीवस्यापीश्वराद्भेदग्राहकसाक्षिग्राह्यत्वात् ॥

अत एवोक्तमनुव्याख्याने ॥

"शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते ।
अनुभूतिविरोधेन कथमेकत्वमुच्यते" ॥ इति ।

अधिकरणपदेनाभावप्रतीत्यधिकरणमात्रमित्युपेत्य अन्त्यपक्षाङ्गीकारेण समाधिमाह—**यन्निष्ठत्वेनेति** । पूर्वोक्तदोषं निराह—**एवं चेति** । तार्किकरीत्या मानसत्वभ्रमनिरासायाह—**जीवस्येति** । यद्वा जीवेश्वरभेदस्य द्वासुपर्णेत्याद्यागमग्राह्यतया कथमिन्द्रियग्राह्यत्वमित्यत आह—**जीवस्येति** । भेदान्योन्याभावयोरेकत्वाद्भेदेत्युक्तम्—**साक्षीति** । स्वरूपेन्द्रियग्राह्यत्वादित्यर्थः—**अत एवेति** । उक्त[3]रूपेन्द्रियग्राह्यत्वरूपाधिकरणयोग्यत्वस्याभावप्रत्यक्षे [4]तन्त्रत्वादेव । द्वितीयाध्यायतृतीयपादे "पृथगुपदेशात्" इत्यत्र शास्त्रैकगम्येश्वरभेदो जीवे साक्षिप्रत्यक्षसिद्ध इत्युक्तमित्यर्थः—**ईयते** । साक्षिणा ज्ञायत इत्यर्थः ॥

---

[1] य–**च-ख.** [2] 'अन्यरूपस्येति नास्ति'–**छ.** [3] स्वरू–**अ.** [4] क्षत्वतं–**इ-अ.**

वनादिकं च शब्दाभावग्राहकत्वेनाभिमतश्रोत्राग्राह्यमिति न शब्दाभावस्य श्रावणता ॥

यत्तु वाय्वादौ रूपाद्यभावानामप्रत्यक्षत्वापादनं, तन्न। [1]तन्मते नीरूपो वायुः, गुडो न तिक्तः इति वाय्वादिविशेष्यकप्रतीतीनामिव मन्मतेपि[2] वायौ न रूपं गुडे न तिक्तेति वाय्वादिविशेषणकप्र[3]त्ययानामपि लैङ्गिकत्वेनेष्टापत्तेः। तत्र विशेष्ययोग्यतारूपप्रत्यक्ष[4]त्वहेत्वभावेनेव प्रकृतेपि दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतारूपतद्धेत्वभावेन योग्यानुपलब्धिरूपलिङ्गाद्यनुसंधानकल्पनात्। न च भट्टमत इव मन्मतेऽनुपलब्धिरप्यनुमेया। येनानुपलब्धेरप्यनुपलब्ध्यन्तरानुमेयत्वेनानवस्था स्यात् ॥

न चैवं वाय्वादौ रूपाद्यभावस्यानुमेयत्वे चक्षु-

शब्दाधिकरणमपि योग्यमेवेति प्रागुक्तं निराह—[5]**वनादिकमिति**। प्रागुक्त[6] दोषान्तरं च निराह—**यत्त्विति**। ननु वाय्वादिविशे[7]ष्यकप्रतीतावधिकरणयोग्यत्वाभावाल्लैङ्गिकत्वं युक्तमित्यत आह—**तत्र विशेष्येति**। **प्रकृतेपीति**। वाय्वादिविशेषणकरूपाद्यभावप्रतीताविति्यर्थः। स्यादित्यनन्तरं किंतु साक्षिप्रत्यक्षेति योज्यम्। "अस्मत्पक्षेऽनुपलब्धेः [illegible]नवस्थे"ति प्रमाणलक्षणटीकोक्तेरिति

---

[1] त्व–**ग-छ-ख-क-रा.** [2] अपिपदंन–**ख क-ग-रा** [3] तीतीनां–**क.**
[4] क्षहे–**ग-ख-क-रा.** [5] वेदादिकमिति–**ई** वर्णादिकमिति–**अ.** [6] क्तदो–**इ** [7] ष्यप्र–**अ.**

रादिव्यापारवैयर्थ्यम्, पक्षस्य वाग्वादेश्चक्षुराद्य-योग्यत्वात्, लिङ्गीभूताया अनुपलब्धेश्च साक्षि-वेद्यत्वात्, प्रतियोगिनश्च स्मरणादिति वाच्यम्। लिङ्गीभूतानुपलब्धिविशेषणयोग्यतान्तर्गतालाको-दिग्रहार्थत्वात् ॥

उक्तं हि प्रमाणलक्षणे "योग्यानुपलब्धेश्च लिङ्गत्वम्" इति । लिङ्गत्वेनोक्ता [1]योग्यानुपल-ब्धिश्च [2]न ग्राहकाभाव[3]प्रयुक्ता ॥

भावः । वैयर्थ्यमित्युक्तं व्यनक्ति—**पक्षस्येत्यादिना** । रूपादिलक्षण-प्रतियोगिज्ञानार्थं च नेत्याह—**प्रतियोगिनश्चेति** । **अनुपलब्धिविशे-षणेति** । अनुपलब्धिमात्रं नाभावग्राहकम् व्यभिचारात् । किंतु योग्या-नुपलब्धिरेव । योग्यता च प्रतियोग्युपलम्भकसामग्र्यादिरूपेति भावः । **योग्येति** । टीकोक्तरीत्या योग्यस्यानुपलब्धिः [4]योग्यानुपलब्धिरिति विग्रहः । संसर्गाभावग्रहे प्रतियोगियोग्यताऽपि तन्त्रमित्यग्रे व्यक्तत्वात् ॥

न चैव "मनुपलब्धिस्त्व[5]र्वर्जनीयसन्निधि" रिति प्रागुक्तपद्धति-वाक्यविरोधः "अभावो[6]नुमा प्रत्यक्षं चे" ति प्रमाणलक्षणेऽनाविद्वैविध्य-स्याप्युक्तया प्रत्यक्षेणाभावग्रहेऽनुपलब्धिरवर्जनीयसन्निधिः अन्यत्र लिङ्ग-त्वेनेत्यविरोधात् ॥

नन्वनुपलब्धिलिङ्गतास्थळेऽनुपलब्धेरुपलम्भकसामग्र्यभावनिमित्त कतया तत्साहित्यरूपयोग्यताख्यविशेषणाभावाद्धेतोरसिद्धिरित्यत आह—**लिङ्गत्वेनेति** ॥

---

[1] क्तानुप-**ग-ख**. [2] 'न' इति नास्ति—**ग-छ-क-ख-रा**. [3] वाप्र-**ग-छ**. [4] ब्धिर्रति विग्रहः—**इ**. [5] 'तु' इति नास्ति—**इ**. [6] वेऽनु-**मु**.

न चाधिकरणयोग्यतायास्तन्त्रत्वे आत्मादौ धर्माद्यभावोपि प्रत्यक्षः स्यादिति शङ्क्यम् । संसर्गाभावग्रहे त्वदभिमता प्रतियोगियोग्यताऽपि तन्त्रमिति मया स्वीकृतत्वात् । दृष्टानुसारिणी हि कल्पना ।

ध्वनिध्वंसोपि योग्यानुपलब्धिरूपलिङ्गगम्य एव । न तु प्रत्यक्षः । अत एव ॥

"क्वचिद्घटाद्यभावोपि प्रत्यक्षेणावगम्यते ।" इति ब्रह्मतर्के, "अभावोऽनुमा प्रत्यक्षं च परामर्शापरामर्शविशेषादिति" प्रमाणलक्षणे, "प्रायेणानुमानेऽन्तर्भाव[1]ज्ञापनाय क्रमोल्लङ्घन"मिति प्रमाणलक्षणटीकायां च, प्रत्यक्षप्रतियोगिकाभावस्यापि

कुसुमाञ्जल्याद्युक्तमाशङ्कते—**न चेति**। **तन्त्रत्व इति**। अभावप्रत्यक्षत्व इति शेषः—**प्रतियोगियोग्यताऽपीति**। एतेन "अधिकरणयोग्यत्वं भेदग्रहे तन्त्र"मिति सुधोक्तिः "प्रतियोगियोग्यत्वं तन्त्र"मिति लक्षणटीकोक्तिश्चाविरुद्धोपपादिता ज्ञेया—**अत एवेति**। प्रागभावादिरूपसंसर्गाभावग्रहेऽधिकरणप्रतियोगिनोर्द्वयोरपि योग्यत्वस्यापेक्षितत्वादेवेति[2] बाहुल्येनानुमानान्तर्भावादेवेत्यर्थः । क्वचिदेव प्रत्यक्षत्वमुक्तमित्यन्वयः । तत्त्वनिर्णयोक्तब्रह्मतर्कवाक्ये इत्यर्थः—**क्रमेति**। अभावोऽनुमा प्रत्यक्षं चेति[3] मूलवाक्ये प्रत्यक्षमनुमा चेति वक्तव्ये अनुमाप्रत्य-

---

[1] सूचनाय–**ग**-कथनाय–**क**. [2] 'वा' इत्याधिकम्–**मु**. [3] इतः, 'क्रमव्यत्यासो' इत्येतत्पर्यन्तं नास्ति–**इ**.

क्वचिदेव प्रत्यक्षत्वमुक्तम् ॥

तस्माद्वर्णानित्यत्ववादिनस्तव रीत्याऽपि वर्णध्वंसग्रहे सहकारि[1]णोऽभावात्प्रत्यासत्त्यभावाच्च तद्नित्यत्वे न प्रत्यक्षं मानम् ॥

शब्दानित्य[2]त्वस्य प्रत्यक्षत्वभङ्गः ॥ २३ ॥

ननु तर्हि योग्यानुपलब्धिरूपं लिङ्गं वर्णध्वंसादौ मानम[3]स्त्विति चेन्न । व्यञ्जकाभावेनाप्यनुपलम्भसंभवेन विशेषणासिद्धेः ॥

क्षंचेति क्रमव्यत्यासो बाहुल्येनानुमानान्तर्भावद्योतनायेति टीकार्थः[4]--- **सहकार्यभावादिति** । योग्यानुपलब्धिरूपसहकार्यभावादित्यर्थः — **प्रत्यासत्तीति** । इन्द्रियविशेषणतोदर्दूषितत्वादिति भावः । "न प्रत्यक्षम्" इति पदविभागः ॥

वर्णानित्यत्वस्य[5] प्रत्यक्षत्वभङ्गः ॥ २३ ॥

"व्यञ्जकभावाभावाभ्यामेवोपलम्भानुपलम्भा 'विति तत्त्वनिर्णयटीकां हृदि कृत्वाऽऽह—**व्यञ्जकेति** । ध्वनिरूपव्यञ्जकेत्यर्थ.—**विशेषणेति** । प्रतियोग्यनुपलम्भक[6]सहितानुपलब्धेरेव योग्यानुपलब्धित्वाद्व्यञ्जकाभावनिबन्धनानुपलब्ध्यभावनिश्चयेंऽधकारावृते घटवति गेहे घटाभावप्रमापातादिति भावः ॥

---

[1] र्यभा–**ग.** [2] त्वप्र–**ग** [3] स्ती–**ख**-रा. [4] ततः '**प्रत्यासत्तीति**' इत्येवास्ति–**इ.** [5] त्वप्र–**मु.** [6] म्भस–**इ.**

एतेन वर्णः[1] प्रयत्नोत्पाद्यः[2] तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलभ्यमानत्वात् घटवत् इति निरस्तम्। विशेषणस्यापाततः सन्दिग्धासिद्धेः। विमर्शे वक्ष्यमाणरीत्या [3]निश्चितासिद्धेश्च ॥

एतेनैव वर्णोऽनित्यः उत्पत्तिमत्त्वे सति भावत्वात्, सामान्यवत्त्वे सति अस्मदादिबहिरिन्द्रिय[4]ग्राह्यत्वात्[5]घटवत्, प्रत्यक्षविशेषगुणत्वात् घट-

---

मणिकृदाद्यभिमतहेतूनाशङ्क्य निराह—**एते**[6] **नेति**। प्रयत्नाभिव्यङ्ग्ये प्रयत्नानन्तरमुपलभ्यमाने व्यभिचारनिरासाय हेतौ तदित्यादिसत्यन्तम्। गगनादौ तन्निरासाय विशेष्यम्—**आपातत इति**। नित्यत्वसाधकविशेषादर्शनदशायामित्यर्थः—**विमर्श इति**। उत्तरभङ्गे वक्ष्यमाणदिशा प्रत्यभिज्ञाविरोधादनित्यो न भवतीति विशेषदर्शने सतीत्यर्थः॥

एतेनैवेति। ध्वंसे व्यभिचारनिरासाय हेतौ भावत्वादिति विशेष्योक्तिः। गगनादौ तन्निरासाय सत्यन्तम्। द्वितीयहेताविन्द्रियप्रत्यक्षत्वादित्यस्येन्द्रियकरणकज्ञान[7]विषयत्वादित्यर्थ। क्वचिदिन्द्रियग्राह्यत्वादित्येव पाठः। तत्र प्रत्यक्षत्वमात्रस्यात्मनि व्यभिचारात् बहिरिन्द्रिये[8]त्युक्तिः। तथापि योगिबहिरिन्द्रियप्रत्यक्षत्वमादायोक्तदोषनिरासाय—**अस्मदादीति**। घटत्वादौ तन्निरासाय सत्यन्तम्। तन्मात्रस्यात्मन्यपि सत्त्वाद्विशेष्यम्। तृतीये च गुणत्वमात्रस्य गगनादिपरि-

---

[1] र्णाः—छ. [2] द्याः—छ. [3] संदिग्धा क. [4] प्रत्यक्षत्वात्—ग. [5] च इत्यधिकं—छ. [6] नैवेति—अ [7] करणत्वात्—अ. [8] ग्राह्येत्यधिकं—मु.

रूपवत्, उत्कर्षापकर्ष[1]वत्त्वात् मधुरादिरसवत् बहिरिन्द्रियव्यवस्थापकगुणत्वात् घट[2]रूपवदित्यादि[3]मण्युक्ता नुमानं तत्र मानम्। विपक्षे च शब्दध्वंसग्राहकप्रत्यक्षानुपपत्तिर्बाधिकेति निरस्तम्। विपक्षे बाधकस्यैव निरासात्॥

माणादौ, विशेषगुणत्वस्य जलपरमाण्वादिरूपादौ, प्रत्यक्ष[5]गुणत्वमात्रस्य चात्मैकत्वादौ, सत्त्वाद्व्यभिचारनिरासाय प्रत्यक्ष[6]गुणत्वादित्युक्तिः—**उत्कर्षेति**। उत्कर्षवत्त्वे सत्यपकर्षवत्त्वादित्यर्थः। एकैकस्य गगना[7]दिपरिमाणे परमाण्वादिपरिमाणे च सत्त्वादुभयोक्तिः। तारमन्द्रत्वादिरूपोत्कर्षादिः पक्षे, दृष्टान्ते च माधुर्यातिशयादिः, तथापि जातिरूपोत्कर्षादिरुभयत्र सम इति भावः—**बहिरिन्द्रियेति**। शब्दज्ञानं करणसाध्यम् कार्यत्वात् इति करणसामान्यसिद्धौ चक्षुरादेरूपादिज्ञानकरणत्वादिना शब्दज्ञानाहेतुत्वात्परिशेषाच्चक्षुरादिबाह्येन्द्रियचतुष्टयादन्यच्छोत्रेन्द्रियं सिद्ध्यतीति श्रोत्ररूपबहिरिन्द्रियव्यवस्थापकगुणत्वादित्यर्थः। गुणत्वमात्रस्य गगनादिपरिमाणादिगुणे इन्द्रियव्यवस्थापकगुण[8]त्वस्यात्मगतैकत्वादौ बहिरिन्द्रियव्यवस्थापक[9]त्वमात्रस्य रूप[10]त्वरसत्वेन व्यभिचारनिरासाय बहिरिन्द्रियव्यवस्थापकगुणत्वादित्युक्तम्। ननु चैतद्ध्वनाव[11]प्यस्तीति चेत् किं तावता। यथोक्तसाध्यस्यापि तत्र सत्त्वात् —**तत्रेति**। वर्णानित्यत्व इत्यर्थः। एतेनेत्युक्तं व्यनक्ति—**विपक्ष इति**॥

---

[1] कत्वात्–**ग** [2] गत' इत्याधिकम्–**छ-ख-क-रा.** [3] मण्युक्तेति नास्ति–**ग-ख.** [4] क्तमनु–**छ-ख-रा.** [5] क्षादि–**इ.** [6] विशेषेत्याधिकं–**इ.** विशेष्येत्याधिकं–**अ.** [7] आदिपदं न–**इ.** [8] णस्य–**अ.** [9] कमा–**अ.** [10] त्वरसत्वादौ सत्त्वेन–**इ-अ.** [11] न्यादाव–**मु.**

आद्ये हेतावुत्पत्तिमत्त्वस्य द्वितीये प्राभाकरं प्रति सामान्यवत्त्वस्य नैयायिकं प्रत्यपि क्षणिके[1] शब्दे विषयजन्येन्द्रियकरणकज्ञानविषयत्वस्य तृतीयपञ्चमयोर्मां प्रति गुणत्वस्य चतुर्थे उत्कर्षवत्त्वे सत्यप-

प्रातिस्विकदोषं चाह—**आद्य इत्यादिना** । षष्ठ्यन्तानामसिद्धेश्चेत्य[2]नेनान्वयः । उत्पन्नो गकार इति मण्युक्तप्रतीतिस्तु नास्त्येवेति भावः—**प्राभाकरं प्रतीति** । तस्यापि वर्णनित्यत्ववादित्वेन तं प्रत्यपि प्रयोज्यत्वात् । नित्यत्ववादे गकारादिव्यक्तेरेकत्वेन तत्र सामान्याभावात् । गुणत्वपक्षेपि तेन गुणगतजातेरनङ्गीकारादिति भावः । तं प्रति हेत्व[3]न्तरं भविष्यतीत्यत आह—**नैयायिकं प्रतीति** ॥

तन्मते कदम्बमुकलादिन्यायेन भेरीताडनो[4]च्चारणा[5]तिदेशाच्छ्रोत्रदेशपर्यन्तं सजातीयशब्दपरंपरोत्पत्तेः । अन्त्योपान्त्यशब्दयोः सुन्दोपसुन्दन्यायेनान्योन्यनाशस्य च स्वीकारात् । सर्वशब्दानामिवान्त्य[6]स्यापि त्रिक्षणव[7]त्त्वोपगमेनान्त्यशब्दस्थितिक्षणस्यैवोपान्त्यशब्दस्य विना[8]शक्षणत्वादन्त्यस्य तृतीयक्षणे पूर्वशब्दस्य ध्वंसेनान्त्यस्य विनाशकाभावेन नित्यतापत्तेः । क्षणिकत्वे चोपान्त्यशब्दविनाशक्षणस्यैवान्त्यशब्दविनाशक्षणत्वेन नित्यत्वापत्तिदोषाभावात्क्षणिकत्वं स्वीकृतम् । अतस्तस्मिन्ज्ञानात्पूर्ववृत्तित्वस्याभावेन ज्ञानजनकेन्द्रियसन्निकर्षायोगात् विषयजन्यं इन्द्रियकरणकं यज्ज्ञानं [9]तद्विषयत्वस्यासिद्धेरित्यर्थः॥

मांप्रतीति । मन्मते वर्णस्य द्रव्यत्वादिति भावः—

[1] केन्त्यशब्दे—**ग** कशब्दे—**ख** क्षणिकपदं न—**क**. [2] त्यन्वयः—**इ**. [3] त्वनन्तरामितिशोधितम्—**अ**. [4] नादिदेशा—**इ**. [5] णादिदे—**अ**. [6] शब्दस्यापि—**इ**. [7] वर्तित्वेन—**इ**. [8] नश्यत्क्षण—**अ**. [9] तदिन्द्रियत्वस्या—**अ**.

कर्षवत्त्वस्य मन्द्रतमे तारतमे चासिद्धेश्च । शब्दत्वरसत्वादिना सांकर्यप्रसङ्गेन शब्दे रसे चैकस्या उत्कर्षादिरूपा[1]या जातेरभावेनासिद्धिसाधनवैकल्यान्यतरापाताच्च ॥

न चोत्कर्ष[2]स्य गुणत्वव्याप्यजात्या [3]सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन, अपकर्ष[4]स्य

शब्दत्वेति । तारत्वस्य शब्दत्वपरिहारेण रसे, शब्दत्वस्यापि तारत्वपरिहारेण मन्दशब्दे, तारशब्दे च तारत्वशब्दत्वयोरुभयोर[5]पि समावेशेन

"व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः ॥"

इति कारिकोक्तसांकर्यरूपजातिबाधकेन तारत्वादेर्जातित्वायोगात् । [6]एवं रसत्वादिनापि सांकर्यं ध्येयम् ॥

नच तर्हि शब्दत्वस्यैव जातित्वं त्यज्यतामिति वाच्यम् । तस्यानुगतप्रतीत्यादिना जातित्वस्य परमते सिद्धत्वादिति भावः ॥

सजातीयेति । पक्षे शब्दान्तरं दृष्टान्ते रसान्तरं ध्येयम् । तारशब्दश्रवणे शब्दान्तरस्यानुपलम्भात् । यद्यपि मणौ सजातीयेत्याद्येवोक्तम् । तथापि सुखादिसाक्षात्काराप्रतिबन्धकत्वात्तद्व्यावृत्तये तदीयटीकोक्तस्यानुवादो—**गुणत्वव्याप्यजात्येति** । प्रतिबन्धकत्वमात्रे तूक्ते फलोपधान[7]प्राप्तौ बुभुत्सावशान्मन्देपि शब्दे गृह्यमाणे तारशब्दस्याप्रतिबन्धकतया तत्साधरणानुगतधीसिद्ध्यर्थं तदवच्छेदकत्वेनेत्युक्तम् ।

---

[1] पजा–छ. [2] त्वस्य–ख. [3] स्वजा–छ. सजातीयाप्रतिबध्यसाक्षात्कारविषयतावच्छेदकत्वेन–ख. [4] त्वस्य–ख. [5] अपिपदं न–इ. [6] एवमित्यादि नास्ति–इ. [7] नाप्रा–इ.

चोक्तजात्या[1]सजातीयप्रतिबध्यसाक्षात्कारविषयता-वच्छेदकत्वेनानुगम इति वाच्यम् । उक्तरूपस्योत्कर्षस्यापकर्षस्य वा परिमाणेऽभावेनैकस्य[2] हेतुत्वेऽपि परममहत्परिमाणाणुपरिमाणयोर्व्यभिचाराभावेनोभयग्रहणवैयर्थ्यात् । उत्कर्षापकर्षयोः प्रत्येकं[3]हेतुत्वे च य[4]थोक्तमन्द्रतमतारतमयो[5]र्भागासिद्ध्यपरिहारात् । [6]उक्तहेतुपञ्चकेपि श्रोत्रावृत्तित्वस्योपाधित्वाच्च ।

तथा च तत्र बुभुत्सोत्तेजिकेति भावः—**उक्तेति** । गुणत्वव्याप्यजात्येत्यर्थः । तारशब्दश्रवणे सत्यपकृष्टशब्दानुपलम्भादिति भावः ॥

किंचायं विशिष्ट ए[7]को हेतुरुत प्रत्येकं हेतुः ? आद्ये गगनपरिमाणेऽणुपरिमाणे चाव्यभिचाराय हि विशेष्यं विशेषणं चेति वाच्यम् । न च तत्र व्यभिचारप्रसक्तिरस्ति । स्वस्य साक्षात्काराभावात् । सजातीयसाक्षात्कारप्रतिबन्धकत्वाभावाच्चेति भावेनाह—**उक्तरूपस्येति** । परिमाणे गगनादिपरिमाणे—**अभावेनेति** । तत्र साक्षात्काराप्रसक्तेरिति भावः ॥

अन्त्ये दोषमाह—**उत्कर्षेति** । **श्रोत्रावृत्तित्वस्येति** । तस्य घटादौ रूपरसादौ च साध्यव्यापकत्वात्साधनवति पक्षे शब्देऽभावेन साधनाव्यापकत्वात् । यदिन्द्रियं [8]यद्गुणं गृह्णाति तदिन्द्रियं तद्गुणयुक्तमितिन्यायेन शब्दस्य श्रोत्रवृत्तित्वादिति भावः ॥

[1] स्वजा–**छ**. [2] कैकस्य–**ग-छ-ख**. [3] कहे–**ग**. [4] थाक्रमं–**ग-ख**. [5] भागपदं न–**छ**. [6] उक्तेत्यादिग्रन्थ. नास्ति–**ख-क-रा**. [7] एवोक्तो–**इ**. [8] यत्पदं नास्ति–**अ**.

विपक्षाच्छ्रोत्रवृत्तिपरिमाणतो व्यावृत्तत्वान्न पक्षेतरता ॥

वर्णानित्यत्वेऽ[1]नुमानभङ्गः ॥ २४ ॥

किंच स एवायं गकार इति प्रत्यभिज्ञा[2]बाधः ।

न च श्रोत्रमशकसंयोगादौ साध्याव्यापकत्वम् । श्रोत्रेतरावृत्तित्वे सति श्रोत्र[3]वृत्तित्वा[4]भावस्याभिमत्वात् । न च सिद्धान्तेऽथापि दोषः । पररीत्या परस्य दोषोक्तेरिति भावः ॥

पक्षमात्रव्यावर्तकश्रोत्रारब्धविशेषणवत्त्वात्पर्वतेतरत्वादेरिव नोपाधित्वमस्येत्याशङ्क्याह —**विपक्षादिति** । श्रोत्रस्याकाशात्मकत्वेन तत्परिमाणस्याजन्यत्वादिति भावः । एतच्चोपलक्षणम् । बाधादिस्थले पक्षेतरत्वस्याप्युपाधित्वं दुर्वारम् । प्रकृते विपक्षे बाधकाभावस्येह प्राग्व्यक्तत्वेन हेतूनामप्रयोजकत्वस्य वक्ष्यमाणदिशा बाधस्य च निर्णयेन पक्षेतरत्वस्याप्युपाधित्वे दोषो नेत्यपि ध्येयम् ॥

वर्णानित्यत्वे[5]नुमानभङ्गः ॥ २४ ॥

"तदेवेदं वचनमिति प्रत्यभिज्ञाविरोधात् । न च सादृश्यात्प्रत्यभिज्ञा भ्रान्तिरिति वाच्यम् । सोयं देवदत्त इत्यादेरपि तथात्वप्राप्तेः" इति तत्त्वनिर्णयतट्टीकायोरुक्तं व्यक्तीकुर्वन् उक्तहेतूनां बाधितविषयत्वं चाह—**किञ्चेति** । यद्यपि प्रत्यभिज्ञा न वर्णनित्यत्वं विषयीकरोति । तथापि पूर्वं गकारं श्रुतवतः पुनस्तच्छ्रवणे स एवायं गकार

---

[1] त्वानु–**ग ख.** [2] विरोधः–**क-रा.** [3] त्रा–**इ.** [4] त्वभा–**इ.** [5] त्वानु–**अ-इ.**

न च तानेव शालीनु[1]पभुञ्जमह इत्यादिवत्सोयं गकार इति व्यपदेशो गौण इति वाच्यम् । प्रत्यभिज्ञाबाध उक्ते व्यपदेशगौणत्वशङ्काया व्यधिकरणत्वात् । प्रत्यभिज्ञायाश्च[2]स्थायिपदार्थान्तर इवात्राप्यनुभवसिद्धत्वात् । ते शालय इमे शालयो

इति जायमाना प्रत्यभिज्ञा प्राक्तनस्येदानीन्तननैक्यं गोचरयन्ती तावत्कालस्थिरत्वमवगाहत इति—

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति ।

इति न्यायेन पराभिमताशुतरविनाशस्य व्यतिरेकान्नित्यत्व एव पर्यवस्यतीति मण्युक्तदिशा वा टीकोक्तदिशा [3]पूर्वं पूर्वतरं पूर्वतममप्येवमित्यनादिनित्यतैव सिद्धयतीति भावेन प्रत्यभिज्ञाबाध इत्युक्तम् ॥

अत्र चत्वारः पक्षाः सम्भवन्ति । ज्ञानमेवेदं नेति वा, ज्ञानत्वेप्यभिज्ञैव न प्रत्यभिज्ञेति वा, प्रत्यभिज्ञात्वेपि जात्य[4]भेदविषयेति वा, व्यक्त्यभेदविषयत्वेपि भ्रान्तिरिति वा । तत्राद्यं कुसुमाञ्जल्याद्युक्तमाशङ्क्य निराह—**नचेति** । शालीन् सूक्ष्मव्रीहिविशेषान् । ज्ञानमेवेदं नेत्युच्यत इत्यत आह—**प्रत्यभिज्ञाया इति । स्थायीति** । सोयं देवदत्त इत्यादाविव स एवायं गकार इति प्रत्यभिजानामीत्यनुभवसिद्धत्वादित्यर्थः । तत्राप्येवमनुभवोऽस्तीत्यतस्तत्र विपरीतदर्शनान्न प्रत्यभिज्ञानुभवस्य भावोस्ति । अस्ति चेदपि भ्रम एव । प्रकृते तु न तथेति भावेनाह—**ते शालय इति ॥**

---

[1] न्भुञ्जत-**ग** न्भुञ्ज्महे-**छ-क** 'भुजाम' इति शोधितम्- **छ** न्भुञ्जानः-**ख.**
[2] च इति नास्ति-**ग.** [3] पूर्वपूर्वतरमप्येव-**इ.** पूर्वं पूर्वतममप्ये-**अ.** [4] तिभे-**इ.**

न भवन्तीतिवत् स गकारोऽयं गकारो न भवतीति भेदप्रत्ययाभावाच्च ॥

न चेयं प्रत्यभिज्ञा पुरोवर्तिनि गकारे गत्वेनोपस्थितगकाराभेदविषया, सा च पुरोवृत्तिगकारस्य स्वाभेदेनाप्युपपन्ना, न तु [1]तत्काला[2]द्यवच्छेदेनोपस्थितगकाराभेदविषयेति वाच्यम् । प्रत्यभिज्ञान्तरवत् सोयमिति तत्तेदंताधिकरणाभेदप्रतीतेः ॥

नन्वियं गत्वादिजात्यभेदविषया । न च तथात्वे तज्जातीयोयमित्याकारः स्यादिति वाच्यम् । जात्यभेदादधिकस्य जातिगतस्य जातित्वस्य प्रतीतावेव तदाकारादिह च जातित्वस्याप्रतीतेरिति

द्वितीयं पक्षमाशङ्क्य निराह—**न चेयमिति । प्रतभिज्ञेति ।** तव प्रत्यभिज्ञात्वेनाभिमतेत्यर्थः—**उपपन्नेति ।** तथा चाभिज्ञैव जाता न तु प्रत्यभिज्ञेति भावः—**तत्कालेति ।** अतीतकालेत्यर्थः ॥

तृतीयं पक्षमाशङ्कते—**नन्विति ।** तथा सति तज्जातियोयमिति स्यादिति मणिग्रन्थोक्तं निराह—**न च तथात्व इति ।** तज्जातियोयमित्यस्य तन्निष्ठजातिमानयमिति ह्यर्थः । स चाकारो जातित्वभान एव युक्तो नान्यथेति भावः । सामान्यनित्यतायाः प्रमाणविरुद्धत्वा-

---

1 'तत्' इति नास्ति–छ-क-रा. 2 आदिपदं न–छ-क. 3 'हि' इति नास्ति–इ-अ

चेन्न । तारत्वादिना[1] सांकर्यस्य वक्ष्यमाणत्वेन गत्वादिजातेरेवाभावात् । स एवायं घट इत्यादेरपि तथात्वापातेन व्यक्तयभेदस्य क्वाप्यसिद्ध्यापत्तेश्च । [2]क्वापि प्रत्यभिज्ञाया भ्रान्तित्वाभावापत्तेश्च । घटान्तराद्गृहीतभेदेपि घटे स एवायं घट इति प्रत्यभिज्ञाप्रसङ्गाच्च ॥

किंच प्रत्यभिज्ञाजनके स एवायं गकार इति वाक्ये स इत्यस्य जातिपरत्वेऽयमित्यस्य च व्यक्तिपरत्वे जत्या सह व्यक्तेरेवाभेदः प्रती[3]येत न तु जात्या सह जातेः। तथा च निरसिष्यमाण-

---

दिति स्वमतावष्टम्भेन वास्तवमुपेत्य टीकायां परिहारोक्तावपि पररीतिमनुसृत्य स्वयं परिहारमाह—**तारत्वादिनेति । क्वापीति ।** सोऽयं [4]देवदत्त इत्यादा[5]वपि जातिविषयत्वस्य वक्तुं शक्यत्वादिति भावः—**घटान्तरादिति ।** तत्राप्यनुगतजातेः सत्त्वादिति भावः । जात्यभिप्रायेण तादृशप्रत्यभिज्ञापादनमिष्टमिति मन्वानं प्रत्याह—**किंचेति ।** शाब्दप्रत्यभिज्ञायां या विषयव्यवस्था सैव प्रत्यक्षप्रत्यभिज्ञायामपि भविष्यति । तथा च [6]तत्र सोयमिति तदिदंशब्दाभ्यां किं जातिव्यक्त्योरुक्तिरथ जातेरेव उत व्यक्तेरेवेति वाच्यम् । पक्षान्तरासंभवात् । आद्येपि [7]व्यक्तेर्जात्यभेदोपि किं साक्षादथ परंपराय[8]वा । तत्राद्यं निराह—**प्रत्यभिज्ञाजनक इति ।**

---

1 संकरस्य—**छ-ख-क-रा.** 2 अद्यापि—**क.** 3 यते—**छ-क.** 4 दीप इत्या—**अ.** 5 देरपि—**इ.** 6 'किं' इत्यधिकम्—**अ-इ.** 7 व्यक्तिजात्योरभे—**मु.** 8 'वा' इति नास्ति—**अ-इ.**

भ्रान्तित्वपक्ष एवान्तर्भावः स्यात् ॥

नच जात्यभेदोपि व्यक्तौ परंपरासंबन्धेनास्तीति न भ्रान्ति[1]त्वमिति वाच्यम्। क्वापि व्यक्तयभेदा[2]सिद्धयादि पूर्वोक्तदोषात् ॥

उभयोरपि जातिपरत्वे च व्यक्तिवाचकगकार[3]-सामानाधिकरण्य[4]मुक्तम्। उभयोरपि व्यक्तिपरत्वे तु शब्दजन्यप्रत्यभिज्ञा व्यक्तयभेदविषयेति प्रत्यक्ष-प्रत्यभिज्ञापि तद्विषयैव। तयोः करणकृताभ्यां परोक्षत्वापरोक्षत्वाभ्यां भेदेपि विषयकृतभेदानुभवात् ॥

न चेयं सोयं कुन्तलकलाप इत्यादिवद्भ्रान्तिः।

भ्रान्तित्वपक्ष एवेति । तथा च तन्निरासेनायं पक्षो निरस्तो भविष्यतीति भावः ॥

अन्त्यमाशङ्क्य निराह—**न चेति** ॥ जातेर्जात्यभेदः साक्षात् तत्समवायसंबन्धेन व्यक्ताविति परंपरयेति[5] भावः। द्वितीयं निराह—**उभयोरपि[6]जातीति**। तृतीयं निराह—**उभयोरपि[7]व्यक्तीति** ॥

नन्वस्तेवं प्रत्यभिज्ञा गकार[8]व्यक्तयैक्यविषया । तथापि सा भ्रान्तिरस्तु । परि[9]लूनपुनर्जातकुन्तलकलापयोः सादृश्यान्निमित्तात्सोयं कुन्तलकलाप इति प्रत्यभिज्ञावदिति चतुर्थं पक्षमाशङ्कते—**न चेति**। तत्र परि[10]लूनकुन्तलसमूहस्य भूमौ पतितस्य दर्शनेन नावग्गाविनि

---

[1] न्तिरिति-ख-रा. [2] दसि-ग. [3] 'पद' इत्यधिकम्-ग. [4] मयुक्तं-ग-छ-रा. [5] त्यर्थः-अ-इ. [6] जातिपदं न-इ. [7] व्यक्तीति इत्येवास्ति-इ [8] आदीत्यधिकम्-अ-इ. [9] धून-अ. [10] धून-अ.

बाधकाभावात् । न च भेदधीर्बाधिका । स गकारोयं गकारो न भवतीति विशे[1]ष्ये भेदबुद्धेरभावात् ॥

तारो गकारो मन्द्रो न भवतीति धीस्तु विशेष्याभेद[2]ज्ञानेन पाकरक्ते घटे न श्याम इतिवत्, मुण्डिते चैत्रे न शिखीतिवच्च विशिष्टभेदविषयैव । न विशेष्यभेदविषया ॥

इयांस्तु [3]भेदः; तद्विशिष्टं मम पदार्थान्तरम्, तव तु विशेषणोपरक्तं विशेष्यमेव वा विशेषण-

---

बाधकज्ञानोदयवदिह तदभावादित्याह—**बाधकेति** ॥

ननु [4]बाधकदर्शनाद्बाधकाभावादित्यसिद्धमिति चेत्तर्किं भेदज्ञानमुतोत्पत्तिविनाशज्ञानमथ विरुद्धधर्मवत्त्वज्ञानम्, यद्वा गत्वादिव्याप्यजातिविशेषानुभवरूपज्ञानं बाधकम् । आद्यमाशङ्क्य प्रत्याह—**न चेति** । [5]न बाधकेत्यतः सा किं विशेष्यभेदविषयाथ तारत्वादिविशिष्टभेदविषयेति[6] विल्प्याद्यं [7]निराह—**स इति** । द्वितीयेत्विष्टापत्तिरिति भावेनाह—**तार इति** । विशिष्टभेदधीर्बाधान्न विशेष्यभेदविषायिणीति भावेनोक्तम्—**विशेष्याभेदज्ञानेनेति** । हेतुनेति शेषः ॥

ननु, विशिष्टं न विशेष्यादितोऽतिरिक्तमिति मते अस्तु विशेष्यभेदविषयेत्यत आह—**इयांस्तु भेद इति** । उपरक्त विशेष्यमेव न तु

---

[1] शिष्य—**च**-शेष्य-**क.** [2] मानेन-'मात्रेण' इति शोधितम्-'विशेष्याभेदमानेन' इत्येतदुपरिरेखामि पराहतम्-**छ.** ष्यभेदभानेन—**रा-ग-क.** [3] विशेषः—**ख.** [4] बाधकाभावादित्येवास्ति—**अ-इ.** [5] 'कुतः' इत्यधिकम्—**अ**-'नबाधकेत्यत'-इति नास्ति—**इ.** [6] इति 'विकल्प्य' इति नास्ति—**इ-अ.** [7] पराह—**अ-इ.**

विशेष्यसंबन्ध एव वेति। उभयथापि न विशेष्याभेदहानिः ॥

नापि तारो नष्टो मन्द्र उत्पन्न इत्युत्पत्त्यादिधीर्बाधिका। पाकरक्ते श्यामो नष्ट इत्यादिवन्मन्मते विशिष्टनाशविषयत्वेन त्वन्मते तु विशेषणनाशविषयत्वेन मतद्वयेपि विशेष्यनाशाविषयत्वात् ॥

[1]नापि तारत्वादिविरुद्धधर्मसंसर्गधीर्बाधिका। यो गकारो [2]मन्द्रः स एव तार इति सामानाधिकरण्यानुभवेनैकस्मिन्नेव चैत्रे शिखित्वमुण्डित्ववद्घटे श्यामत्वरक्तत्ववत्, गगने शब्दतदभाववत्, आत्मन्यदृष्टतदभाववच्च काला[3]दिभेदेनाविरोधात् ॥

न चैकदैव चैत्रमैत्रोच्चारितयोर्गकारयोस्तारत्वमन्द्रत्वे दृश्येते इति वाच्यम्। एकदैव गगने विहगदेहसंयोगतदभाववत्, आत्मनि सुखदुःखा[4]दिवच्च प्रदेशभेदेनाविरोधात्। स च प्रदेशभेदो मम स्वाभाविकः तव त्वौपाधिक इत्यन्यदेवैतत् ॥

केवलमित्यर्थः। तथा च त्वन्मते स्वर्गी ध्वस्त इत्यादाविवेहापि विशेषणभेदविषयैव स्यादिति भावः। द्वितीयं बाधकं निराह—**नापि तार इति।**

तृतीयं निराह—**नापि तारत्वेति**। स किं तारत्वादिरौपाधिको धर्मः? उत जातिरूपः? आद्य आह—**यो गकार। इति कालादिभेदेनेति।** "एकस्यैव वर्णस्य काल[5]भेदेनोच्चारयितृपुरुषभेदेन

---

[1] न च मु-च-छ-क-रा. [2] सर्वत्र 'न्द' इत्येवास्ति—छ-क-ग-ख [3] आदिपदं नास्ति—छ-क-ग-ख. [4] आदिपदं न—छ-ग-ख. [5] आदीत्यधिकम्—अ.

न च तारत्वादीनां जातित्वान्न कालादिभेदे-नाविरोध इति वाच्यम्। त्वन्मते गत्वादिना संकरात्सावधिकत्वाच्च। न हि जातिः सावधिका। तारेप्यन्यापेक्षया मन्द्रत्वस्य मन्द्रेप्यन्यापेक्षया तारत्वस्य सत्त्वेन तुल्यव्यक्तिकत्वाच्च। तारतमत्वा-देरपि पाचकतमत्वादिवदतिशयविशिष्टौपाधिकध-र्मत्वात्॥

न च गत्वादिव्याप्यतारत्वादीनां नानात्वाद-संकरः। सर्वत्राप्येवं संकरस्य सुपरिहरत्वेन तस्या-

---

नासिकादिस्थानभेदेन विरुद्धधर्माध्या[1]सोपपत्तेरिति" तत्त्वनिर्णयटीको-क्तेरिति भावः॥

द्वितीयमाशङ्क्य निराह—**न च तारत्वा[2]दीनामिति**। गत्व-परिहारेण तारत्वस्य वर्णान्तरे तारत्वपरिहारेण गत्वस्य मन्दगकारे, तारगकारे च गत्वतारत्वे [3]द्वे अपि स्त इति न जातित्वं तारत्वस्य। एवं मन्दत्वादेरपीति भावः—**सावधिकत्वाच्चेति**। तारत्वस्य मन्दा-पेक्षत्वान्मन्दत्वस्य तारापेक्षत्वादिति भावः—**तुल्येति**। यावन्तस्तार-गकारास्तावन्तो मन्दाश्च भवन्तीति गत्वतारत्वमन्दत्वानां घटत्वकरीरत्व-कलशत्वानामिव न जातित्वम्। किं तु गत्वादिरेव जातिः। न तु तार-त्वादिरिति भावः॥

ननु तारत्वादेरजातित्वे तारतमत्वादेरपि तथात्वं स्यादित्यतः स्या-देवेत्याह—**तारेति**। [4]अतुल्यव्यक्तिकत्वात्तारतमत्वं जातिः स्यादित्यतो

---

[1] सापत्ते-मु. [2] आदिपदं नास्ति-इ-अ. [3] 'द्वे' इति नास्ति-इ
[4] इयमवतारिका नास्ति-इ.

दोषत्वापातात् ॥

अत एव स्वर्णत्वादिव्याप्यघटत्वादिकमपि नाना । घटत्वस्यावयवसंयोगविशेषरूपसंस्थानविशेषसमानाधिकरणद्रव्यत्वरूपौपाधिकधर्मत्वादिसंभवात् । तारत्वादेर्नानात्वे ताराकारानुगतप्रत्ययानुपपत्तेश्च ॥

न च भिन्नानामपि जातीनां तारशब्दप्रवृत्तिनिमित्तत्वेनानुगमादेकाकारप्रत्ययः । अगृहीतसमयस्य बालस्यापि ताराकारानुगतप्रत्ययात् ॥

न च सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदक[1] जातित्वेनानुगमः । आवश्यकेनोक्तप्रतिबन्ध-

---

वाह—**तारेति** । **तस्येति** । संकरस्य जातिबाधकत्वानापत्तेरित्यर्थः ॥

नन्वेवं नानात्वेन सांकर्यस्यापरिहार्यत्वे स्वर्णघटे घटत्वं जातिर्न स्यात् । नानात्वेनैव तत्र जातिसांकर्यस्य परिहार्यत्वादित्यत आह—**अत एवेति** । तत्र घटत्वं जातिरेव नेत्याह—**घटत्वस्येति** । **ताराकारेति** । अयं तारोऽयं तारोऽयं तारोऽयमपि तार इत्येवं ताराकारेत्यर्थः—**अगृहीतेति** । तारशब्दनिमित्तत्वमजानतोऽप्ययं तार इत्यनुगताकारप्रत्यय[2]दर्शनादित्यर्थः ॥

सजातीयेति । गुणत्वव्याप्यजात्या सजातीयेत्यर्थः । पूर्ववत्पदकृत्यं बोध्यम् । **उक्तेति** । सजातीयसाक्षात्कारप्रतिबन्धकत्वे-

---

[1] जातिपदं नास्ति-**ख.** [2] याद-**मु.**

कत्वेनैव शब्दप्रवृत्तिव्यवहारयोरुपपत्तौ जाति-कल्पनावैयर्थ्यात् ॥

न च यदा मन्द्रे बुभुत्सा तदा मन्द्रग्रहरूप-कार्यदर्शनेन प्रतिबन्धक[1] त्वाभावात्तारव्यवहारो न स्यात्। प्रतिबन्धकतावच्छेदकविवक्षायान्तु जाति-सिद्धिः, जातितोऽन्यस्यावच्छेदकस्याभावादिति वाच्यम्। त्वन्मतेपि प्रतिबन्धकतावच्छेदकावाच्छिन्ने सति मन्द्रग्रहरूपकार्यायोगात् ॥

यदि च बुभुत्सोत्तेजिका तर्हि मन्मतेप्युत्तेज-कस्य सत्त्वेन कार्यसम्भवेपि प्रतिबन्धकस्य सत्त्वात्तारव्यवहारो[2] युक्तः। तस्मात्प्रत्यभिज्ञाया-स्तारत्वादिविरुद्धधर्मसंसर्गो न बाधकः ॥

नेत्यर्थः। **शब्देति**। तारशब्देत्यर्थः ॥

उक्तविवक्षायां बाधकमाशङ्क्य निराह। **न चेति**। तार-शब्दश्रवणदशायामेव बुभुत्सावशान्मन्दशब्दग्रहेण गुणत्वव्याप्यजात्या सजातीयशब्दग्रहाप्रतिबन्धाच्छ्रूयमाणे. तारशब्दे तारशब्दव्यवहारो न स्यादित्यर्थः ॥

मन्मतेपीति। तारत्वं न जातिः। तेषामनेकत्वेपि सजातीय-साक्षात्कारप्रतिबन्धकत्वेनानुगम इति वादिमतेऽपि बुभुत्सारूपोत्तेजकव-शेन मन्दग्रहसम्भवेपि तारव्यवहारः स्यादेव। न ह्युत्तेजकं[3] तत्प्रति-बन्धाभावो मण्यादेः प्रतिबन्धकत्वमेव नेत्यस्य कल्पको भवति। तथा-त्वेऽतिप्रसङ्गादिति भावः। व्यवहितत्वात्तृतीयपक्षदोषमुक्तमुपसंहरति। **तस्मादिति**। तारत्वादेरविरोधादिति भावः ॥

---

[1] काभा–ग-ख. [2] रोऽयुक्तः–छ. [3] कृतप्रतिबन्धाभावो–ङ.

नापि शुकशारिकामनुष्यतद्विशेषरूपवक्तृविशेषानुमापकगत्वादिव्याप्यजातिविशेषानुभवो बाधकः। वर्णाश्रवणेपि तत्तद्ध्वनिविशेषेणैव तत्तदनुमानदर्शनेन वर्णश्रवणेप्यावश्यकेन ध्वनिविशेषेणैव तदनुमानात्। अन्यथा यो गकारः शुकेनोच्चारितः स एव मनुष्येणापीत्यादिप्रत्यभिज्ञा न स्यात्। अत एवानुव्यवसायो 'ध्वनिविशेषेणैव दूरस्थः पुत्रो [1]मयानुमित' इति॥

न चैवं सति सैवेयं [2]घर्घरी स एवायं ध्वनिरित्यादिप्रत्यभिज्ञया ध्वनिरपि नित्यः स्यादिति मण्युक्तं [3]युक्तम्। ध्वनिवर्णयोर्द्वयोरपि नित्यत्वे द्वयोरपि सदोपलब्धिप्रसङ्गात्। उच्चारणवैयर्थ्याच्च॥

चतुर्थं पक्षं निराह—**नापि शुकेति। बाधक इति।** स एवायं गकार इति प्रत्यभिज्ञाया इत्यर्थः। गकारव्यक्तेरेकत्वे गत्वस्याजातित्वेन तद्व्याप्यजातेरयोगादिति भावः। गकारादिव्यञ्जकध्वनिविशेषणैव वक्तृविशेषानुमानम्। न तु त्वदुक्तजातिविशेषेण। येन प्रत्यभिज्ञा भ्रान्तिर्भवेदित्याह—**वर्णाश्रवण इति॥**

एवं सतीति। स एवायं गकार इत्यादिप्रत्यभिज्ञाया अभ्रान्तित्व इत्यर्थः। **मण्युक्तमिति।** शब्दानित्यत्ववादे सिद्धान्ते मण्युक्तमित्यर्थः। प्रत्यभिज्ञाद्वयस्याभ्रान्तित्वायोगादन्यतरभ्रान्तित्वेऽवश्यंभाविनि ध्वन्यंश एव तद्युक्तमिति सयुक्तिमाह— **ध्वनिवर्णयोरिति॥**

---

[1] मयेति नास्ति—**क-ग-ख.** [2] गूर्जरी—**छ.** गुर्जरी—**क-ग-ख.** [3] निरस्तम्—**छं.**

न चोच्चारणस्य व्यञ्जकत्वान्नोक्तदोष इति वाच्यम् । भिन्नदेशत्वात् । उच्चारणं हि वक्तृवक्त्रे । शब्दस्तु श्रोतृश्रोत्रे । भिन्नेन्द्रियग्राह्यत्वाच्च । अत एव नोच्चारणजन्यो वायुर्व्यञ्जकः । अत एवातीन्द्रियस्य व्यञ्जकान्तरस्य कल्पनाप्ययुक्ता । घटादावपि तत्कल्पनाप्रसङ्गात् ॥

तस्माद्वयोरेको नित्यः अन्यस्तु व्यञ्जक इति

भिन्नदेशत्वं व्यनक्ति—**उच्चारणं हीति** । ध्वनिवर्णयोर्नित्यत्वे विभुद्रव्यतया सर्वगतयोर्निरवयवयोर्वक्तृनिष्ठेनाप्युच्चारणेनाभिव्यक्तयोः श्रोत्रेण ग्रहणमविरुद्धम् । तथाप्य[1]न्वयव्यतिरेकाभ्यां शब्दस्थळे [2]श्रोत्रसंबद्धेनैव व्यञ्जकेनाभिव्यक्तस्य श्रोत्रेण ग्रहणम् । अन्यथैक[3]वक्तृनिष्ठोच्चारणाभिव्यक्तशब्दस्य सर्वैरपि ग्रहणप्रसङ्गादिति भावः—**भिन्नेन्द्रियेति** । उच्चारणस्य चाक्षुषत्वाच्छब्दस्य श्रावणत्वादिति भावः ॥

यद्यपि गोघृतादेः कुंकुमगन्धादेश्च भिन्नेन्द्रियग्राह्यत्वेपि अस्ति [4]व्यञ्जकव्यङ्ग्यभावः । तथाप्यन्वयव्यतिरेकाभ्यां शब्दस्थले एकेन्द्रियग्राह्ययोरेव तथात्वावगतेरिति भावः । घृतादावपि प्रतिनियतव्यञ्जकव्यङ्ग्य[5]वादे वक्ष्यमाणदिशा घृतादिगतगन्धादिरेवाभिव्यञ्जक इति[6] भावः । अन्ये त्वेकेन्द्रियग्राह्यत्वं वा एकेन्द्रियग्राह्यगुणकत्वं वा व्यञ्जकत्वे तन्नमित्याहुः ॥

अत एवेति । वायोरतीन्द्रियत्वेन श्रोत्रेन्द्रियाग्राह्यत्वादिति भावः—**अत एवेति** । तद्ग्राहकेन्द्रियग्राह्यस्यैव तद्व्यञ्जकत्वादित्यर्थः—

---

[1] अन्वयव्यतिरेकाभ्या शब्दस्थळे इति नास्ति–अ-इ. [2] श्रोतृसम्बन्धेनैव–इ. [3] वक्तृपदं नास्ति–अ. [4] व्यङ्गयव्यञ्जक–इ. [5] त्वेवा–इ. [6] वा–अ.

वक्तव्ये नतावद्ध्वनिरेव नित्यो वर्णस्तु व्यञ्जक इति युक्तम् । भेर्यादौ वर्णाभावेपि ध्वनिग्रहात् । तस्मात्परिशेषाद्वर्ण एव नित्यो धन्विस्तु व्यञ्जक इति युक्तम् । ध्वन्यभावे वर्णाग्रहात् ॥

[1]तदेवमुपपत्तिविरोधादापणे ध्वनिरुत्पन्नः स च शान्त इति ध्वनित्वेनैवोत्पत्त्याद्यनुभवविरोधाद्वर्णप्रत्यभिज्ञाया "यावद्ब्रह्मविष्ठितं तावतीवागि"-त्यादिश्रुत्यनुगृहीतत्वाच्च सैवेयं [2]घर्घरीत्यादेरेव भ्रान्तित्वादिकं युक्तम् ॥

तदेवमुक्तरीत्या बाधकाभावेपि वर्णे[3] सोयमिति

तदेवमिति । तस्मादेवं ध्वनिवर्णयोरित्यादिनोक्तरीत्येर्थ. । [4]तत्तस्मादित्यस्य विवरणं **उपपत्तीत्यादि** । **तावती वागिति** । तावत्कालीनो वर्ण इत्यर्थः ॥

वागित्यस्य टीकायां वेदरूपा वागिति व्याख्यानेपि सजातीयानुपूर्वीकत्वेनैव तावत्कालत्वस्य वाच्यत्वेन मुख्यार्थ[5]लाभाय वर्णरूपार्थान्तरमुपेत्य वा वेदरूपवाचस्तावत्कालीनत्वस्य[6] वर्णानां तावत्कालीनत्वाभावेऽयोगादर्थलब्धमुपेत्य वा श्रुत्यनुगृहीतत्वाच्चेत्युक्तम् । अत एव टीकायां तावती वागिति वर्णानां व्यापकत्वस्याभ्युपगतत्वेनेत्यप्युक्तमित्यदोषः ॥

एवं प्रत्यभिज्ञाया अनन्यविषयत्वं प्रसक्तबाधकनिरासेनाभ्रान्तित्वं च समर्थ्योपसंहरन् परपक्षे बाधकोक्त्याप्युक्तं समर्थयते—**तदेवमित्यादिना**—**अन्यत्प्रमाणमस्तीत्यन्तेन**—**उक्तेति** । "न च भेदधीर्बाधिके"

---

[1] तस्मात्-**छ-क.** [2] गूर्जिरी—**छ-क-ग**—गुर्जरी—**ख.** [3] र्णः सो—**क.**
[4] तत्पदं नास्ति—**अ-इ.** [5] र्थत्व—**अ.** [6] त्वाभावे.

व्यपदेश एव न तु प्रतीतिरिति तदपलापे वा, [1]तदनपलापेपि [2]तस्याः पुरोवृत्तिगकारे गत्वेनोपस्थितगकाराभेदविषयत्वेनाभिज्ञात्वे वा, प्रत्यभिज्ञात्वेपि साक्षात्परंपरया[3] जात्यभेदविषयत्वे वा, व्यक्त्यभेदविषयत्वेपि तस्याः भ्रान्तित्वे वा, तत्तद्वादिभिस्तत्तद्वस्तुनः स्थायित्वेन प्रमाणत्वेनाङ्गीकृताया अपि स एवा[4]हमित्यादिप्रत्यभिज्ञाया अपलापादिप्रसङ्गेन कस्यापि स्थायि[5]त्वं न सिद्ध्येदिति क्षणिकवादः स्यात्। न हि स्थायित्वे प्रत्यभिज्ञातोऽन्यत्प्रमाणमस्ति ॥

तदेतदभिप्रेत्योक्तं भगवत्पादैः। "न च

त्यादिनोक्तरीत्येत्यर्थः—**तदपलापे वेति**। "न च तानेव शालीनि" त्यादिनोक्तरीत्या प्रतीत्यपलापे वेत्यर्थः। "तस्या" इत्यतः पूर्वमप्युक्तरीत्येत्यनुषञ्जनीयम्। "न चेयं प्रत्यभिज्ञे" त्यादिनोक्तरीत्येति तत्रार्थः। एवमग्रेप्युक्तरीत्येत्यनुवर्त्य यथायोगमर्थो योज्यः ॥

सप्तम्यन्तोक्तापादकचतुष्टयेप्यनिष्टापादनमाह—**तत्तद्वादिभिरिति**। सर्वक्षणिकत्वं वदद्भिरपि बौद्धैः

"आकाशो द्वौ विनाशौ च नित्यं त्रयमसंस्कृतम्"

इत्युक्तत्वेनाकाशस्य बुद्धिपूर्वविनाशाबुद्धिपूर्वविनाशयोश्च नित्यत्वोपगमेन तेषामदृष्टापादनं सममिति सूचनाय—**तत्तद्वादिभिस्तत्तद्वस्तुन इत्युक्तम्**। अपलापादीत्यादिपदेन प्रागुक्तापादक[6]त्रयग्रहः—**तदेतदिति**। व्यपदेशादिपक्षचतुष्टयमपि नेत्येतत्तत्त्वनिर्णय उक्तमित्यर्थः ॥

---

[1] प्रतीत्यनपला—**क-ख.** [2]अनन्तरं "साक्षात्परंपरे" त्यादेवास्ति—**छ.** [3]राजा—**क.** [4]वायमि—**ग.** [5]अत्र सर्वत्र 'पि' इत्येवास्ति—**क.** [6]'त्रय' इति नास्ति—**अ.**

सादृश्यात्प्रत्यभिज्ञा भ्रान्तिरिति वाच्यम्। सोयं देवदत्त इत्यादेरपि तथात्वा[1]पत्ते" रिति। अत्र प्रत्यभिज्ञा भ्रान्तिरित्यस्य समस्तपदत्वेन व्यपदेशमात्रत्व[2]पक्षे तस्मिन्व्यपदेशे प्रत्यभिज्ञात्वभ्रान्तिरिति, पुरोवृत्तिनस्तदभेदविषयकाभिज्ञात्वपक्षे तस्यास्तत्का[3]लीनावच्छिन्नाभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति, जात्यभेदविषयकप्रत्यभिज्ञात्व-पक्षे तस्यां व्यक्तयभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति, व्यस्तपदत्वेन व्यक्तयभेदविषया प्रत्याभिज्ञा भ्रान्तिरिति पक्षे व्यक्तयभेदविषयापि प्रत्यभिज्ञा भ्रान्तिरेव न तु [4]प्रमेति, [5]चार्थो द्रष्टव्यः॥

टीकायां चतुर्थपक्षनिरासपरत्वेन व्याख्यानेपि बह्वर्थकत्वान्मूलग्रन्थस्य स्वोक्तपक्षचतुष्टयनिरासमपि मूलारूढं दर्शयति—**अत्रे**[6]**ति**। मूलवाक्य इत्यर्थः —**समस्तेति**। चतुर्थपक्ष एव भिन्नपदत्वात्तदन्यपक्षत्रयेपि भावप्रधाननिर्देशेन प्रत्यभिज्ञात्वेन भ्रान्तिः प्रत्यभिज्ञाभ्रान्तिरिति समासं प्राप्तपदत्वेन हेतुनाऽव्यस्तपदत्वेन हेतुनेत्यर्थो द्रष्टव्य इत्यन्वयः। "अर्थो द्रष्टव्यः" इति पदद्वयं। पूर्वत्र प्रत्येकं इतिशब्दत्रयान्तेपि व्यपदेशमात्रपक्ष इत्यर्थो द्रष्टव्य इत्यादिरूपेणान्वेतव्यम्॥

---

[1] त्वापातादिति–**ग.** [2] 'मात्रम्'–ततः "जात्यभेद" इत्यादि "भ्रान्तिरिति" इत्यन्तं, ततः 'पक्षेस्मिन् व्यपदेशे प्रत्यभिज्ञात्वभ्रान्तिरिति' इत्यारभ्य, "तत्कालावच्छिन्नाभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति" इति पङ्क्तिः, ततः "व्यस्तपदत्वेन" इत्यादि च वर्तते–**ग.** [3] लावच्छिन्नाभेद–**छ-ख.** [4] भ्रम इति–**छ.** [5] वा–**ग.** [6] 'च' इत्यधिकम्–**अ.**

एतेन "प्रत्याभिज्ञानन्तरमुत्पत्त्यादिप्रत्ययानां तदनन्तरं च प्रत्यभिज्ञाया दर्शनेनोभयाबाधायोत्पत्त्यादिधीर्व्यक्तिविषयिणी अभेदधीस्तु जातिविषया ; यद्वोत्पत्त्यादिप्रत्ययानामनेकत्वात्तद्विरुद्धैका प्रत्यभिज्ञा भ्रान्तिः। बहुबाधस्यान्याय्यत्वात्" इति [1]मण्युक्तं निरस्तम् । प्रत्यभिज्ञाया विशेष्यात्मकव्यक्तयभेदविषयत्वेनोत्पत्त्यादिप्रत्ययस्य च विशिष्टविषयत्वेनोभयप्रामाण्यस्योक्तत्वात् । प्रत्याभिज्ञा व्यक्तयभेदविषया, उत्पत्त्यादिधीस्तु ध्वनिविषयेत्यपि सुवचत्वाच्च ॥

किं चोत्पत्तिधीः संमर्देऽपगतेऽवकाशो[2] जात इत्याकाशोत्पत्तिधीवदभिव्यक्तिविषयास्तु। त्वन्मते बाधलाघवोक्तिश्चायुक्ता । त्वदभिमतानां अयं शुकोत्पन्नो गकारः, अयं शुकोच्चारितो गकारो

मण्युक्तमन्यदपि निराह—**एतेनेति** । उत्पत्त्यादीत्यादिपदेन विनाशतारमन्दत्वादिप्रत्ययग्रहः—**उक्तत्वादिति** । "न च भेदधीर्बाधिके" त्यादिग्रन्थेनोक्तत्वादित्यर्थः ॥

ननूत्पन्नो गकारो नष्टों गकार इति प्रतीतेः कथं ध्वनिविषयतेत्यत आह—**किं चेति** । बहुबाधस्यान्याय्यत्वादित्युक्तिं च निराह—**त्वन्मत इति** । **त्वदभिमतानामित्यस्य** [3]**प्रत्ययाना**मिति षष्ठ्यन्तेनान्वयः । सर्वलोकसिद्धानामित्यस्य वक्ष्यमाणषष्ठ्यन्ताभ्यामन्वयः ॥

---

[1] मण्युक्तमिति नास्ति—**ख**. [2] त्पत्तिधीवत् इत्यस्ति—**ग**. [3] मानानां—**इ**.

[1] नष्ट इत्यादीनामुत्पत्त्यादिसाक्षात्काररूपप्रत्यायानां; सर्वलोकसिद्धानां[2] शुकोच्चारितो गकारोऽयं[3] वर्तते श्रोत्रे शुकगकार इत्याद्यभिज्ञानां; यः पूर्वं गकारः श्रुतः स एवेदानीमपि, योऽन्यत्र स एवात्रापि, यश्चैत्रोच्चारितः स एव मैत्रोच्चारितः, एकोच्चारितेऽपि[4] यः प्राच्येन श्रुतः स एव प्रतिच्येनापि, यो निकटस्थेन श्रुतः स एव दूरस्थेनापीत्यादिप्रत्यभिज्ञानां च; बाध[5]कत्वेन त्वन्मत एव बहुबाधात् ॥

न हि त्वत्पक्षे शुकोत्पन्नस्येदंत्वेन साक्षात्क्रियमाणत्वेन[6] वर्तमानत्वेन श्रोत्रस्थत्वेन च सामानाधिकरण्यम् । न वा एकोच्चारितेऽपि कदंब[7]गोलकन्यायपक्षे प्राच्यप्रतीच्ययोरेकत्वम् ॥

ननूक्तत्रिरूपप्रतीतीनां कुतो बाधो न्यायमत इत्यत आह--न हीति । शब्दोत्पत्तिदेशात्कदंबगोलकन्यायेन शब्दानां दशस्वपि दिक्षु दशधा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण कर्णदेशप्राप्त्युपगमेन कर्णदेशसंबद्धस्य शुकमुखोत्पन्नशब्दजातीयत्वेन साक्षात्तदुत्पन्नत्वाभावात् । एवं तत्तद्दिगवस्थितपुरुषैःश्रूयमाणस्यापि 'दिगन्तरस्थितपुरुषान्तरश्रुतशब्दजातीयत्वेन साक्षात्तदभेदाभावादिति भावः ॥

ननु तटाकादिमध्ये पाषाणाद्यभिघाताद्दशदिक्सम्बन्धिन्य एकैका

---

[1] न सः-ग. [2] अस्य पूर्वान्यय रेखाद्वयेन सूचितः-छ. [3] 'अयं' इति नास्ति-छ-क-ग-ख. [4] तः-छ-क. [5] धेन-छ-क-ग. [6] 'नष्टत्वेन' इत्यधिकम्-च-क-ग-ख 'वर्तमानत्वेन' इति नास्ति-छ. [7] मुकुळ-ख.

यद्यपि वीचीतरङ्गन्यायपक्षे तयोरैक्यम्। तथापि निकट[1] दूरस्थयोरैक्यं नास्त्येव। तस्माद्बहूनामबाधायोत्पत्त्यादिधीरेव भ्रान्तिरस्तु॥

ननूत्पत्त्यादिधीर्न तावत्स्मर्यमाणारोपः। सदृशादर्शनात्। गृह्यमाणारोपत्वे रक्तः स्फटिक इत्यादाविवोपाधिर्वाच्यः। स च न तावत्कुङ्कुमारुणा तरुणीतिवदानुभाविकः। गकारो[2]स्तीत्यादावुपाधेर्ध्वनेरननुभवात्। नाप्ययो दहतीतिवदौ[3]पपत्तिकः।

एव वीच्यस्तरङ्गाश्च जायन्त इति न्यायेन दशदिक्संबन्ध्येकैकशब्दपरंपरोत्पत्तिपक्षे प्राच्यादिशब्दस्यैक्यमेवेति न तत्प्रत्यभिज्ञाबाध इत्याशङ्क्य निराह—**यद्यपीति**। वीचीनाम सूक्ष्मरूपस्त्रीतरङ्गः। तरङ्गस्तु स्थूलः—**निकटेति**। शब्दोत्पत्तिदेशनिकटस्थदूरस्थयोरित्यर्थः॥

उत्पत्त्यादिधियो भ्रान्तित्वमयुक्तमिति मण्युक्तरीत्या शङ्कते—**नन्विति**। **सदृशेति**। शुक्ताविदं रूप्यमित्यारोपे शुक्तिसदृशस्य रजतस्येवेह वर्णसदृशस्योत्पत्त्यादिमतोऽभावादित्यर्थः। **आनुभाविक इति**। कुङ्कुमेनारुणा न स्वत इति कुङ्कुमस्योपाधित्वमनुभूयमानमित्यानुभाविकः। कुङ्कुमरूप उपाधिः। एवं गकारो ध्वन्युत्पन्नो न[4] स्वत इत्यनुभवाभावादित्यर्थः। **औपपत्तिक इति**। उपपत्तिसिद्ध इत्यर्थः। उपाधिरित्यनुषङ्गः। वह्निधर्मस्य दग्धृत्वस्यायस्यारोपाद्वह्निरूपोपाधिनैवायो दग्धृ न तु स्वत इत्यनुभवः। तत्रायसि वह्नित्वेन वह्नेरननुभवात्। किन्तु वह्निसम्बन्धे सति दग्धृत्वमन्यथा तु नेत्यन्वयव्यतिरेकगम्यं वह्ने-

---

[1] स्थदू-च-छ-ग-ञ दूरस्थनिकटस्थयो-क. [2] गकारो नास्ती-छ-क-ग. [3] पाधिकः-छ. [4] स्वरूपतः-अ-ङ.

तत्रान्वयव्यतिरेकवतोग्नेरिवेह तद्वतः कस्यचिद्-भावादिति चेन्न। इहापि ध्वनेः सत्त्वात् ॥

तत्राग्नेरग्नित्वेनाननुभवेप्यारोप्येण दग्धृत्वेना-नुभवोस्तीति चेदिहापि ध्वनेर्ध्वनित्वेनाननुभवे-प्यारोप्येणोत्पत्त्वादिनानुभवोस्तीति समम् ॥

न च प्रत्यभिज्ञारोप्ये ऐक्यसाक्षात्कारे सति कथं तद्विरुद्धोत्पत्त्यादिभ्रम इति वाच्यम्। उत्प-त्त्यादेरैक्याभावानात्मकत्वेन साक्षादविरोधात्। ऐक्यव्यापकाभावप्रतियोगित्वरूपे विरोधे सत्यपि तदग्रहदशायामारोपसम्भवात्। तद्ग्रहदशायां चा-रोपाभावस्येष्टत्वात् ॥

रुपाधित्वमित्यौपपत्तिक इत्युक्तम् ॥

यद्यपि मणौ "कृपाणे मुखदीर्घत्वमौपपत्तिकं कृपाणान्वयव्यति-रेकानुविधानात्" इत्युक्तम्। तथापि तत्रानुभाविकत्वमेव कथंचिद्वक्तुं शक्यम्। कृपाणत्वेन तस्यानुभवादित्यरुचिं मन्वानः अयो दहतीत्युदा-हरदित्यदोषः ॥

तद्वतः अन्वयव्यतिरेकवतः। उत्पत्त्यादिधर्मकस्येत्यर्थः। विशेषदर्शनसत्वेनारोपासम्भवमाशङ्क्य निराह—**न च प्रत्यभिज्ञेति**। किं साक्षादारोप्याभावावगाहित्वेन प्रत्यभिज्ञा विरोधिनी उतारोप्याभावं प्रति व्याप्यविषयकतया। आद्य आह—**उत्पत्त्यादेरिति**। अन्त्य आह—**ऐक्येति**। **प्रतियोगित्वेति**। उत्पत्त्यादेरित्यनुषङ्गः—**विरोध इति**। प्रत्यभिज्ञया सहेत्यर्थः—**तदग्रहेति**। उक्तरूपप्रतियोगित्वाग्रहेत्यर्थः—

तस्मात्प्रत्यभिज्ञाबाधितानि शब्दानित्यत्वानुमानानि ॥

वर्णा[1]नित्यत्वे प्रत्यभिज्ञाविरोधः ॥ २५ ॥

सत्प्रतिपक्षाणि च । तथा हि । शब्दत्वं नित्यवृत्ति द्रव्यत्वव्याप्यजातिमदसमवेताद्विष्ठवृत्ति-

---

तस्मादिति । प्रत्यभिज्ञा यागकारादिव्यक्तयैक्यादन्यविषयकत्वभ्रान्तित्वयोरयोगादित्यर्थः ॥

वर्णानामनित्यत्वे प्रत्यभिज्ञाविरोधः ॥ २५ ॥

प्रत्यभिज्ञादोषयोर्बाधप्रतिपक्षयोः प्रबलं बाधकं पूर्वमुक्त्वा प्रतिपक्षदोषं चाह—**सत्प्रतिपक्षाणि चेति** । शब्दानित्यत्वानुमानानीत्यनुषङ्गः । शब्दो नित्य इत्येव प्रतिज्ञोक्तौ द्वितीयादिकतिपयहेत्वसिद्धिः । ध्वन्यंशे बाधश्च । अतः शब्दत्वं नित्यवृत्तीति प्रतिज्ञा[2]य द्वितीयादिहेत्वनुगमाय तु वर्णत्वमित्येव न कृतम् । नित्यवृत्तित्वं च जगदाधारताप्रयोजकसंबन्धभिन्नसंबन्धेनेति ज्ञेयम् । स च सम्बन्धो न्यायमते समवायः । सिद्धान्ते स्वरूपसम्बन्धः । तेन कालवृत्तित्वमादाय न सिद्धसाधनतावकाशः । ध्वन्यंशे बाधाद्वर्णवृत्तित्वेन साध्यपर्यवसा[3]नमिति भावः—**द्रव्यत्वेति** । द्रव्यत्वव्याप्यजातयः पृथिवीत्वजल-

---

[1] नामनि-ग. [2] ज्ञा-अ. [3] नं, ध्वन्यानित्यताया ध्वनिवर्णयोरित्यादिना प्रागुपपादनादिति भावः इत्यस्ति-अ.

त्वात् आत्मत्ववत् (१) । घ्राणभिन्नबहिरिन्द्रिय-व्यवस्थापकतावच्छेदकत्वात् रूपत्ववत् (२) ।

त्वादयः । तद्वत्सु पृथिव्यादिष्वसमवेतं य[1]दद्विष्ठं अव्यासज्यवृत्ति तदवृत्तित्वादित्यर्थः । शब्दस्तु तादृशपृथिव्यप्तेजोवाय्वात्ममनःस्वसमवेतोऽद्विष्ठश्चेति तद्वृत्तिशब्दत्वे हेतुसत्त्वमिति भावः । एते च हेतवः पररीत्यैव । परासिद्धैर्दूषणमित्याचार्योक्तेः । अत एव सत्प्रतिपक्षाणीत्युपक्रमः । अन्यथा नित्यत्वे मानं त्विति ब्रूयात् । सिद्धान्तेऽनुगतजातेरभावात्पञ्चीकरणप्रक्रियायां शब्दस्य पृथिव्यादिष्वपि सत्त्वेन तादृशजातिमदसमवेतत्वाभावात् । अत एव सुधायां प्रकृतिनये "गगनादेश्च सत्यत्व" मित्यत्र पृथिव्यादिगुणत्वेनापि शब्दस्योत्पत्तिरुक्ता । पञ्चीकरणप्रक्रियामविवक्षित्वा जातिपदस्य सदृशधर्मपरत्वमुपेत्य स्वरीत्यापि वा । तेन मन्मत इत्यग्रिमग्रन्थाविरोध इत्याहुः । विशेषणकृत्यमग्रे स्फुटम्—**आत्मत्ववदिति** । तच्च[3] काप्यसमवेताद्विष्ठात्मवृत्तित्वाद्धेतुसाध्ययोः सत्त्वं स्पष्टम् । न्यायमते विभुत्वेनात्मनोऽवृत्तित्वात् ॥

घ्राणेति । घ्राणभिन्नं यद्बहिरिन्द्रियं श्रोत्ररूपं तदस्तित्वावधारकतानियामकत्वादित्यर्थः । शब्दज्ञानं हि कार्यं स्वकारणभूतं श्रोत्रास्यमिन्द्रियस्वरूपमनुमापयति । अकारणकस्यानित्यज्ञानस्यानुदयात् । अन्यस्य चक्षुरादेः शब्दज्ञाने करणत्वायोगात् । शब्दस्य तादृशेन्द्रियव्यवस्थापकतायां शब्दत्वस्यावच्छेदकत्वादिति भावः । चक्षुरिन्द्रियादिव्यवस्थापके[2] रूपत्वरसत्वादौ हेत्वनुगमाय **बाहिरिन्द्रियेति** सामान्योक्तिः । न तु श्रोत्रेति विशिष्य —**रूपत्ववदिति** । रूपत्वरसत्वस्पर्शत्वव-

[1] यद्द्विष्ठं अव्यासज्यवृत्ति तद्वृत्तित्वाभावादित्यर्थः—**अ.** [2] कतावच्छेदके—**मु.** [3] तस्य—**च.**

आत्मत्वमूर्तत्वासमानाधिकरणाद्विष्ठवृत्तित्वात् कालत्ववत् (३)। स्वाश्रयभिन्नविशेषगुणासमानाधिकरणप्रत्यक्षवृत्तित्वादात्मत्ववत् (४)। पृथिवीवृत्त्यवृत्तित्वे आत्मवृत्त्यवृत्तित्वे च सति सत्तासा-

दित्यर्थः । बहिरिन्द्रियव्यवस्थापकतावच्छेदकानां रूपरसगन्धस्पर्शशब्दत्वानां एकस्य पक्षत्वेपि गन्धस्य पृथिवीमात्रगुणत्वेन पार्थिवपरमाणुषु गुणानां पाकजत्वेनानित्यतायां[1] गन्धत्वस्य नित्यावृत्तित्वरूपसाध्याभावेपि जलपरमाण्वादिगतरूपरसस्पर्शानामपाकजत्वेन रूपत्वादित्रयस्य नित्य[2]वृत्तित्वादाधिक्यदोषनिरासाय **रूपत्ववदित्ये** वोक्तम्— **आत्मत्वेति** । आत्मत्वमूर्तत्वाभ्यामसमानाधिकरणं यद[3]द्विष्टं तन्निष्ठत्वादित्यर्थः । मूर्तत्वं नाम इयत्तावच्छिन्नपरिमाणयोगित्वम् । पृथिव्यप्तेजोवायुमनसां धर्मः । पक्षदृष्टान्तभूतयोः शब्दत्वकालयोस्तादृशशब्दकालनिष्ठत्वात्कालस्य नित्यत्वाच्च हेतुसाध्यानुगम इति भावः ॥

स्वेति । स्वस्य शब्दत्वस्याश्रयः शब्दः, तद्भिन्नाविशेषगुणो रूपादिः, तदसमानाधिकरणम् प्रत्यक्षम् च यत्, शब्द एव, तद्वृत्तित्वादि[4]त्यर्थः । दृष्टान्ते स्वस्यात्मत्वस्य आश्रयः आत्मा । तदतिरिक्तविशेषगुणेनासमानाधिकरणं प्रत्यक्षं च अवृत्तिभूतमात्माख्यं वस्तु तद्वृत्तित्वादिति हेत्वनुगमो ध्येयः । स्वशब्दस्य समभिव्याहृतपरत्वात् । शब्दत्वमात्रपरत्वेप्यदोषात्—**पृथिवीति** । पृथिवीवृत्ती रूपादिः । अत्मवृत्तिर्ज्ञानादिः । तदुभयावृत्तित्वे सति सत्तासाक्षाद्व्याप्यं पक्षे गुणत्वम् । दृष्टान्ते च द्रव्यत्वम् । तेन साक्षाद्व्याप्यं शब्दत्वं जलत्वं चेति पक्षदृष्टा-

[1] तया—इ. [2] वृत्तिपदं न—मु. [3] द्विष्टं—अ. [4] 'ति हेत्वनुगमो ध्येयः' इत्यस्ति. 'दृष्टान्ते' इत्यादिपङ्क्तिर्नास्ति—अ.

क्षाद्याप्यसाक्षाद्याप्यत्वात् जलत्ववत् (५)। व्योमेतरावृत्तिजातिमद्वृत्तित्वादात्मत्ववत्। (६) सकलशब्दवृत्तित्वात्सत्तावत् (७)। श्रोत्रं नित्यवृत्तिसत्ताव्याप्यव्याप्यजातिग्राहकम् अपार्थिवेन्द्रियत्वाच्चक्षुर्वत् (८)। वर्णो नित्यो ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वाच्छब्दत्ववत् (९) इत्याद्यनुमानैः प्रतिरोधात्॥

अत्राद्ये हेतौ कालाकाशगतद्वित्वनिष्ठद्वित्वत्वेऽ-

न्तयोर्हेत्वनुगमः। दृष्टान्ते साध्यानुमश्च जलपरमाणुवृत्तित्वेन ज्ञेयः। साक्षाद्व्याप्यत्वं नाम व्याप्याव्याप्यत्वे सति व्याप्यत्वम्। गुणत्वद्रव्यत्वयोः सत्ताजातेश्च मध्ये तथा गुणत्वद्रव्यत्वयोः शब्दत्वजलत्वयोर्मध्ये च व्याप्यधर्मान्तरस्याभावात्॥

व्योमेति। व्योमेतरस्मिन्नविद्यमानो यो जातिमान् शब्दः आत्मा च तद्वृत्तित्वाच्छब्दत्वस्यात्मत्वस्य चेति पक्षदृष्टान्तयोर्हेत्वनुगतिः॥

श्रोत्रमिति पक्षः। नित्यवृत्तिर्या सत्ताव्याप्यगुणत्वव्याप्यशब्दत्वरूपा जातिः तद्ग्राहकत्वेन पक्षे, दृष्टान्ते च तादृशरूपत्वग्राहकत्वेन साध्यानुगमः। रूपत्वस्यापि नित्यं यज्जलपरमाण्वादिरूपं तद्वृत्तित्वात्—**अपार्थिवेति**। परमते घ्राणस्यैव पार्थिवत्वेन तदन्येषामपार्थिवत्वान्नासिद्ध्यादिः॥

ध्वनीति। ध्वनिश्च शब्दत्वव्याप्यं तारत्वादिकं च ताभ्यां भिन्नत्वे सतीत्यर्थः—**प्रतिरोधादिति**। सत्प्रतिपक्षाणीत्यन्वयः—**द्वित्वत्व इति**। अनुमानोपनीतकालाकाशाद्यगोचरमानसापेक्षाबुद्धिजन्यस्य काला-

व्यभिचारायाद्विष्ठेत्युक्तम् । *[1] गन्धत्वदुःखत्वादावव्यभिचारायासमवेतेत्युक्तम् । असमवेतवृत्तित्वस्य प्रतिवादिनं प्रत्यसिद्धि[2]निरासाय द्रव्यत्वव्याप्यजातिमदित्युक्तम् * ॥

द्वितीये गन्धत्वेऽव्यभिचाराय घ्राणभिन्नेति ।

काशोभयगतद्वित्वस्य द्रव्यत्वव्याप्यजातिमत्सु पृथिव्यप्तेजोवाय्वात्ममनःस्वसमवेतत्वेन द्वित्वत्वे तादृशद्वित्ववृत्तित्वहेतुसत्त्वेपि नित्यवृत्तित्वाभावाद्व्यभिचारनिरासाया[3]द्विष्ठेत्युक्तमित्यर्थः । तर्ह्य[4]द्विष्ठवृत्तित्वादित्येवास्त्वित्यत अह—**गन्धत्वेति** । गन्धत्वादेः पृथिव्यात्मादिसमवेतगन्धादिवृत्तित्वादव्यभिचार इत्यर्थः । रूपत्वादिकं तु नित्यवृत्तीति गन्धत्वेत्युक्तम् । पार्थिवगुणानां पाकजत्वेन गन्धो न नित्य इति भावः ॥

तर्ह्यसमवेता[5]द्विष्ठेत्येवास्त्वित्यत आह —**असमवेतेपि** । **प्रतिवादिनं प्रतीति** । तार्किकं प्रतीत्यर्थः । सत्प्रतिपक्षानुमानप्रयोक्तृदशायां सिद्धान्तिनः स्थापनावादित्वेन परस्यैव प्रतिवादित्वात्—**असिद्धिनिरासायेति** । न चासिद्धिनिरासकं व्यर्थम् । व्याप्ति[6]पक्षधर्मताया अप्यनुमित्यङ्गत्वेन तत्संपादकस्यापि सार्थक्यात् । "यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न परिच्छिद्यते तद्विशेषणमर्थवदिति" न्यायेन विशिष्टहेतुनिष्ठव्याप्तेरुक्तविशेषणेन विना गृहीतुमशक्यत्वेन व्याप्तिग्रहौपयिकत्वाच्चेति भावः ॥

गन्धत्व इति । पृथिवीगुणस्य पाकजत्वेन गन्धत्वे नित्यवृत्तित्वरूपसाध्याभावेपि घ्राणरूपबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वाद्घ्राणभिन्ने

---

[1] अ यं ग्रन्थः नास्ति—क. [2] वारणाय-छ. [3] यद्वि—अ. [4] र्हिद्वि—अ [5] तद्वि—अ. [6] 'वत्' इत्यधिकं—इ.

दुःखत्वादावव्यभिचाराय बहिरिति चोक्तम् ॥

तृतीयेप्यद्विष्ठपदस्याद्यहेताविव प्रयोजनं द्रष्टव्यम्। दुःखत्वादौ [1]वेगत्वादौ चाव्यभिचारायात्मत्वमूर्तत्वासमानाधिकरणेत्युक्तम् ॥

चतुर्थे गन्धत्वे दुःखत्वादौ चाव्यभिचाराय विशेषगुणासमानाधिकरणेत्युक्तम् । विशेषगुणासमानाधिकरणमनोगतवेगवर्तिनि वेगत्वेऽव्यभिचाराय प्रत्यक्षेत्युक्तम् । मनोगतवे[2]गस्त्वप्रत्यक्षः। तावत्युक्ते गकाररूपविशेषगुणसमानाधिकरणत्वात्परं प्रत्यसिद्धिः । तदर्थं स्वाश्रय-

---

त्युक्तया न दोष इत्यर्थः—दुःखत्वेति । तस्यान्तरिन्द्रिय व्यवस्थापकतावच्छेदकत्वादिति भावः । आत्मत्वमूर्तत्वान्यतरासमानाधिकरणाद्विष्ठवृत्तित्वादित्युक्तावाह—दुःखत्वादाविति । मूर्तत्वासमानाधिकरणदुःखादिनिष्ठदुःखत्वादौ नित्यवृत्तित्वाभावेन तत्रा[3]व्यभिचाराय आत्मत्वासमानाधिकरणेत्यद्विष्ठविशेषणम् । आत्मत्वासमानाधिकरणं यदद्विष्ठं तद्वृत्तित्वादित्येवोक्तौ पृथिव्यप्तेजोवायुमनोधर्मवेगरूपगुणस्यात्मत्वासमानाधिकरणत्वेन वेगत्वे यथोक्तहेतुसत्त्वेपि नित्य[4]त्वाभावात् मूर्तत्वासमानाधिकरणेत्यद्विष्ठविशेषणमित्यर्थः ॥

प्रत्यक्षवृत्तित्वादित्येवोक्तौ दोषमाह—दुःखत्वादौ चेति । तर्हि प्रत्यक्षेत्यस्य बाह्यप्रत्यक्षेत्यर्थं मत्वोक्तम्—गन्धत्वेति। परं प्रतीति ।

---

[1] 'वेगत्वादा' इति नास्ति—छ वेगधर्त्वादौ—ग. [2] वेगपदं नास्ति—छ.
[3] अ व्यभिचारवारणाय—इ. [4] वृत्तीत्यधिकं—इ.

भिन्नेत्युक्तम् । एवं च [1]ककारस्यापि शब्दत्वाश्रयत्वेन तद्भिन्नत्वाभावान्नासिद्धिः ॥

पञ्चमे गन्धत्वादावव्यभिचाराय पृथिवीवृत्त्यवृत्तित्वे सतीत्युक्तम् । दुःखत्वादावव्यभिचारायात्मवृत्त्यवृत्तित्वे सतीत्युक्तम् । प्रभात्वादावव्याभचाराय स[2]मेत्याद्युक्तम् ॥

एवं च सत्तासाक्षाद्व्याप्यं * [3]द्रव्यत्वं प्रति तेजस्त्वमेव साक्षाद्व्याप्यम् न तु प्रभात्वादिकमिति न व्यभिचारः । शब्दत्वं तु मन्मते सत्तासाक्षाद्व्याप्यं * द्रव्यत्वं प्रति परमते च गुणत्वं प्रतिसाक्षाद्व्याप्यमिति नासिद्धिः ॥

षष्ठे ध्वनिप्रागभावत्वेऽव्यभिचाराय जातिमदित्युक्तम् । गन्धत्वादावव्यभिचाराय व्योमेतरावृत्तीत्युक्तम् ॥

तार्किकं प्रतीत्यर्थः—**नासिद्धिरिति** । असिद्धिवारकस्यापि सार्थक्यं पूर्ववत् ॥

आत्मेत्याद्युक्तौ दोषमाह—**गन्धत्वादाविति** । व्योमेतरावृत्तिवस्तुवृत्तित्वादित्येवोक्तौ दोषमाह— **ध्वनिप्रागभावत्व इति** ॥

ननु सप्तमे सकलवृत्तित्वादित्येवोक्तौ प्रमेयत्वादौ कवलान्वयिनि नित्यवृत्ति[4]साध्यस्यापि सत्त्वेन व्यभिचाराभावाच्छब्देति व्यर्थम् । स्वरूपासिद्धिवारकत्वेपि व्यर्थत्वादित्यत ईश्वरवादोक्तदिशा व्याप्त्या-

---

[1] गकार–छ-क. [2] त्वेत्या–छ-क-ग-ख. [3] अयं ग्रन्थः नास्ति–छ-क. [4] त्वसा–अ.

सप्तमे शब्दपदमकेवलान्वयिनो गुणत्वादेरपि संग्राहकत्वेन विकासकत्वान्न व्यर्थम् ॥

***[1] अष्टमे साध्ये नित्यवृत्तिसत्ताद्रव्यत्वयोः सत्तागुणत्वयोर्वा ग्राहकत्वेनार्थान्तरमिति शङ्का-निरासाय [2] सत्ताव्याप्यव्याप्येत्युक्तम् * । हेतोर्घाणेऽव्यभिचारायापार्थिवेत्युक्तम् ॥**

[3] नवमे ध्वनौ शब्दत्वव्याप्ये तारत्वादौ चाव्यभिचाराय ध्वनिशब्दत्वव्याप्याभिन्नेत्युक्तम् । अत्र

श्रयाणामनेकत्वसंपादकत्वेन सार्थक्यादिति भावेनाह—**सप्तम इति** । **अकेवलान्वयिन इति** । शब्दनिष्ठस्येत्यपि ग्राह्यम् । न केवलं केवलान्वयिनः प्रमेयत्वादेरपीत्येपरर्थः । आकाशसमवेतत्वादिरादि-पदार्थः ॥

अष्टम इति । अपार्थिवेन्द्रियत्वादिति हेतौ यत्साध्यं नित्यवृत्ती-त्यादि तस्मिन्नित्यर्थ—**नित्यवृत्तिसत्ताद्रव्यत्वयोरिति** । नित्यवृत्ति-सत्ताजातिग्राहकमित्युक्ते शब्दगतसत्ताग्राहकत्वेनार्थान्तरम् । शब्दस्या-नित्यत्वेप्याकाशादिनित्यवृत्तित्वात्सत्तायाः । अतो **नित्यवृत्तिसत्ता-व्याप्यजातिग्राहकमिति** । तावत्युक्ते शब्दो द्रव्यमिति मते द्रव्यत्वस्य, गुण इति मते गुणत्वस्य ग्राहकत्वेनार्थान्तरम् । अतः सत्ताव्याप्यव्याप्येत्युक्तमित्यर्थः । सिद्धसाधनताव्युदासाय शब्दस्य नित्यत्व सिद्धये नित्यवृत्तीति जातिविशेषणमिति स्पष्टमिति भावः ॥

नवम इति । ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वादि-त्यत्र ध्वनिपदस्य कृत्यं ध्वनाविति । ध्वनिभिन्नत्वे सति श्रावणत्वादित्ये-

---

[1] अयं ग्रन्थः लुप्त.—**छ** [2] सत्तेत्यु—**ग.** [3] चरमे—**छ.**

विपक्षे प्रत्यभिज्ञानुपपत्ति[1]गौरवादीनि बाधकानि। केचित्तु श्रोत्रं नित्यद्रव्यग्राहकम् निरवयवेन्द्रियत्वात् मनोवत् इत्याहुः ॥

वर्णानां नित्यत्वेनुऽमानानि ॥ २६ ॥

वोक्तौ दोषः **शब्दत्वव्याप्यतारत्वादाविति** । ध्वनिशब्दत्वव्याप्याभ्यां भिन्नत्वे सतीत्युक्तमित्यर्थः । श्रावणत्वादिति तु घटादावव्यभिचारायेति व्यक्तमिति भावः—**कल्पनागौरवादीति** । विवरिष्यते चैतदुत्तरभङ्गे व्यक्त्यानन्त्यादिकल्पना विचीतरङ्गादिन्यायेन पूर्वशब्दस्योत्तरोत्तरशब्दान्तरजनकत्वमुत्तरशब्दस्य पूर्वपूर्वशब्दनाशकत्वमन्त्योपान्त्ययोरन्योन्यनाशकत्वमित्युत्तरत्र[2] वक्ष्यमाणगौरवमित्यर्थः । आदिपदेन बहुबाधादिग्रहः—**नित्यद्रव्येति** । शब्दत्वादिग्राहकत्वेनार्थान्तरपरिहाराय द्रव्यपदम् । एवं च शब्दस्य द्रव्यत्वं नित्यत्वं चादाय साध्यं पर्यवस्यति । व्योमादिनित्यद्रव्यग्राहकत्वेन पर्यवसानस्य बाधितत्वात् । इन्द्रियत्वमात्रस्य चक्षुरादौ व्यभिचारान्निरवयवेत्युक्तिः—**मनोवदिति** । तस्यात्मग्राहकत्वादिति भावः ॥

अत्रारुचिबीजं तु, आत्मनो मानसत्वे कदाचिदहमनहं वेत्यादिसन्देहापातेन सुदृढनिर्णयरूपसाक्षिवेद्यत्वादात्मनः साध्यवैकल्यं दृष्टान्तस्य वस्तुमात्रस्येश्वरवादोक्तरीत्या संयोगित्वयुक्त्या सावयवत्वेन निरवयवत्वासिद्धेरित्यादि ध्येयम् ।

वर्णानित्यत्वेऽनुमानानि ॥ २६ ॥

---

[1] कल्पनेत्यधिकं—ग-ख-रा. [2] भङ्गे इत्यधिकम्-अ.

ननु वर्णानां नित्यत्वे सर्वदोपलब्धिः स्यात् । न चोच्चारणजन्यस्य ध्वनिरूपव्यञ्जकस्य कादाचित्कत्वान्न दोष इति वाच्यम् । तस्य हि व्यञ्जकत्वं न तावदावरणापसारणवदिन्द्रियसन्निधा[1]पकत्वेन । श्रोत्रगुणत्वपक्षे विभुत्वपक्षे च वर्णानां सर्वेन्द्रियसंबन्धात् । नापि चक्षुरादावञ्जनादेरिव श्रोत्रे संस्काराधायकतया । संस्कृतेन श्रोत्रेण चक्षुषेव विविच्य स्वसंबद्धसर्ववर्णसमूहालम्बनस्यैकस्य ज्ञानस्योत्पत्त्यापातादिति चेन्न । त्वन्मते वर्णोत्पादकानामिव मन्मते तद्व्यञ्जकानामपि नियतत्वात् ॥

"अत आकाशगुणे शब्दे व्यज्यमाना वर्णादय" इति तत्त्वनिर्णयवाक्यस्य टीकायां शङ्कितं वर्णनित्यत्वबाधकं मण्याद्युक्तमाशङ्कते—**नन्विति । श्रोत्रगुणत्वपक्ष इति ।** परिमाणवन्नि[2]त्यशब्देन सर्वदा श्रोत्रस्य सम्बन्धादित्यर्थः । बुभुत्सायां[3] नियामकत्वमाशङ्क्योक्तं—**चक्षुषेवेति—**

"सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान्प्रकाशयेत् ।
घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते ॥"

इति प्राचीनोक्तेरिति भावः—**त्वन्मत इति ।** यथैकवर्णोत्पादके[4]नैव न सर्ववर्णोत्पत्तिः, तथैकवर्णव्यञ्जकेनैव न सर्ववर्णव्यक्तिरिति न सर्वोपलम्भ इत्यर्थः ॥

वर्णानित्यत्ववादे पूर्वपक्षे मणिकृताशङ्क्य निरस्तमप्यनुमानं

---

[1] धायक-क-ख. [2] नित्यपदं न-अ. [3] यानि-इ. [4] नेनै-अ.

ननु वर्णा न प्रतिनियतव्यञ्जकव्यङ्ग्याः, एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वाद्घटगतैकत्व[1]परिमाण[2]वत् । [3]अत्र च साध्ये व्यञ्जकशब्देन[4]* विषयसन्निकर्षातिरिक्तो ज्ञानहेतुर्विवक्षित इति न बाधः । हेतौ भिन्नेन्द्रियग्राह्य-

दोषान्तरविवक्षया शङ्कते—**नन्विति । प्रतिनियतेति** । अत्र प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वं दोषाभावे परस्पराविषयक साक्षात्कारविषयत्वमिति यावत् । तेनैकत्र द्वित्वभ्रमजनकेन परिमाणग्राहिणा परिमाणभ्रमजनकेनैकत्वग्राहिणा च न व्यभिचार इति व्याचक्षते—**एकेति** । कवर्णाद्ये[5]कावच्छेदकश्रोत्ररूपसमानदेशत्वे सति श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णानां पक्षे हेतुसत्त्वं ध्येयम् । एकावच्छेदकदेशतः कालतश्चेत्यग्रे व्यक्तम् । अन्यूनानतिरिक्तदेशकालत्वे सतीति पदद्वयतात्पर्यमित्येके—**घट गतेति** । घटगतैकत्वपरिमाणयोरेकघटत्वावच्छेदेन समानदेशत्वं समानेन्द्रियचक्षुर्ग्राह्यत्वमिति हेत्वनुगमः । परिमाणव्यञ्जकालोकव्यङ्ग्यत्वादेकत्वस्य प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभावरूपसाध्यानुगम इति भावः । ननु व्यञ्जकपदेन सन्निकर्षस्यापि ग्रहणे समवायस्यैकत्वेपि तत्तद्वर्णनिरूपितश्रोत्रसमवायस्य नि[6]यतत्त्वात्तदभावसाधने बाधो दृष्टान्ते साध्यवैकल्यं चेत्यत अह—**अत्र च साध्य इति** । न बाध इत्युपलक्षणम् । दृष्टान्ते साध्यवैकल्यं च नेत्यपि ध्येयम् ॥

सत्यन्तमात्रं हेतुरस्त्वित्यत आह—**हेताविति** । रूपादेरालोकलवणादिभिन्नव्यञ्जकव्यङ्ग्यत्वादिति भाव । समानदेशत्वे सतीत्यस्य

[1] सङ्ख्यापरि-छ. [2] णादि-छ. [3] सन्निकर्षातिरिक्तत्वविवक्षया न बाधः इत्यस्ति-छ. [4] एतावन्नास्ति-ग. [5] एकपदं न-मु. [6] त्यत्वात्-इ.

रूपरसादौ व्यभिचारनिरासाय समानेन्द्रियेति विशेषणम् । [1]एकेन श्येन[2]चरणावच्छेदेन *वर्तमानयोर्भिन्नसंयोगिव्यङ्ग्ययोः [3]श्येनस्य स्थाणुतदवयवा[4]भ्यां संयोगयोर्व्यभिचारनिरासाय समानदेशत्वे सतीति विशेणम् । इह च समानदेशत्वमनातिरिक्तदेशत्वं विवक्षितम् । तेनोक्तयोः संयोगयोरेकस्मिन् श्येने वृत्तावपि स्थाणुसंयोगस्यावयवसंयोगानाश्रये स्थाणावयवसंयोगस्य च स्थाणुसंयोगानाश्रयेऽवयवे वृत्त्यातिरिक्तदेशत्वान्न व्यभिचारः । अत एव

"प्रदीपे व्यज्यते जातिर्न तु नीरजनीलिमे
त्युक्तत्वादुत्पलत्वव्यञ्जकप्रदीपाव्यङ्ग्ये नैल्ये

कृत्यमभिमतं मण्युक्तं व्यनक्ति—**एकेनेति** । साध्याभावोपपादनायोक्तं भिन्नसंयोगिव्यङ्ग्ययोरिति । कारणाकारणसंयोगात्कार्याकार्यसंयोग इति संयोगजसंयोगपक्षे स्थाणुश्येनसंयोगस्थाने स्थाण्ववयवसंयोगस्यापि सत्त्वात् स्थाणुतदवयवाभ्यां संयोगयोरित्युक्तम् । तथाच कथं न व्यभिचार इत्यत आह—**इह चेति** ॥

अन्यत्रापि व्यभिचारनिरासः फलमित्यत आह—**अत एवेति** । समानदेशत्वे सतीत्य[5]स्यैवं विवक्षाकरणादेवेत्यर्थः—[6]**प्रदीप इति** । प्रदीपे सत्येवेत्यर्थः । जातिरुत्पलत्वम् । न तु व्यज्यत इत्यन्वयः । नीरजनीलिमा तु तस्मिन्सत्येव व्यज्यत इत्युक्तत्वात्प्राचीनैरित्यर्थः—

---

[1] एकेनेति नास्ति-छ. [2] ने पादाव-छ. [3] श्येनस्येति नास्ति-छ. [4] वसं-छ. [5] त्यन्तस्यैवं-इ. [6] इत्युक्तत्वात् इतिपर्यन्तं लोपः-इ-अ.

न व्यभिचारः । उत्पलत्वस्यातिरिक्तदेशवृत्ति-त्वात् । कालरूपावच्छेदकभेदेनैकघटनिष्ठयो रूपतद्ध्वंसयोर्व्यभिचारनिरासायैकावच्छेदेनेति वि-शेषणम् । एकावच्छेदश्च न केवलं कालतः । किं तु देशतोपि । तेनावयवद्वयवृत्त्योरवयवद्वया-रब्धयोरवयविसंयोगयोर्व्यभिचारो निरस्तः । अवयविनो व्याप्यवृत्तित्वेन अवयवसंयोगस्य चाव्याप्यवृत्तित्वेन देशतोऽवच्छेदकभेदात् । अत्र च हेतुमत्सु संख्यादि[1]सामान्यगुणेषु द्रव्यग्रहण-योग्यतान्तर्गतयोग्यताकत्वस्य द्रव्यग्राहक[2]बहिरि-न्द्रियग्राह्यत्वस्य च सत्त्वान्न व्यभिचारशङ्का । न चोक्तहेतुनैव प्रतिनियतोत्पादकाभावोपि साध्यः ।

अतिरिक्तेति । रक्तोत्पलेपि सत्त्वादिति भावः—**काल-रूपेति** । काला-स्येत्यर्थः—**अवयवीति** । अवयवी च संयोगश्चेति द्वंद्वः । तन्तुद्वय-निष्ठस्य पटरूपावयविनः तन्तुद्वयसंयोगस्य च यथाक्रममालोकेन तन्तु-द्वयेन च व्यङ्ग्यत्वात्साध्याभावेपि हेतुरपि तत्र नेत्याह—**अवयविन इति** । **अवच्छेदकेति** । व्यक्तयंशावच्छेदेन संयोगस्य, सर्वावयवाव-च्छेदेनावयविनो वृत्तेरिति भावः ॥

नन्वेवमपि सङ्ख्यापरिमाणपृथक्त्वेषु एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वहेतोः सत्त्वाद्व्यभिचार इत्यतः साध्यस्यापि सत्त्वान्न दोष इत्याह—**अत्र हेतुमत्स्विति** । **भिन्नहेत्विति** । वेगस्य

---

[1] सामान्यपदं न—क. [2] यावदिन्द्रि—ग-ख.

भिन्नहेतुजन्ययोर्वेगकर्मणोर्व्यभिचारादिति चेन्मैवम् । तथापि त्वचा ग्राह्ययोर्घटगतस्पर्शपृथक्त्वयोर्व्यभिचारात् । तत्र पृथक्त्वस्य स्पर्शाव्यञ्जकेनावधिना व्यङ्ग्यत्वात् ॥

न च समानेन्द्रियग्राह्यपदेन परस्पराग्राहकेन्द्रियाग्राह्यत्वं विवक्षितम्, एवं च न व्यभिचारः; स्पर्शस्य पृथक्त्वग्राहकत्वगिन्द्रियमात्रग्राह्यत्वेन तदग्राहकाग्राह्यत्वेपि पृथक्त्वस्य स्पर्शाग्राहकचक्षुर्ग्राह्यतया तदग्राह्यत्वाभावादिति वाच्यम्। भिन्नपुरुषनिष्ठापेक्षाबुद्धिभ्यां जन्ययोर्व्यङ्ग्ययोश्चैकदेशकालयो-

---

कर्मजन्यत्वात्कर्मणो नोदनादिजन्यत्वादिति भावः—**तथापीति** । उक्तस्थलेषु व्यभिचाराभावेपीत्यर्थः । हेतुसत्त्वायोक्तं-**त्वचा ग्राह्ययोरिति** । सत्यन्तांशसत्त्वं तु व्यक्तम् । साध्य[1]सत्त्वं व्यनक्ति—**तत्रेति** । **अवधिनेति** । अयमस्मात्पृथगिति प्रतीत्या पञ्चम्यन्तनिर्दिष्टावधि[2]पदार्थेनेत्यर्थः । तावता कथं न व्यभिचार इत्यत आह—**स्पर्शस्येति** । **भिन्नेति** । यत्र घटपटस्थळे चैत्रनिष्ठापेक्षाबुद्धया मैत्रनिष्ठापेक्षाबुद्धया च द्वित्वद्वयमुपपन्नं तत्र द्वित्वद्वये एकावच्छेदेन समानदेशत्वे सति परस्पराग्राहकेन्द्रियाग्राह्यत्वरूपहेतोः सत्त्वात् द्वित्वत्वावच्छिन्नाद्वित्वग्राहकेन्द्रियस्यैकत्वेन नानात्वाभावादित्यर्थः । साध्यसत्त्वं नेति भावेनोक्तं **व्यङ्ग्ययोश्चेति** । उक्तरूपबुद्धिभ्यां व्यङ्ग्ययोश्चेत्यर्थः ॥

---

[1] साध्या–अ. [2] शब्दा–अ.

द्वित्वयोर्व्यभिचारात्। त्वयापेक्षाबुद्धिर्व्यञ्जिकेत्यपि स्वीकारात् ॥

न च प्रति[1]नियताप्रतिप[2]त्तिकत्वमपि हेतुविशेषणं विवक्षितम्, द्वित्वे तु प्रतिनियतप्रतिपत्तृके इति वाच्यम्। अवयविव्यञ्जकमात्राव्यङ्ग्येनावयवबहुत्वेनैकत्वव्यञ्जकमात्राव्यङ्ग्येन पृथक्त्वदीर्घत्वादिना च व्यभिचारात् ॥

ननु परस्पर[3]व्यभिचारिव्यञ्जकाव्यङ्ग्यत्वं साध्यम्, एवं च न व्यभिचारः। अवयव्येकत्वव्यञ्जकयोर्बहुत्वपृथक्त्वव्यञ्जकाभ्यां व्यभिचारेपि

तद्व्यञ्जकत्वमसिद्धमित्यत आह—**त्वयेति**। **अवयवीति**। पटावयवगतबहुत्वस्य पटेन सहैकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वरूपहेतुमत्त्वेपि साध्यवत्त्वं नेत्युपपादनाय **अवयविव्यञ्जकमात्राव्यङ्ग्येने**त्युक्तम्। अपेक्षाबुद्ध्यापि व्यङ्ग्यत्वस्वीकारादिति भावः—**एकत्वेत्यादि**। अवधिपदार्थेनापि व्यङ्ग्येनेत्यर्थः। हेतुसत्त्वं तु व्यक्तमिति साध्याभाव एवोपपादितः। [4] तथा चैकत्वदीर्घत्वयोरेकत्वपृथक्त्वयोर्न व्यभिचार इत्यर्थः ॥

कथं न व्यभिचार इत्यत उक्तस्थले साध्यसत्त्वं व्यनक्ति—**अवयवीति**। अवयव्येकत्वयोः ये व्यञ्जके तयोरित्यर्थः—**व्यभिचारेपीति**। बहुत्वव्यञ्जकापेक्षाबुद्धेरवयविव्यञ्जकत्वाभावात्। तथा पृथ-

---

[1] सर्वत्र प्रतिनीतेत्येवास्ति—**ख**. [2] कर्तृकत्वमपि—**छ-क**. [3] प्रतिनीतेन्द्रियजन्यग्राह्यत्वं इत्यधिकं—**ख**. [4] इयं पङ्क्तिर्नास्ति—**इ**.

बहुत्वपृथक्त्वव्यञ्जकयोरवयव्येकत्वव्यञ्जकाभ्याम-
व्यभिचारेण परस्परव्यभिचारिव्यञ्जकाव्यङ्ग्यत्व-
रूपसाध्यस्य सत्त्वादिति [1]मणावुक्तमिति चेन्न ।
तथाप्यवयवबहुत्वग्रहव्यतिरेकेणावयविग्रहवदञ्च -
लेऽवयविग्रहव्यतिरेकेणावयवबहुत्वग्रहदर्शनेनानै -
कान्त्यात् । भिन्नप्रतियोगिव्यङ्ग्ययोर्भूतलगतयोः
समवायिनाशजन्ययोर्विरलावयवतया समानदेशा-

क्त्वव्यञ्जकावधेरेकत्वाव्यञ्जकत्वादिति भावः—**व्यभिचारेणेति** । अवयव्यादेरग्रहे तन्निष्ठबहुत्वाद्यग्रहात् अवयव्यादिव्यञ्जकालोकाद्यव्यभिचार आवश्यक इति भावः—**मणाविति** । वर्णानित्यत्ववादे पूर्वपक्षे—**अञ्चल इति** । वस्त्रान्त्यभाग इत्यर्थः । तथा च परस्परव्यभिचारव्यञ्जकव्यङ्ग्यत्वमेव न तु तदभावरूपसाध्यसत्त्वमिति व्यभिचार इत्यर्थः ॥

ननु बहुत्वस्य पटावयवैकदेशवृत्तित्वेन पटस्य तदधिकवृत्तित्वात् । बहुत्वस्याशुविनाशिताया पटस्याधिककालत्वाच्च । एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वरूपहेत्वभावान्नानैकान्त्यमित्यन्यत्र व्यभिचारमाह—**भिन्नेति** । साध्याभावोपपादनाय भिन्नेत्यादि । समानदेशतोक्त्यर्थं भूतलगतयोरिति । समवायिगतत्वाद्ध्वंसस्य कथं भूतलस्थतेत्यत उक्तम् । समवायीत्यादि । ध्वंसयोरित्यन्वयः । प्रतियोगिनोः समानदेशत्वे तद्ध्वंसयोरपि तथात्वादिति भावेनाह—**विरलावयवे[2]ति** । पाषाणादिवन्निबिडद्रव्यत्वाभावेन समानदेशे ये आलोकजले तद्ध्वंसयोरित्यर्थः । निर्म[3]लजलान्तस्थभूतलेप्यालोकोपलम्भा-

---

[1] मणावुक्तमिति नास्ति—छ. [2] वतयेति—इ. [3] विमल—मु.

लोकजलप्रतियोगिकयोरालोकजलध्वंसयोर्ब्राह्मण-त्वात्यन्ताभावतद्व्यञ्जकात्यन्ताभावयोश्च व्यभिचाराच्च । देशशब्देन समवायिविवक्षायामपि वर्णानां नित्यद्रव्यत्ववादिनं [1]मां प्रत्यसिद्धेः । घटगतयोरेकत्वैकपृक्त्वयोर्भिन्नव्यक्तिवङ्क्यगोत्वाश्वत्वादौ च व्यभिचाराच्च । जातिः सर्वगतेति पक्षस्येव

दिति भावः । **ब्राह्मणत्वात्यन्ताभावतद्व्यञ्जकात्यन्ताभावयोरिति**। भिन्नप्रतियोगिव्यङ्ग्ययोर्भूतलगतयोरित्येतदत्राप्यन्वेति । ब्राह्मणत्वं व्यञ्जकं ब्राह्मणमातापितृकत्वादिकम्—**देशशब्देनेति** । समानदेशत्वे सतीति हेतुशरीरप्रविष्टदेशशब्देनेत्यर्थः । तथा च हेत्वभावान्न तत्र व्यभिचार इति भावः । नन्वेकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वाभावादिति हेत्वर्थोस्त्वित्यत आह—**घटगतयोरिति** । एकपृथक्त्वस्यावधिव्यङ्ग्यत्वादेकत्वस्य तदभावाद्भिन्नव्यङ्ग्यत्वेन साध्यासत्त्वेप्युक्तहेतुसत्त्वादिति भावः । अवध्यनभिव्यङ्ग्यत्वेनापि हेतुर्विशेष्यत इत्यत आह—**भिन्नेत्यादि** ॥

ननु कथं गोत्वाश्वत्वादौ हेतुसत्त्वम् । समानदेशत्वाभावादित्यत आह—**जातिः सर्वगतेतीति** । गोत्वस्य देशादिव्यवहितानेकगोपिण्डगतत्वपक्षे मध्यगताश्वादिपिण्डैरसम्बन्धायोगादश्वादावपि सम्बन्धेन तत्रापि वृत्तेरङ्गीकारस्य युक्तिसिद्धत्वात् । अश्वादौ गोत्वाद्यनुपलम्भस्य गोव्यक्तिरूपव्यञ्जकाभावेनोपपत्तेः । एवमश्वत्वादिजातिर्गवादिपिण्डसम्बन्धेति जातेः सर्वगतत्वात्समानदेशत्वमिति भावः ॥

---

[1] मां इति नास्ति-ख.

प्रामाणिकत्वात् । वर्णाः परस्परव्यभिचारिप्रमापकप्रमाप्याः आश्रयेण सहैकेन्द्रिय[1] ग्राह्यत्वात् गन्धरसवदित्यनेन सत्प्रतिपक्षता च ।

उक्तं हि तत्त्वनिर्णयटीकायां "गोत्वाश्वत्वादीनां प्रतिनियतव्यक्ति[2]व्याप्यत्वस्य परैरपि स्वीकृतत्वात्, गोत्वादीनां व्यक्तिसर्वगतत्वेन समानदेशत्वं नास्तीति चेन्न। प्रत्यासत्तेरवर्जनीयत्वात् । समवायाभावस्य वर्णेष्वपि सत्त्वा" दित्यादि ॥

नन्वितरनिरूपणानधीननिरूपणत्वे सतीत्यपि हेतुर्विशेष्यते । पूर्वोक्तव्यभिचारस्थळानि सर्वाण्यप्यन्यनिरूपणाधीननिरूपणान्येव, अतो हेत्वभावान्न व्यभिचार इति[3] पूर्वपक्षे मण्युक्तमेव प्रतिपक्षदोषं चाह— **वर्णा इति ।** परस्परव्यभिचारिणः प्रमापकाः ध्वनयस्तत्प्रमा[4]प्यत्वेन साध्यसिद्धिः । **आश्रये[5]णेति ।** शब्दस्येकेन्द्रियग्राह्यत्वेपि तार्किकमते वर्णाश्रये[6]ण गगनेन सहैकेन्द्रियाग्राह्यत्वाद्गगनस्यातीन्द्रियत्वात् आश्रयग्राहकेन्द्रियाग्राह्यत्वादिति फलितार्थत्वान्नासिद्धिः ॥

न चैवमसिद्धिवारकत्वात्सहेत्यन्तं व्यर्थम्, तद्विनाकृतस्यैव व्याप्यत्वादिति वाच्यम् । असिद्धिवारकस्यापि व्यभिचारवारकस्येव सार्थक्यादित्युक्तत्वात् । अखण्डाभावेऽवैयर्थ्या[7]च्च । शरीरा[8]जन्यत्ववत् ॥

न च द्व्यणुकादौ व्यभिचार इति वाच्यम् । प्रत्यक्षत्वे सतीति हेतुविशेषणादित्येके । आश्रयाग्राहकेन्द्रियग्राह्यत्वादित्यर्थ इत्यन्ये । **गन्धेति ।** गन्धरसयोर्घ्राणरसनग्राह्यत्वात्तदाश्रयस्य चक्षुरादिग्राह्यत्वा-

---

[1] याग्रा–छ-क-ग-ख. [2] व्यङ्गयत्वस्य–इ. [3] त्यतः पू–मु-इ. [4] णत्वे–अ, व्याप्यत्वे–इ. [5] ययोरि–अ. [6] यणेन–अ. [7] र्थं च–इ-अं. [8] रज–अ-इ.

द्रव्यग्रहणयोग्यतान्तर्गतयोग्यताकत्वं मूर्तवृत्तित्वं चोपाधिश्च ॥

किं चैवं सति वर्णाः परस्परं व्यभिचार्युत्पादकोत्पाद्या न, अपाकजत्वे सति भूतविशेषगुणत्वात्, जलगतरूपरसवदित्याद्यनुमाननेनोत्पादकानियमोपि किं न साध्यते । जन्यजलगतरूपरसादीनां कारणगुणपूर्वकत्वे[1] न तदुत्पादकानां परस्पर-

---

द्धिन्नप्रमापकप्रमा[2]प्यत्वाच्च हेतुसाध्ययोरनुगमो व्यक्तः । सत्प्रतिपक्षता चेत्युपलक्षणम् । न्यायमते वर्णानां क्रमिकोत्पादित्वेनाव्याप्यवृत्तित्वेन च तुल्यदेशकालत्वाभावात् । [3]एकावच्छेदेनेत्यादिहेतोरसिद्धिः । किंच तत्तद्वर्णमात्रविषयकसाक्षात्कारसम्भवाद्बाधश्चेत्यपि ध्येयम् ॥

एकावच्छेदेनेति हेतावुपाधी[4] चाह—**द्रव्येति** । यत्र धटगतैकत्वपरिमाणयोरेकव्यञ्जकव्यङ्ग्यत्वं तत्र द्रव्यग्रहणेत्याद्युपाधी स्त इति साध्यव्यापकत्वम् । साधनवति पक्षे वर्णे द्रव्यग्रहणेत्याद्युक्तोपाधी नस्त इति साधनाव्यापकत्वं च व्यक्तमिति भावः ॥

प्रागुक्तहेतोरनैकान्त्योक्तेर्हेत्वन्तरमाह—**अपाकजत्वे सतीति** । गुणत्वादित्युक्तौ भिन्नो[5]त्पादकोत्पाद्ये घटादिगतसङ्ख्यापरिमाणादिसामान्यगुणे व्यभिचाराद्वि शेषेति । आत्मगुणेषु भिन्नो[6]त्पादकोत्पाद्येषु ज्ञानादिष्वव्यभिचाराय भूतेति । पृथिवीगतरूपादिषुव्यभिचाराय सत्यन्तम् ॥

दृष्टान्ते तु साध्यानुगतिं दर्शयति । **जन्येति** । समवायि[7]कारणसमवायिकारणमात्रप्रत्यासन्नगुणासमवायिकारणकत्वं कारणगुणपूर्वकत्वं

---

[1] त्वे तदु-**च-क**. [2] व्याप्यत्वा-**अ**. [3] इतः 'ध्येयं' इत्यन्तं नास्ति-**इ**. [4] धीरा-**अ**. [5] उत्पादकपदं न-**इ**. [6] उत्पादकपदं न-**इ**. [7] अत्र सर्वत्र दीर्घ एवास्ति-**इ**.

व्यभिचाराभावात् । यदि फलबलाच्छब्दे [1]उत्पादकनैयत्यं तर्हि तत एव व्यञ्जकनैयत्यमप्यस्तु ॥

किंचोत्पत्तिपक्षे कदम्बगोलकन्यायेन लाघवप्रत्यभिज्ञाभ्यामनुगृहीतेन वीचीतरङ्गन्यायेन [2] वा प्रतिपुरुषं प्रत्युच्चारणं क्षणमात्रस्थितिकवर्णधारायास्तत्प्रागभावानां तद्ध्वंसानामन्यत्राऽदृष्टस्य पूर्वपूर्ववर्णे उत्तरोत्तरवर्णोत्पादकत्वस्य, उत्तरोत्तरवर्णे च पूर्वपूर्ववर्णनाशकत्वस्य, अन्त्योपान्त्यवर्णयोश्च सुन्दोपसुन्दन्यायेनान्योन्यं वध्यघतकभावस्य, अन्त्यशब्दे तु स्वोत्पत्तिचरमकारणस्योपान्त्यशब्दस्यैव स्वनाशचरमकारणत्वेन स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगित्वरूपबौद्धाङ्गीकृतक्षणिकत्वस्य[3] च कल्प[4]नमित्यतिगौरवम् ॥

नाम । तथा च जलसमवायिकारणगतरूपरसादीनां परस्परव्यभिचारे कार्ये[5]कुले रूपादयो न स्युरिति परस्परव्यभिचार्युत्पाद्यत्वा[6]भावोस्तीति भावः । **फलेति** । एकवर्णोत्पादकेन[7] तन्मात्रोत्पादरूपफलबलादित्यर्थः । **तत एवेति** । एकवर्णोपलम्भरूपफलबलादेवेत्यर्थः ॥

विपक्षे कल्पनागौरवाच्च वर्णानां नित्यत्वमुपेत्य प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमुपेयमिति भावेन कल्पनागौरवादीति पूर्वोक्तं व्यनक्ति । **किंचेत्यादिनातिगौरवमित्यन्तेन** । **लाघवेति** । दशसु दिक्षु दश-

---

[1] तदु–ग. [2] 'वा' इति नास्ति–मु. [3] त्वं च–ख. [4] ल्प्यं–ख. [5] र्यजलरूपादयो–इ. [6] त्वान्नास्तीति भावः–इ. [7] के त–अ.

न चेदं गौरवं फलमुखम्। फलस्याद्याप्यसिद्धेः। वर्णस्थले ध्वनिस्तु त्वयापि स्वीकार्य एव। दूरस्थस्य ध्वनिमात्रं मया श्रुतं न तु वर्ण इत्यनुभवात्। शब्दत्वं सजातीयव्यञ्जक-

---

विधशब्दोत्पत्त्यङ्गीकारादप्येकैकस्यैव गकारादेः दशदिक्संबन्धिनः कल्पनस्यैव लघुत्वाल्लाघवयुक्तया प्राच्यप्रतीच्ययोरेकत्वप्रत्यभिज्ञया चानुगृहीतेनेत्यर्थः। षष्ठ्यन्तानां कल्पनमित्यनेनान्वयः। **फलमुखमिति**। वर्णोत्पत्तिलक्षणफलमेव मुखमुपस्थितिजनकं यस्य तत्फलमुखं तेनेत्यर्थः **असिद्धेरिति**। येन गौरवं न दोषायेति स्यादिति भावः॥

ननु वर्णनित्यत्वपक्षे व्यञ्जकध्वनिः वर्णभिन्नः कल्पनीयः, तस्योत्पत्तिस्थानात्कर्णदेशपर्यन्तं शब्दान्तरोत्पादकत्व[1]माशुतरविनाशित्वमित्यादिकल्पनीयमित्यत आह। **वर्णस्थल इति**। "दूराद्वर्णा[2]ग्रहणेपि ध्वनिग्रहणादि" ति टीकोक्तमाह। दूरस्थस्येति। टीकोक्तेरुपलक्षणत्वमत्वा ध्वनिसत्त्वेनुमानं चाह। **शब्दत्वमिति**॥

[3] यद्वा वायुविशेषसंयोग एव वर्णव्यञ्जक इति पक्षं निरसितुमाह **शब्दत्वं इति**। सजातीयं यत्र[4] व्यञ्जकध्वनिलक्षणमेव तद्व्यङ्ग्यवृत्तीत्यर्थः। जातित्वमात्रस्य घटत्वादौ व्यभिचारादिन्द्रियेत्यादि। तावन्मात्रस्य ज्ञानत्वेच्छात्वादावपि सत्त्वाद्बहिरित्युक्तम्। प्रमेयत्वादावव्यभिचाराय **जातित्वादिति**। न च ध्वनित्वे व्यभिचारः। तारत्वादिना सांकर्येण तस्याजातित्वादित्याहुः। वर्णानामेवेन्द्रियव्यवस्थापकत्वं न ध्वनेरित्यन्ये॥

---

[1] दशकत्वमित्यधिकम्–इ. [2] र्णग्रह–मु-अ. [3] यद्वेत्यादि नास्ति–इ
[4] यव्यञ्जक–मु.

व्यङ्ग्यवृत्ति बहिरिन्द्रियव्यवस्थापकवृत्तिजातित्वात् रूपत्ववदित्यनुमानाच्च । दृष्टं हि घटरूपकुंकुमगगन्धादेरालोकरूपघृतगन्धादिव्यङ्ग्यत्वम् ॥

न च पूर्वपूर्ववर्णस्योत्तरोत्तरवर्णव्यञ्जकत्वेन वा वर्णस्यैव ध्वनिव्यञ्जकत्वेन वार्थान्तरमिति वाच्यम् । आदावेव श्रोत्रोत्पन्नं वर्णं प्रति [1] पूर्ववर्णाभावात् । [2] भेर्यादिध्वनिस्थले वर्णाननुभवाच्च ॥

तस्माद्व्यञ्जकानां प्रतिनियतत्वान्न सर्वदोपलब्धिप्रसङ्गः । तदुक्तं भगवत्पादैः "अत आकाशगुणे शब्दे व्यज्यमाना वर्णा[3]दय" इति ॥

[4]**वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् ॥ २७ ॥**

रूपादेरालोकादिव्यङ्ग्यत्वात्साध्यवैकल्यमाशङ्क्य रूपत्वादौ सायानुगतिं[5] व्यनक्ति दृष्टं हीति । शङ्कितद्वयमपि निराह । आदावेवेति । र्यादीति च । तदुक्तमिति । प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं वर्णामित्येतत्तत्त्वनिर्णय उक्तमित्यर्थः । अत इति । प्रत्यभिज्ञाबलादित्यर्थः । ादिपदेन वर्णधर्मग्रहः ॥

वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् ॥ २७ ॥

---

[1] पूर्वपूर्वेत्यस्ति-**च.** [2] इतः 'तदुक्तं' इति पर्यन्तं नास्ति-**रा.** [3] र्ण इति-**ङ-क-रा.** [4] अत्र भङ्गविभागो न दृश्यते-**छ-रा.** वर्णानामिति नास्ति-**ख.** मं व्य-**इ.**

न च नित्यत्वे कालादिकृतक्रमाभावादुच्चारण-क्रमस्य च मौनिश्लोकादावभावादभिव्यक्तिक्रमस्य च [1] लिप्यादिदर्शनजनितसमूहालम्बन-स्मृतिविषयवर्णेष्वभावात् क्रमहीनवर्णमात्रस्य च राजाजारेत्यादौ भिन्नार्थबोधकत्वायोगात् घस-मानकालीनप्रागभावप्रतियोगित्वं टस्य टसमान-कालीनध्वंसप्रतियोगित्वं [2] च घस्य क्रमो वाच्य इति वर्णनित्यत्वे क्रमानुभवो बाधक इति वाच्यम् । यत्र मौनिश्लोकादौ वर्णोत्पत्तिरेव न

तार्किकैकदेशमतं वर्णोत्पत्तिसाधनमाशङ्क्य निराह । **न चेत्यादिना** । यद्यपीदं मणावेव "यत्तु श्रोत्रानुविधानात्पदं शृणोमीत्यबाधितानुव्यवसाया" दित्यादिनाशङ्क्य निरस्तम् । तथापि दोषान्तरविवक्षया शिष्यव्युत्पादनाय च पुनरत्रोपन्यास इत्यदोषः । नित्यत्वे विभुत्वे च वर्णानामिति योज्यम् । प्रतिपदादितिथ्यादीनामिव कालकृतपौर्वापर्यस्य, मालाभूतबला[3] कानामिव देशकृतपौर्वापर्यस्य चाभावादित्यर्थः । **समूहालम्बनेति** । तत्रापि घटाद्यर्थधीदर्शनेन घटाद्यानुपूर्व्या वाच्यत्वादिति भावः ॥

मास्तु क्रमः वर्णानामेवास्तु पदत्वमित्यत आह। **क्रमहीनेति**। अभिव्यक्तिक्रम एव वर्णानां पदे क्रम इति भावेन तत्रोक्तदोषं प्रतिबन्ध्या परिजिहीर्षुः परोक्तक्रमदोषं तावदाह । **यत्रेति** । **उत्पत्तिरेव नेति** । वर्णानामुच्चारणजन्यत्वात्तत्र च तदभावादिति

---

[1] लिप्यादिक्रमस्येत्यप्यस्ति-**ख.** [2] च इति नास्ति-**छ-रा.** 'वा' इत्यस्ति-**ग-ख.** [3] हका-**मु.**

यत्र च घटेति वक्तव्ये टघेति विपरीत एवोत्पत्ति-क्रमः तत्र त्वदुक्तस्यापि क्रमस्याभावात्। दृश्यते च टघेत्युक्तेः प्रामादिकत्वं जानतो व्युत्पन्नस्यार्थधीः॥

यदि कालान्तरीयोत्पत्तिक्रमानुसन्धानात्तत्रा-र्थधीस्तर्हि समूहालम्बन [1]स्मृतिस्थलेऽपि कालान्त-रीयाभिव्यक्तिक्रमानुसन्धानादर्थधीरिति समम्॥

न चैवं पदादिभावस्याभिव्यक्तिघटितत्वे इद-मेकं पदमित्यादिप्रतीतिः श्रावणी न स्यात्। पदाद्युपाधेरभिव्यक्तेरश्रावणत्वादिति वाच्यम्। मनसोपनीतस्याभिव्यक्तिक्रमस्य श्रावणत्वोपपत्तेः॥

भावः। तथाच तत्र प्रागभावादिप्रतियोगित्वमप्रामाणिकमिति [2] क्रमः। विपरीतक्रमस्थले तु व्यक्तम्॥

ननु विपरीतक्रमस्थले घटानुपूर्व्येव नास्ति कथमव्याप्तिरित्यतस्तत्र घटार्थबोधरूपकार्यबलेन घटानुपूर्व्यस्तीति वाच्यमिति भावेनाह। **दृश्यते चेति। इति समामिति।** तथा च घकाराभिव्यक्तिसमानकालीनप्रा-गभावप्रतियोग्यभिव्यक्तित्वं टस्य टकाराभिव्यक्तिसमानकालीनध्वंसप्रति-योग्यभिव्यक्ति[3]कत्वं घकारस्येत्यादिरूपेण घटाद्यानुपूर्वी सम्भवत्येव॥

न च समूहालम्बनस्थले घटाद्यर्थधीदर्शनेन तत्र घटाद्यानुपूर्व्याम-व्याप्तिरिति वाच्यम्। तत्रापि स्मृतकालान्तर्यो [4]क्तरूपानुपूर्व्या एवार्थ-धीजनकत्वेनादोषत्वादिति भावः॥

अभिव्यक्तेरित्युपलक्षणम्। कालस्येत्यपि [5] ज्ञेयम्। **मनसेति।**

---

[1] स्मृतिपदं न–क. [2] न इत्यधिकं–इ. मिवक्रमः–अ. [3] पूर्व इत्यधिकं–इ. [4] रोक्ति–इ. [5] ध्ये–इ.

तस्माद्वर्णानां नित्यत्वेन तदनित्यत्वरूपस्य बाधकस्याभावान्नित्य एव वेदः ॥

अभ्युपेत्य चेदमु[1]दितं वर्णानित्यत्वं वेद-नित्यत्वबाधकमिति । वस्तुतस्तु वर्णानामनित्य-त्वेपि नियतानुपूर्वीकत्वरूपस्य नित्यत्वस्य न हानिः । [2]वर्णनित्यत्वोक्तिस्तु वस्तुस्थिति प्रदर्श-नार्था । उक्तं हि सुधायां, "वस्तुतत्त्वविचारकं प्रति [3]वर्णानां कूटस्थनित्यत्वमुपपादित" मिति ॥

वर्णानां नित्यत्वम्[4] ॥ २८ ॥

पररीत्या ध्येयम् । अभिव्यक्तेर्ज्ञानत्वेन तस्य परमते मानसत्वात् । कालस्य चानुमानिकत्वात् । सिद्धान्ते तु साक्षिणेति ध्येयम् । ज्ञानसामान्यसामग्री मादायानुपनीतोपि कालो भासत इति कैश्चिदङ्गीकाराक्कालो नोक्त इत्याहुः।

"ननु तथापि वर्णसमुदायरूपस्य वेदस्य न नित्यत्वमित्या' दिनोक्तचोद्यनिरासमुपसंहरति । तस्मादिति । उक्तं हीति । 'प्रत्यक्ष कस्यचिद्धर्मे' इत्येतत्पद्यव्याख्यावसाने वर्णनित्यत्वस्य वेदनित्यत्वानुपयोग मुक्त्वा तर्हि तत्त्वनिर्णयवर्णनित्यत्वं किमर्थं[5] मित्यतः तत्कथनस्य कृत्यमुक्तं सुधायामित्यर्थः ॥

वर्णानां नित्यत्वेपि क्रमोपपादनम् ॥ २८ ॥

वर्णनित्यत्ववादः[6]

---

[1] मुक्तं–ग. [2] वर्णेत्यादिग्रन्थः नास्ति–क. [3] तु इत्यधिकं–ग. [4] त्वेपि क्रमोपपादनं–च-मु. [5] मुक्त मित्यधिकम्-मु. [6] समाप्त इत्यधिकं–मु.

यच्चोच्यते । आकाशात्मकश्रोत्रगुणा वर्णाः समवायेन सम्बन्धेन गृह्यन्त इति तन्न । वर्णानां नित्यविभुद्रव्यत्वात्समवाये मानाभावाच्च ॥

[1]ननु यद्यपि समवाये प्रत्यक्षं न प्रमाणम् ।

न "न्वाकाशगुणे शब्दे व्यज्यमाना वर्णादय" इति ध्वनेरे वाकाशगुणत्वोक्तिरयुक्ता । वर्णानामप्याकाशगुणत्वात् । अन्यथा श्रोत्रेण सह सम्बन्धायोगेन वर्णग्रहणानुपपत्तेः । आकाशगुणत्वेत्वाकाशात्मकश्रोत्रेण तद्गु[2]णस्य वर्णस्य समवायेन ग्रहणोपपत्तेरित्यतः संयोगसम्बन्धेनैव तद्ग्रह इति भावेन "समवायाभ्युपगमाच्चेति" सूत्रदूषितं समवायं निरसितुमाह । **यच्चेति । नित्यविभुद्रव्यत्वादिति ।** अन्य[3]थानुविधानाभावादिना घटादेरिव द्रव्यत्वस्य पूर्वोक्तदिशा नित्यत्वस्य, काश्यां श्रुत एव गकारोत्रापि श्रूयत इति प्रत्याभिज्ञानात्तावती वागिति श्रुतेर्विभुत्वस्य, च सिद्धेर्गुणत्वे मानाभावाच्चेत्यर्थः ॥

न च शब्दो गुणः सामान्यवत्त्वे सत्यस्मदादिबाह्ये[4]न्द्रियग्राह्यत्वाद्रूपवादित्यनुमानं गुणत्वे मानमिति वाच्यम् । ध्वनिशब्देन सिद्धसाधनत्वात् । वर्णात्मक इत्युक्तावपि हेतोरप्रयोजकत्वात् । घटादीनामेकेन्द्रिया[5]ग्राह्यत्वेप्यात्मनस्तथात्ववद्द्रव्यस्यैव सतो बाह्येकेन्द्रियग्राह्यत्वेपि विरोधाभावात् । निरवयवद्रव्यत्वे बाह्येन्द्रियग्राह्यत्व[6]विरोध इति चेत् । निरवयवद्रव्यस्यात्मन इन्द्रियग्राह्यत्ववत् बाह्येन्द्रियग्राह्यत्वेपि बाधकाभावेन व्याप्तिनिश्चयादिति सुधायामेव व्यक्तत्वादिति भावः । **यद्यपीत्यस्य** तथापीति वक्ष्यमाणेनान्वयो ध्येयः ॥

---

[1] 'ननु' इति नास्ति–छ-मु-रा. [2] द्गृहण–इ. [3] न्यानुवि–मु. [4] ग्येकेन्द्रि–मु-इ. [5] यग्रा–अ. [6] त्वं वि–इ.

इमौ संयुक्ताविव्यादिवदिमौ समवेताविति वाऽनयोः[1] समवाय इति वा अननुभावात्। समवायं जानामीत्यननुव्यवसायाच्च। रूपी घट इत्यादेश्चाभाववद्भूतलमित्यादिवदुपपत्तेः॥

एतेनायं तन्तुपटसम्बन्धप्रत्ययश्चाक्षुषः चक्षुरन्वयव्यतिरेकानुविधायित्वात् घटप्रत्ययवदिति समवाय[2] प्रत्यक्षत्वसाधनमप्यपास्तम्। उपादानो-

---

समवायवादे पूर्वपक्षे मण्युक्तादिशा निराह। **इमाविति।** अननुभवोऽसिद्ध इत्यत आह। **समवायं जानामीति॥**

यद्वा समवायो हि विशेषणत्वेन वा विशेष्यत्वेन वा अयं घट-इतिवदसमवाय इति[3] समवायत्वरूपस्वरूपेण वा संसर्गविधया वा भासेत। तत्राद्य[4] आह। **इमाविति।** द्वितीय[5] आह। **अनयोरिति।** तृतीय[6] आह। **समवायमिति।** तथा च समवायत्वेन समवाय[7] प्रत्यक्षमसिद्धमिति भावः। चतुर्थ[8] आह। **रूपीति।** संसर्गवि[9]धयैव प्रतीयमानसम्बन्धस्याभावभूतलसम्बन्धवत् समवायभिन्नसम्बन्धत्वेनाप्युपपत्त्या समवायत्वासिद्धेरित्यर्थः। ज्ञान[10]मिष्टमित्यादिप्रत्यय आदिपदार्थः। **सम्बन्धप्रत्यय इति।** तन्तुषु पट इति संसर्गविधया तन्तुपटसम्बन्धविषयकः प्रत्यय इत्यर्थः। विशेषणत्वादिना तत्प्रत्ययस्यासिद्धेरुक्तत्वाद्वक्ष्यमाणार्थान्तरानवकाशाच्च। स्व[11]रीत्याह। **उपादानेति।**

---

[1] संयोग इतिवदनयोः-**ग.** [2] यस्य-**ग-ख.** [3] 'अयं' इत्यादि नास्ति-**इ** [4] द्यमा-**अ.** [5] यमा-**अ.** [6] यमा-**अ.** [7] यः प्रत्यक्षसिद्ध इति भावः इत्यस्ति-**इ** [8] र्थमा-**अ.** [9] षयतयैव-**इ.** [10] तमि-**मु.** ननिष्ठ-**इ.** [11] मतरी-**मु-इ.**

पादेयाभेदवादे आश्रयासिद्धेः। तद्भेदवादेपि घटाभावभूतलयोरिवेहापि स्वरूपसम्बन्धस्य चाक्षुषत्वेनार्थान्तरात् ॥

एतेन रूपी घट इति धीर्विशेषणविशेष्यसंबन्धविषया विशिष्टधीत्वात् दंडीति धीवत् ; इह तन्तुषु पट इत्यादिरिहप्रत्ययः आधाराधेयसम्बन्धनिमित्तकः अबाधितेहप्रत्ययत्वात्। इह[1] कुण्डे बदरामिति धीवत् ; जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं भूतलमितिव्यवहारवत् ; एते तन्तवः

पररीत्याह—**तद्भेदेति** ॥

समवायसाधकप्राचीनानुमानान्याशङ्क्य मण्युक्तदोषोक्त्या निराह। **एतेनेत्यादिना**। भूतलेऽभावप्रत्ययवदन्यथोपपत्तिकथनेनेत्यर्थः। अपास्तामित्यन्वयः। भ्रमे व्यभिचारनिरासायाबाधितेति हेतुविशेषणोक्तिः। **जात्यादीति**। ब्राह्मणोयं, शुक्लः पटः; चलति गौः, विशिष्टः परमाणुरित्यादिजातिगुणक्रियाविशेषविशिष्टव्यवहार इत्यर्थः। **सबन्धानियत इति**। स्वविषयसम्बन्धव्याप्त इत्यर्थः। तेन श्रोत्रादिसंबन्धेनैयत्येन नार्थान्तरम्। जातिरित्याद्यविशिष्टव्यवहारे अव्यभिचाराय विशिष्टेति हेतुविशेषणम्। इदं रूप्यमित्यादिबाधितसम्बन्धकविशिष्टव्यवहारेऽव्यभिचारायाबाधितेति। अभाववद्भूतलमित्यादिभावाभावगोचरतादृशव्यवहारेऽव्यभिचाराय **भावमात्रेति**। **सघटमिति**। संयोगस्तत्र सम्बन्ध इति

---

[1] तु इत्यधिकम्—ग.

एतत्पटसंबद्धाः एतदाश्रयत्वात् भूतलवत्; भूतल-रूपादयो भूतलसम्बद्धाः भूतलविशेषणत्वात् घट-वदित्याद्यनुमानम्[1]पास्तम् । [2]भगवता स्वरूप-सम्बन्धेनार्थान्तरात् । अयं संयोगः एतदन्यसं-योगत्वरहितसम्बन्धान्यः मेयत्वादि[3]त्यादि तु

भावः । **भूतलवदिति** । संयोगसम्बन्धेन पटाश्रयभूतलवदित्यर्थः । पक्षे [4]च संयोगस्य बाधात्समवाय एव सिध्यतीति भावः । रूपवद्भूतल-मिति प्रतीतिमनुरुध्याह । **भूतलविशेषणत्वादिति** ॥

यद्वा भूतलविशेषणत्वादित्यस्य भूतलाश्रितत्वादित्यर्थः । अत **एव** घटवदित्युक्तिः । अन्यथा घटवद्भूतलमिति प्रतीयमानघटवदिति व्याख्येयम् ॥

स्वरूपसम्बन्धेनार्थान्तरादिति । न च स्वरूपाणामनेकत्वेन गौरवापत्तेः ईश्वरानुमाने कर्तैकत्ववल्लाघवादेकः समवाय एव सिध्यतीति वाच्यम् । तथात्वे अभाववद्भूतलं ज्ञातो घटः इष्टो घट इत्यादावपि तादृशसंबन्धाङ्गीकारापत्तेः । तत्र तादृशसम्बन्धस्य बाधात्स्वरूपाणाम-नेकत्वेपि कल्पत्वेन गौरवस्यादोषत्वात् । स्वरूपम्बन्धेनैव विशिष्टप्रत्यया-द्युपपत्तेर्नैकसम्बन्धकल्पनेति चेत् । समं प्रकृतेपि । विवरिष्यते चैतदग्रे नापि गुणक्रियेत्यादिमण्युक्तानुमानान्त[5]रखण्डनप्रस्ताव इति भावः । **अयं संयोग इति** । बुद्धिस्थः कश्चिद्घटपटसंयोगः पक्षः । **एतदिति** । पक्षभूतसंयोगपरामर्शः । एतदन्यो यः संयोगः [6]एतदन्यसंयोगः स्तम्भ-

[1] अपि इत्यधिकम्-क. [2] भगवतेति नास्ति-च-ग-ख. [3] घटवत् इत्य-धिकम्-ख. [4] च इति नास्ति-इ. [5] अन्तरपदं नास्ति-इ. [6] एतदन्यसंयोग इति नास्ति-मु-इ.

स्वव्याहतम्। रूपादिरिन्द्रियसंबद्धः प्रत्यक्षत्वात् घटवदित्यत्र तु अभावादाविव संयुक्तविशेषणतादि-रूपसम्बन्धेनार्थान्तरम् ॥

कुंभा[1]दिसंयोगस्तस्य भावः एतदन्यसंयोगत्वम्। तद्रहितो यः संम्बन्धः पक्षीकृतसंयोगस्तदन्यः कश्चित्सम्बन्धश्च भवति। तथा च पक्षे पक्षीकृतसंयोगान्यत्वस्य बाधात् अपूर्वसम्बन्धान्तरादन्यत्वमादाय [2]साध्यपर्यवसानमिति समवायसिद्धिः। दृष्टान्ते च घटादौ पक्षभूतसंयोगरूपसंम्बन्धान्यत्वेन साध्यानुगमो बोध्य इत्यादि तु विशिष्टव्यतिरेक्य[3]नुमानमित्यर्थः। **स्वव्याहतमिति**। अद्या[4]पि समवायरूपसम्बन्धान्तरस्यासिद्धया तदादाय साध्यपर्यवसाने बाधात्स्वान्यत्वेनैव साध्यपर्यवसानं वाच्यम्। तद्व्याहतमित्यर्थः ॥

यद्वा एवमेव संयोगसमवायविशेषावपि पक्षीकृत्य एतदन्यसंयोगसमवायित्वरहित[5]सम्बन्धान्यः मेयत्वाद्घटवत्, अयं घटः एतदन्यघटत्वरहितघटान्यः मेयत्वात्पटवदित्यादिप्रयोगस्यापि संभवेन संयोगसमवायान्यसम्बन्धः अपूर्वघटादिश्च सिध्येदिति स्वव्याहतमित्यर्थः ॥

अन्ये त्वित्यादिना मण्युक्तमेवाशङ्क्य निराह। **रूपादिरिति**। क्रियाजात्यादिरादिशब्दार्थः। प्रत्यक्षत्वात्प्रत्यक्षविषयत्वादित्यर्थः। अत्र संयोगबाधे इन्द्रियसम्बन्धघटकतया समवायसिद्धे[6]रिति भावः। **अभावादाविति**। यथा अभाववद्भूतलमिति गृह्यमाणे घटाभावादिः चक्षुः संयुक्तभूतलविशेषणतया त्वन्मते गृह्यते यथा च घटादौ रूपादिसमवायः चक्षुःसंयुक्तघटादिविशेषण[7]तया गृह्यते [8]अभावसमवायाभ्यां चक्षुः[9]

[1] भयोः सं-मु-इ [2] संसाध्य-अ. [3] कानु-इ. [4] आद्यपि-इ. [5] तः स-इ. [6] द्धिरि-अ. [7] षतया-इ. [8] त्वन्मत इत्यधिकं-मु-इ. [9] षः संयोगा-अ.

तथापि मण्युक्तं गुण्यादिना सह गुण-क्रियाजातिविशिष्टयथार्थबुद्धयः सम्बन्धिभिन्न-सम्बन्धविषयाः निर्वि[1]कल्पकभावमात्रविषयक-विशिष्टबुद्धित्वात् इतरनिरूपणाऽनिरूप्यविशिष्ट-बुद्धित्वाद्वा दण्डीतिबुद्धिवदित्यनुमान[2]मिति । तन्न । काले घटरूपमित्यादिप्रतीतौ व्यभिचारात् ।

समवायादेरभावात् । एवमेव रूपादिरप्यस्तु । तथा च समवायासिद्ध्या-र्थान्तरमित्यर्थः ॥

नव्यास्त्वित्यादिनोक्तमाह—**तथापि मण्युक्तमिति । गुण्यादि-नेति** । क्रियावदा[3]दिरादिपदार्थः । भ्रमबुद्धिषु बाधवारणाय **यथार्थेति ।** आरोपितसम्बन्धविषयत्वेनार्थान्तरवारणाय वा यथार्थेत्युक्तिः । गुणगु-ण्यादिसमूहालम्बने बाधनिरासाय—**विशिष्टेति ।** विशेषण[4]त्वावगाहीत्यर्थः। स्वरूपसम्बन्धेनार्थान्तरवारणाय साध्ये सम्बन्धिभिन्नेत्युक्तिः । **आद्ये** हेतौ निर्विकल्पकादावव्यभिचाराय विशिष्टेति विशेषणम् । अभाव-वद्भूतलमिति बुद्धावव्यभिचाराया **भावमात्रविषयकेति ।** ज्ञातो घट इत्यादिबुद्धावव्यभिचाराय **निर्विषयकेति** भावविशेषणम् । **इतरेति ।** इतरनिरूपणेनानिरूप्यः[5] विशेष्यविशेषणविषयकबुद्धित्वादित्यर्थः । अभाववद्भूतलं ज्ञातो घट इत्यादिबुद्धावव्यभिचाराय इतरनिरूपणानि-रूप्येति । निरूपणं नाम ज्ञानमभिलपनं वा । **इत्यादीति ।** इदानी-माकाशः वीणायां शब्द इत्यादिप्रतीतिरादिपदार्थः। **व्यभिचारादिति ।** द्वयोरपि हेत्वोरिति भावः ॥

[1] षयकबु–**ग**. [2] नं मानमिति इत्यस्ति–**च-क-ग-रा.** [3] आदिपदं न–**मु.** [4] षत्वा–**इ**. [5] प्याविशे–**इ**

त्वन्मते घटगतस्य रूपस्य कालेन सह सम्बन्धि-भिन्नसम्बन्धाभावात् ॥

तदुक्तं भगवता सूत्रकृता । "समवायाभ्युप-

उक्तप्रतीतौ सध्याभावं व्यनक्ति —**त्वन्मत इति** । स्वमते कालेन सह सर्वस्य वस्तुमात्रस्य संयोगे बाधकाभावात् त्वन्मत इत्युक्तिः । संयोगस्य सम्बन्धिना भिन्नाभिन्नत्वेन भिन्नत्वस्यापि सत्त्वात् ॥

ननु बुद्धित्वादित्यस्य प्रत्यक्षत्वादित्यर्थ इति चेत् तथापि तादृशोपनीतप्रत्यक्षबुद्धौ व्यभिचारात् ॥

न च लौकिकप्रत्यक्षबुद्धित्वादिति तदर्थ इति वाच्यम् । सुरभि-चन्दनमित्याद्यलौकिकविशिष्टबुद्धौ भागासिद्धेः । तदन्यविशिष्टबुद्धिपक्षी-कारे चार्थान्तरता । विशिष्टबुद्धिमात्रस्यैव तादृशसम्बन्धविषयकत्वे विवादात् । एवं सति निर्विषयकेति विशेषणवैयर्थ्यापत्तेश्च । ज्ञातो घट इत्यादिबुद्धावुपनीतज्ञानादिविशिष्टबुद्धेरलौकिकत्वादेव व्यभिचाराप्रसक्तेः॥

न च ज्ञानसत्त्ववेलायामात्मा ज्ञात इति वर्तमानविशिष्टा[1]त्मबुद्धौ दोषवशात्समवायसम्बन्धाभा[2]नेन विषयविषयिभावमात्रभानं तत्राव्यभि-चाराय निर्विषयकेत्युक्तिरिति वाच्यम् । एवमपि रूपं समवेतमित्यादि समवायविशिष्टबुद्धौ त्वन्मते व्यभिचारापरिहारात् ॥

न च समवायासिद्धिदशायां तत्प्रतिसा[3]धनं नेति वाच्यम् । आपाततः प्रतीतेः सम्बन्धे व्यभिचारं पश्यतो व्याप्तिग्रहवैमुख्येन तद्ग्रहासंभवादिति वक्ष्यमाणदोषात् । वस्तुगत्या व्यभिचारजन्यानुमिते-र्भ्रमत्वावश्यंभावाच्च । विषयाबाधस्याद्याप्यसिद्धया विषयाबाधात् प्रमात्व-मित्यस्याप्ययोगाच्चेति भावः । **तदुक्तमिति** । समवायसाधकहेतोरने-

---

[1] आत्मपदं न—**मु-इ.** [2] वेन—**अ.** [3] संधा—**मु.**

गमाच्च साम्यादनवस्थिते"* रिति । हेतोः पक्ष-सपक्षयोरिव काले घटरूपमितिप्रतीतिरूपविपक्षेपि सत्त्वसाम्यात्साध्येनैव सम्बन्ध इति व्यवस्थित्य-भावा[1]दित्यर्थः ॥

किंच समवायसिद्ध्यनन्तरमपि समवायेतरस-म्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाधम्, एवं तत्सिद्ध्यनन्तरं तदुभयेतरसम्बन्धिभिन्नसम्बन्धवि-षया इत्यपि सुसाधम्[2], एवं तत्सिद्ध्यनन्तरं तत्रि-तयेतरसम्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाध-मिति सम्बन्धानन्त्यप्रसङ्गः ॥

एतदप्युक्त'मनवस्थितेरि'ति [1]साध्ये सम्बन्धि-भिन्नेतिवत्सम्बन्धिसमवायाभिन्नेत्यपि विशेष्टुं शक्य-त्वसाम्यात्सम्बन्धानन्त्यप्रसङ्गादित्यर्थः ॥

कान्त्यमित्ये[3]तत् समयपादे वैशेषिकाधिकरणे उक्तमित्यर्थः ॥

ननु कथमेषोर्थः सूत्राक्षरालब्ध इत्यतः पूर्वभागस्य समवाया-भ्युपगमाच्च वैशेषिकमतमसमञ्जसमितिव्यक्तमित्युपेत्य सुधाद्यनुक्तमुत्तरां-शस्यार्थान्तरं स्वयं व्यनक्ति—**हेतोरिति**। सूत्रस्य विश्वतोमुखत्वान्नाने-कार्थत्वं दोषः, प्रत्युत गुण एवेति भावः। बुद्धिपदं लौकिकप्रत्यक्ष-परमतो न दोष इत्यतो दोषान्तरं तर्कपराहतिमनुमानस्याह—**किंचेति**। समवायसिद्ध्यसिद्धिभ्यां तर्कपराहतेरपहातिरिति त्वापातत **इत्यादि ग्रन्थेन** निरसिष्यत इति भावः। **समवायेतरेति** सम्बन्धविशेषणम्।

---

* २-२-१३ ब्र. सू. [1] वप्रसङ्गादि–**क-ग.** [2] ततः " इति सम्बन्धानन्त्ये " त्येवास्ति. पुनः एवमित्यादि नास्ति–**च-क-रा.** आदितः एवमित्याद्यपि नास्ति–**ग.**
[3] **वसम–अ.**

अपि च त्वदभिमते पटस्तन्तुसमवेत इति विशिष्टज्ञाने व्यभिचारः। [1]तन्तुपटयोरिव समवायिसमवाययोरपि सम्बन्धान्तराङ्गीकारे त्वनवस्था। न च समवायस्य सिद्धौ व्यभिचारः किं करिष्यति असिद्धौ [2]कानैकान्त्यमिति वाच्यम्। आपाततः प्रतीते सम्बन्धे व्यभिचारं पश्यतः व्याप्तिग्रहे वैमुख्येन तद्ग्रहासम्भवात्। अन्यथा तव [3] निर्विकल्पकसाध्यके [4] विशिष्टप्रत्ययत्वादिति हेतौ विशिष्टपदं व्यर्थं स्यात्[5]।

समवायानन्त्येति। द्वित्वसमवायासिद्ध्यनन्तरमपि तद्द्वित्वेत्यपि सुवचत्वादिति भावः॥

सुधोक्तं व्यभिचारमेवाह—**अपि चेति**। तन्तुसमवायविशेषण कपटविशेष्यकज्ञान इत्यर्थः। सुधोक्त एव शङ्कोत्तर आह—**न चेत्यादिना**। समवायस्यान्यनिरूपणनिरूप्यत्वाद्धेतावन्यनिरूपणानिरूप्येत्युक्तत्वात् न व्यभिचार इति चेत्। [6]आद्यहेत्वभिप्रायेणैवै [7]तदुग्रन्थप्रवृत्तेः। अत एव सुधोक्तव्यभिचारस्य पश्चादुक्तिः। **व्यर्थमिति**। जात्यादिविशिष्टप्रत्ययो विशेषणज्ञानजन्यः विशिष्टप्रत्ययत्वादित्यत्र विशिष्टपदस्य निर्विकल्पके व्यभिचारवारणार्थत्वात्। तत्रापि निर्विकल्पकस्य सिद्धौ व्यभिचारः किं करिष्यति, असिद्धौ तु कानैकान्त्यमिति सुवचत्वादिति भावः। प्रथमपक्षवदिति। काले घटरूपमिति प्रतीतिरूपेतिपदस्थाने पटस्तन्तुसमवेत इति विशिष्टज्ञानरूपेति बोध्यम्।

---

[1] अनन्तरं नचेत्याद्येवास्ति–**ग.** [2] 'तु' इत्याधिकम्–**क ग.** [3] वापि–**च-क-ग.** [4] धके–**च-क-ग-रा.** [5] एतदयुक्तमनवस्थितेरिति अर्थस्तु प्रथमपक्षवद्द्रष्टव्यः किंच–**च-ग-रा.** [6] न। इत्याधिकम्–**मु.** [7] व तत्–**इ.**

किंचाभाववद्भूतलमित्यभावविशिष्टबुद्धिवत् ज्ञातो घट इष्टो घट इति सविषयकज्ञानादिविशिष्टबुद्धिवच्च गुणादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धेनैवोपपत्त्या अप्रयोजकत्वम् ॥

अन्यथा हि ज्ञानेच्छाद्वेषकृतीनां स्वविषयैः सह

सुधायां तु अनवस्थितेरिति सूत्र[1]मस्मिन्पक्षे कथं इत्थम् । यदि व्यभिचारपरिहाराय समवायस्यापि समवायान्तरमुपेयते तदाऽनवस्थिति" रिति योजितम् ॥

हेतुद्वयस्याप्यप्रयोजकत्वं क्रमादृष्टान्तोक्तिपूर्वकमाह— **किंचेति।** गुणादिविशिष्टबुद्धेरपीत्यापिपद[2]स्य भावमात्रविषयकत्वेपि इतरनिरूपणानिरूप्यविशिष्टबुद्धित्वेपीत्यर्थः । अनुकूलतर्कादेरभावादिति भावः ॥

अनुकूलतर्कादेरभावेप्यभावादि[3] विशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणोक्तरूपसाध्यसाधनं चेत्तर्हि गुणादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणाप्यभावादुक्तरूपसाध्यसिद्ध्यापातेन गुणादिविशिष्टबुद्धौ स्वरूपसम्बन्धोन्यत्राभावादिविशिष्टबुद्धावतिरिक्तसम्बन्ध इति स्यादित्याह—**अन्यथेति।** अभावादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणोक्तरूपसाध्यसिद्धावित्यर्थः । वैपरीत्यं स्यादित्यन्वयः । वैपरीत्यं व्यनक्ति—**ज्ञानेति** । ज्ञातो घटः, दृष्टो घटः, द्विष्टः, कृत, इति ज्ञानादिविशेषणकघटादिविशेष्यकयथार्थबुद्धय इत्यर्थः । आरोपितसम्बन्धविषयकत्वेनार्थान्तरवारणाय सत्येत्युक्तिः ॥

अभावविशिष्टबुद्धी[4]नामविशिष्टनामबुद्धिसाधारण्येनापि पक्षनिर्दे-

---

[1] अस्मिन्पक्षे इति नास्ति—इ. [2] दभा—मु. दस्वभा—अ. [3] 'भावः' इत्यारभ्य एतत्पर्यन्तं नास्ति—इ. [4] अभावविशिष्टबुद्धिनामविशिष्टबुद्धिसाधार इत्यास्ति—इ.

विशिष्टसत्यबुद्धयः, असंयुक्तयुतसिद्धानां परस्परं विशिष्टसत्यबुद्धयो वा,सम्बन्धिभिन्नसम्बन्धविषयाः युतसिद्धविषयकविशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्यनु[1]मानेन युतसिद्धानां [2]ज्ञानादीनां स्वविषयैः सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः ; अयुतसिद्धानां गुणादीनां तु गुण्यादिभिः सहाभावस्य भूतलेनेव स्वरूपसम्बन्ध इति विपरीतं स्यात् ॥

एवमसंयुक्तविषयकसत्यविशिष्टबुद्धयः सम्बन्धिभिन्नसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्य[3]नुमानेन गुणादीनां गुण्यादिभिर्ज्ञानादीनां ज्ञेयादिभिरभावस्य चाधिकरणेन सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः सिद्धयेत् । एवं च

शमाह—**असंयुक्तेति । परस्परविशिष्टेति ।** अभाववद्भूतलं डित्थोयं ज्ञातो घट इत्यादिविशिष्टयथार्थबुद्धयो वेत्यर्थः । **ज्ञानादीनामिति ।** ज्ञानेच्छाद्वेषकृत्यभावनाम्नामित्यर्थः । **स्वविषयैरिति ।** ज्ञानाद्यपेक्षयोक्तम् । अभावादेस्तु स्वविशेष्येण सहेति ज्ञेयम् ॥

एवं वैपरीत्यमापाद्य सर्वत्रैकरूपलक्षणमतिप्रसङ्गान्तरमप्याह—**एवमिति ।** अन्यथेत्यनुकर्षः । यथा वैपरीत्यं तथा हेतौ विशेषमात्रानुपादानेन सर्वत्रैकरूप्यमपि स्यादित्येवंशब्दार्थः । हेतोरप्रयोजकत्वं निरस्य फलितमाह—**एवं चेति**[4] ॥

---

[1] त्यनेन–च-क-ग-रा. [2] गुणादीनां इत्याद्येवास्ति. 'ज्ञानादीनां' इत्यादि नास्ति–क. [3] नेन–च-क-ग-रा. [4] हेतोरित्यादि नास्ति–मु.इ.

सम्बन्धिभिन्नसम्बन्धविषयत्वे विशिष्टबुद्धित्वस्यैव तन्त्रतया लाघवे[1] नैकरूप्यं च भवति ॥

एतदप्युक्त "मनवस्थिते" रिति । युतसिद्धत्वसाम्येपि ज्ञानादीनां स्वविषयैः सह स्वरूपसम्बन्धः चैत्र[2]दण्डयोस्तु संयोगः; एवमयुतसिद्धत्वसाम्येपि भूतलाभावयोः स्वरूपसम्बन्धः गुणगुण्यादेः समवाय; इत्यादित्वदुक्तव्यवस्थितिभङ्गादित्यर्थः ॥

नापि गुणक्रियाजाति विशिष्टसत्यबुद्धयः विशेषणसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवत् । ज्ञातो घट इत्यादिबुद्धिरपि स्वरूपसम्बन्धविषयेति न व्यभिचारः । न चात्रापि तेनैवार्थान्तरं स्वरूपाणामनन्ततया गौरवेण लाघवादेकस्यैव सम्बन्धस्य सिद्धेरिति वाच्यम् । समवायस्वरूपस्य च तद्वतसम्बन्धत्वस्य कल्पनादपि धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायेन सिद्धानां गुणादिस्वरूपाणां भूतलघटाभावादौ कल्पस्य

उच्यत इत्यादिना मणिकृता सिद्धान्तितमनुमानान्तरं च निराह—**नापीति** । पूर्ववदेव सत्यपदकृत्यं बोध्यम् । तदुक्तरीत्यैव परिष्करोति—**ज्ञात इत्यादिना** । **एकस्येति** । सकर्तृत्वानुमाने एकस्य कर्तुरिवेति भावः । [4]अन्यथोपपत्तावपि लाघवतर्कानुसरणे [5]प्रतिबन्दीरूपातिप्रसङ्ग-

[1] वमैक—**च-क-ग-रा.** [2] विषययोस्तु—**क.** [3] सत्यविशिष्टबुद्धयः—**च.**
[4] 'एकस्येति' इत्यादि नास्ति—**इ.** [5] णप्र—**इ.**

सम्बन्धत्वरूपधर्ममात्रस्य कल्पने लाघवात् ॥

अन्यथा अभावमात्रविशिष्टसत्यबुद्धिं पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावमात्रानुगत एको नित्यः संबन्धः सिध्येत् ॥

[1] एवमभावावयविगुणाक्रियाजातिविशिष्टसत्यबुद्धिं ज्ञातो घट इत्यादिबुद्धिं च पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावे गुणगुण्यादौ ज्ञा[2]नेच्छादौ चैको नित्यः सम्बन्धः सिद्धयेत् ॥

एतदप्युक्त "मनवस्थिते" रिति । लाघवतर्कानुग्रहस्य धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायस्य च साम्येपि अभावादौ स्वरूपसंबन्धः गुणादौ तु तदन्य इति व्यवस्थित्ययोगादित्यर्थः ॥

चाह—**अन्यथेति** । मात्रपदं प्रागभावादिसर्वाभावपरम् ॥

नन्वत्र विशिष्टबुद्धित्वं सम्बन्धबुद्धित्वं वा सविकल्पकबुद्धित्वं वा द्वयोरपि सम्बन्ध[3]विषयबुद्धिपर्यवसानेन साध्याविशेष इति चेन्न विशेषणधीजन्यबुद्धित्वं वा अविशिष्ट[4]बुद्धित्वमित्युपपत्तेः । अन्यथा तव प्रयोगेप्यस्य दोषः सा[5]मान्यात् । विशेषणधीजन्यत्वस्या[6]विशिष्टव्यावृत्तिधीजनकत्वस्य[7] च बुद्धेः सम्बन्ध[8]विषयकत्वज्ञानं विना दुर्ज्ञानत्वं चेत्तवाप्येष दोषः समान एव । विशेषण[9]ताबुद्धिगोचरबुद्धित्वेन तद्धेतुत्वे च उपजीव्यत्वेन तस्यैव हेतुत्वमस्त्वित्येतदपि समानमिति भावः ॥

[1] इत· "एतदप्युक्तमिति पर्यन्तं नास्ति–**ग-रा.** [2] नज्ञेयादौ च–**च-क.** [3] न्धि–**इ.** [4] वावृत्तिबुद्धिजनकबुद्धित्वं वा विशिष्ट इत्यधिकम्–**इ.** [5] साम्यात्–**इ.** [6] त्वमपि–**अ.** [7] त्वं च–**अ.** [8] न्धावि–**इ.** [9] णगोचर–**इ.**

ननु तथात्वे पटाभाववति घटवति[1] घटाभावधीः स्यात्। अभावमात्रे वैशिष्ट्यस्यैकत्वात्। एवं घटादेः स्वविष[2]यकज्ञानादिना नित्यसम्बन्धवत्त्वे आत्मत्वं स्यादिति चेत्। तर्हि तवापि स्पर्शवति रूपाभाववति वायौ रूपधीः स्यात्। समवायस्यैकत्वात्। एवं घटादेरप्यात्मत्वं स्यात्। घटत्वसमवायस्यैव ज्ञानसमवायत्वादिति समम्॥

यदि च वायौ रूपसमवायस्य सत्त्वेपि रूपेण सह विशेषणताविशेषरूप[3]सम्बन्धाभावात् रूपाऽप्रतीतिः। तर्हि भूतले घटसत्त्वकाले घटाभाववैशिष्ट्यस्य सत्त्वेपि घटाभावेन सह विशेषणता-

---

प्रतिबन्दिरूपेणाभावादिविशिष्टबुद्धावप्येकनित्यसम्बन्धापादनमयुक्तम्। तत्र बाधकसत्त्वादिति भावेन मण्युक्तमेव बाधकमाशङ्कते—**नन्विति। तथात्वे।** अभावादावेकनित्यसम्बन्धसत्त्वे इत्यर्थः। घटाभावसम्बन्धसत्त्वोपपादनायोक्तम् **पटाभाववतीति।** तादृशस्थलेघटाभावबुद्धेरति[4]रिक्तेष्टत्वनिरासायोक्तं **घटवतीति। आत्मत्वं स्यादिति।** आत्मनीवेति भावः। अतः समवायत्याग एव युक्त इति भावेन प्रतिबन्द्या समाधत्ते—**तर्हि तवापीति।** गुणादावेकनित्यसम्बन्धवादिनोपीर्थः॥

"वायौ रूपसमवाये सत्यपि रूपात्यन्ताभावोस्ति। न घटे। कथमेवम्। अधिकरणस्वभावादबाधितरूपनिरूपप्रतीतेश्चेति" मण्युक्तमा-

---

[1] भुतले इत्यधिकम्–**मू.** [2] यैकज्ञानादिनित्यसम्बन्धित्वे इत्यस्ति–**रा.**
[3] स्वरूपेत्यधिकम्–**रा.** [4] अतिरिक्तपदं नास्ति–**इ.**

विशेषा[1]भावात् [2]घटाभावाप्रतीतिरिति(तु) समम्॥

ननु रूपसमवायवत्त्यपि वायौ रूपाप्रतीतिरधिकरणस्वभावात्। न चात्रतादृशः स्वभावः कल्प्यः। घटापसरणानन्तरं तत्रैव घटाभावप्रतीतेः। वायौ तु न कदापि रूपप्रतीतिरिति चेत्। तर्हि घटे श्यामतादशायां भविष्यद्रक्तरूपसमवायस्य [3]सत्त्वेन तदा रक्तरूपधीः स्यादिति समम्। न चात्र वायाविवाधिकरणस्वभावः कल्प्यः। तत्रैव कदाचिद्रक्तरूपप्रतीतेः॥

ननु तदा रक्तरूपाभावात्तदप्रतीतिः। लौकिकप्रत्यक्षे विषयस्यापि हेतुत्वात्। [4]तव तु घटाप-

---

शङ्कय निराह—**ननु रूपसमवायवत्यपीति**। अयोग्यत्वरूपाधिकरणस्वभावादित्यर्थः। **न चात्रेति**। घटभावाधिकरणभूतलादावित्यर्थः। तथात्वे वायौ रूपस्येव भूतले घटाभावधीः कदापि न स्यादिति भावेनाह—**घटापसरणेति**। **कदाचिद्रक्तरूपप्रतीतेरिति**। वायाविव तत्राप्ययोग्यतालक्षणाधिकरणस्वभावकल्पने च सा न स्यादिति भावः॥

ननु आमघटे श्यामतादशायां रक्त[5]रूपधीरुपनीतप्रत्यक्षरूपापाद्यतेऽथलौकिकप्रत्यक्षरूपा। नाद्यः। इष्टापत्तेः। अन्त्ये विषयसत्त्वस्य तत्र हेतुत्वेन तदभावादेव तत्र रक्तरूपाप्रत्यक्षतोपपत्तेरिति भावेन पक्षधराद्युक्तमाङ्कय निराह—**नन्वित्यादिना**। मयाप्येवं वक्तुं शक्यमित्यत आह—**तव त्विति**। अभावविशिष्टबुद्धावप्येकनित्यसम्बन्ध-

---

[1] षरूपसम्बन्धा इत्यधिकम्–**रा**. [2] इतः "स्वभावः कल्प्यः" इत्यन्तं नास्ति–**छ**. [3] तदा इत्यधिकम्–**मु**. [4] तावत् इत्यस्ति–**छ-रा-मु**. तु इति नास्ति–**ग**.

नयनकाले सतो घटाभावस्य घटोपनयनकालेपि सत्त्वेन तत्प्रतीतिर्दुर्वारा । न हि घटसत्त्वकाले घटाभावोऽन्यत्र गतः । अमूर्तत्वात् । नापि नष्टः । नित्यत्वादिति चेन्न । मया घटोपनयापनयकाले भूतले घटसंयोगतदभावयोरेव स्वीकृतत्वेन अपनय-काले सतः संयोगाभावस्योपनयनकाले अभावात् ॥

किंच त्वद्रीत्याश्रयणेपि किमत्यन्ताभावस्य धी-

वादिन इत्यर्थः । **काल इति** । कालयोरित्यर्थः । **स्वीकृतत्वेनेति** । "एतद्घटैतद्भूतलसंसर्गाभावस्यापि यथासम्भवं प्रागभावादिष्वन्तर्भावा दिति" तत्त्वसङ्ख्यानटीकोक्तेः । तथैव वर्धमानाद्युक्तेश्च । विवृतश्चाय-मर्थो न्यायामृते असतो निषेधप्रतियोगित्वसमर्थनवादे इति भावः ॥

अभावादिति । ननु उपनेष्यमाणघटसंयोगस्य पूर्वं सतोऽभा वस्य प्रागभावत्वेन पश्चात्तदभावेपि प्राक्सतो घटस्यापयनकाले सतोऽभा-वस्य घटसंयोगध्वंसरूपत्वेन तस्य घटो[1]पनयकालेपि सत्त्वात् कथम-प्रतीतिरिति चेत् न। प्राचीनघटसंयोगध्वंसमादायेदानीं घटवत्यपि प्रती-त्यापादन इष्टापत्तेः । पूर्वं घटोत्रस्थ एवान्यत्रापनीतः पुनरत्रोपनीत इति प्रतीत्यान्यत्र नीत इति प्रतीतेरेव तत्प्रतीतित्वादिति भावः ॥

नन्वस्त्वेवं भूतलघटो नेति धीस्तत्संयोगाभावविषयेति भवदभि-मते दोषाभावः, तार्किकमते भट्टादिमते च स्यादेव दोष इत्यत आह— **किञ्चेति । त्वद्री[2]त्येति** । मणिकृद्री[3]त्येत्यर्थः ॥

ननु प्राचीनरीत्यापि इह भूतले घटो नास्तीति तत्संयोगो निषि-

---

[1] घटपदं नास्ति—**मु.** [2] त्वदीयेति—**इ.** [3] दीये—**इ.**

रापाद्यते उत्पादविनाशशीलस्य तुरीयाभावस्य वा । नाद्यः । तस्य त्वत्पक्षे घटकालेपि स्वरूपात्मकप्रत्यासत्त्या तत्र सत्त्वेन तत्प्रतीतेर्दुर्वारत्वात् । नान्त्यः । श्यामतादशायां रक्तरूपस्येव घटस-

---

ध्यत इत्युदयनोक्तेः उत्पादविनाशशीलोपि प्रागभावादित्रितयान्यश्चतुर्थः कश्चित्संसर्गाभावोस्तीति मतेनाह—**उत्पादविनाशेति** । उक्तं च वर्धमानेन "प्रतियोगिभेदेनेव प्रतियोगितावच्छेदकभेदेनाप्यभावभेदात् संयुक्तघटाभावोयं विशिष्टान्तराभाववदुत्पादविनाशशीलोन्य एवेति" ॥

स्वरूपात्मकेति । एतेन तदानीन्तनयोर्विशिष्टप्रत्ययजननयोग्यत्वाभावात् न स्वरूपप्रत्यासत्तित्वमिति निरस्तम् । द्वयोः स्वरूपसत्त्वे प्रत्यासत्तित्वं नेत्यस्य रिक्तवचनत्वात् ॥

[1]यदुक्तं वर्धमानेन घटात्यन्ताभावस्य भूतलेन सह तत्संयोगध्वंसादिरेव सम्बन्ध इति न तदा प्रतीत्यापत्तिरिति । तन्न । अभावाधिकरणयोः सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वरूपक्लृप्तसम्बन्धत्यागेनार्थसंयोगध्वंसादेः सम्बन्धत्वकल्पने घटस्य कपालेष्वत्यन्ताभावः स्यात् । घट[2]भावे त्वाश्रयाश्रयिभावध्वंसादिरूपसम्बन्धाभावादप्रतीत्युपपत्त्या बाधकाभावात् । तथा च घटाद्य[3]त्यन्ताभावस्याप्याकाशाद्यत्यन्ताभावस्येव केवलान्वयित्वापत्ते[4]रिति भावः ॥

यत्तु तदा रक्तरूपाभावादप्रतीतिरिति पूर्वमुक्तं तन्न । घटे श्यामतादशायां जपाकुसुमे रक्तरूपभावात् । घटो रक्त इति धीरवर्ज-

---

[1] त्तूक्तं–मु. [2] कपालेत्वाश्र–इ. [3] आदिपदं न–मु. [4] त्तिरि–अ,

त्त्वकाले तुरीयाभावस्य [1] सत्त्वेन साम्यात् । रक्तरूपस्यापि श्यामतादशायामेव जपाकुसुमादौ सत्त्वाच्च । इह नास्तीति चेत् [2] । विशेषणे [3] तस्य विशेष्येण संसर्गे च सति विशेष्ये विशेषणाभावस्यासंभवात् । न हि प्रतियोगिनि रूपे [4] प्रतियोगितावच्छेदक [5] संसर्गे च सति रूपसंसर्गाभावः संभवी ॥

किंच रूपसमवायवतोपि वायो रूपराहित्यस्वभाववत् प्रतियोगिमदधिकरणस्यापि प्रतियोगिकाले स्वस्मिन् तत्प्रतियोगिकाभावविशिष्टप्रमित्यजनकत्वस्वभावः कल्प्यताम् ॥

नीयैव । समवायस्यैकत्वेन श्यामरूपसमवायस्य घटे सत्त्वे तदानीमेवान्यत्र विद्यमानरक्तरूपसमवायस्यापि सत्त्वादिति भावेनाह—**रक्तरूपस्यापीति** । **इहेति** । घटे रक्तरूपं नास्तीति चेदित्यर्थः । **विशेषण इति** । सतीत्यन्वयः । **तस्य** विशेषणस्य । **प्रतियोगितावच्छेदक इति** । रूपं न समवेतमित्यत्र संसर्गस्यावच्छेदकत्वादेवमुक्तम् ॥

पूर्वं पररीतिमाश्रित्य प्रतिबन्द्या अभावप्रतीत्यापादनमयुक्तमित्युक्तम्, इदानीं भूतलाभावयोर्नित्यसम्बन्धसत्त्वेपि घटदशायामप्रतीत्युपपादकमाह—**किंचेति** । प्रतियोगिकाल इत्याद्युक्तया न चात्र तादृशः स्वभावः कल्प्यः घटापसरणानन्तरं घटाभावप्रतीतेरित्युक्तदोषोपास्तो ध्येयः ॥

---

[1] स्यास–**क-ग-रा.** [2] न इत्यधिकं–**रा** [3] णज्ञाने–**क.** [4] प्ये–**क-रा.** [5] के–**च-ग-रा.**

अपिच यथा तव चत्वरीयाभावगेहस्वरूपयोर्न प्रतियोगिकाले सम्बन्धत्वं तदाऽभावाप्रतीतेः, किंतु कदाचिदेव, तथा घटसत्त्वकाले वैशिष्ट्यस्य सत्त्वेपि न तदा तस्य सम्बन्धत्वमिति। न घटवति घटाभावधीप्रसङ्गः ॥

ननु—अभावस्य स्वाश्रयेण नित्यसम्बन्धश्चेत् ध्वंसस्यापि स्वाश्रयनाशेन नाशापत्त्या घटोन्मज्जनं

अत्यन्ताभावस्वीकारवादिना त्वया भूतले घटाभावस्य घटदशायां सतोप्यप्रतीतेरुपपादकत्वेन प्रतियोगिदेशान्यदेशत्वं वा तत्संयोगध्वंसादिरूपो वा सम्बन्धो नेत्युच्यते यथा, तथैवात्र नित्यसम्बन्धपक्षेप्यस्तु तथा च घटापसरणानन्तरमभावधीर्न स्यादितिशङ्कानवकाशोपीत्याह—**अपि चेति। चत्वरीयः**। चत्वरनिष्ठो योऽभावः यच्च गृहं तयोर्ये स्वरूपे तयोर्ग्रहे पटादिलक्षणप्रतियोगिकाले सम्बन्धत्वं नास्ति यथा तथा कादाचित्कप्रतीत्यन्यथानुपपत्त्या प्रकृतेप्यस्तीत्यर्थः ॥

एवमभावविशिष्टबुद्धावप्येको नित्यः कश्चित्सम्बन्धः सिद्धः स्यादित्युक्तप्रतिबन्ध्या घटदशायामपि घटाभावाधीः [1]स्यादिति मण्याद्युक्तं बाधकं निरस्येदानीं बाधकान्तरम[2]प्याशङ्क्य निराह—**नन्वभावस्येत्यादिना ॥**

ननु—आश्रयनाशहेतुककार्यनाशे समवायिकारणनाश एव प्रयोजकः। पटादौ तथा दर्शनात्। एवं च ध्वंसरूपकार्यनाशः स्वनिरूपितनित्यसम्बन्धयुक्तस्वाश्रयस्य नाशमात्रेण कथं चोद्यते। न हि विशिष्टबुद्धित्वहेतुना [3]विशिष्टभावबुद्धौ सिद्धयन् समवायो भवति।

---

[1] धीपदं न—मु-इ.. [2] अपिपदं न—मु-इ. [3] अभावविशिष्टबुद्धौ इत्यस्ति—इ

स्यात्। कार्यनाशं प्रति[1] नित्यसम्बन्धवत्कारण-नाशरूपं सामान्यमेव तन्त्रम्। न तु तद्विशेषसम-वायिनाशः। असति बाधके सामान्यस्य त्यागा-योगात्। किंच समवायत्वं न जातिः, किं तु वैशिष्ट्यान्यनित्यसम्बन्धत्वमिति कल्पनीयत्वाद्गौ-रवमिति चेन्न। तथा सति ध्वंसातिरिक्ताभावे वैशिष्ट्याभ्युपगमे बाधकाभावात्। न चैकस्मिन्न-भावे स्वरूपसम्बन्धश्चेदभावान्तरेपि तथा। भावेपि ज्ञातो घट इत्यादौ स्वरूपस्य सम्बन्धत्वे रूपे घट इत्यादावपि तथात्वापत्तेः॥

अयुतसिद्धत्वाभावात्। किं तु तदन्यः कश्चिदेव। तथा च कथमेव-मापादनमित्यत आह—**कार्यनाशं प्रति हीति**। न केवलं त्यागे कारणाभावो, गौरवं चास्तीत्याह—**किंचेति**। **न जातिरिति**। एक-व्यक्तित्वादिति भावः। अभावादिविशिष्टबुद्धौ यद्वैशिष्ट्यं तदन्यनित्य-सम्बन्धित्वमित्यर्थः। **न चेति**। अभावान्तरेपि तथा न चेत्यन्वयः। कुत इत्यत आह—**भावेपीति**। तथात्वापत्तेरित्यन्वयः। युतसिद्ध-त्वायुतसिद्धत्वादिना भावपदार्थेषु वैषम्यं चेदभावेष्वपि कर्यत्वाकार्यत्वा-दिना वैषम्यमिति समम्॥

ननु ज्ञानादेर्घटेन नित्यसम्बन्धे सदा घटप्रकाशः स्यादिति चेत्। रूपादेर्घटादिना नित्यसम्बन्धे सदा घटे श्यामरक्तरूपादिधीप्रसङ्गः स्यादिति समम्। श्यामरूपादेः कादाचित्कत्वान्न दोष इति चेत्। ज्ञानादेरपि तथात्वादिति तुल्यम्। किं च यथाकथंचिद्बाधकवशाद्भावे द्वैरूप्यं चेद-

---

[1] 'हि' इत्यधिकम्—च-क-ग.

किंच यदि लाघवान्नित्यसम्बन्धिकारणनाशः कार्यनाशे तन्त्रं तर्हि ततोपि लाघवान्नित्यसम्बन्धिनाश एव तत्र तन्त्रं स्यात्। न चेष्टापत्तिः। घटनाशेन पटरूपनाशापत्तेः। भवति हि पटरूपाहेतुरपिघटः पटरूपसमवायी। एवं सम्बन्धस्य नाश्यत्वे सम्बन्धत्वमेव तन्त्रम्, लाघवात्. न तु तद्विशेषः संयोगत्वमिति समवायस्यापि[1] नाशः स्यात्॥

यदि च समवायरक्षार्थं तत्र कारणत्वादिकं

भावेप्युक्तादेव बाधकाद्दुरूप्यमस्त्विति सा[2] मान्यमेवेति भावः॥

नन्वयुतसिद्धभावमात्रे अस्त्यैकरूप्यं, संसर्गाभावमात्रे नास्त्यैकरूप्यं, ध्वंसातिरिक्ताभाव एव नित्यसम्बन्धोपगमादित्यतो; अभावमात्र एवास्तु नित्यसम्बन्धः, न चोक्तदोषः, कार्यनाशं प्रति समवायिकारणनाशस्यैव प्रयोजकत्वाद्गौरवस्य चाकिंचित्करत्वादिति भावेन कार्यनाशं प्रति हीत्यादिनोक्तं निराह—**किंचेति। नित्यसम्बन्धीति।** नित्यो यः सम्बन्धः तद्युक्त इत्यर्थः। **ततोपि लाघवादिति।** कारणपदत्यागादिति भावः॥

कार्यनाशे समवायिनाशस्य तन्त्रत्वमनुक्त्वा नित्यसम्बन्धिनाशस्यैव लाघवेन प्रयोजकत्वस्वीकारेतिप्रसङ्गान्तरं चाह—**एवमिति।** लाघवमनुसृत्य विशेषत्यागेन सामान्यादेर[3]सति कार्यनाशे नित्यसम्बन्धिनाशवत् सम्बन्धनाशे सम्बन्धत्वमेव तन्त्रं स्यादित्यर्थः। **तत्रेति।** नाशप्रयोजकसम्बन्धत्वे कारणीभूतसम्बन्धत्वं समवायान्यसम्बन्धत्वमिति

---

[1] स्य वि-छ-मू. [2] म्यमे-इ. [3] दसति-अ. [दरे सति]

विशेषणं तर्हि वैशिष्ट्यरक्षार्थं वैशिष्ट्यान्यत्वविशेषणमप्यस्तु । साम्यात् ॥

केचित्तु समवायिकारणनाशस्य हेतुत्वकल्पने समवायत्वं न प्रविष्टम् । येन गौरवं स्यात् । किं त्वनतिप्रसक्त[1]मुण्डितसमवाय[2]व्यक्तिमात्रमित्याहुः ॥

एतेनैव सत्यलौकिकप्रत्यक्षजातिगुणक्रियाविशिष्टबुद्धयः विशेषणसम्बन्धनिमित्तकाः सत्य-

---

विशेषणं यदीत्यर्थः । वैशिष्ट्येति । अभावविशिष्टबुद्धिविषयीभूतवैशिष्ट्यान्यसम्बन्धत्वमेव सम्बन्धनाशे [3] तन्नमित्यस्तु । एवं चाभावेपि नित्यसम्बन्धः स्यादेवेति भावः ॥

कार्यनाशे समवायनाशो हेतुरित्यत्र किंच समवायत्वमित्यादिनायद्गौरवमुक्तं तदुद्धारं प्रकारान्तरेणाह—केचित्त्विति । समवायत्वाप्रवेशेपि संबन्धत्वेनाप्रवेशे किंचिद्युक्तकारणनाशस्तन्नमित्यपि प्राप्तयातिप्रसङ्गेन नित्यकारणभूतसम्बन्धवन्नाशस्तन्नमित्येव वाच्यत्वात्किमनेनेत्यरुचिबीजमत्रेति ध्येयम् ॥

एवमभावविशिष्ट[4]प्रतिबन्दीदुरुद्धारेत्यभावस्थल इव [5]क्लृप्तस्वरूपसम्बन्धेनैव विशिष्टप्रतीत्युपपत्तौ न समवायकल्पनेत्युक्त्वा विशिष्टबुद्धित्वादिति हेतुरप्रयोजक इति निरस्येदानी " मथवा [6] सम्बन्धविशेषनिमित्तका इति साध्य " मित्यादिना मप्युक्तमनुमानान्तरं चानूद्य निराह—एतेनेति । स्वरूपसम्बन्धेनैवान्यथोपपत्तिकथनेनेत्यर्थः । निरस्तमित्यन्वयः ॥

---

[1] क्तं–च-ग. [2] यं–च. [3] 'त्रये' इत्यधिकम्–अ. [4] बुद्धिपदमधिकम्–अ. [5] क्लृप्तपदं न–मु. [6] विशेषसंबन्धनिमि–मु-इ.

लौकिकप्रत्यक्षविशिष्टबुद्धित्वात् । दण्डीति सत्य-लौकिकप्रत्यक्षबुद्धिवत् । अत्र च क्षित्यादौ क[1]र्तैव लाघवाद्विशेषणसम्बन्धोपि एक एव सिध्यति । अनुगतकार्यस्यानुगतकारणजन्यत्वात् । स्वरूप-सम्बन्धानाननुगतत्वा[2]च्च । अत एव नाप्रयोजकता । सम्बन्धं विनापि विशिष्टबुद्धौ गवाश्वादा-

---

हेतौ च सत्यत्वं विशेषणमिति मण्युक्तयैव पक्षेपि तदनुमतमिति-ावेन सत्यपदम् । तत् कृत्यं पूर्ववत् । मणौ विशिष्टबुद्धय इत्येव पक्षोक्तावप्यत्र पक्षहेतुदृष्टान्तेषु विशिष्टबुद्धिपदं लौकिकप्रत्यक्षपरमिति [3]तद्वीकोक्तेर्लौकिके[4]त्याद्युक्तिः । अलौकिकप्रत्यक्षे बाधनिरासाय **लौकिकेति** । अनुमित्यादौ बाधनिरासाय **प्रत्यक्षेति** । निर्विकल्पके तन्निरासाय विशिष्टपदम् । भ्रमे व्यभिचारवारणाय हेतौ सत्यपदम् । साध्यसाधनतावैकल्याय दृष्टान्तविशेषणानि ॥

तावता समवायसिद्धिःकुत इत्यत आह—**अत्र चेति** । पक्षधरा-द्युक्तमाह—**क्षित्यादौ कर्तेवेति** । अत एवेत्युक्तं हेतूच्छेद(क)बाधकं व्यनक्ति—**सम्बन्धमिति** ॥

सम्बन्धनिमित्तका इत्यत्र सम्बन्धस्य निमित्तत्वं किं विषयत्वे-नाथ समवायत्वेन आद्ये गुणादिस्वरूपाणामेव केन चिद्धर्मेणानुगतानां तथा हेतुत्वमस्तु । किं समवायेन । अन्त्ये तु समवायत्वं नित्यसम्ब-न्धत्वं तथा च लाघवेन सम्बन्धत्वेनैव हेतुत्वमस्तु । तच्च स्वरूप-सम्बन्धसाधारणमिति तेनानुगतीकृतानां गुणादीनामेव हेतुत्वमस्तु ।

---

[1] त्रैक्यला—**क.** [2] दनन्तत्वात्—**च·क·ग·रा.** [3] तत्पदं न—**इ.**
[4] कत्वा—**अ.**

वपि तत्प्रसङ्गादिति निरस्तम् । अभावादौ कृत्स्नेन स्वरूपसम्बन्धत्वेनानुगतीकृतानां गुणादिस्वरूपाणामेवानुगतकार्यहेतुत्वोपपत्तेः । तस्मादभावादाविव गुणादावपि धर्मिकल्पनात इति न्यायसाम्येन स्वरूपमेव सम्बन्धः ॥

यत्तु युतसिद्धसम्बन्धिद्वयविषयाणां दण्डादिविशिष्टबुद्धीनामिवायुतसिद्धसम्बन्धिद्वयविषयाणां अवयविगुणक्रियाजातिविशिष्टबुद्धीनामन्योन्यं

अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वादिति भावेन निराह—**अभावादाविति** । आदिपदेन तन्मतसिद्धसमवायविशिष्टबुद्धिपरिग्रहः ॥

एतच्च सत्यलौकिकजात्यादिविशिष्टप्रत्यक्षत्वं कार्यतावच्छेदकमुपेत्योक्तम् । वस्तुतस्तु तादृशानुमितित्वादिकमिव तादृशप्रत्यक्षत्वमपि नावच्छेदकं मानाभावात् । स्वावच्छिन्नकार्यतानिरूपितानुगतैककारणासिद्धया अनित्यप्रमात्वानित्यप्रत्यक्षत्वादेरिव बाधकोपपन्नत्वेनावच्छेदकत्वासंभवाच्च । न च नित्यैकरूपसम्बन्धरूपसमवाय एवानुगतकारणमितियुक्तम् । अन्योन्याश्रयापत्तेः । विषयस्य प्रत्यक्षं प्रत्यहेतुत्वस्य प्रामाण्यवादे व्युत्पादनाच्चेति ज्ञेयम् ॥

पक्षधराद्युक्तमनूद्य निराह—**यत्त्वित्यादिना। अन्योन्यमिति।** अवयवावयविविशिष्टबुद्धेर्गुणादिविशिष्टबुद्ध्या तस्याः जातिविशिष्टबुद्ध्या जातिविशिष्टबुद्धेः गुणविशिष्टबुद्ध्येत्यादिरूपेणान्योन्यं साजात्यमित्यन्वयः ॥

स्फुटतरविवेकप्रकाशराहित्यरूपं साजात्यमन्यविशिष्टबुद्धितो व्यावृत्तमनुभवसाक्षिकम्। तथा च दण्डादिविशिष्टप्रतीतिं प्रति संयोग इव गुणादिविशिष्टप्रत्यक्षप्रतीतिरूपमनुगतकार्यं प्रति निमित्ततया समवायः सिध्यतीति। तन्न॥

तस्य भेदाविषयत्वेन,[1] स्फुटतर[2]प्रकाशसामग्रीराहित्येन वा, त्वदभिमतसमवायनियामकायुत-

---

तत्स्वरूपमाह—**स्फुटतरेति**। विवेको भेदः। तद्विषयकत्वराहित्यरूपमित्यर्थः। अवयवावयव्यादेरन्योन्यं भेदस्याङ्गुलिद्वयवदप्रतीतेरिति भावः। **अन्येति**। दण्डीकुण्डलीत्यादिविशिष्टबुद्धीनामन्योन्यं साजात्यमि[3]वेहायुतसिद्धविशिष्टबुद्धीनामन्योन्यसाजात्येपि दण्डीत्यादिबुद्धितो व्यावृत्तं तादृशबुद्धावविद्यमानं अनुभवसाक्षिकमस्तीत्यर्थः॥

तादृशं साजात्यं अन्यतो व्यावृत्तं गुणक्रियादिविशिष्टबुद्धिगतमनुभवसिद्धमुक्तम्। तत्किं जातिकृतमुत स्फुटतरविवेकप्रकाशराहित्यरूपमेव बाधविषयविशेषकृतं वा। नाद्यः जातित्वे मानाभावात्। तादृशानुमितित्वादिना सांकर्यापत्तेश्च। द्वितीये समवायेन विनापि तादृशविशिष्टबुद्धित्वस्योपपत्ते[4]रप्रयोजको हेतुरिति भावेन तादृशविशिष्टबुद्धेः अन्यथासिद्धिमाह—**तस्येति**। अवयव्यादिविशिष्टबुद्धिगतसाजात्यस्येत्यर्थः। तृतीयं प्रत्याचष्टे—**त्वदिति**। त्वदभिमता[5]या[6]समवायनियामकायुतसिद्धि[7]रित्यर्थः॥

---

[1] 'वा' इत्यधिकम्—**च-क-ग.** [2] विवेकपदमधिकम्—**च-क-ग-रा.** [3] इवेति नास्ति—**मु-इ.** [4] र्न प्रयो—**इ.** [5] तानि—**इ.** [6] यानि—**इ.** [7] द्धानि—**इ.**

सिद्धविषयत्वेन वा, भेदाऽभेदविषयत्वेन वा, सविशेषाभेदविषयत्वेन वोपपत्तेः ॥

अभावप्रतियोगिनोर्ज्ञानज्ञेयादीनां च विवेकप्रकाशस्य स्फुटतया न्यायसाम्येन तत्र संयो[1]गापत्तेश्च ॥

अभावाधिकरणयोस्तन्मते सुवर्णतदुपष्टम्भकपीतद्रव्ययोश्च विवेकप्रकाशस्यास्फुटत्वेन न्यायसाम्येन तत्र समवायापत्तेश्च ॥

युतसिद्धेषु संयोगस्येवायुतसिद्धेषु समवायस्यापि न्यायसाम्येन नानात्वापाताच्च । तस्मान्न

ननु नित्य[2]सम्बन्धसम्बन्धित्वमेवायुत्तासिद्धि[3]रित्यतोऽयावद्द्रव्यभाविगुणक्रियावयव्याद्यभिप्रायेण विषयान्तरमाह—**भेदाभेदेति** । यावद्द्रव्यभाविगुणाद्याशयेनाह—**सविशेषेति** ॥

यद्वाद्या विषयोक्तिर्न्यायमतरीत्या द्वितीया मीमांसकरीत्या तृतीयासिद्धान्तरीत्येति [4]ध्येयम् । तन्तुपटादिबुद्धिः कुण्डेबदरादिबुद्धेर्विलक्षणेत्यभेदविषयैवावसीयत इति सुधोक्तेरिति भावः । एवं वदता त्वया स्फुटतरविवेकप्रकाशोपेतविशिष्टबुद्धौ संयोग इत्युक्तः स्यात् । तच्चायुक्तमित्याह—**अभावेति** । आदिपदेनेच्छेष्यमाणादेर्ग्रहः । **न्यायेति** । स्फुटतरविवेकप्रकाशराहित्यस्थले समवाय इति वत् तादृशप्रकाशवद्विशिष्टबुद्धौ दण्डीत्यादिबुद्धाविव संयोगः स्यादित्यर्थः । **नानात्वेति** ।

---

[1] गोपप–क. [2] संबन्धपदं नास्ति–इ. [3] द्धत्व–मु-इ. [4] ज्ञे–मु-इ.

समवाये प्रमाणमस्तीति ॥

समवाये प्रमाणभङ्गः ॥ २९ ॥

उक्तप्रकाशराहित्यरूपसाजात्यस्यानुगतस्य दण्डीत्यादिबुद्धौ सत्त्वेपि तत्र संयोगनानात्ववत् समवायस्यापि नानात्वा[1]पत्तेरित्यर्थः ॥

यत्त्वाश्रयनाशजन्यकार्यनाशस्थले कार्यनाशं प्रति समवायिरूपाश्रयनाश एव हेतुर्वाच्यो न त्वाश्रयमात्रनाशः । तथात्वे कपालनिष्ठघटध्वंसस्य कपालनाशेनापि नाशप्रसङ्गेन घटोन्मज्जनापत्तेरतः समवायोभ्युपेय इति तन्न । समवायत्वं हि नित्यसम्बन्धत्वं न तु जातिरनभ्युपगमात् । तथा च लाघवात्सम्बन्धिकारणरूपाश्रयनाश एव वा कारणीभूताश्रयनाश एव वाश्रितकार्यनाशहेतुरिति स्वीकृतौ ध्वंसनाशाप्रसक्त्या समवायस्यानुपेयत्वात् ॥

वस्तुतस्तु परिणामवादे ध्वंसस्य भूतलादिनिष्ठत्वेन कपालनाशेपि[2] तन्नाशाप्रतक्तेः । अत एव प्राग् भेदाभेदविषयत्वेनेत्याद्युक्तिरिति ॥

समवाये प्रमाणभङ्गः ॥ २९ ॥

एवं समवायस्याप्रामाणिकत्वमुक्त्वानुव्याख्यानसुधयोरुक्तमन्यत्स-

---

[1] त्वोपपत्ते–इ. [2] अपिपदं न–इ.

किञ्च कालस्य स्वगतेन सङ्ख्यापरिमाणादिना त्वयापि स्वरूपसम्बन्धः स्वीकृत इति किं तत्र समवायेन ॥

यदि च कालस्य तेन सह समवायस्य सत्त्वान्न स्वरूपसम्बन्धः। तर्हि का[1]लस्य घटेन सह संयोगस्य

मवायोपगमे बाधकजातमाह—**किंचेति**। [2]यद्वा प्रागुक्तानुमानेषु गुणादि-विशिष्टबुद्धिनिमित्तसम्बन्धतया हि समवायसिद्धिरभिमता सा न युक्ता। तद्बुद्धेरन्यथोपपत्तेरिति । चतुर्थान्यथोपपत्तिमाह—**किंचेत्यादिना**। अथवा—

समवायश्च सम्बन्धो नित्यः स्यादेक एव सः ।

इति नित्यत्वे सत्येकत्वे सति सम्बन्धत्वमिति यत्समवायलक्षणमुक्तं तत्र सम्बन्धत्वं तावदन्यथोपपत्तिचतुष्टयेन निराह-- **किंचेत्यादिना ॥**

तत्रादौ तावत्साम्यादनवस्थितेरिति सूत्रखण्डस्य स्वगतसंख्यादि-गुणेन कालस्य पदार्थान्तरेणेव स्वरूपसम्बन्धस्वीकारसाम्यात्समवायस्या नवस्थितेरसत्त्वापातादित्यर्थमुपेत्याह—**कालस्येति** । कालपरिमाणं सदास्तीतिकालस्यैकत्वसख्या सदास्तीत्यादिप्रतीत्या कालस्य जगदा-धारताप्रयोजकत्वेन स्वगतधर्मैरन्यैश्चसर्वैः स्वरूपसम्बन्धः स्वीकृत इति तेनैव सम्बन्धेनैकः कालो परिच्छिन्नपरिमाणः काल इति विशिष्टबुद्ध्युप-पत्तौ तत्र समवायस्यावस्थित्यभावः स्यादित्यर्थः ॥

स्वगतसङ्ख्यादिना समवायसत्त्वस्येव घटादिद्रव्येण संयोगसत्त्व-स्यापि साम्यादिदानीं घट इत्यादिधीबलेन घटादिना स्वीकृतस्वरूप-सम्बन्धस्यावस्थित्यभावापत्तेरित्यर्थान्तरं चोपेत्याह—**यदि चेति। तेन**

---

[1] लेन सह घटस्य—च-छ-रा. [2] 'यद्वा, अथवा' इत्याद्यवतारिकाद्वयं नास्ति—इ.

सत्त्वात् स्वरूपसम्बन्धो न सिद्ध्येत्। साम्यात् ॥

अपि च गुणादेरपि त्वन्मते स्वाभावस्वज्ञान-स्वकालैः सह स्वरूपसम्बन्धत्वं तावदस्ति। तत्र गुणादेरभावज्ञानादीन्प्रति स्वरूपसम्बन्धत्वं न प्रतियोगि[1]विषयत्वादिना। अननुगमात्। गौरवाच्च। किन्तु विशेषणत्वेनानुगमाल्लाघवाच्च। विशेषणत्वं च गुणादेर्गुण्यादावपि [2]सममिति गुण्यादावपि गुणादेः स्वरूपसम्बन्धत्वं कल्पमेवेति क्व समवायस्यावकाशः ॥

अपि च घटरूपसमवाया इति समूहालम्बनज्ञानात् रूपी घट इत्यादिबुद्धेर्वैलक्षण्यायावश्य-

---

स्वगतसङ्ख्यादिना ॥

नन्वस्त्वेवं तथापीदानीं घटरूपमित्यादिधीबलाद्घटे रूपादिनैव स्वरूपसम्बन्धः कालस्य नान्येनेत्यत आह—**अपि चेति**। [3]यद्वा काले गुणविशिष्टबुद्ध्युपपादकसम्बन्धत्वेन समवायसिद्धावप्यन्यत्र तथात्वेन सिद्धिरस्त्वित्यत आह—**अपि चेति**। तच्च स्वरूपसम्बन्धत्वमित्यन्वयः। विषयत्वादिनेत्यादिपदेन विशेषणविशेष्यभावग्रहः। **अननुगमादिति**। स्वाभावेन प्रतियोगित्वरूपः, ज्ञानादिना विषयत्वरूपः, कालेन विशेषणत्वादिरित्यननुगमात् अनेककल्पने गौरवाच्चेत्यर्थः ॥

सममिति[4]। एतेन गुणादेर्विशेषणत्वसाम्यात्समवायस्यावस्थित्यभावात् इत्यर्थ उक्तो भवति। **वैलक्षण्यायेति**। समूहालम्बनेऽपि

---

[1] त्वावि—**ग-रा.** [2] 'सममिति गुण्यादावपि' इति नास्ति—**ग-मु.** [3] यद्वेत्याद्यवतारिका नास्ति—**इ.** [4] तीति—**मु.**

मङ्गीकार्येण रूपस्य घटेन सह विशेषणताविशेषेणैव विशिष्टबुद्ध्युपपत्तौ किं समवायेन। एवं रसादावपीति न समवायस्यावकाशः॥

किञ्च समवायस्यापि स्वसम्बन्धिना सह सम्बन्धाङ्गीकारे अनवस्था। तत्र स्वरूपसम्बन्धाङ्गीकारे च गुणादेरेव गुण्यादिना स्वरूपसम्बन्धोस्तु। साम्यात्। किं दूरगमनेन। कालस्य स्वगतस-

---

घटतद्रूपतत्समवायानां प्रतीतिवद्रूपी घट इति प्रतीतावपि रूपादित्रयस्यैव भानेऽनुभवसिद्धस्य ततो वैलक्षण्यस्यायोगेन रूपादौ विशेषणत्वादिरेव समूहालम्बने[1] प्रतीतोत्र प्रतीयत इति वाच्यमिति तेनैवोपपत्तौ किं समवायेनेत्यर्थः। एतेनाभावविशिष्टबुद्धिसाम्याद्रूपी घट इत्यादिबुद्धावपि समवायस्यावस्थित्यभाव इत्यर्थः सूत्रांशस्य सूचितः—

"भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद्ध्रुव"

मित्यनुव्याख्यानसुधयोरुक्तमाह—**किञ्चेति**। सम्बन्धिना[2] गुणगुण्यादिरूपेणेत्यर्थः। [3]समवायस्यावस्थित्यभाव इत्यर्थः। समवायविशिष्टबुद्धिसाम्यात्समवायस्याव[4]स्थित्यभावो गुणादावपीत्यर्थमुपेत्याह—**तत्रेति**। समवेतः पट इत्यादिसमवायविशिष्टबुद्धौ प्रतीतसमवायसमवायिनोरित्यर्थः। [5]**दूरेति**। गुणादिविशिष्टबुद्धौ समवायः, समवायविशिष्टबुद्धौ स्वरूपसम्बन्ध, इत्यभ्युपगमेन किमित्यर्थः। उपपादितबाधकानि बुद्ध्यारोहाय संगृह्णाह—**कालस्येति**॥

---

[1] नेऽप्र इत्यस्ति–इ. [2] गुणपदं नास्ति–इ. [3] 'भाव इत्यर्थः' इत्यन्तं नास्ति–इ-मु. [4] वगत्य–इ. [5] स्वरूपेति–मु, रूपेति–इ.

ह्न्यादिना समवायानुपपत्तिः, गुणादेः स्वाभावादिनेव गुण्यादिनापि स्वरूपसम्बन्धेनैवोपपत्तिः, समूहालम्बनाद्वैलक्षण्यानुपपत्तिः, अनवस्था चेति बाधकचतुष्टयं दुष्परिहरम् ॥

किंच समवायस्यैकत्वमयुक्तम्। तथाहि। धूमाद्यनुमानेन हि धर्मिमात्रं धर्ममात्रं वा न[1] साध्यम्। तयोः प्रागेव सिद्धत्वात्। अन्यथा आश्रयासिद्ध्यप्रसिद्धविशेषणत्वे स्याताम्। किंतु तयोः सम्बन्धः। स च क्वचित्संयोगः यथा पर्वताग्न्योः। क्वचित्समवायः यथा रसाद्रूपानुमाने। अग्निसंयोगोपि महानसादौ सिद्ध इति नानुमानसाध्यः। [2]किंतु पर्वतस्याग्निसंयोगः। तत्र च षष्ठ्यर्थः समवाय एव। स च एक एवेत्यनुमानमात्रं सिद्धसाधनं स्यात्। एवं शब्दमात्रमपि ज्ञातज्ञापकं स्यात्। तत्रापि पदार्थानां संसर्गाणां च [3]सिद्धत्वात्।

एवमन्यथोपपत्त्या समवा[4]यस्य स्वरूपमेव (स्व संबन्धित्वेन सिद्धिं) निरस्येदानीमस्तु नाम गुणगुण्यादौ कश्चनातिरिक्तः संबन्धः, तस्यैकत्वं तु न, तथात्वेनुमानशब्दप्रमाणमात्रोच्छेद इति भावेन सुबोधं विवृण्वन्नाह — **किंचेति। धर्मीति।** पर्वतादिमात्रं वह्न्यादिमात्रमित्यर्थः। **षष्ठ्यर्थः।** पर्वतस्येति षष्ठ्यर्थ इत्यर्थः। **स च एक एवेति।** रूपी

---

[1] बो-छ-क-ग-रा. [2] न तु-ग-मु. [3] विशकलितानां इत्यधिकं-च क-ग-रा. [4] 'वा यस्य सम्बन्धत्वेऽनुमाने' त्यादिरीत्या पाठान्तरमस्ति-अ.

तदुक्तमनुव्याख्याने ॥

"भूधरस्याग्निसंयोगो यदि षष्ठ्यर्थ एव कः ।
समवायो यदि ह्यस्य चैकत्वात्सिद्धसाधन"मिति॥

सिद्धसाधनं ज्ञातज्ञापनम् । एवं सुखस्यात्मान्तरे सिद्धत्वात्स्वसम्बन्ध एव कृतिसाध्य इति वक्तव्यम् । तच्चाशक्यम् समवायस्यानादित्वेनासाध्यत्वात्। एतदप्युक्तं "समवाय" इत्यादिना । सिद्धसाधनं निष्पन्ननिष्पादनम् ॥

घट इत्यादिप्रतीतौ सिद्धश्चेत्यपि ध्येयम् । **विशकलितानामिति ।** न च विशिष्टं नान्यत्र सिद्धमिति वाच्यम्। विशिष्टस्य त्वन्मते पदार्थान्तरत्वाभावाद्घटोस्तीत्यादिवाक्यबोध्यस्य घटतत्सत्तयोः समवायस्यैकत्वेनात्र तस्य ज्ञातत्वाच्चेति भावः । **तदुक्तमिति ।** वैशेषिकाधिकरणानुव्याख्यान इत्यर्थः ॥

शब्दसाधारण्यलाभार्थमाह—**ज्ञातज्ञापनमिति ।** धूमाद्यनुमानमिति शेषः । इति सुधोक्तिरुपलक्षणम् । पर्वते वह्निरस्तीत्यादिशब्दजातमित्यपि ध्येयम् । [1]अत एव सुधायां समवायैकत्वनिरास-[2]प्रकरणावसाने आगमापह्नवश्च समवायैक्ये स्यात्पदार्थानां तत्संसर्गाणां [3]सिकतावद्विशकलितानां सिद्धत्वादित्युक्तमिति भावः ॥

समवायो यद्युपेयते तर्ह्यस्यैकत्वात्सिद्धस्यैव साधनमुत्पादनमिति प्राप्तमित्यर्थान्तरं चोत्तरार्धस्योपेत्य समवायस्यैकत्वे बाधकान्तरं चाह—**एवमिति । स्वेति ।** स्वस्य सुखेन यः समवायस्तस्येत्यर्थः ।

---

[1] ततः 'इति भावः' इत्येवास्ति 'अत एवे' त्यादि नास्ति-इ. [2] प्रपदं नास्ति-मु. [3] 'सिकतावद्विशकलितानां इति नास्ति-मु.

एवं दुःखस्या[1]त्मान्तरे सत्त्वेन निवर्तयितुमशक्यत्वात्स्वसम्बन्ध एव निवर्त्य इति वाच्यम्। तच्चाशक्यम्। समवायस्याऽविनाशित्वात्॥

अपि चात्माकाशकालादौ रूपरसादिसमवायस्य [2]चलनादिसमवायस्य, घटपटादौ ज्ञानेच्छादिसमवायस्य, पटादौ घटत्वादिसमवायस्य, सुखादौ दुःखा[3]दिसमवायस्य च, सत्त्वेन सर्वपदार्थेषु सर्वधर्मसम्बन्धस्य साम्यात् सर्वसङ्करूपाव्यवस्थास्यात्। नन्वात्मादौ रूपादिसमवायस्य सत्त्वेपि घटादाविव रूपादिना सह विशेष-

---

सिद्धसाधनमित्युपलक्षणम्। [4]सिद्धस्यैव नित्यस्यैव दुःखादिसम्बन्धस्यावसानमित्यपि ध्येयमिति भावेनाह—**एवं दुःखस्येति**। इष्टानिष्टप्राप्तिपरिहारार्थं प्रयत्नाभावापत्तिः समवायैक्ये बाधिकेत्युक्तं भवति॥

समवायैक[5]त्वदूषणं सूत्रारूढं दर्शयितुं साम्यादनवस्थितेरिति सूत्रांशस्यार्थान्तरमुपेत्यातिप्रसङ्गान्तरमाह—**अपि चात्मेति**। षष्ठ्यन्तानां पूर्वपूर्वेणैव सप्तम्यन्तेनान्वयः। **सत्त्वेनेति**। सर्वषष्ठ्यन्तेन सम्बन्धः। समवायस्यैकत्वपक्ष इति योज्यम्॥

यत्तु मणौ "ननु समवायस्यैकत्वे कथं रूपिनीरूपिव्यवस्थे"त्यादिनैतदेव सांकर्यमाशङ्क्याधिकरणस्वभावादिना समाहितं,तदनूद्य निराह—**नन्वात्मादाविति**। समवायस्यैकत्वपक्षेमण्याद्युक्तसमाधावति-

---

[1] प्या–क. [2] वल–छ–मु. [3] खत्वादि–च–क–ग. [4] 'सिद्धसाधनं सिद्धस्यैव सुखादेरवसादनमित्यपि' इत्यस्ति–मु–इ. [5] क्यदू–इ.

णताविशेषाभावाद्वा अधिकरणस्वभावाद्वा आधेयस्वभावा[1]द्वा न सङ्कर इति चेत्। एवं हि तैरेव सर्वव्यवस्थोपपत्तौ किं व्यवस्थित्यहेतुना समवायेन ॥

किंचैवं सर्वेषामपि वस्तूनां सर्वैः सह एक एव सम्बन्ध इति वा [2]कस्यापि केनापि सह न सम्बन्ध इति वा स्यात्। आद्ये आधारस्य वा आधेयस्य वा सम्बन्धस्य वा स्वभावात् कुत्र चिदसम्बन्धव्यवहार इति द्वितीये आधारस्य वा आधेयस्य वा स्वभावात्कुत्रचित्सम्बन्धव्यवहार इति च सुवचत्वात् ॥

किंच [3]संयोगोप्येक एव लाघवात्। व्यवस्था तु स्वभाववैचित्र्यादिति स्यात्। नाशाद्यनुभवस्तु उभयत्रापि समः। पाकेन श्यामरूपमिव तत्सम्बन्धोपि नष्टः, रक्तरूपमिव तत्सम्बन्धोप्युत्पन्न इत्यनुभावात् ॥

प्रसङ्गान्तरमाह—किञ्चैवमिति। पक्षद्वयेप्युपपत्तिप्रकारं परोक्तन्यायेनाह—आद्य इत्यादिना। ननु संयोगस्यैक्ये घटसंयोगो नष्टः पटसंयोग उत्पन्न इति धीः कथमित्यत आह—नाशादीति। सम इत्युक्तसाम्यं समवायेन व्यनक्ति—पाकेनेति ॥

---

[1] वबलाद्वा—क. [2] एक—क. [3] चैवं—च-मु.

न हि सम्बन्धनाशेपि सम्बन्धिनः स्थितिवत् सम्बन्धिनाशेपि सम्बन्धस्थितिः कुत्रचिद्दृष्टा ॥

एतेनात्मादिनिष्ठे समवाये रूपादिप्रतिसम्बन्धिकत्वस्याभावान्न सङ्कर इति निरस्तम्। आत्मनिष्ठस्य समवायस्य घटादिनिष्ठाद्भेदे अपसिद्धान्तात् । अभेदे घटादिनिष्ठेपि रूपादिप्रतिसम्बन्धिकत्वाभावापातात् ॥

एतेनैव समवायस्य स्वभावतः एकत्वेपि औपाधिको भेदोस्ति। रूपसुखाद्युपाधीनां भिन्नत्वादिति निरस्तम्। एवं हि रूपादिः संयोगादिश्चैक एव भेदस्त्वौपाधिक इति स्यात् ॥

अयमनुभवो भ्रमोस्त्वित्यतो बाधकाभावादिति भावेनाह— **न हीति**। **रूपादिप्रतिसम्बन्धिकत्वस्येति**। रूपादिनिरूपितत्वस्येत्यर्थः। **रूपादिरिति**। रसगन्धादिरादिपदार्थः। तत्रोपाधिः पटादिराश्रय एव। तथा च घटपटादिगतरूपमेकमेव। भेदकार्यं तु घटाद्याश्रयलक्षणोपाधिभेदनिमित्तभेदसत्त्वाद्युक्तमित्यस्तु इत्यर्थः। **संयोगादिरि** त्यादिपदेन विभागस्य वा विशेषणविशेष्यभावादिसम्बन्धस्य वा ग्रहः। **औपाधिक इति**। घटादिस्वरूपनिरूपकभेदनिमित्तक इत्यर्थः। उपाधिशब्दात् तृतीयासमर्थाज्जन्यगम्यार्थे[1] शैषिके ठकि कृते औपाधिकशब्दो[2] निष्पन्नः ॥

औपाधिकमित्युपाधिगम्यमुतोपाधिजन्यमिति कल्पद्वयलाभं हृदि

---

[1] वैशे-अ. [2] शब्दनिष्पत्तेः-मु.

किञ्चौपाधिकत्वं उपाधिज्ञेयत्वं चेत्। ज्ञानस्य प्रमात्वे भेदा[1]सिद्धिः। भ्रमत्वे तु पदार्थानां सङ्कर-तादवस्थ्यम्। उपाधिजन्यत्वं चेत्। सिद्धः समवा-यस्य सत्यो भेदः। अपसिद्धान्तश्च॥

तदुक्तमनुव्याख्याने॥

"उपाधिजन्यं तद्गम्यमिति चौपाधिकं भवेत्।
उभयत्राप्यनन्ताः स्युः समवाया इतस्तत" इति॥

एतेन लाघवतर्कसहकृतेन धर्मिग्राहकानुमानेन

कृत्वा आद्येपि ज्ञानं प्रमा भ्रमो वेति भावेन क्रमेण निराह— **किञ्चौपाधिकत्वमिति। तदुक्तमिति**। वैशेषिकनये। **उभयत्रेति।** उपाधिना[2]जन्यत्वपक्षे प्रमीयमाणत्वपक्षे चेत्यर्थः। कथमानन्त्यमित्यत उक्तम्— **इतस्तत इति**। अत्र तत्रेत्यर्थः। नानादेशकालेषु स्थितानामवयवावयव्याद्युपाधीनामनन्तत्वादिति शेषः। ज्ञानस्य भ्रमत्वपक्षे साङ्कर्यदोषोक्तिस्तु॥

अविद्यमान एवान्यः समवायोवगम्यते।
उपाधिना तद्गमकमनुमानं न मा भवेत्॥

इत्यनुव्याख्यानोक्तमुपलक्षणमिति भावेनेति ज्ञेयम्। अत एव तत्र सुधायां "इत्यादि द्रष्टव्य" मित्युक्तम्॥

धर्मिग्राहकमानबाधं[3] समवायानन्त्यापादनमित्याश[4]ङ्क्य निराह— **एतेनेति। धर्मीति**। सत्यलौकिकप्रत्य[5]क्षजातिगुणक्रियाविशिष्ट[6]बुद्धयो

---

[1] दसि-क-ग-रा. [2] धिज-मु. [3] धितम्-मु. [4] ङ्कां नि-इ. [5] क्षे-इ. [6] बुद्धित्वादित्याद्यनुमानैरित्यर्थः। तत्सहकृतेन (यः) विशेषणसंबन्धनिमित्तका इति प्रागुक्तानुमानेनेत्यर्थः। **उक्तत्वेनेति। इत्यस्ति-अ.**

समवायस्यैकत्वं नित्यत्वं च सिद्धमितिनिरस्तम् ॥ एकत्वादौ प्रत्यक्षविरोधस्योक्तत्वेनानुमानस्य तद्-विरुद्धनानासम्बन्धसाधनेनं कृतार्थत्वात् ॥

अन्यथा संयोगोपि लाघवतर्कसहकृतेन प्रत्यक्षेण, अभावाधिकरणयोर्ज्ञानज्ञेयादीनां सम्बन्धोपि तत्सहकृतैरुक्तानुमानैरेको नित्यश्च सिध्येत् । द्व्यणुकादीनां सोपादानकत्वसाधने[1] कार्यत्वहेतुनापि तत्सहकृतेन नित्यमेकं उपादानं सिध्येत् । लाघवतर्कस्य साम्यात् । ईश्वरानुमानेपि कर्त्रेकत्वसिद्धिर्नेत्युक्तम् ॥

तस्मात्समवायस्य नित्यत्वमेकत्वं[2] वाऽयुक्तम्॥ समवायाभावे तु अयुतसिद्ध[3] योराधाराधेय-

---

विशेषणसंबन्धनिमित्तकाः, इति प्रागुक्तानुमानेनेत्यर्थः । **उक्तत्वे नेति** । नाशाद्यनुभवस्तूभयत्र सम इत्यादिग्रन्थेनेत्यर्थः । **उक्तानुमानैरिति** । पूर्वत्र समवायानुमानभङ्गे उक्तैर्विशिष्टबुद्धित्वात्[4] तद्विशिष्टविषयकविशिष्टबुद्धित्वादित्याद्यनुमानैरित्यर्थः । **तत्सहकृतेन** लाघवतर्कसहकृतेनेत्यर्थः ॥

नन्वेवमीश्वरानुमानेपि लाघवतर्केण कर्त्रैक्यसिद्धिर्न स्यादित्यत आह—**ईश्वरेति** । उक्तमीश्वरानुमानभङ्ग इत्यर्थः ॥

समवायाभावे मानाभावादेव समवायसिद्धिरस्त्वित्यत आह—**समवायाभावे त्विति** । इत्याद्यनुमानानि प्रमाणानीत्यनेनान्वयः ।

---

[1] केन-च-क-ग. [2] चा-च-क-ग. [3] भाव इत्यधिकं-च-'भावयोरन्योन्यं संबं' इति शोधितमस्ति-क-ग-रा. [4] युतसिद्धविषयविशिष्टबुद्धि-इ.

भावनिमित्तसम्बन्धः न सम्बन्धिभिन्नः अयुतसिद्धयोरेवान्योन्यं सम्बन्धत्वात् । भूतलघटाभाव

अयुतसिद्धौ यौ भावौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेत्येवं द्वंद्वीभूतौ द्वौद्वौ पदार्थौ तयोरित्यर्थः । अत्र सम्बन्ध इत्यस्यैव पक्षत्वे स्वरूपसम्बन्धेन सिद्धसाधनं अतोन्योन्यमित्यन्तम् । कालसम्बन्धेन तद्वारणाय वान्योन्यमित्युक्तिः । न्यायमते जगदाधारताप्रयोजकतया कालस्य सर्वेणापि स्वरूपसम्बन्धोपगमात् । अयुतसिद्धभावयोरपि प्रत्येकं स्वस्वनिष्ठाभावादिना स्वरूपसम्बन्धस्योपगमेन तेन सिद्धसाधनवारणाय वा अवयवावयविनोः प्रत्येकमन्येन संयोगे बाधनिरासाय वान्योन्यमित्युक्तिः । भूतलघटाभावयोरन्यसम्बन्धेनार्थान्तरवारणाय **भावयोरिति** । अपृथक् गृह्यमाणत्वरूपत्वादयुतसिद्धत्वस्य घटपटसंयोगे बाधनिरासायायुतसिद्धेत्युक्तिः । संयोगस्य परमते सम्बन्धिनात्यन्तं भिन्नत्वात् । सिद्धान्तेपि भिन्नाभिन्नत्वात् । अत एव संयोगे व्यभिचारवारणाय हेतावयुतसिद्धयोरित्युक्तिः । अत एवावयवावयविनोः प्रत्येकमन्येन सह संयोगे व्यभिचारवारणायान्योन्यमित्युक्तिः । पक्षे भावपदस्याधिकस्योपादानान्न हेतु[1]तावच्छेदकैक्यनिमित्तसिद्धसाधनत्वं शङ्क्यम् । अभावभूतलयोरयुतसिद्धत्वमसिद्धमिति चेत् न । तस्यापृथग्गृह्यमाणत्वमात्ररूपत्वादन्यस्यानिरूपणात् । नित्यसम्बन्धत्वादेः समवायसिद्ध्युत्तरकालीनत्वात् ॥

अभावव्यावृत्तमन्यदेव किञ्चिदयुतसिद्धत्वमिति वादिनं प्रति

---

[1] पक्षेत्यधिकम्—इ.

सम्बन्धवत्, संयोगभिन्नः साक्षात्सम्बन्धः न संयोगविशेषणतोभयाभिन्नः साक्षात्सम्बन्धत्वात् संयोगवत्, साक्षात्सम्बन्धत्वं सयोगविशेषणतान्यान्यत्वव्याप्यम् साक्षात्सम्बन्धमात्रवृत्तित्वात्

प्रयोगान्तरमाह—**संयोगेति**। सम्बन्ध इत्येवोक्तौ रक्तः स्फटिकः कृष्णं वस्त्रमित्यादौ स्फटिकवस्त्रसंयुक्तजपाकुसुमकर्दमसम्बन्धरक्तिमकालिमादिसम्बन्धे बाधवारणाय साक्षादित्युक्तिः। संयोगेनार्थान्तरवारणाय संयोगभिन्न इति[1]। केचिद्विशेषणतारूपसम्बन्धेनार्थान्तरनिरासाय साक्षादित्युक्तिरित्याहुः। **न संयोगेति**। संयोगविशेषणतान्यतररूप एवेत्यर्थः। तथैवोक्तौ वक्ष्यमाणसाध्यां[2]शेऽविशेषापत्त्या नञ्द्वयेनोक्तिः। तत्र सं[3]योगभिन्नत्वाभावेन साध्यपर्यवसाने बाधात्। विशेषणताभिन्नत्वाभावेनैव साध्यपर्यवसानात्संयोगान्यसाक्षात्सम्बन्धस्य विशेषणतारूपत्वस्यैव सिद्धिरिति भावः। हेतौ प्रागुक्तपरम्परासम्बन्धेऽव्यभिचाराय साक्षादित्युक्तिः॥

साक्षादिति। प्रागुक्तपरम्परासम्बन्धे बाधनिरासाय साक्षादित्युक्तिः। **संयोगेति**। संयोगविशेषणतान्यतरत्वव्याप्यमित्यस्यार्थनिर्देशः संयोगविशेषणताभ्यामन्यज्जगत् तदन्यत्वं संयोगविशेषणतयोरेव तद्व्याप्यत्वमिति। तथा च संयोगविशेषणतारूपौ द्वावेव साक्षात्सम्बन्धौ सिध्यतो न त्वतिरिक्तः कश्चित्समवाय इति भावः। हेतौ साक्षात्पदकृत्यं प्राग्वत्। प्रमेयत्वादावव्यभिचाराय मात्रेत्युक्तिः॥

---

[1] चेद्विशे—इ. [2] अंशपदं न—मु. [3] संभिन्नत्वा—इ.

संयोगत्ववत्, सम्बन्धत्वं न सम्बन्धिध्वंससमान-कालीनसम्बन्धवृत्ति न सम्बन्धि[1] द्वयप्रागभाव समानकालीनसम्बन्धवृत्ति वा सम्बन्धमात्रवृत्ति-त्वात् संयोगत्ववदित्याद्यनुमानानि प्रमाणानि ॥

समवाये बाधकम् ॥ ३० ॥[2]

यच्चोच्यते—समवायसम्बन्धेन पूर्वं गत्वादि

एवं सम्बन्धैकत्वविरोध्यनुमानान्युक्त्वा नित्यत्वविरोध्यनुमानमाह—**सम्बन्धत्वमिति** । सम्बन्धिद्वयमवयवावयव्यादि । अनादित्वविरोधिसाध्यान्तरमाह—**न सम्बन्धिद्वयप्रागभावेति** । मात्रपदकृत्यं प्राग्वत् ॥

समवाये बाधकम् ॥

समवायवादः समाप्तः ॥ ३० ॥

ननु समवायाभावे निर्विकल्पकादिभेदेन प्रत्यक्षप्रमाद्वैविध्यानुपपत्तिः । तस्य समवायरूपवैशिष्ट्या[3]वगाहित्वानवगाहित्वाभ्युपगमेनैव[4] द्वैविध्यस्य वाच्यत्वादित्यतः द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेरिति पद्धतिवाक्यं विवृण्वानो नास्त्येव निर्विकल्पकं[5] विशिष्टज्ञानं च स्वरूपसम्बन्धावगाहीति भावेनाह—**यच्चेति । समवायेति ।** वस्तुगत्या समवायसम्बन्धेन स्थिता या

[1] द्वयेति नास्ति—**च-छ-मु.** [2] समवायभङ्गः इत्यधिकम्—**क.** [3] विषयकत्वे तद्विषयकत्वाभ्यु—**अ.** [4] एवकारो नास्ति—**मु-इ.** [5] क—**अ.**

जातिविषयकं निर्विकल्पकं अनन्तरं जातिविशिष्टगकारविषयकं सविकल्पकमिति । तन्न । निर्विकल्पके मानाभावात् ॥

ननु—यद्यपि निर्विकल्पके न प्रत्यक्षं प्रमाणम्। तस्यातीन्द्रियत्वाभ्युपगमात् । नापि व्यवहारः । तस्य च सविकल्पकसाध्यत्वात् । नापीदं पूर्वं मया [1] संमुग्धेन ज्ञातमित्यनुभवः । तस्याल्पविशेषण [2] ज्ञानेनैवोपपत्तेः। नापि ज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणम् सकलज्ञानवृत्तित्वात् सत्तावत्, चक्षुः चाक्षुषसविकल्पकातिरिक्तज्ञानकरणं ज्ञानकरणत्वाद्घ्राणवदित्यनुमानम् । अप्रयोजकत्वात् ।

गत्वादिजातिः तद्विषयमित्यर्थः । [3] यद्वा श्रोत्रसन्निकर्षरूपेण समवाय सम्बन्धेन जायमानं गत्वादिजातिविषयकं वैशिष्ट्याविषयकं ज्ञान निर्विकल्पकं, तेनैव सन्निकर्षेण पश्चाज्जायमानं जातिविशिष्टज्ञानं सविकल्पकमित्यर्थः ॥

सम्भावितपक्षान्मण्युक्तखण्डनरीत्या निराकुर्वन्नेव पूर्वपक्षयति—**यद्यपीत्यादिना** । तथापीति वक्ष्यमाणेनान्वयः । व्यवहारो गौरित्याद्यभिलप[4]नरूपः । **तस्येति** । तादृशानुव्यवसायस्येत्यर्थः । सविकल्पकज्ञानत्वे अव्यभिचाराय सकलेति हेतुविशेषणम् । निष्प्रकारकघटादिवृत्तित्वे बाधात्तादृशज्ञानवृत्तित्वेनैव साध्यपर्यवसानमिति भावः[5] ।

---

[1] सांमुग्ध्ये—**च-क-ग-रा.** [2] णक—**ग-रा.** [3] यद्वेत्यादिसम्भावितेति पर्यन्तो ग्रन्थः नास्ति—**इ.** [4] लापादिः—**मु-इ.** [5] निष्प्रकारकेत्यारभ्य नास्ति—**इ.**

अतिप्रसङ्गाच्च। नापि जागराद्यं गौरिति ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् दण्डी पुरुष इति ज्ञानवदित्यनुमानम्। दृष्टान्तस्य साध्यवैकल्यात्। दण्डपुरुषयो[1] रुभयोर्युगपदिन्द्रियसन्निकर्षे असंसर्गाग्रहे च सति विनैव दण्डज्ञानं दण्डीति ज्ञानोत्पादानुभवात्॥

तथापि "एतज्जन्मनि प्राथमिकं गौरिति प्रत्यक्षं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वादनुमितिवत्" इति मण्युक्तमनुमानं मानम्। न च तत्र विशेषणज्ञानं स्मृतिरूपम्। एतज्जन्मनि तेन गोत्वस्याननुभवात्। न चाद्यस्त[2] नपाना-

---

अतिप्रसङ्गाच्चेति। ज्ञानत्वं घटत्वसमानाधिकरणमिति, तथा चक्षुः चाक्षुषनिर्विकल्पकसविकल्पकातिरिक्तं ज्ञानजनकमित्यपि त्वदुक्तप्रयोगाभ्यां साधयितुं शक्यत्वादिति भावः। **गौरिति**। ज्ञानमात्रपक्षत्वे द्वितीयादिसविकल्पके प्राथमिकसविकल्पकजन्यत्वेनार्थान्तरनिरासाय जागराद्यमित्युक्तिः। साध्ये ईश्वरज्ञान[3]जन्यत्वेनार्थान्तरवारणाय जन्येति ज्ञानविशेषणम्॥

मणिकृता सिद्धान्तितमनुमानमाह —**तथाप्येतज्जन्मनीति**। एतज्जन्मनीत्यस्य कृत्यमग्रे व्यक्तम्। द्वितीयादिज्ञाने प्राथमिकसविकल्पकजन्यत्वेनार्थान्तरनिरासाय प्राथमिकमित्युक्तिः। साध्ये जन्येति विशेषणमीश्वरज्ञानेनार्थान्तरनिरासाय। हेतौ चाव्यभिचारायेति भावः॥

मण्युक्तदिशैव परिष्करोति —— **न च तत्रेति**।

---

[1] उभयपदं न—च-क-ग-रा. [2] न्यपा—रा. [3] नाजनकत्वेनार्था—इ.

दाविवात्रा[1]दृष्टमेव जन्मान्तरीयसंस्कारोद्बोधकम्। तद्वदनन्यगतिकत्वाभावात्। अन्यथातिप्रसङ्गात्। तद्वदेव[2] सन्निकर्षेपि प्रथमं गोत्वस्मृत्यापाताच्च। गोत्वसन्निकर्षस्याप्यपेक्षायां तु सन्निकर्षाद्गोत्वानुभव एवोचितः। तस्यानुभव एव हेतुत्वस्य क्लृप्तत्वात्। स्मृतिसामग्रीतोनुभवसामग्र्याः बलवत्त्वात्। अन्यथा जन्मान्तरानुभूतानां एतज्जन्मनि इन्द्रियसन्निकृष्टानां नित्यानां वैदिकानां चार्थानां स्मृतिरेव स्यान्न त्वनुभवः। न च गोत्वरूपविशेषणानुभवः सविकल्पकः। तथात्वे तस्यापि विशेषणज्ञानजन्यत्वावश्यंभावेनानवस्थानात्॥

तस्मादर्थान्निर्विकल्पकसिद्धिः। न चाप्रयोजको हेतुः। अनुमितिशाब्दज्ञानादौ हि साध्य-

---

तद्विदिति। इह निर्विकल्पकेनाप्युपपत्त्या जन्मान्तरीयसंस्कारोद्बोधका[3]दृष्टकल्पनानुपपत्तेरिति भावः। **अतिप्रसङ्गादिति**। सविकल्पक प्रत्यक्षादेरप्येवमपलापप्रसङ्गादि[4]त्यर्थः। **तद्वदेवेति**। स्तनपानादिवदवेत्यर्थः॥

नन्वस्तु सन्निकर्षाद्गोत्वानुभवः। स च विशिष्टज्ञानरूप एव सविकल्प[5] कहेतुरास्त्वित्याशङ्क्याह—**न च गोत्वरूपेति**। पूर्वपक्षदशायां मण्युक्तमेवानुकूलतर्कमत्राह—**अनुमितीति**। आदिपदद्वयेन

---

[1] त्राप्य–**रा.** [2] वा–**च-क-ग-रा.** [3] केऽदृ–**अ.** [4] ति भावः–**मु-इ.** [5] एतादृशस्थळे–'क' कारो नास्ति–**इ.**

प्रसिद्धिपदार्थोपस्थित्यादिर्हेतुः। साध्यादीनि च विशेषणानि। एवं च यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि स इति न्यायेन साध्यप्रसिद्ध्यादेर्जन्यविशिष्टज्ञानसामान्ये जन्यविशेषणज्ञानत्वेन हेतुत्वसिद्धिरिति। [1]तन्न॥

अनुमित्यादौ साध्यप्रसिद्ध्यादेरेवाहेतुत्वेन यद्विशेषयोरि[2]तिन्यायानवकाशात्। न हि व्याप्त्यादिज्ञाने सति तद्विलम्बेनानुमित्यादिविलम्बः॥

क्रमादुपमितिवाचकज्ञानयोर्ग्रहः। **यद्विशेष(ण)योरिति**। साध्यप्रसिद्ध्यनुमित्योः पदार्थोपस्थितिशाब्दज्ञानयोः वाचकज्ञानोपमित्योरित्यर्थः॥

नन्वेवं दण्डघटयोः कार्यकारणभावे यत्सामान्ययोर्द्रव्यमात्र[3]पृथिवीमात्रयोः कार्यकारणभावः स्यादित्यत आह—**असतिबाधक इति**। तत्र व्यभिचारस्यैव बाधकत्वादिह च तदभावादिति भावः। **साध्यप्रसिद्ध्यादेरहेतुत्वेनेति**। [4]तदहेतुत्वं च द्वितीयतृतीयपरिच्छेदयोर्विवरिष्यत इति भावः॥

असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते।

इत्यनुव्याख्यानोक्तं हृदिकृत्वाह—**न हीति**। आदिपदेन शब्दज्ञानसंकेतस्मरणयोः सत्त्वे इति ग्रहः। **तद्विलम्बेन** साध्यप्रसिद्धिपदार्थस्मृतिवि-

---

[1] चेन्न—**च-मु**-द्वेरिति। मैवम्-**ग.** [2] त्यादि—**च-ग.** [3] पार्थिव—**अ.**
[4] प्रसिद्धिपदार्थोपस्थित्योरहेतुत्वं च इत्यस्ति—**अ.**

न च व्याप्त्यादिधीरेव तेन विना नेति वाच्यम्। एवं हि तस्य हेतुहेतुत्वेनान्यथासिद्धत्वान्नानुमित्यादिहेतुता ॥

अस्तु वा साध्यप्रसिद्ध्यादिरनुमित्यादिहेतुः। तथापि वह्निमानित्यादिज्ञानं प्रति वह्न्यादिज्ञानस्य न विशेषणज्ञानत्वेनैव कारणता। द्रव्यत्वादिना वह्निज्ञानेपि तदभावात्। नापि विशेषणतावच्छेदकप्रकारकविशेषणज्ञानत्वेन। तेन निर्विकल्पकासिद्धेः। गौरवाच्च। किं तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेन। तथा च न निर्विकल्पकसिद्धिः ॥

ननु—तत्र विशेषणज्ञानत्वमप्यस्ति। एवं च विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छे-

---

लम्बेनेत्यर्थः। ननु सम्बन्धिनो[1] रज्ञाने तन्निरूपितव्याप्तिशक्त्योर्धीरेव नेत्याशङ्क्य निराह—**न चेति** ॥

परप्रक्रियामुपेत्यापि निर्विकल्पकासिद्धिमाह—**अस्तु वेति**। अस्त्वेवं को दोष इत्यत आह—**तथा च न निर्विकल्पकेति**। तस्य निष्प्रकारकत्वेन यद्विशेषन्यायेनापि विशेषणतावच्छेदकप्रकारकज्ञानस्यैव सिद्धिरिति भावः ॥

एवमपि निर्विकल्पकसिद्धिरिति भावेन मण्युक्तमाशङ्कते—**ननु तत्रेति**। वह्निज्ञानादावित्यर्थः। **विशिष्टवैशिष्ट्येति**। वह्नि-

---

[1] नोज्ञा–इ.

दकप्रकारकविशेषणज्ञानत्वेन हेतु[1] ता सेत्स्यति। यद्विशेषयोरिति न्यायादिति चेत्। [2] एवं ह्यनुमितौ करणविशेषलिङ्गज्ञानस्य हेतुत्वाद्यद्विशेषयोरिति न्यायेन जन्यज्ञानमात्रे करणमात्रज्ञानं हेतुः स्यात्। तथा च प्रत्यक्षेपि चक्षुरादिविषयकमतीन्द्रियं निर्विकल्पक[3] कल्प्यं स्यात्॥

अपि चैवं प्रत्यक्षविशिष्टज्ञानं प्रति विशेष्यज्ञानस्यापि हेतुता स्यात्। संशयादौ धर्म्यादि-

---

मानित्यादिज्ञानमित्यर्थः। तत्र वह्नित्वविशिष्टवैशिष्ट्यस्य पर्वते भानाद्वौरित्यादि[4] तु विशिष्टज्ञानमात्रमित्यर्थः॥

अतिप्रसङ्गेन न्यायस्याभासत्वमाह—**एवं[5] हीति**। अनुभवबाधपरिहारायाह—**अतीन्द्रियनिर्विकल्पकमिति॥**

अतिप्रसङ्गान्तरोक्त्या यद्विशेषयोरितिन्यायस्याभासतामाह—[6]**अपि चैवमिति**। यद्विशेषयोरिति न्यायेन विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन हेतुत्व इत्यर्थः। कुत इत्यत आह—**संशयादाविति**। संशयरूपविशिष्टप्रत्यक्षविशेषं प्रति, तथा इदं रजतमित्यादिविपरीतविशिष्टप्रत्यक्षविशेषं प्रति च धर्मिज्ञानस्याधिष्ठानज्ञानस्य च हेतुत्वमस्ति। अन्यथा कोटिस्मरणस्योत्कटकोटिकसंशयादेश्चानुपपत्तेः। तथा अनुमितौ पक्षज्ञानस्य शाब्दे[7] बोधे च पदार्थज्ञानस्य च हेतुत्वमस्ति। एवं च यद्विशेषयोरिति न्यायेन धर्म्यादिज्ञानसंशयप्रत्यक्षादिरूपज्ञानयोः

---

[1] त्वे विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन हेतु इत्यधिकम्—**च-क-ग-रा.** [2] न इत्यधिकं—**ग.** [3] र्कं क—**ग-रा.** [4] दौतु—**इ.** [5] सतीति—**च-छ-क-ग-रा.** [6] एवमित्यारभ्य नास्ति—**इ.** [7] न्वयेत्याधिकम्—**अ.**

ज्ञानस्यानुमित्यादौ पक्षादिज्ञानस्य हेतुत्वेन कल्पनत्वात्। न च इष्टापत्तिः दण्डत्वविषयके निर्विकल्पके सामग्रीसत्त्वेन दण्डस्यापि स्वरूपेण भानादिति वाच्यम्। त्वदनङ्गीकृत[1]विशेष्यज्ञानत्वेन हेतुत्वस्यापादनात्॥

किं च सामान्यप्रत्यासत्तिर्नेति पक्षे व्याप्तिग्रहकाले अनुभूतो वह्निः पर्वतं प्रति न विशेषणम्। अन्यविशेषणज्ञानस्य हेतुत्वे चातिप्रसङ्गः॥

कार्यकारणभावे तत्सामान्ययोः प्रत्यक्षविशिष्टज्ञानाविशेष्यज्ञानयोरपि कार्यकारणभावापत्तिः स्यादित्यर्थः॥

इष्टापत्तिं व्यनक्ति—**दण्डत्वेति। सामग्रीति।** दण्डेन्द्रियसम्प्रयोगादिरूपेत्यर्थः। विशेषणज्ञान[2]स्येव विशेषणज्ञानत्वेन दण्डत्वविशिष्टसविकल्पके दण्डरूपविशेष्यज्ञानस्य हेतुत्वं नानिष्टमिति भावः। **विशेष्यज्ञानत्वेनेति।** विशेषणज्ञानस्य तत्त्वेन यथा हेतुत्वं तथेति भावः॥

यद्विशेषन्यायेनापि न विशेषणज्ञानत्वेन हेतुत्वं कल्पयितुं शक्यम्। येन तद्बलान्निर्विकल्पकत्वसिद्धिरिति भावेनाह—**किंचेति।** सामान्यप्रत्या[3]सत्तिरस्तीति न्यायमते[4] यो धूमवानसौ वह्निमानिति व्याप्तिग्रहदशायां पर्वतीयवह्नेरपि पर्वतविशेषणतया भानेनोक्तदोषासंभावात्। सामान्यप्रत्यासत्तिर्नेति पक्ष इत्युक्तम्॥ एतन्मतेनुमानप्रवृत्तेस्तृतीयपरिच्छेदे उपपादयिष्यमाणत्वादिति भावः॥

---

[1] स्य-क-ग-रा. [2] इव विशेष्यज्ञानत्वेन-इ. स्यैव विशेष्याज्ञानत्वेन-अ. [3] सत्त्या इत्यधिकम्-अ. [4] योयो-अ.

अपि च त्वयापि घटाभाववद्भूतलमिति ज्ञाने अभावरूपविशेषणस्य संयुक्ताविमौ समवेताविमावित्यादिज्ञाने च संयोगसमवायादिरूपस्य विशेषणस्य, अनुव्यवसाये व्यवसायगतस्य रजतत्वप्रकारकत्व[1]रूपस्य विशेषणस्य, अभावज्ञाने प्रतियोगित्वा[2]दिरूपस्य विशेषणस्य च, पूर्वमज्ञातस्यैव भानमिति स्वीकृतत्वात्तत्र व्यभिचारः ॥

भूतले अभाव इत्यभावादिविशेष्यकज्ञानानन्तरमेव भूतलमभाववदित्यभाव[3]विशेषणकज्ञानमिति कल्पने त्वन्योन्याश्रयः । एतत्कल्पनस्य-विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावसिद्ध्यधीनत्वात् ॥

एतेनानुगस्य विशेषणज्ञानस्याहेतुत्वे अनुगतं विशिष्टज्ञानरूपं कार्यमाकस्मिकं स्यात् । अन्यस्य

व्यभिचाररूपबाधकसत्त्वादसति बाधके यत्सामान्ययोरिति न्यायावतारोप्ययुक्तः । यद्बलाद्विशेषणज्ञानहेतुतासिद्ध्या निर्विकल्पकसिद्धिरिति भावेनानेकस्थलेषु व्यभिचारमाह—**अपि चेति** ॥

यत्तु मणावेतदेवाशङ्क्य प्रथमं भूतले घटो नास्तीति बुद्धिरित्यादिना समाधानमुक्तं तदनूद्य निराह —**भूतलेभाव इत्यादिना** । अन्योन्याश्रय इत्युक्तं व्यनक्ति—**एतादिति** । प्रथमं विशेष्यत्वेन ज्ञानमिति कल्पनस्येत्यर्थः । विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावे सिद्धे हि व्यभिचारस्य गत्यन्तरकल्पनं सिद्धे च तस्य गत्य-

---

[1] रूपपदं न–**क-ग.** [2] भावत्वा–**क-ग-रा.** [3] वादि–**च-ग.**

तदनुगतस्य हेतोरभावादिति निरस्तम् । व्यभिचारस्योक्तत्वात् । उभयसम्मतादिच्छादिव्यावृत्तादात्ममनोयोगादिरूपज्ञानसामान्यहेतुत एव विशिष्टज्ञानसंभवाच्च ॥

यदि ह्यननुमित्यनुमितिरूपज्ञानद्वयवन्निर्विकल्पकसविकल्पकरूपज्ञानद्वयं प्रामाणिकं स्यात् । तदा ज्ञानसामान्यसामग्रीत एव विशिष्टज्ञानोत्पत्तौ सर्वमपि ज्ञानं सविकल्पकं स्यादिति भयेन विशेषसामग्री कल्प्येत । न च तदस्ति । निर्विकल्पकस्याद्याप्यसिद्धया सर्वस्यापि ज्ञानस्य सविकल्पकत्वात् । इदमित्थमिति हि सर्वापि

न्तरे तयोः कार्यकारणभावसिद्धिरिति भावः । **व्यभिचारस्योक्तत्वादिति** । तथा चानुगतकारणाभावाद्विशिष्टज्ञानत्वं कार्यतावच्छेदकमेव नेति भावः ॥

तस्य कार्यतावच्छेदकत्वमुपेत्याप्यन्यदेवानुगतकारणमाह—**उभयेति** ॥

ननु कथमेतत् निर्विकल्पकसाधारणकारणस्य विशिष्टज्ञानहेतुत्वम् । अन्यथा तदपि विशिष्टज्ञानमापद्येतेत्यत आह । **यदि हीति । विशेषेति** । विशेषणज्ञानरूपविशेषसामग्रीत्यर्थः । **इति हीति** । हिशब्देन सर्वानुभवसिद्धत्वं सूचयति ॥

ननु निर्विकल्पकस्यातीन्द्रियत्वादेव नानुभव इत्यत आह—

धीः। अन्यथा निष्प्रकारकधीवन्निर्विषयापि धीः स्यात्। इच्छापि काचिन्निष्प्रकारिकातीन्द्रिया च स्यात्। एवं द्वेषोपि॥

एतेनैव व्यभिचारेण रूप्यादिस्मृतेर्भ्रमे विशेषणज्ञानत्वेन कारणत्वं क्लृप्तमतोन्यत्रापि विशिष्टज्ञाने तत्करणमिति निरस्तम्। आवश्यक विशेषणसन्निकर्षत्वेनैव तस्य तत्र हेतुत्वात्। भ्रमं प्रति विशेष्यज्ञानस्यापिहेतुतायाः क्लृप्तत्वेन अन्यत्रापि विशिष्टज्ञाने तस्यापि हेतुत्वापत्तेश्च॥

ननु—विशेषणज्ञानस्याजनकत्वे कथं विशेषणस्यैव प्रकारत्वमिति नियमः। सन्निकर्षस्य विशेष्येपि स[1]त्त्वादिति चेत्। निर्विकल्पकाङ्गीकारेपि

अन्यथेति। एवं द्वेषोपीति। निष्प्रकारको अतीन्द्रियश्च स्यादित्यर्थः। एतेनैवेति। व्यभिचारविशिष्टज्ञानान्यथासिद्धयतिप्रसङ्गानां कथनेनैवेत्यर्थः। रूप्यादिस्मृतेर्व्यभिचारेणेत्यन्वयः। गृह्यमाणारोपस्थले स्मृतेरभावान्न स्मृतित्वेनारोप्यभूतरूप्यादिज्ञानस्य हेतुता। किं तु विशेषणज्ञानत्वेनेत्यर्थः। कथं तर्हि हेतुतेत्यत आह—आवश्यकेति। हेतुत्वापत्तेश्चेति। इष्टापत्तिस्तु प्रागेव निरस्तेति भावः॥

यदपि गोत्वादेः प्रकारत्वनियमान्यथानुपपत्त्या विशेषणज्ञानहेतुत्व[2] सिद्धिः। विशिष्टधीहेतुताविषयत्वस्यैव प्रकारत्वादिति तदप्याशङ्क्य निराह-नन्विति। सन्निकर्षो नियामक इत्यत आह-सन्निकर्षस्येति।

---

[1] मत्वा—च-छ. [2] सिद्धिविशिष्टहेतुधीविषयत्वस्यैव इत्यास्ति-इ.

कथम् । त्वन्मते विशष्येपीन्द्रियसंप्रयोगादिनिर्विकल्पकसामग्र्याः सत्त्वेन निर्विकल्पकस्य विशेष्येपि सत्त्वात् । कथं चाभावादिज्ञाने अभावत्वादेः प्रकारत्वम् ॥

किं च फलीभूतज्ञाने यद्विशेषणत्वेन भासते तद्विषयकज्ञानेन जन्यं यज्ज्ञानं[1]तत्तत्प्रकारकमिति वा नियमः, यज्ज्ञानजन्यं यज्ज्ञानं [2]तत्तत्प्रकारकमिति वा । नाद्यः । आत्माश्रयात् । नान्त्यः । अनुमित्यादौ व्याप्तयादेः प्रकारत्वापातात् । तस्मात्त्वयापि प्रकारत्वनियमो भोजकादृष्टादिभिरेव वाच्यः।

कथमिति । विशेषणस्यैव प्रकारत्वनियम इत्यनुषङ्गः । कुत इत्यत आह—**त्वन्मत इति** । अभावादिज्ञान इत्यादिपदेन प्राग्व्यभिचारस्थलोक्तसंयोगसमवायादिग्रहः । त्वदुक्तरीत्या भूतले घटाभाव इत्यभावविशेष्यकज्ञानस्य प्राथमिकत्वेप्यभावत्वस्य तत्राज्ञातत्वस्यैव प्रकारत्वात् । भावस्थल एवायं नियम इत्युक्तावपीमौ संयुक्तौ इत्यादावभावादिति भावः ॥

ननु तर्हि गोत्वादेरिव प्रकारत्वनियमे किं बीजमित्यतस्तत्परमुखेनैव वाचयितुं परोक्तं विशिष्टधीहेतुधीविषयत्वरूपं प्रकारत्वं विकल्प्य निराह—**किंचेति** । **फलभूतज्ञाने** विशिष्टज्ञान इत्यर्थः । **विशेषणत्वेन** प्रकारत्वेनेत्यर्थः । **आत्माश्रयादिति** । विशेषणत्वेनेत्यस्य प्रकारत्वेनेत्यर्थतया प्रकारत्वज्ञाने प्रकारत्वज्ञानस्यापेक्षितत्वादिति भावः । **तस्मादिति** । जनकज्ञानविषयत्वस्य प्रकारत्वरूपत्वासंभवादि-

[1] तत् इति नास्ति—**च-छ.** [2] तादिति नास्ति—**च-छ.**

उक्तेन[1] व्यभिचारेणैव विशिष्टज्ञानं सम्बन्ध-विषयकं सम्बन्धज्ञाने च सम्बन्धिज्ञानं हेतुः सम्बन्धि च विशेषणमिति निरस्तम् । सम्बन्धिनोर्युगपदिन्द्रियसन्निकर्षे तयोरसंसर्गाग्रहे च ताभ्यां सहैवेन्द्रियसन्निकृष्टसम्बन्धस्यापि धीरित्युक्तत्वाच्च ॥

इयांस्तु भेदः ; सम्बन्धः सम्बन्धिनौ विना न भाति तौ तु तेन विनापि भात इति ॥

किंच विशेष्यस्यापि सम्बन्धित्वेन तज्ज्ञानस्यापि हेतुता स्यात् । न च विशेष्यस्य सम्बन्धित्वेपि न[2] प्रतियोगित्वं किं तु विशेषणस्यैवेति

त्यर्थः । **उक्तेनैवेति** । अपि च त्वयापि इत्यादिग्रन्थेनोक्तेनेत्यर्थः । अभाववद्भूतलमित्यादौ सम्बन्धिनोऽभावादेरज्ञानेपि विशिष्टज्ञानोदयेन न तस्य हेतुत्वमिति भावः ॥

दोषान्तरं चाह—**सम्बन्धिनोरिति** । **उक्तत्वाच्चेति** । त्वन्मते विशेष्येपीत्यादिना ग्रन्थेनोक्तप्रायत्वादित्यर्थः । [3] यद्वा दण्डपुरषयोर्युगपदिन्द्रियसान्निकर्षेत्यादिना ग्रन्थेनोक्त[4]त्वादित्यर्थः । नन्वेवं सम्बन्धिवत्सम्बन्धस्यापिनिरपेक्षधीः स्यादित्यत आह—**इयांस्त्विति** । अयं भेदो वस्तुस्वभावकृत इति भावः ॥

विशेषणस्य प्रतियोगित्वात्तन्निमित्तं विशेषणज्ञानस्य विशिष्टज्ञान-

---

[1] नैव. [2] तदित्यधिकम्–**च-मु.** [3] यद्वेत्यादि नास्ति–**इ.** [4] प्राय–**मु.**

तज्ज्ञानमेव हेतुरिति वाच्यम्। अभावादिबुद्धाविव प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव हेतुताया वक्तव्यत्वेन निर्विकल्पकासिद्धेः ॥

किंचास्तु विशेषणज्ञानं[1] तथापि न निर्विकल्पकसिद्धिः। तथा हि। न तावज्जन्यविशिष्टज्ञानत्वं जन्यविशेषणज्ञान[2] जन्यतावच्छेदकम्। स्मृतावतिप्रसक्तेः। न च तत्रापि पूर्वानुभवो विशेषणज्ञानतया संस्कारद्वारा हेतुरिति वाच्यम्। विशेषणज्ञानत्वेन जनकतायां संस्कारस्य द्वारत्वायोगात्। यज्जातीयस्य यं[3] जनयित्त्वेव यज्जातीयजनकत्वं स एव हि तत्र[4] व्यापारः। अन्यथा

हेतुत्वं चेत्तदा दोषमाह—**अभावादिबुद्धाविवेति**। इमौ संयुक्तावित्यादिबुद्धिरादिपदार्थः। व्यवहितेऽनुभवनाशादाह—**संस्कारद्वारा हेतुरिति**। **यज्जातीयस्येति**। चक्षुरादीन्द्रियजातीयस्य सन्निकर्षं जनयित्त्वैव चाक्षुषादिसाक्षात्कारजातीयजनकत्वं दृष्टमिति सन्निकर्ष एवेन्द्रियस्य व्यापारः। तथा दण्डजातीयस्य चक्रभ्रमं जनयित्त्वैव घटजातीयजनकत्वमिति भ्रमिः दण्डस्य व्यापारो दृष्ट इत्यर्थः। कदापि फलोपधानरहितवनस्थदण्डादेर्व्यापारवत्त्वाय यज्जातीयस्येत्युक्तिः। **अन्यथेति**। सापेक्षत्वमात्रेण व्यापारत्व इत्यर्थः ॥

नन्वस्त्वेवं व्यापारत्वं तादृशमपि संस्कारस्यास्त्वित्यत आह-

---

[1] कारणपदं अधिकम्—**च-क-ग-रा.** [2] कार्यताव—**मु.** [3] यज्ज—**च.** [4] तस्य इत्यधिकम्—**च-क-ग-रा.**

दण्डादिरपि कुलालव्यापारः स्यात् । न चात्र तत्संभवति । विशेषणज्ञानस्य संस्कारमजनयित्वापि विशिष्टज्ञानजनकत्वात् । तथा च जन्यानुभवत्वमेव जन्यविशेषणज्ञानजन्यताच्छेदकमस्तु । लाघवात् । वैशिष्ट्यप्रवेशे एव गौरवात् ॥

तथा च निर्विकल्पकाभिमतमपि विशेषणज्ञानजन्यम् । अत एव विशिष्टज्ञानं वास्तु । न चैव मनवस्था । क्वचिद्विशिष्टज्ञानस्य स्मरणरूपतया तत्र विशेषणज्ञानानपेक्षणात् । जन्यविशिष्टानुभवं प्रत्येव हि जन्यविशेषणज्ञानं हेतुः । न तु स्मृतिं प्रत्यपीत्युक्तम् ॥

केचित्तु—

न चात्रेति । ननु विशिष्टज्ञानत्वस्योक्तविधया कार्यतानवच्छेदकत्वेपि निर्विकल्पकासिद्धिः कुत इत्यत आह—**तथाचेति** । जन्यविशिष्टज्ञानत्वस्यानवच्छेदकत्वे सतीत्यर्थः । **तत्रेति** । स्मरण इत्यर्थः । अननुभूतगोव्यक्तेः प्रथमतो गोत्वविशिष्टज्ञानमपि प्राग्भवीयसंस्कारजन्यस्मरणमस्तु । स्तनपानादाविवेति भावः ॥

ननु स्मरणस्य विशेषणज्ञान[1] जन्यत्वादनवस्थेत्यत आह—**जन्येति** । **उक्तमिति** । स्मृतावतिप्रसक्तेरित्या[2] दिपूर्वग्रन्थे उक्तमित्यर्थः ।

स्मृतिव्यावृत्तमेव कार्यतावच्छेदकं स्वयमुपपाद्य स्मृतिसाधारणमेव कार्यतावच्छेदकमस्त्विति मतान्तरमाह—**केचि[3]दिति** । इत्याहु-

---

[1] जन्यपदं न—इ. [2] आदिपदं न—मु-इ [3] त्विति—इ.

अस्तु वा स्मृतिसाधारणं जन्यज्ञानत्वमेव कार्यतावच्छेदकम् । तथापि वैशिष्ट्य[1] प्रवेशे गौरवमेव । न चैवमनवस्था । बीजाङ्कुरवत् प्रामाणिकत्वेन वस्त्वनवस्थाया अदोषत्वात् । प्रथमप्रवृत्तेन प्रमाणेन लाघवसहकारिणा जन्यज्ञानपरम्परायामेव विशेषणज्ञानस्य कारणत्वावधारणात् । अन्यथा सामग्री[2] सामग्रयन्तरसापेक्षेत्यनवस्थापि दोषः स्यात् ॥

न च जन्यस्य सर्वस्यापि ज्ञानस्य विशेषणज्ञानजन्यत्वे पूर्वपूर्वज्ञानधारायां अविच्छेदे प्रायणाद्यनुपपत्त्या ज्ञानानवस्थादोषः । एतज्जन्मनि प्राथमिकानुभवे स्मरणं हेतुः । तत्र च संस्कारद्वारा जन्मान्तरीयानुभवः । तत्रापि[3] पूर्वजन्मान्तरीयानुभव इति स्वीकारे[4]णाविरललग्नज्ञानधारायां अभावेन प्रायणाद्युपपत्तेः ॥

न च पुरुष[5]प्रयोज्यशब्दवृत्तिंजातिविशिष्टप्रत्यक्षे विशेषणज्ञानं न स्मृतिरूपं, तस्या जातेः

रित्यन्वयः । नचैवमिति । स्मरणस्यापि जन्यविशेषणज्ञानजन्यत्व इत्यर्थः । प्रामाणिकत्वं व्यनक्ति—प्रथमेति । लाघवेति । वैशिष्ट्यप्रवेशापेक्षया जन्यज्ञानत्वस्य लाघवादिति भावः । सामग्रयन्तरेति । स्वजनकसामग्र्यन्तरेत्यर्थः । प्रायणादीति । मरणमूर्च्छादिरित्यर्थः ।

---

[1] ष्टधाप्र–क-ख-छ. [2] प्रणः–ख. [3] तादित्याधिकम्–ग-मु. [4] रेऽवि–मु. [5] विशेषेत्याधिकम्–क-ग-रा.

पूर्वमननुभवादिति वाच्यम्। शब्दस्य शब्दत्वादिना स्मरणानन्तरं शब्दविशेषणकजातिविशेष्यकज्ञाने जाते पश्चाज्जातिविशेषणकशब्दविशेष्यकज्ञानसम्भवात्। त्वत्पक्षे अभावविशेष्यकज्ञानानन्तरं [1]तद्विशेषणकज्ञानवत्॥

एवं प्रत्यग्रोत्पन्नरूपादिविशिष्टप्रत्यक्षेपि द्रष्टव्यम्। अन्यथा त्वत्पक्षेपि निर्विकल्पकस्यादृष्टद्वारा जन्यज्ञानजन्यत्वादनवस्था स्यादित्याहुः॥

निर्विकल्पके प्रमाणभङ्गः॥ ३१॥

किञ्चातीन्द्रिय[2]ज्ञानोपगमे योग्यानुपलब्धेरभावेन ज्ञानाभावस्य निश्चेतुमशक्यतया अनुपलब्धिलिङ्गजन्या घटाद्यभावधीर्न स्यात्॥

अदृष्टद्वारा जन्यज्ञानेति। हविरादिगोचरजन्यज्ञानेत्यर्थः॥

[3]आहुरित्यरुचिबीजं तु स्मृतावतिप्रसक्तेरित्यादिना पूर्वोक्तमेव ज्ञेयम्॥

निर्विकल्पके प्रमाणभङ्गः॥ ३१॥

निर्विकल्पके साधकाभावमात्रं न बाधकं चास्तीत्याह—**किञ्चेति**। **योग्येति**। यद्यत्र मयि ज्ञानं स्यादुपलभ्येतेति प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगित्वरूपमण्युक्तयोग्यानुपलब्धेरित्यर्थः। **लिङ्गजन्येति**। यद्यपि

---

[1] 'शब्दविशेष्यकज्ञानान्तरं' इत्यधिकम्—क. [2] प्रमाणे—छ. [3] प्राहु—इ.

न च सविकल्पकाभाव एव निर्विकल्पकाभावे लिङ्गम् । निर्विकल्पके सति सविकल्पकावश्यंभावाभावेन निर्विकल्पकं प्रति सविकल्पकस्याव्यापकत्वात् ॥

अपि च निर्विकल्पकजन्यसविकल्पकोत्पत्तिदशाया[1] मती[2]न्द्रियनिर्विकल्पकसामग्रीसत्त्वेन सत्प्रतिपक्षवत्सामग्रीद्वयस्य परस्परप्रतिबन्धादेकमपि ज्ञानं नोत्पद्येत ॥

घटाद्यभावो योग्यानुपलब्धिसहकृतप्रत्यक्षवेद्यस्तथापि क्वचिदन्धकाराद्यावृतस्थले परामर्शेन गृह्यमाणो घटाद्यभावोत्र घटो नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वादिति लिङ्गगम्य इत्यभ्युपगमात् । ज्ञानाभावज्ञानस्यावश्यकत्वद्योतनाय लिङ्गजन्या घटाद्यभावधीरित्युक्तम् ॥

न च सविकल्पकाभाव एव घटाद्यभावबुद्धौ लिङ्गमस्तु सविकल्पकस्य योग्यतया तदभावज्ञानसंभवादिति वाच्यम् । उपलब्धिसामान्याभावस्यैवार्थाभावे लिङ्गत्वादन्यथातिप्रसङ्गादिति भावः ॥

ननु निर्विकल्पकस्यातीन्द्रियत्वेन तदभावस्याप्रत्यक्षत्वेपि तज्ज्ञानमनुमितिरूपमस्तु । सविकल्पकस्य निर्विकल्पव्यापकतया सविकल्पकाभावस्यैव तत्र लिङ्गत्वात्तस्य च प्रत्यक्षत्वादित्याशङ्क्य निराह--**न चेति । सविकल्पकावश्यंभावाभावेनेति** । निर्विकल्पकमात्रं सविकल्पकं प्रत्यक्षसामग्रीत्वात्कारणान्तराभावादिना तदभावसंभवादिति भावः॥

बाधकान्तरमाह—**अपि चेति । सविकल्पकदशायां निर्वि**

---

[1] इतः 'न च पूर्व' इत्यन्तं नास्ति. अत्र 'मपि इन्द्रिय सन्निकर्षरूप' इत्यस्ति—छ-ग. [2] मपीन्द्रियसन्निकर्षरूपनिर्वि—क-मु-रा

न च पूर्वनिर्विकल्पकमेवोत्तरनिर्विकल्पक-प्रतिबन्धकम् । धारावाहिकसाक्षात्कारदर्शनेन त्वत्पक्षेपि प्रत्यक्षस्थले सिद्धेः सिद्ध्यन्तराप्रति-बन्धकत्वात् ॥

न च समूहालम्बन[1]वत्, सामग्रीद्वया[2] दार्थ-समाजादेकं ज्ञानमस्त्विति वाच्यम्। तद्वदिह फला-विरोधाभावात् । न हि संभवत्येकमेव ज्ञानमेक-स्मिन्नेव घटे घटत्वप्रकारकं तद[3]प्रकारकं चेति ॥

अपि च दण्डपुरु[4]षोभयसन्निकर्षे सति दण्ड-दण्डत्वोभयनिर्विकल्पकानन्तरं दण्डे दण्डत्व-वैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्ट[5] पुरुषधीः

कल्पकसामग्र्येव नास्ति निर्विकल्पकाभावसहकृतेन्द्रियसंयोगादेरेव निर्विकल्पकसामग्रीत्वादेवं च नोक्तदोष इति भावेनाशङ्क्य निराह—**न च पूर्वेति** । सामग्रीद्वयसत्त्वेप्यविरोधमाशङ्क्य निराह—**न च समूहेति** । तत्तदिन्द्रियसन्निकर्षरूपानेकसामग्रीसत्त्वेपि अनेकगोचरमेकं ज्ञानं जायते न तु प्रतिबन्ध एवमस्त्वित्यर्थः । विरोधं व्यनक्ति—**न हीति** ॥

ननु स्मृतिसामग्रीतोनुभवसामग्र्या इवानुमितिसामग्रीतः प्रत्यक्ष-सामग्र्या इव च निर्विकल्पकसामग्रीतः सविकल्पकसामग्र्या बलव-त्त्वात् सविकल्पकस्यैवोत्पत्तिरित्यस्त्वित्यतो दोषान्तरमाह—**अपि-चेति** । **मुण्डितदण्डेति** । दण्डत्वानुल्लेखिदण्डविशिष्टपुरुषधीरित्यर्थः ।

---

[1] द्वय इत्याधिकम्–**क.** [2] दर्थ–**च-छ.** [3] दाकारकं चेति–**च-छ.** [4] षयोरिन्द्रियसन्नि–**च-ग-मु.** [5] पुरुषपदं न–**च-ग-मु.**

स्यात् । सामग्र्याः सत्त्वात् । न चेष्टापत्तिः । तादृशज्ञानाननुभवात् ॥

न हि दण्डपुरुषसन्निकर्षानन्तरं दण्डे दण्डत्व-वैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्टपुरुषज्ञानमनुभूयते । न चेदमपि ज्ञानमतीन्द्रियम् । सविकल्पकत्वात् । मम तु इन्द्रियसन्निकर्षादादावेव विशिष्टवैशिष्ट्यज्ञानोत्पत्तेर्नायं प्रसङ्गः ॥

किञ्च दण्डपुरुषसन्निकर्षे[1] तदुभयस्वरूपमात्रविषयकनिर्विकल्पकवत् सम्बन्धस्यापि सन्निकर्षे[2] तत्स्वरूपमात्रविषयकं निर्विकल्पकमपि कस्मान्न स्यात् ॥

सामग्र्या इति । विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयाससंर्गाग्रहरूपविशिष्टज्ञानसामग्र्या इत्यर्थः ॥

ननु मुण्डितदण्डज्ञानसामग्रीसम्पत्तिवद्दण्डे दण्डत्व[3]वैशिष्ट्यज्ञानसामग्र्यामपि सत्त्वात् । मुण्डितदण्डविशिष्टज्ञानोत्पत्तिवेळायां दण्डत्ववैशिष्ट्यमपि दण्डे भात्येवेतित्वन्मत[4]वन्नयायमते [5]विशिष्टवैशिष्ट्यधीरस्त्वित्यत आह—**किञ्च दण्डपुरुषेति । सन्निकर्षेणेति ।** संयुक्तविशेषणतादिरूपेणेत्यर्थः ॥

ननु सम्बन्धभाने सन्निकर्षमात्रं न हेतुः । किं तु सम्बन्धिज्ञानमपीति चेत् न । सम्बन्धत्वेन सम्बन्धज्ञानस्य तथात्वेपि सम्बन्धस्वरूपज्ञाने तदनपेक्षणात् । अन्यथा सम्बन्धितावच्छेदक-

---

[1] र्षेण ग-मु. [2] र्षेण-ग-मु. [3] विशिष्टज्ञानसामग्र्या-इ. [4] तं न्या-इ. [5] पि-इ.

अपि चास्य निर्विकल्पकजातीयस्य ज्ञानकार्यं व्यवहारं संस्कारं इच्छादिकं च कदाप्यजनयतो न ज्ञानत्वं युक्तम्। नतरां चास्य स्वविषये कदापि संशयाद्यविरोधिनो निश्चयत्वम्। नतमां चास्य स्वविषयसिद्धिमकुर्वतः प्रमात्वम्। न च निर्विकल्पकेन कस्यचिदपि वस्तुनः कदापि सिद्धिर्दृष्टा। न च [1] प्रमाभ्रमविजातीयं ज्ञानमस्ति॥

अपि चैवं निर्विकल्पकज्ञानं प्रत्यक्षविशेषवत्

सम्बन्धिज्ञानेनैव सम्बन्धज्ञानदर्शनात्। विशिष्टज्ञानेपि सम्बन्धस्याभानापातात्॥

अभ्युपेत्य वा दोषान्तरमाह—**अपि चास्येति**। क्वचित्कार्याजननेपि निर्विकल्पकान्तरे ज्ञानकार्यबलात् निर्विकल्पकमात्रे ज्ञानत्वादिकमविरुद्धमित्यतोऽस्येत्यस्य विवरणं **निर्विकल्पकजातीयस्येति**। नतरांनतमां इति चाव्ययमतिशयार्थकम्॥

सिद्धिमकुर्वत इत्येतद्व्यनक्ति—**न चेति**। नन्वीश्वरज्ञानमिव निर्विकल्पकमपि प्रमाभ्रमविजातीयज्ञानमनित्य [2] मित्यत आह—**न चेति**। तथात्वे घटादिरपि कुतो न ज्ञानं स्यादिति भावः॥

यदपि "प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चे"ति मण्यादौ प्रत्यक्ष [3] त्वकथनं तदप्ययुक्तमित्याह—**अपि चैवमिति**। साक्षात्कारकार्यमकुर्वतोपि प्रत्यक्षज्ञानविशेषत्वेनुमितिकार्यमकुर्वतोप्यनुमितिविशेषत्वं स्यादित्यर्थः॥

---

[1] भ्र—च-ग. [2] मस्त्वित्य—मु. अनित्यपदमपि नास्ति. [3] द्वैविध्य—इ.

अनुमितिविशेषोपि स्यात्। निर्विकल्पकाभावे तु ज्ञानत्वाश्रयो न सविकल्पकत्वावच्छिन्नभिन्नः ज्ञानत्वात् दण्डीति ज्ञानवत्, सविकल्पकत्वं [1]ज्ञाननिष्ठात्यन्ताभावा[2]प्रतियोगी सविकल्पकवृत्तित्वात् ज्ञानत्ववत्, [3]ज्ञानं न सविकल्पकत्वासमानाधिकरणधर्मवत् ज्ञानत्वात् अनुमितिवत्, अपरोक्षत्वं विशिष्टज्ञानत्वव्याप्यं ज्ञानविभाजकधर्मत्वात् परोक्षत्ववदित्यादिद्रष्टव्यम्॥

एतदेवाभिप्रेत्योक्तं पद्धतौ "द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन [4]निर्विकल्पका[5]नुपपत्तेः" इति। यद्विशेषयेोरित्यादिन्याय-

---

प्रमाणविरुद्धं च निर्विकल्पकमिति भावेनाह—**निर्विकल्पकाभावे त्विति**। इत्यादिद्रष्टव्यमित्युत्तरेणान्वयः। एतेन निर्विकल्पकाभावे मानाभावादेव निर्विकल्पसिद्धिरिति निरस्तम्। सविकल्पकस्यापि सविकल्पकान्तरभिन्नत्वाद्बाधनिरासाय सविकल्पकत्वावच्छिन्नभिन्नेति साध्योक्तिः। यत्किंचित्सविकल्पकत्वे [6]व्यभिचारनिरासाय सकलेति सविकल्पकविशेषणम्॥

उक्तप्रमेयस्य बाधकाभावेनेत्येतदारूढतां व्यनक्ति—**यद्विशेषे-**

---

[1] न इत्यधिकम्-मु रा. [2] व-मु-रा. [3] 'ज्ञानत्वाश्रयो' इत्यारभ्य नास्ति-छ-ग. [4] 'न' इत्यधिकम्-च-ग-मु [5] कोप-च-मु. [6] अव्यभिचाराय-मु-इ.

रूपस्या[1]नुगतकारणं विनानुगतकार्यानुत्पत्ति-रूपस्य विशेषणस्य पूर्वमभाने विशिष्टज्ञाने प्रकारत्वानुपपत्तिरूपस्य सम्बन्धिज्ञानं विना सम्बन्धज्ञानानुपपत्त्यादिरूपस्य च विपक्षे बाधकस्योक्तरीत्याऽभावेनेत्यर्थः ॥

उपलक्षणं चैतत् । प्रत्युत निर्विकल्पकाङ्गीकार एवानुपलब्धिलिङ्गकघटाभावज्ञानानुपपत्तिरूपस्य, निर्विकल्पकसविकल्पकसामग्र्योः परस्परं प्रतिबन्धकत्वप्रसङ्गरूपस्य, मुण्डितदण्डाविशिष्टपुरुषज्ञानप्रसङ्गरूपस्य, सम्बन्ध्यंशेपि निर्विकल्पकप्रसङ्गादिरूपस्य, बाधकस्य च सद्भावेनेत्यपि[2] ग्राह्यम् ॥

तस्मात्सर्वमपि ज्ञानं सविकल्पकमेव ।
तदेवं वर्णस्य गुणत्वे उक्तरीत्या ग्रहणासम्भवात्

त्यादिना । उपलक्षणं चैतदिति । बाधकाभावेनेत्येतद्बाधकभावेनेत्यस्याप्युपलक्षणमित्यर्थः । तदेवं व्यनक्ति—प्रत्युतेति । भङ्गद्वयार्थमुपसंहरति—तस्मादिति ॥

प्रसक्तानुप्रसक्तप्रमेयोपपादनस्यादिवर्जितैरित्युक्तविशेषणसमर्थनंफलमिति दर्शयन् परिच्छेदार्थमुपसंहरति—तदेवमिति । उक्तेति ।

---

[1] अनुगतेत्यारभ्य 'संबन्धि' इति पर्यन्तो ग्रन्थः नास्ति-ग. [2] द्रष्टव्यम्-च-मु.-

[1] नित्यविभुद्रव्यात्मकवर्णसमुदायात्मकस्य वेदस्यापौरुषेयत्वं युक्तमिति ॥

निर्विकल्पके[2] बाधकम् ॥ ३२ ॥

इति श्रीमद्ब्रह्मण्यतीर्थ पूज्यपादानां शिष्येण
व्यासयतिना विरचिते तर्कताण्डवे
प्रथमः परिच्छेदः.

समवायरूपप्रत्यासत्तिर्नेत्युक्तरीत्येत्यर्थः । [3] युक्तमिति । तथाचाम्नायैरादिवर्जितैरित्युक्तं साध्विति भावः ॥

निर्विकल्पकवादः ॥ ३२ ॥

इति श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यराघवेन्द्रयतिकृते
तर्कताण्डवविवरणे न्यायदीपे
प्रथमः परिच्छेदः.

श्रीकृष्णार्पणमस्तु.

---

[1] विभुद्रव्यरूप इत्यधिकम्-रा. [2] प्रमाणभङ्गः-च; कल्प-क; निर्विकल्पकभङ्ग इत्यप्यस्ति-क. [3] उक्त-इ.